ब्रह्मसूत्रश्रीकण्ठभाष्यम्

श्रीमदप्पय्य दीक्षितकृतशिवार्कमणि-
दीपिकासहितम्
(चतुःसूत्री भागः)

सम्पादकः
व्रजवल्लभद्विवेदः

संस्थान जङ्गमवाडी मठः
वाराणसी

शिवधर्मग्रन्थमालायाः २८ तमं पुष्पम्

ब्रह्मसूत्रभाष्यम्

श्रीमच्छ्रीकण्ठाचार्यप्रणीतम्

श्रीमदप्पय्यदीक्षितकृतशिवार्कमणिदीपिकासहितम्

[चतुःसूत्रीभागः]

सम्पादकः

व्रजवल्लभद्विवेदः

शास्त्रचूडामणिविद्वान्

सम्पूर्णानन्दसंस्कृतविश्वविद्यालये

सांख्ययोगतन्त्रागमविभागाध्यक्षचर आचार्यश्च

प्रकाशकः

प्रबन्धकः, जङ्गमवाडीमठस्य

वाराणसी

वि० सं० २०४३]　　१९८६ ई०　　[श० सं० १९०८

प्रकाशकः—
प्रबन्धकः, डी० ३५/७७ जंगमवाडीमठस्य
वाराणसी ।

☐

प्रथमं संस्करणम्
१००० प्रतयः

मूल्यम् : ४०.०० ग्रन्थालयसंस्करणम्
३०.०० छात्रसंस्करणम्

☐

मुद्रकः—
रत्ना प्रिंटिंग वर्क्स
कमच्छा, वाराणसी ।

प्रकाशकः—
प्रबन्धकः, डी० ३५/७७ जंगमवाडीमठस्य
वाराणसी ।

□

प्रथमं संस्करणम्
१००० प्रतयः

मूल्यम् : ४०.०० ग्रन्थालयसंस्करणम्
३०.०० छात्रसंस्करणम्

□

मुद्रकः—
रत्ना प्रिंटिंग वर्क्स
कमच्छा, वाराणसी ।

श्रीमत्काशीज्ञानसिंहासनाधीश्वराणां श्री १००८ जगद्गुरु-

विश्वेश्वरशिवाचार्यमहास्वामिनां

शुभाशंसनम्

"नहि ज्ञानेन सदृशं पवित्रमिह विद्यते" इति स्मृत्या ज्ञानस्य माहात्म्यं प्रतिपादितम्। तच्च ज्ञानं लौकिकमलौकिकं चेति द्विविधम्। लौकिकेन ज्ञानेन जीवनस्य निर्वाहो जायते, न तु निःश्रेयसः प्राप्तिः।

"विद्ययाऽमृतमश्नुते" इत्यत्रोक्तामृतत्वहेतूभूता विद्या त्वलौकिकं ज्ञानमिति मन्तव्यम्।

अमृतत्वहेतुभूतज्ञानोपदेशेन सांसारिकजीवात्मनां सन्तापनिवारणद्वारा तेषां चिरशान्तिप्रदानार्थं काशीविश्वेश्वरशिवलिङ्गसमुद्भूतै र्विश्वाराध्यभगवत्पादैः कलियुगारम्भ एव ज्ञानपीठमेकमत्र संस्थापितम्। एतत्पीठपरम्परागताचार्यैस्तदारभ्यैतत्कालपर्यन्तं देशविदेशेषु ज्ञानप्रसारणकार्यं कृतम्। तदारभ्य पीठोऽयं काशीविश्वाराध्यज्ञानपीठनाम्ना प्रख्यातोऽस्ति।

> जानन्त्यतिशयाद् ये तु शिवं विश्वप्रकाशकम्।
> स्वस्वरूपतया ते तु जङ्गमा इति कीर्तिताः॥

इति सिद्धान्तशिखामणेर्वचनानुसारं तादृशशिवज्ञानसम्पन्नानां महात्मनां जङ्गमशब्देन व्यवहारः क्रियते। एतादृशानां बहूनां ज्ञानिनां निवासस्थानभूतत्वादयं पीठो 'जङ्गमवाडी मठ' इति नाम्नापि प्रसिद्धोऽस्ति।

अप्पय्यदीक्षितकृतशिवार्कमणिदीपिकासंहिता ब्रह्मसूत्रस्य श्रीकण्ठभाष्यान्विता चतुःसूत्री सम्प्रति मठस्यास्य शिवधर्मग्रन्थमालातोऽष्टाविंशतितमपुष्परूपेण समुन्मील्यते।

ग्रन्थस्यास्य सम्पादने सम्भावितक्लेशान् मुदा हृदा स्वीकृत्य उपादेयचित्ताकर्षकसामग्र्या संवर्ध्य कतिपयस्थलेषु मूलग्रन्थस्याशयविस्फोरणाय स्वकीयटिप्पणीं च विलिख्य यदनुपमलोकसेवा विद्वत्कुलशिरोमणिना पण्डित श्रीव्रजवल्लभद्विवेदिमहोदयेन कृतास्ति, तदर्थं ते महदादरपात्राणीति भावयामः।

एवमेव काशीविद्वत्कुलतिलकैः पद्मभूषणादिभिर्नानाविशिष्टोपाधिभिर्विभूषितैः पण्डितश्रीपट्टाभिरामशास्त्रिमहोदयैरत्र मीमांसाशास्त्रसंबद्धा विषयाः सरलीकृत्य उपस्थापिता इति ग्रन्थस्यास्य महत्तामुपादेयतां च वर्धयतामेषां महानुभावानां भृशमुपकारं ख्यापयामः ।

प्रसङ्गेऽस्मिन् गुलेदगुड्डस्थ-अमरेश्वरमठीयो डॉ० चन्द्रशेखरशिवाचार्यः साधुवादार्होऽस्ति, यतो ह्ययं प्राचीनसंस्कृतसाहित्यग्रन्थप्रकाशने दत्तचित्तोऽस्ति ।

अनेन ग्रन्थेन निष्पक्षपातं तत्त्वबुभुत्सूनां महानुपकारो जायेतेति संमन्यामहे । ग्रन्थस्यावलोकनेन ग्रन्थस्थतत्त्वावगाहनेन च विनष्टभ्रान्तयः सन्तो निरतिशयसुखसाधने हेतुभूतस्यास्य चिन्तनेन परमेश्वरस्यानुकम्पां सम्यगवाप्य सर्वातिशयशिवसायुज्यपदवीं प्राप्नुयुरिति कामयामहे ।

॥ शिवं भूयात् ॥

प्रकाशकविज्ञप्तिः

लोकेऽस्मिन् सुप्रसिद्धवीरशैवसिद्धान्ते प्राक्समुद्भावितपञ्चात्मकमहोन्नतजगद्गुरुपीठेषु ज्ञानसिंहासनाख्यमन्वर्थपीठं काश्यां सुस्थिरेणावस्थितमस्ति । एतत्पीठपरम्परानुगतचतुरुत्तराशीति(८४)पीठाधीश्वरैः श्री श्री श्री १००८ जगद्गुरुवीरभद्रशिवाचार्यमहास्वामिभिः स्वलीलासंवरणात् प्रागेव प्राक्तनां शिवतत्त्वग्रन्थमालां शिवधर्मग्रन्थमालेत्यभिनवाभिधानेन परिवर्त्य संस्कृत-हिन्दी-मराठी-तेलुगु-अंग्रेजीत्यादिविभिन्नभाषासु विभिन्नविषयानवलम्ब्यानेकानि दार्शनिकधार्मिकपुस्तकानि पुष्पाणीत्याख्यया प्रकाशितानि ।

तत्समयादारभ्य अद्यावधि सप्तविंशतिपुस्तकानि पुष्परूपेण लोकसेवायै समुन्मीलितानि । सम्प्रति बादरायणीयब्रह्मसूत्रेषु चतुःसूत्रीपर्यन्तो विश्वविख्यातश्रीकण्ठभाष्यान्वितो भागः शिवार्कमणिदीपिकासहितोऽष्टाविंशतितमपुष्परूपेण श्रीमतां करकमलमलङ्कुर्वन्नस्ति ।

अनेकैः प्रशंसितस्य प्राचीनग्रन्थस्यास्य सम्पादनमतिकुशलविद्वज्जन-साध्यमिति मत्वा साम्प्रतिकविद्वज्जनेषु मुकुटायमानं शास्त्रचूडामण्याद्यनेक-पदवीविभूषितमनेकसंस्कृतग्रन्थानां प्रणेतृत्वेन सम्पादकत्वेन च देशविदेशेषु लब्धगौरवं सम्पूर्णानन्दसंस्कृतविश्वविद्यालये सांख्ययोगतन्त्रागमविभागा-ध्यक्षचरं सर्वथा समर्थाध्यापक इति स्वसमानकालीनाध्यापकैः संकीर्त्यमानं पण्डितश्रीव्रजवल्लभद्विवेदिमहाभागमेतद्ग्रन्थसम्पादनाय वयमभ्यर्थितवन्तः। अस्मदीयामभ्यर्थनामाकर्ण्यानुक्षणमेव स्वकीयस्वीकृतिं प्रदाय व्यस्त-चित्तोऽपि ग्रन्थस्यास्य सम्पादनेऽपेक्षितसमयं योगदानं च दत्त्वा मञ्जुल-मञ्जरीरूपेण शास्त्रीयविषयान् ग्रन्थेऽस्मिन् यथास्थानं संयोज्योपादेयाभि-नवसामग्र्या समलंकृत्य च यो हि महानुपकारस्तेन कृतः, तदर्थमुचितप्रति-कर्तव्यतारूपेण समर्प्यमाणमस्माकं सविधे किमपि नास्तीति मत्वा तमभि-नन्दनार्हं विनम्राभिधानेनैवाभिनन्द्यानृणीभावाय यतिष्यामः।

एवमेव काशीविद्वत्कुलतिलकैः पद्मभूषणादिविशिष्टोपाधिभिरलङ्कृतैः पण्डितश्रीपट्टाभिरामशास्त्रिमहोदयैः सरलया पद्धत्या मीमांसाविषयाणां स्फुटीकरणपूर्वकं प्रदत्ता सम्मतिरपि ग्रन्थस्यास्य महत्तामुपादेयतां च वर्धयति। अतस्तेभ्यः शिष्टाचारपरिपाटीमनुसृत्य वयं कृतज्ञतां विज्ञापयामः।

अपरं च महतो हर्षस्य विषयोऽयं यदयं ग्रन्थः सम्पूर्णानन्दसंस्कृतविश्व-विद्यालये शक्तिविशिष्टाद्वैतवेदान्ते आचार्यपरीक्षायां प्रथमवर्षे पाठ्यग्रन्थत्वेन स्वीकृतोऽस्ति। मन्यामहेऽनेन तत्त्वबुभुत्सूनां परीक्षायां प्रविष्टानां विद्यार्थि-वर्याणां शास्त्रीयोपादेयविषयसंकलनेऽन्वेषणारूढविद्वज्जनानां चापेक्षाधिकं साहाय्यं भविष्यतीति।

भवदीयः

गङ्गाधरशास्त्री

प्रबन्धको जङ्गमवाड़ीमठस्य

प्राक्कथनम्

यथा हि कुशलाः स्वर्णकाराः स्वस्वप्रतिभया एकमेव सुवर्णं हिरण्यशकलमादाय नैकविधानि मनोहराण्याभरणानि निर्माय ग्राहकाणां मनांस्यावर्ज्य स्वस्वरुच्यनुसारेण क्रयणाय तान् वशीकुर्वन्ति, तथैव भगवत्पादाचार्य-रामानुजाचार्य-मध्वाचार्य-वल्लभाचार्य-श्रीकण्ठाचार्यप्रभृतयो रत्नतत्त्वपरीक्षका एकं ब्रह्मसूत्रमादाय स्वस्वसम्प्रदायानुसारेण भाष्याण्यभाषिषुः। तत्र श्रीकण्ठभाष्यं सर्वतन्त्रस्वतन्त्रैश्चतुरधिकशतग्रन्थनिर्मातृभिः श्रीमदप्पय्यदीक्षितेन्द्रैः प्रणीतया शिवार्कमणिदीपिकया सह समग्रं दक्षिणभारते मुद्रितमपि सम्प्रति नोपलभ्यते। तच्च भाष्यं चतुस्सूत्रीपर्यन्तं सम्पूर्णानन्दसंस्कृतविश्वविद्यालये वेदान्तविभागे पाठ्यक्रमे सन्निवेशितं नोपलभ्यत इति वाराणसेयजंगमवाडीमठद्वारा प्रकाश्यमानमस्ति। तस्य च सम्पादकः पण्डितवरः श्रीव्रजवल्लभद्विवेदिमहाभागः। वाराणसेयजंगमवाडीमठसदस्यैः पण्डितवरेण द्विवेदिमहाभागेन चाहमभिहितो यदस्य ग्रन्थस्य मीमांसासम्बन्धिनः केचन पदार्था भूमिकायां लेखनीया इति। तदनुसारेण स्वटीकायां दीक्षितेन्द्रैः प्रतिपादितान् कांश्चन विषयान् विशदीकरोमि।

"मीमांसाख्या तु विद्येयं बहुविद्यान्तराश्रिता" इति भट्टपादोक्ति यथार्थयन्तः श्रीदीक्षितेन्द्राः स्वीयेषु ग्रन्थेषु मीमांसान्यायसञ्चारप्रदर्शनेन विना तृप्तिं न लभन्त इति तत्तद्ग्रन्थाध्येतृणामध्यापकानां च नाविदितम्। विशिष्य वेदान्तसम्बन्धिषु ग्रन्थेषु मीमांसान्याया बहुलं सञ्चार्यन्ते दीक्षितेन्द्रैः। धर्ममीमांसा ब्रह्ममीमांसेति सत्यपि भेदे विचारदृष्ट्या द्वयोरपि मीमांसयोरस्ति सम्बन्धनैकट्यम्। तथाहि—विमलं दर्पणं बिम्बग्राहि भवति, मलिनं च तन्न बिम्बग्रहणक्षममिति लोकसिद्धः पन्थाः। अस्मदीयं चित्तं दर्पणस्थानापन्नम्। तच्चेद् विमलं ब्रह्मतत्त्वग्राहकं भवितुमर्हति। यदि च तन्मलिनं न कदापि ब्रह्मतत्त्वं परिस्फुरेत्। मलिनं दर्पणं प्रोञ्छनादिना संस्क्रियते, तथैव मलिनं चित्तं पूर्वतन्त्रेण संस्क्रियते। विहितकर्मणां यथावदाचरणेन दूषितं चित्तं संस्कृतं सद् विमलस्य ब्रह्मतत्त्वस्य ग्रहणे क्षमं भवेत्। अतः पूर्वतन्त्रस्योत्तरतन्त्रेणास्ति निकटः सम्बन्धः। एतावांस्तु विशेषः—यदुत पूर्वं तन्त्रं वेदवाक्यार्थनिर्णयाय प्रवृत्तं यथा तथै-

वोत्तरं तन्त्रमपि । पूर्वं तन्त्रं प्रायो विधिभागगतवाक्यानामर्थं विचारयति, उत्तरं च तन्त्रं वेदान्तवाक्यानामर्थं विचारयितुं प्रवृत्तमित्युभयोर्वेदवाक्यार्थविचाराय प्रवृत्तत्वाद् वाक्यशास्त्रत्वमविशिष्टम् ।

तत्र "अथातो धर्मजिज्ञासा" इति जिज्ञासाधिकरणे "स्वाध्यायोऽध्येतव्यः" इति विधिवाक्यं शास्त्रारम्भसमर्थकत्वेनोदाहृत्य प्राधान्येन चिन्ता प्रवर्तिता—किमिदं शास्त्रमारम्भणीयम् ? न वा ? इति । तदर्थं स्वाध्यायाध्ययनविधिरदृष्टार्थत्वेनाध्ययनं विधत्ते ? उत दृष्टार्थज्ञानार्थत्वेन ? इति चिन्ता प्रवर्तिता । यद्यदृष्टार्थमध्ययनं तर्हि विचारशास्त्रमनारम्भणीयम्, यदि च तद्दृष्टार्थज्ञानार्थं तर्हि विचारशास्त्रमारम्भणीयमिति तदर्थविचारस्य फलफलिभावः सिध्यति । तदर्थसंशयनिष्कर्षाय "स्वाध्यायोऽध्येतव्यः" इति वाक्यस्यार्थो ज्ञातव्य इति तं विवृणुमः । अधिपूर्वकेङ्धातोः कर्मणि तव्यप्रत्ययेऽध्येतव्य इति रूपम् । धात्वर्थोऽध्ययनम् । अध्ययनं च गुरुमुखोच्चारणानूच्चारणम् । तव्यप्रत्ययस्य शाब्दी भावना (प्रेरणा = प्रवर्तना) अर्थः । प्रवृत्त्यनुकूलव्यापारापरपर्याया शाब्दीभावना प्रवृत्तिं विनानुपपन्नेति प्रवृत्तिमार्थीभावनापरपर्यायामाक्षिपति, आर्थीभावनापरपर्यायायाः प्रवृत्तेर्वाचकस्याख्यातस्यात्राभावात् । आक्षिप्तायामार्थीभावनायां धात्वर्थोऽध्ययनं गुरुमुखोच्चारणानूच्चारणं भावार्थाधिकरणन्यायेन करणत्वेनान्वेति । स्वाध्यायः स्वकुलपरम्परागता शाखा कर्मत्वेनान्वेति । तथा च गुरुमुखोच्चारणानूच्चारणरूपेणाध्ययनेन स्वकुलपरम्परागता शाखा अवाप्तव्येति, स्वकुलपरम्परागतां शाखां भावयेत् प्राप्नुयादित्यर्थः सम्पन्नः । अर्थाद् गुरुमुखोच्चारणानूच्चारणरूपमध्ययनं संस्कार इति सिध्यति । संस्कारश्च उत्पत्तिः, आप्तिः, विकृतिः, संस्कृतिश्चेति चतुर्विधो भवति । तत्रायमाप्तिसंस्कारः । शब्दराशिरूपवेदस्याप्तिसंस्कारः । संस्कारकर्मणां क्वचिददृष्टं प्रयोजनम्, क्वचिच्च दृष्टं प्रयोजनं दृष्टम् । अत्र चाक्षरावाप्तावेव यदि शास्त्रार्थः पर्यवसन्नस्तर्हि विश्वजिन्न्यायेनायं संस्कारोऽदृष्टफलकः, अक्षरावाप्तिपरम्परोपजायमानार्थज्ञानफलको यदि तर्हि दृष्टफलकोऽयं संस्कारः । अदृष्टकल्पनायां मीमांसका न बिभ्यति, किन्तु दृष्टे सम्भवत्यदृष्टं ते न स्वीकुर्वन्ति । यदा हि साङ्गं वेदमधीते तदा निगमनिरुक्तव्याकरणादिना जायमानमर्थज्ञानं कोऽपि वारयितुं नेष्टे । एवं च दृष्टेऽर्थज्ञाने फले सम्भवति नादृष्टकल्पनमुचितमिति स्वाध्यायाध्ययनविधिरर्थज्ञानमुद्दिश्याध्ययनं विधत्त इति सम्पन्नम् । तच्चार्थज्ञानं विचारमन्तरा न सेत्स्यतीति विचारात्मकस्य शास्त्रस्य विधिरयं

प्रयोजको जायते। अयमेव न्यायो वेदान्तवाक्यविचाराय प्रवृत्तस्य शास्त्रस्यापि। एवं च शास्त्रद्वयमिदं विधिप्रयुक्तत्वेन समानभावमनुभवतीति सिद्धम्।

"स्वाध्यायोऽध्येतव्यः" इति विधिः किमपूर्वविधिः ? किं वा नियमविधिः ? आहोस्वित् परिसंख्याविधिरिति विचार्यते। भट्टपादैस्त्रयाणामपि विधीनां लक्षणं प्रदर्शितम्—

विधिरत्यन्तमप्राप्ते नियमः पाक्षिके सति।
तत्र चान्यत्र च प्राप्ते परिसंख्येति गीयते॥ इति।

अस्यार्थः—प्रमाणान्तरेणात्यन्तमप्राप्तमर्थं यः प्रापयति, सोऽप्राप्तप्रापकत्वादपूर्वविधिः। अत्यन्ताप्राप्तप्रापकत्वमपूर्वविधेर्लक्षणम्। यत्र पाक्षिकी प्राप्तिः सम्भाव्यते, तत्राप्राप्तिपक्षं यो नियमयति स विधिर्नियामकत्वान्नियमविधिः। 'तत्र चान्यत्र' इत्यस्य तस्मिंश्चान्यस्मिंश्चेत्यर्थः। सप्तमीद्वयेन साकं 'प्राप्ते' इत्यस्य वैयधिकरण्येन सामानाधिकरण्येन चान्वयः। वैयधिकरण्यपक्षे तस्मिन्नन्यस्मिंश्च शेषिणि एकः शेषो यदि प्राप्नुयात्, तत्रान्यतरशेषिणः परिसंख्येति शेषिपरिसंख्या, सामानाधिकरण्यपक्षे तु स चान्यश्च शेष एकस्मिन् शेषिणि यदि प्राप्नुयात्, तर्ह्यन्यतरस्य परिसंख्येति शेषपरिसंख्या। एवं च एकस्मिन्नङ्गे प्रधानद्वयसम्बन्धे नियतप्राप्ते, एकस्मिन् प्रधानेऽङ्गद्वयसम्बन्धे नियतप्राप्ते सत्यन्यतरनिवृत्तिफलको विधिः परिसंख्याविधिरिति। अर्थात् शेषिपरिसंख्या शेषपरिसंख्येति द्वैविध्यं परिसंख्याविधेः।

"स्वाध्यायोऽध्येतव्यः" इति विध्यभावेऽर्थज्ञानसम्पादनाय गुरुमुखोच्चारणानूच्चारणरूपमध्ययनं कर्तव्यमिति नास्माभिर्ज्ञातुं शक्यते, प्रमाणान्तरेण तस्याज्ञातत्वात्। अतोऽत्यन्ताज्ञातार्थबोधकत्वेनायमपूर्वविधिरिति वक्तुं शक्यते, किन्तु लोकतोऽर्थज्ञानाय लिखितपाठादिकं साधनमवगच्छामः। अतः स्वाध्यायाध्ययनविध्यभावेऽपि लिखितपाठादिनाऽर्थज्ञानमवाप्तुं शक्यमिति स्वाध्यायाध्ययनविधेरर्थज्ञानार्थत्वं न सिध्यति। ततश्च लिखितपाठादेः प्रवृत्तिदशायां स्वाध्यायाध्ययनस्य या अप्राप्तिः, तामयं विधिः पूरयतीत्यप्राप्तांशपूरकत्वेनायं नियमविधिरित्येष्टव्यम्। तथा च गुरुमुखोच्चारणानूच्चारणरूपाध्ययनद्वारैवार्थज्ञानं सम्पादयेदिति नियमः सम्पद्यते। नियमस्य प्रयोजनमपशूद्राणां द्विजानामेव वेदाध्ययने प्रवृत्तिरित्यन्यत्र विस्तरः।

सोऽयमध्ययनविधिर्विधि-मन्त्र-नामधेय-निषेधार्थवादोपनिषदात्मना विभक्ते समग्रे वेदे प्रवर्तते, न त्वंशे। विधीनामयं स्वभावो यत्समग्रे प्रवर्तत इति।

विंशतिहस्तपरिमितं कूपं यः पद्भ्यामुल्लङ्घते तस्मै शतं रूप्यकाणि दीयन्तामिति विध्यर्थमवगत्य कश्चन पञ्चदशहस्तपरिमितं कूपस्य स्थलमुल्लङ्घ्य कूपे पतित्वोत्थाय पञ्चसप्ततिरूप्यकाणि दीयन्तामिति यदि पृच्छति, तदा कोऽपि कपर्दिकामपि न दद्यात् । एवं च वेदान्तपर्यन्तं स्वकुलपरम्परागतायाः शाखाया अध्ययनं स्वाध्यायाध्ययनविधिर्विधत्त इति निर्गलति । तत्रोपनिषत्सु—"आत्मा वा अरे द्रष्टव्यः श्रोतव्यः" इति विधिसरूपं वाक्यं विलोकयामः । अत्रास्य वाक्यस्य विधायकत्वमस्ति न वा ? यद्यस्ति तर्हि त्रेधा विभक्तेषु विधिषु को वा ? इति विचारयितुं मनीषिणः शास्त्रविदः प्रवृत्ताः । तेषामाशयं संक्षिप्य प्रदर्शयामः । ब्रह्मतत्त्वसाक्षात्काराय श्रवणादयः प्रवृत्ताः "श्रोतव्यो मन्तव्यः" इति । एतद्विध्यभावे न ज्ञायते यद्वेदान्तश्रवणमात्मसाक्षात्काराय भवतीति । अतोऽत्यन्ताप्राप्तप्रापकत्वादपूर्वविधिरिति केचन सङ्गिरन्ते । यद्यपि श्रवणं श्रोतव्यस्यार्थस्य साक्षात्कारहेतुरिति सामान्यतो ज्ञायते, तथापि तद् व्यभिचरति । कर्मकाण्डभागश्रवणेन तदर्थधर्मसाक्षात्कारो न भवति । अतः श्रवणेऽपूर्वविधिरङ्गीक्रियते, अप्राप्तत्वात् ।

तदिदमपरे न सहन्ते । अपरोक्षब्रह्मसाक्षात्कारहेतुत्वं वेदान्तश्रवणस्य पाक्षिकं मन्यन्ते । तथाहि—अपरोक्षवस्तुविषयकं प्रमाणमपरोक्षज्ञानहेतुः, विचारमात्रं विचार्यनिर्णयहेतुरिति हेतुहेतुमद्भावाङ्गीकारे वेदान्तशब्दज्ञानरूपस्य श्रवणस्य तद्धेतुत्वं प्राप्नोति । अतः प्राप्तत्वान्नापूर्वविधिः, किन्तु नियमविधिः । दृष्टफलानि यावन्ति कर्माणि तानि नियमार्थानि भवन्तीति मीमांसका आशेरते । श्रवणादीनि यानि तान्यात्मदर्शनार्थानि । आत्मदर्शनं नाम दृष्टं फलम् । तत्र श्रवणादीनां हेतुत्वेऽवघातवन्नियमः स्वीकर्तव्यो भवति । अवहननस्य दृष्टं फलं तुषविमोकद्वारा तण्डुलनिष्पत्तिः । तण्डुलनिष्पत्तिपर्यन्तमवहननमावर्त्यते, तद्वद् यावदात्मदर्शनं तावच्छ्रवणमावर्तनीयम् । अस्यां स्थितौ यथा चक्षुषा किञ्चिद् वस्तु पश्यन्तमपि वस्त्वन्तरं चापश्यन्तं तद्ग्रहणाय बोधितः पुनरपि स्वीयं चक्षुर्व्यापारयति, तथैव वेदान्तवाक्यानि शृण्वन्नपि अहमिति केवलं जीवं गृह्णन्तं परो बोधयति यद् निर्विशेषं परं ब्रह्मतत्त्वं वेदान्तवाक्यान्युपदिशन्ति, न केवलमहमिति जीवमिति । ततश्च तदवबोद्धुं श्रवणे प्रवर्तते । अत्र प्रवृत्तौ पाक्षिकत्वमनुभूयत इति पाक्षिकाप्राप्तांशपूरकत्वं विद्यत इति नियमविधिरयम् । किञ्च, प्रायः सर्वाणि दर्शनान्यात्मविचारपराण्येव । तत्र भिन्नात्मविचारपरे

शास्त्रे श्रवणाय प्रवृत्तः पुरुषस्तस्मिन्नेव समये निर्विशेषपरब्रह्मतत्त्वप्रतिपादकवेदान्तवाक्यानां श्रवणाय न प्रवर्तते, किन्तु कालान्तरे तत्र पाक्षिकत्वं सम्भवतीति तदंशपूरकत्वेन नियमविधिरयमिति वक्तुं शक्यते ।

तमिमं नियमपक्षमपि केचन न स्वीकुर्वन्ति, किन्तु परिसंख्याविधिरित्याचक्षते । व्यापारद्वयस्य समुच्चित्य प्राप्तावितरनिवृत्तिफलको विधिः परिसंख्याविधिरिति कथ्यते । परब्रह्मतत्त्वाधिगमाय वेदान्तवाक्यानि श्रोतुं प्रवृत्तः पुरुषो भेदवासनावशाद् व्यापारान्तरे यदि प्रवर्तेत तन्निवृत्त्यर्थं 'श्रोतव्यः' इति परिसंख्याविधिर्भवतीत्याशयः ।

एवं विभिन्नेषु सत्सु मतेषु "आत्मा वा अरे द्रष्टव्यः श्रोतव्यः" इति वाक्ये तव्यप्रत्ययश्रवणमात्रेण को विधिरिति विचारस्यावश्यकता नास्ति, यतो ह्ययं सन्दर्भोऽर्थवाद उपांशुयाजन्यायेन । "उपांशुयाजमन्तरा यजति" इति वाक्येनोपांशुयाजं विधाय, "अग्निरुपांशु यष्टव्योऽजामित्वाय, प्रजापतिरुपांशु यष्टव्योऽजामित्वाय अग्नीषोमावुपांशु यष्टव्यौ अजामित्वाय" इति श्रुते वाक्ये तव्यप्रत्ययश्रवणेऽपि विधायकत्वमनङ्गीकृत्यार्थवादत्वं व्यवस्थापितं पूर्वतन्त्रे, तन्न्यायेन प्रकृतेऽपि परतत्त्वज्ञानावाप्तये दर्शनश्रवणादीनां प्रशंसापरकत्वेन नयनमुचितमिति नात्र कोऽपि विधिः प्रसरतीति मतान्तरम् । विस्तररूपेणायं विषयो दीक्षितेन्द्रैः स्वीये सिद्धान्तलेशसंग्रहे निरूपितः ।

मीमांसाशास्त्रमर्यादामनुसृत्य दीक्षितेन्द्राः स्वाध्यायाध्ययनविधेः स्वरूपमुपवर्ण्यार्थज्ञानावाप्तिपर्यन्तं विधेस्तात्पर्याङ्गीकारापेक्षयाऽक्षरावाप्तिपर्यन्तमेव तात्पर्यं स्वीयटीकायां प्रत्यपादयन् । एवं प्रतिपादने भूयसीर्युक्तीः प्रदर्शयामासुः । अध्ययनं त्रिविधं परिगण्यते-ग्रहणाध्ययनम्, धारणाध्ययनम्, ब्रह्मयज्ञाध्ययनं चेति । तत्र ग्रहणाध्ययनावसरे माणवका अक्षरावाप्तावेव दत्तचित्ता भवन्ति, धारणाध्ययने ब्रह्मयज्ञाध्ययनेऽपि । यद्यपि साङ्गवेदाध्यायिनां वक्ष्यमाणार्थावबोधो भवत्येव, किन्तु न तत्र तेषामभिनिवेशो भवति । अग्निहोत्रदर्शपूर्णमासादिकर्मानुष्ठानकाले कर्मणां प्रयोगज्ञानमावश्यकम्, तदर्थमुपद्रष्टृनियोगेन तज्ज्ञानसम्पादनं सुकरम् । अपि च, ज्योतिष्टोमादौ स्तोत्रशस्त्र-याज्यापुरोनुवाक्यापठनकाले तत्तदर्थावगमपूर्वकं मन्त्रोच्चारणं दुश्शकम् । मन्त्रार्थेऽनुसन्धीयमाने तदानीं मन्त्रोच्चारणनियमानामनुसरणधाराया विच्छेदः स्यात् । इत्येवमादिषु पर्यालोच्यमानेष्वक्षरग्रहणमात्रेणैव

स्वाध्यायाध्ययनविधिः पर्यवसन्नो भवितुमर्हति। एतावताऽध्ययनस्य नादृष्टार्थत्वं सिध्यति, येनादृष्टपरिकल्पनया शास्त्रस्यानारभ्यत्वं सिध्येत्, नियमविध्यङ्गीकारेण शास्त्रस्य विधिप्रयुक्तत्वसाधनस्य शक्यत्वात्।

दीक्षितेन्द्रैः स्वाध्यायाध्ययनविधिविचारप्रसङ्गे प्राभाकरमतेन सिद्धो वाक्यार्थोऽपि प्रदर्शितः। तस्यायं सारः–प्राभाकरा यस्मिन् वाक्ये नियोज्यः = अधिकारी श्रूयते तदेव वाक्यं प्रवर्तकम्, केवलं 'तव्य'प्रत्ययश्रवणमात्रेण वाक्यस्य प्रवर्तकत्वं न भवतीत्यङ्गीकृत्य "स्वाध्यायोऽध्येतव्यः" इत्यत्र नियोज्यस्याश्रूयमाणत्वाद् आचार्यकरणविधिप्रयुक्तत्वमध्ययनस्य सिद्धान्ततोऽङ्गीकुर्वन्ति। अर्थाद्विधिरयमध्ययनस्य न विधायकः, किन्तु—

उपनीय तु यः शिष्यं वेदमध्यापयेद् द्विजः।
सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते॥

इति स्मृत्यनुमितेन 'उपनीयाध्यापनेनाचार्यकं भावयेत्' इत्यध्यापनविधिना प्रयुक्तस्याध्ययनस्य किमाचार्यकत्वसिद्धिः प्रयोजनम्, उतार्थज्ञानमिति विचारशरीरं प्रवर्तयन्ति। अध्यापनं च माणवककर्तृकाध्ययनेन विना न सिध्यतीत्यध्यापनविधिरध्ययनमाक्षिपति। आक्षिप्तस्यास्याध्ययनस्य स्वाध्यायाध्ययनविधिरनुवादकः। आचार्यकत्वसिद्धिः प्रथमपतिता, अर्थज्ञानं चानन्तरपतितम्। प्रथमपतितत्वादसंजातविरोधित्वन्यायेनाचार्यत्वसिद्धिः फलमिति पूर्वपक्षः, प्रथमपतितत्वेऽप्याचार्यत्वस्य बहिरङ्गत्वादन्तरङ्गत्वाच्चार्थज्ञानमेव फलमिति सिद्धान्तः। माणवककर्तृकाध्ययनेन गुरुमुखोच्चारणानूच्चारणरूपेण आचार्यत्वसिद्धिः फलमित्यङ्गीकारे क्रियायाः फलस्य च भिन्ननिष्ठत्वमापतेत्। तच्च न युक्तमिति योऽधीते माणवकस्तन्निष्ठत्वेनैव फलेन भाव्यम्। तच्चार्थज्ञानमिति स्वीकृते सङ्गतं स्यादित्यध्यापनविधिप्रयुक्तस्याध्ययनस्यार्थज्ञानं फलमिति प्राभाकरसंमतः पक्षः।

भाट्टमते त्वध्ययनं स्वविधिप्रयुक्तमेव नाध्यापनविधिप्रयुक्तम्। अध्यापनविधिप्रयुक्तत्वे नियोज्याभावं हेतुं निर्दिशन्ति प्राभाकराः, किन्तु नियोज्याभावस्थले नियोज्यपरिकल्पनया शास्त्रार्थपरिपूर्तये विश्वजिन्न्यायो जागर्ति। अतो विश्वजिन्न्यायेन नियोज्यपरिकल्पनाद्वाराऽध्ययनस्य स्वविधिप्रयुक्तत्वे सिध्यति किमिव परविधिप्रयुक्तत्वमेष्टव्यम्। परविधित्वेन "अष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयीत" इत्यध्यापनविधिरभीप्सितः प्राभाकराणाम्। अस्मिन्नपि विधौ नियोज्यः क्वास्ति? यद्बलादस्य प्रयोजकत्वं स्वीक्रियेत। एककर्तृकत्वबलादुपनयनाध्यापनयोरङ्गा-

ङ्गिभावं स्वीकृत्याङ्गभूतस्योपनयनस्य द्वारापेक्षायामुपनेयासत्तिः, तस्या अप्यकिञ्चित्करााया द्वारत्वमनुपपन्नमित्युपनयनं प्रक्रम्य क्रियमाणं माणवककर्तृकमध्ययनं गुरुमुखोच्चारणरूपं द्वारमङ्गीकृत्याध्यापनविधिनाऽध्ययनस्य प्रयुक्तिरङ्गीकर्तव्या। एतदपेक्षयोपनयनस्याध्ययनाङ्गत्वस्वीकारे लाघवं भवति। अन्यथा उपनयनेन विना न उपनेयस्य बटोराचार्यसमीपप्राप्तिः, तां विना नाध्ययनम्, अध्ययनं च विना नाध्यापनमिति परम्परयाऽध्यापनाङ्गत्वमुपनयनस्य कल्पनीयं स्यात्। किञ्च, उपनयनं माणवकसंस्कारः। माणवकेनाध्ययनं क्रियते। अतोऽध्ययनाङ्गत्वमेवोपनयनस्य सिध्यति। किञ्च, क्रियाफलस्य कर्तृगामितायां "स्वरितञितः कर्त्रभिप्राये" इत्यादिसूत्रेणैव 'उपनयीत' इत्यात्मनेपदं सिद्धम्। उपनयनसंस्कारो माणवकगामी, माणवक एव चाध्ययनेऽधिकारी। अतश्च संस्कारमात्रस्योद्देश्यत्वासम्भवाद् उपनयनसंस्कृतैरस्माभिः किं कर्तव्यमित्यपेक्षमाणा माणवका अर्थज्ञानफलकमध्ययनमिति स्वीकुर्युः, न त्वाचार्यकत्वसिद्धयेऽस्मदध्ययनमिति। एवं चाध्ययनं स्वविधिप्रयुक्तम्, उपनयनं चाध्ययनाङ्गम्, अध्ययनं च दृष्टार्थज्ञानार्थमिति सिद्धम्।

वेदस्यापौरुषेयत्वेन प्रामाण्यं साधयद्भिर्मीमांसकैः, विशेषेण दीक्षितेन्द्रैः स्वीयेषु ग्रन्थेषूच्चावचा युक्तयः प्रदर्शिताः। तत्र कतिपययुक्तीनां प्रदर्शनेनापौरुषेयत्वं वेदस्य साधयामः। पौरुषेयत्वं वेदस्य साधयद्भिर्विमर्शकैः प्रथममिदं वक्तुं न शक्यते यद् अमुकः पुरुषो वेदान् प्रणिनायेति। यश्च ग्रन्थोऽध्ययनपरम्परायामविच्छेदेन विद्यमानोऽपि तस्य प्रणेताऽध्येतृभिर्न स्मर्यत इति वेदाभिधानं शब्दराशिं विहाय नान्यः कश्चन पौरुषेयो ग्रन्थो दृष्टान्तयितुं शक्यत इति तावदभ्युपगन्तव्यम्। वेदविषये परमध्येतारः स्वस्वगुरुमेव निर्दिशन्ति–अस्माद् गुरोरहं वेदानध्यैषमिति। गुरवश्च प्रवक्तारो भवन्ति न प्रणेतारः। एवमनिदम्प्रथमताकात् कालाद्रीतिं वयमनुभवामः। अधुना यथा वेदाध्येतारोऽत्यन्तं विरला विलोक्यन्ते, न तथा पुरा भारतवर्षे स्थितिरासीदिति संस्कृतसाहित्ये परिशील्यमाने स्पष्टमवगम्यते। आ च हिमवतः, आ च कुमारिकाया विस्तृते देशे कोऽपि वेदप्रणेतारं न स्मरति, अपि च वेदः पौरुषेय इति कथनं कथं सङ्गच्छताम्? अतः कर्तृस्मरणाभावाद् वेदोऽपौरुषेयः।

प्रत्यक्षेण वेदस्य कर्ता न नाम सिध्यतु, अनुमानेन कर्ता साधयितुं शक्यत इति कामं वदेयुः, तदर्थं "वेदः पौरुषेयः, वाक्यत्वात्, भारतादिवत्" इत्यनुमानं पुरस्कुर्युः। वाक्यत्वसामानाधिकरण्येन पौरुषेयत्वं सर्वत्रोपलभा-

महे। वेदेऽपि वाक्यत्वमस्ति पौरुषेयत्वं स्वीकर्तव्यमिति। किन्तु वाक्यत्व-हेतुना यत्र पौरुषेयत्वमनुभवामः, तत्र कर्तृस्मरणमप्यनुभवामः। वेदे परं स्मर्तव्यं कर्तारं न स्मरामः। अस्यामवस्थायां "वेदोऽपौरुषेयः स्मर्तव्यत्वे सत्यस्मरणात्" इति प्रत्यनुमानं कुतो नोदियात्? अथवा वाक्यत्व-हेतुकानुमानेऽस्मर्यमाणकर्तृकत्वमुपाधिः कुतो न स्यात्? वयमिदानीं तं न स्मरामः, अस्मत्पाठ्यक्रमाद् वेदो विच्युतः, किन्तु प्राक्तनकाले नैषा स्थिति-रासीत्। चिरन्तनैर्विरचितेषु वैदिकवाङ्मयेषु श्रौतसूत्रादिषु स्मृतिषु पुराणेषु च चिन्त्यमानेषु चिरन्तनानां वेदेन सह कियान् सम्बन्धोऽविद्यतेति न तिरो-हितं कस्यापि। किञ्च, वेदेषु लक्षश ऐष्टिक-पाशुक-सौमिकानि नित्य-नैमि-त्तिक-काम्यानि कर्माणि नैकविधान्युपलभामहे विहितानि। इमानि वाक्यानि न खलु पदपदार्थग्रहणमात्राय भवितुमर्हन्ति। यथा हि महाकविभिर्विरचि-तानि विविधानि नाटकानि मञ्चेष्वभिनयाय पर्यवसन्नानि भवन्ति तथेमानि कर्माण्यनुष्ठानाय। तेन चैहिकान्यामुष्मिकाण्यैहिकसंवलितामुष्मिकाणि फलान्यनुभवन्तो जनाः सांसारिकवृत्तिं नयन्त्विति महाफलाय प्रवर्तितानि। एतेषां कर्मणामनुष्ठानप्रकारावबोधकानि कल्पसूत्राण्यनन्तान्याविष्कृतानि महर्षिभिः।

मीमांसकमतेनेदं तु स्वीकर्तव्यमेव भवति यदस्माकं देशे चिरन्तना विना वेदाध्ययनेन, विना च वेदोदितकर्मणामनुष्ठानेन तूष्णीमवर्तन्त इति कश्चन कालो नासीदिति। अनादिपरम्परा प्रवाहनित्यत्वन्यायेन प्रवहन्ती जगत्य-स्मिन्नासीत्। वेदानामाविष्कारानन्तरं कल्पसूत्रकारा महर्षयः कल्पसूत्राणि निबबन्धुः, तद्वीक्ष्य तदधीत्य चानन्तरं चिरन्तनाः कर्मानुष्ठाने प्रवृत्ता अभव-न्निति कल्पनं दुश्शकम्। चिरन्तनानामनुष्ठाने स्थितानामेव पदार्थानां कल्पसूत्राणीमानि स्मारकाणीति कथनं युक्तियुक्तम्। अत एव कल्पसूत्राणां स्मृतित्वव्यवहारः सङ्गच्छते। स्मृतिश्चानुभवजन्यसंस्कारोद्बोधेन जायत इति शास्त्रविदां पन्थाः। अत एव भगवान् जैमिनिः स्मृतीनां 'कर्तृसामान्यात्' इति हेतुं निर्दिश्य प्रामाण्यं साधयति। हेतोरयमर्थः—स्मृतिप्रणेतॄणां वेदोदितकर्मा-नुष्ठातॄणां च सामान्यमिति। य एव तादृशकर्मानुष्ठातारस्त एव स्मर्तारः। अनेनेदमवगम्यते—चिरन्तने काले येऽनुष्ठानविषयीभूताः पदार्थास्तानेव पदार्थान् महर्षयः स्मरन्तीति। कुशलोऽपि दैवज्ञो नेदं स्थापयितुं शक्नोति, यदस्मादेव कालाद् वेदाध्ययनम्, वेदोदितकर्मणामनुष्ठानं च समारब्धमिति। एतेनानादीदं जगत् स्वाध्यायाध्ययनविधित इति मीमांसकानां पक्षः साधी-

यानिति प्रतिभाति। किञ्च, वयमिदानीमष्टाविंशतितमे कलौ युगे वर्तामहे। सप्तविंशतिसंख्याकाः कलियुगा गताः। एकैकस्य युगस्य कियत्कालपरिमाणमिति चिन्त्यमाने आधुनिकं यद् विंशतितमं शतकमिति परिमाणं तत्तस्य दासभावेऽपि योग्यं न भवेत्। परैः प्रवर्तितं कालपरिमाणमेवाश्रित्य वयं जीवनयापनं कुर्मः।

पुरातनं च तत्त्वं पुरातनमेव स्थास्यति, नवीनं च तत्त्वं कालान्तरे पुरातनं भविष्यत्येव। तादृशान्येव नवीनानि तत्त्वान्याविष्करणीयानि यानि च पुरातनतत्त्वाभिभावकानि न भवेयुः। यथा भगवतो वल्मीकजन्ममुनेः काव्यमादिकाव्यमङ्गीकृत्य काव्यान्तराणां तत्परवर्तित्वं निश्चीयते, तथा ऋग्वेदं प्रथमं स्वीकृत्य वेदान्तराणि तत्परवर्तीनीति वदन्तो गच्छामो वयम्। ऐतिहासिकी दृष्टिरेवं प्रसरति, किन्त्विदं पर्यालोचनीयं यच्छ्रौतानि कर्माणि कानिचिदेकवेदसाध्यानि, कतिपयानि वेदद्वयसाध्यानि, अन्यानि च वेदत्रयसाध्यान्युपलभ्यन्ते। किमेवं विभागे क्रमनिश्चये च ऐतिहासिक्या दृष्टेर्मूलं किञ्चिदुपलभ्यते? ऐतिहासिक्या दृष्टेरपि मूलेन केनचिद् भाव्यमेव खलु। विना मूलेन प्रतिपाद्यमाने वस्तुनि कः प्रत्ययः? अद्यत्वे विमर्शका एवमाशेरते यत्तैत्तिरीयशाखा अत्यन्तमर्वाचीनेति, किन्तु—

कौसल्यां च सुमित्रां च भक्तः पर्युपतिष्ठति।
आचार्यस्तैत्तिरीयाणामभिरूपश्च वेदवित्॥

इति वाल्मीकेः पद्ये विमृश्यमाने रामायणात् प्रागेव '**तैत्तिरीयाणामाचार्यः**' पट्टमहिष्याः कौसल्यादेव्याः सुमित्रायाश्च पुरोहित आसीदिति। अत्र 'तैत्तिरीयाणाम्' इति बहुवचनेन, 'आचार्य' इति पदेन च द्योत्यमानेऽर्थे विमृश्यमाने तैत्तिरीयशाखायाः कियत्प्राचीनत्वमिति शक्यमवबोद्धुम्। अतो वेदानां पूर्वापरभावनिर्णायकत्वेनैतिहासिकी दृष्टिर्न स्थिरा भवितुमर्हति।

शास्त्रीया दृष्टिश्चेदवलम्ब्यते तर्हि तत्रानुमानं प्रमाणमवलम्ब्य शास्त्रविदो गच्छन्ति। अनुमानेन वेदानां पौरुषेयत्वं साधयन्तोऽपि दार्शनिका अन्तत ईश्वरपर्यन्तं गत्वा विश्राम्यन्ति, स एव वेदान् रचयामासेति। रचनातः पूर्वमर्थावबोध आवश्यक इति नियतः पन्थाः, 'अर्थं बुध्वा शब्दरचना' इति क्रम ईश्वरेणापि स्वीकर्तव्यः। तदेश्वरस्यास्मदपेक्षया किं वैलक्षण्यं साधितं भवेत्? तस्य यत्सर्वशक्तिमत्त्वं स्वातन्त्र्यं तत्कथं संरक्षितं

स्यात् ? तद्रक्षणाय सृष्ट्यादौ गतकल्पीयं वेदं स्मृत्वा ऋषिभ्य उपदिदेशेति पथि स्वीकृते तदीयं सर्वशक्तिमत्त्वं स्वातन्त्र्यं च संरक्षितं स्यात्। एवं च प्रवाहनित्यत्वे पर्यवसानमिति सिध्यति।

अत्र दीक्षितेन्द्रैर्वेदाभिधानशब्दराशिनैव परमेश्वरस्य सर्वज्ञत्वम्, वेदानां च परमेश्वरकार्यत्वं शास्त्रयोनित्वाधिकरणे सुनिपुणमुपपादितम्, वेदानां परमेश्वरकार्यत्वेऽप्यपौरुषेयत्वं च साधितम्। वेदानामपौरुषेयत्वं नामेदमेव यद् अनादिसिद्धस्वरवर्णपदवाक्यप्रकरणतदानुपूर्वीतदर्थानामविपर्यासेन वर्तनम्। इदं च प्रवाहनित्यत्वं बीजाङ्कुरन्यायेन यदि स्वीक्रियते, तदा परमेश्वरकार्यत्वाभ्युपगमेऽपि प्रामाण्ये न काचिद्धानिः। यद्यपि मीमांसकमतेन परमेश्वरकार्यत्वं वेदानां न सिध्यति, किन्तु वेदा एव परमेश्वररूपा इत्यङ्गीकारे तदुदितकर्मानुष्ठाने लोकानां प्रवृत्तिरभ्युदयकारिणीति तत्तच्छास्त्रमर्यादानुपालने न कोऽपि दोषः।

श्रीकण्ठभाष्यस्य शिवार्कमणिदीपिकासहितस्य चतुःसूत्रीपर्यन्तो भागो वाराणसेयजङ्गमवाडीमठस्य शिवधर्मग्रन्थमालाया २८ पुष्पतया मठसदस्यैः प्रकाशितः, तस्य च पण्डितप्रवरश्रीव्रजवल्लभद्विवेदिना सम्पादनं कृतमिति नितरां प्रसीदामि। अध्येतारो ग्रन्थमिममधीत्य स्वीयं ज्ञानं वर्द्धयेयुरिति विश्वसिमि।

सं० २०४३, चैत्रकृष्णैकादशी — **पट्टाभिरामशास्त्री**

वाराणसी। — ४-५-८६

प्रस्तावना

वेदभागः समस्तः कर्मकाण्डज्ञानकाण्डभेदेन व्यस्तो महर्षिभिरिति जानन्त्येव सुधियः सुरभारतीसमुपासकाः। तत्र कर्ममीमांसायां कर्मकाण्डविचारो ब्रह्ममीमांसायां च ज्ञानकाण्डविचारः प्रवर्तते। ब्रह्मविचारशास्त्रमेव वेदान्तशास्त्रनाम्नाऽपि प्रथते। वर्तन्ते तस्य त्रीण्यङ्गानि प्रस्थानत्रयीतिनाम्ना प्रसिद्धानि—उपनिषदः, ब्रह्मसूत्रम्, भगवद्गीता चेति। प्रस्थानत्रयीतिनाम्ना विभक्तं शास्त्रत्रयमेतदेकीकृत्यैव वेदान्तशास्त्रमिति समाख्या प्रवर्तते। विभिन्नासु उपनिषत्सु भगवद्गीतासु च प्रतिपादितानां सिद्धान्तानां समन्वयमुखेन प्रवर्तते ब्रह्मसूत्रं बादरायणीयम्। आचार्यपदप्रतिष्ठाप्राप्तये नैकैर्भारतीयैर्मनीषिभिरत्र भाष्याणि संदृब्धानि। तेषु भगवत्पादशङ्कराचार्येण प्रमुखा उपनिषदः, ब्रह्मसूत्रम्, भगवद्गीतां च समाश्रित्य रचितानि भाष्याण्येव साम्प्रतमुपलभ्यमानेषु भाष्येषु प्राचीनतमानीति वक्तुं शक्यते। इतः पूर्वमपि तत्र भाष्याणि प्रणीतानीति केवलमुद्धरणमुखेन ज्ञायते।

ब्रह्मसूत्रभाष्याणि

तत्र भगवत्पादस्य शङ्कराचार्यस्य ब्रह्मसूत्रभाष्यं शारीरकभाष्यनाम्ना सुप्रथितम्। भट्टभास्करेणाप्यत्र भाष्यं रचितम्। तच्च यथा तथा वा मुद्रितं वर्तते। भट्टभास्करो वर्तते भेदाभेदवादी ज्ञानकर्मसमुच्चयवादी च भर्तृप्रपञ्चादीनां प्राचीनाचार्याणां प्रतिनिधिभूतः। अस्य भगवद्गीताभाष्यमपूर्णमेव [1]साम्प्रतमुपलभ्यते, छान्दोग्योपनिषद्भाष्यं च उद्धरणमुखेन[2] ज्ञायते। श्रीकण्ठरामानुजाचार्ययोः पौर्वापर्यविषये विवदन्ते विपश्चितः। तत्र श्रीकण्ठः शैवविशिष्टाद्वैतवादी, रामानुजाचार्यश्च विशिष्टाद्वैतवादमङ्गीकुरुते।

साम्प्रतमुपलभ्यमानानि भाष्याणीमानि सन्ति—

१. शङ्कराचार्यस्य निर्विशेषाद्वैतप्रतिपादकं शारीरकभाष्यम्।

---

१. सम्पूर्णानन्दसंस्कृतविश्वविद्यालयतः सरस्वतीभवनग्रन्थमालायां भास्करीयं भगवद्गीताभाष्यं प्रकाशितम्।

२. भास्करीयं ब्रह्मसूत्रभाष्यं (पृ० ८४, १५५, २४०) द्रष्टव्यम्।

२. भास्कराचार्यस्य द्वैताद्वैतप्रतिपादकं भाष्यम् ।
३. श्रीकण्ठाचार्यस्य शैवविशिष्टाद्वैतप्रतिपादकं भाष्यम् ।
४. रामानुजाचार्यस्य विशिष्टाद्वैतप्रतिपादकं श्रीभाष्यम् ।
५. निम्बार्काचार्यस्य द्वैताद्वैतप्रतिपादकं भाष्यम् ।
६. मध्वाचार्यस्य द्वैतवादप्रतिष्ठापकं पूर्णप्रज्ञभाष्यम् ।
७. श्रीकराचार्यस्य वीरशैवीयशक्तिविशिष्टाद्वैतप्रतिपादकं भाष्यम् ।
८. वल्लभाचार्यस्य शुद्धाद्वैतप्रतिपादकमणुभाष्यम् ।
९. विज्ञानभिक्षोरविभागाद्वैतप्रतिपादकं विज्ञानामृतभाष्यम् ।
१०. बलदेवस्य अचिन्त्यभेदाभेदप्रतिष्ठापकं गोविन्दभाष्यम् ।
११. पञ्चाननतर्कवागीशस्य शाक्ताद्वयवादप्रतिपादकं शक्तिभाष्यम् ।

शङ्करभगवत्पादात् पूर्वमपि ये वृत्तिभाष्यादिप्रणेतारः समभूवन्, तेषां परिचयः श्रीमतां श्रद्धेयचरणानां श्रीश्रीगोपीनाथकविराजमहोदयानां हिन्दीभाषानुवादसहितस्य ब्रह्मसूत्रशाङ्करभाष्यस्य[1] भूमिकायां द्रष्टव्यः। तत्परवर्तिनोर्यादवप्रकाशनीलकण्ठभाष्ययोरुल्लेखः[2] समुपलभ्यते। साम्प्रतमुपलभ्यमानेषु भाष्येषु सूत्राणामधिकरणानां च संख्याविषये वर्तते महद् वैषम्यम् । तत्र ब्रह्मसूत्रभाष्यनिर्णय[3] इत्याख्ये ग्रन्थे (पृ० १९८) स्वामिश्रीचिद्घनानन्दपुरीमहाभागैरेवं निर्दिश्यते—

शङ्करमतेन	५५५ सूत्राणि,	१९१ अधिकरणानि ।
भास्करमतेन	५४१ ,,	१८९ ,,
रामानुजमतेन	५४५ ,,	१५७ ,,
निम्बार्कमतेन	५४९ ,,	१३५ ,,
मध्वमतेन	५६४ ,,	२२२ ,,
श्रीकण्ठमतेन	५४५ ,,	१८१ ,,
श्रीपतिमतेन	५४४ ,,	१७४ ,,
वल्लभमतेन	५५४ ,,	१६० ,,

१. भूमिकेयं "भारतीय संस्कृति और साधना" इत्याख्यस्य ग्रन्थस्य प्रथमे भागे "शांकर वेदान्त और अद्वैत प्रस्थान" इति शीर्षकेण आनुपूर्व्या मुद्रिता। तत्र (पृ० ७७-८९) विषयोऽयं द्रष्टव्यः ।
२. ब्रह्मसूत्रभाष्यनिर्णयाख्यस्य ग्रन्थस्य १९८ पृष्ठं द्रष्टव्यम् ।
३. ग्रन्थोऽयं काशीस्थरामकृष्णसेवाश्रमतः १९४३ ई० वर्षे प्रकाशितः ।

विज्ञानभिक्षुमतेन	५५५ ,,	न निर्णीतानि ।
बलदेवमतेन	५५८	,,

पूर्वोक्ते ग्रन्थे स्वामिपादैः शक्तिभाष्यस्य समावेशो नाक्रियत ।

श्रीमता बलदेवोपाध्यायेन "भारतीय दर्शन"[१] इत्याख्ये हिन्दीभाषा-ग्रथिते ग्रन्थे सूत्राणामधिकरणानां च संख्या भिन्नैव निर्दिष्टा । तद्यथा—

शङ्करमतेन	५५५ सूत्राणि	१९९ अधिकरणानि ।
रामानुजमतेन	५१५ ,,	१६० ,,
मध्वमतेन	५६४ ,,	२२३ ,,
निम्बार्कमतेन	५४९ ,,	१६१ ,,
श्रीकण्ठमतेन	५४४ ,,	१८१ ,,

अत्रोभयोर्ग्रन्थयोः सूत्राणामधिकरणानां च संख्यासु वैषम्यदर्शनाद् विषयोऽयं पुनः परीक्षणमपेक्षते । स्वामिपादैः प्राधान्येन सूत्राधिकरण-परीक्षापर एव ग्रन्थो लिखित इति द्वितीयस्य पाठ्यपुस्तकस्य मूलमपि मृग्यम् ।

भास्करः श्रीकण्ठश्च

भास्करः स्वकीये भाष्ये (पृ० ८५) मायावादं विगीतं विच्छिन्नमूलं माहायानिकबौद्धगाथितं मनुते । शङ्करभगवत्पादशिष्यः पद्मपादाचार्यश्च विवरणे—"कश्चित् क्षपणकपादावनतशिरोबिम्बः" इत्येवं भास्कराचार्यं विशेषयति । एवं च शङ्करभास्करयोः समसामयिकत्वमेवेति श्रीचिदानन्द-पुरीमहोदयाः साधयन्ति, तस्य दशमशताब्दीस्थितिस्थापकं मतं [२]चोन्मूल-यन्ति । वाचस्पतिमिश्रो भास्करमतं खण्डयति । तेनापि वाचस्पतिमिश्र-प्राग्भवत्वं भास्कराचार्यस्य सिद्ध्यतीति [३]पुरीमहोदयानामेव मतं सुविचारितं प्रतिभाति ।

श्रीकण्ठः—"चिदात्मैव हि देवोऽन्तःस्थितमिच्छावशाद् बहिः । योगीव निरुपादानमर्थजातं प्रकाशयेत् ॥" इति श्लोकं स्मरति (भा० २, पृ० २९) । अयं च श्लोको नवमशताब्दीभवस्य भट्टोत्पलस्य काश्मीरकस्य

१. सप्तमस्य संस्करणस्य १९६६ ई० वर्षे प्रकाशितस्य ३३७ पृष्ठं द्रष्टव्यम् ।

२. पूर्वोक्ते ग्रन्थे ७०-७१ पृष्ठे द्रष्टव्ये ।

३. पूर्वोक्ते ग्रन्थे ७१-७२ पृष्ठे द्रष्टव्ये ।

ईश्वरप्रत्यभिज्ञाकारिकायां (१।५।७) समुपलभ्यते। तेनोत्पलपरवर्तित्वं श्रीकण्ठस्य साधु सिद्धयति। श्रीकण्ठरामानुजयोः समसामयिकत्वं पौर्वापर्यं वा भाष्ययोरनयोर्गहनेनानुशीलनेन विषयाणामुद्धरणानां च सूक्ष्मेण तौलनिकेन परीक्षणेनैव निश्चीयेत।

श्रीमता डॉ० एस० एन० दासगुप्तमहोदयेन भारतीयानि दर्शनान्याधृत्य खण्डपञ्चकात्मक इतिहासग्रन्थो महता परिश्रमेण लिखितः। तत्र पञ्चमे खंडे श्रीकण्ठभाष्यमप्पय्यदीक्षितविरचितां शिवार्कमणिदीपिकां चाधृत्य ३६ तमोऽध्यायो वर्तते। अस्मिन्नेव खण्डे सिद्धान्तशैवमतस्य वीरशैवमतस्य च परिचायकौ ३४-३५ तमावध्यायौ स्तः। एवमेव शिवमहापुराणं पाशुपतं मतं चाधृत्य ३७-३८ तमावध्यायौ विद्येते। अत्रान्तिमे "शैवदर्शनस्य कतिपये महत्त्वपूर्णा ग्रन्थाः" इति शीर्षकेऽध्याये पाशुपतसूत्राणाम्, द्वयोस्तमिलग्रन्थयोः, सटीकस्य तत्त्वप्रकाशस्य, श्रीकरभाष्यस्य च परिचयः समुपन्यस्तः। अत्रत्यं सर्वमेवैतिहासिकं विवरणं सुपरीक्ष्यैव ग्राह्यम्।

वस्तुतस्तु—"द्वावाप्तौ तत्र च श्रीमच्छ्रीकण्ठलकुलेश्वरौ॥ द्विप्रवाहमिदं शास्त्रं सम्यङ्निःश्रेयसप्रदम्। पञ्चस्रोत इति प्रोक्तं श्रीमच्छ्रीकण्ठशासनम्॥" (३७।१४-१६) इति प्रतिपादयति काश्मीरकोऽभिनवगुप्ताचार्यस्तन्त्रालोके। भगवान् शिव एव श्रीकण्ठरूपेणावतीर्णः श्वेतादिलकुलीशान्तान् योगाचार्यान् पाशुपतं शास्त्रमुपदिदेश। शिवपुराणे (७।१।३२।११-१४) श्रौतः स्वतन्त्रश्चेति द्विविधः शिवागमः प्रदर्श्यते। तत्र स्वतन्त्रः शिवागमो दशधा अष्टादशधा च विभक्तः कामिकादिसमाख्याभिः परिचीयते। स्वतन्त्रोऽयं शिवागमः सिद्धान्तपदवाच्यः। श्रौतस्तु शतकोटिप्रविस्तरः। तत्र पाशुपतं व्रतं ज्ञानं चोच्यते। श्वेतादिलकुलीशान्ता अष्टाविंशतियोगाचार्याः शिवस्यांशावताराः, तेषां प्रत्येकं चत्वारः शिष्या इत्याहत्य चत्वारिंशदुत्तरशतं पाशुपताचार्याः पाशुपतस्य मतस्य[1] पुराणमहाभारतादिवर्णितस्य प्रवक्तारः। अन्तिमश्च पाशुपताचार्यो लकुलीशः स्वीयं लाकुलीशाख्यं पाशुपतं मतं प्रतिष्ठापयामास। तस्य पञ्चाध्यायात्मकं

---

१. अत्र पुराणपत्रिकायां रामनगरतः प्रकाशितायां (व० २४, अ० २) समाविष्टोऽस्मदीयः "पुराणवर्णिताः पाशुपता योगाचार्याः" इति शीर्षको निबन्धो द्रष्टव्यः।

पाशुपतं सूत्रं[1] कौण्डिन्यभाष्यसंवलितं साम्प्रतमप्युपलभ्यते। स्वतन्त्रस्य दशविधस्य शिवागमस्य, अष्टाविंशतिधा विभक्तस्य रुद्रागमस्य च प्रवक्तारः प्रणवादयो निधनान्ता आचार्याः[2] किरणादिषु सिद्धान्तागमेषु श्रूयन्ते।

श्रीकण्ठभाष्ये चतुर्थे मङ्गलाचरणपद्ये—"नमः श्वेताभिधानाय नानागमविधायिने" (पृ० ८) इत्येवं नानागमनिर्माता श्वेताचार्यो भाष्यकारेण स्तूयते। कूर्मपुराणे (१।५१ अ०) अष्टाविंशतियोगाचार्याः शिवावतारत्वेन वर्णिताः। शिवार्कमणिदीपिकाकारः—"अंशावतारानीशस्य योगाचार्याऩुपास्महे"(पृ० १) इति तृतीये मङ्गलाचरणपद्ये स्वीयां संमतिमत्र दर्शयति। तत्र श्वेताभिधानेन प्रथमेन योगाचार्येण के वा आगमग्रन्था रचिता इति गवेषणाया अयं विषयः। अत्र "नानाविधपाशुपताद्यागमनिमात्रे" (पृ० ९) इति स्पष्टायां व्याख्यायां सत्यामपि दासगुप्तमहोदयः[3] स्वमनीषिकया यत्किमपि कल्पयति। तत्सर्वं वाचकदन्धनमात्रम्।

अप्पय्यदीक्षितः

मद्रासविश्वविद्यालयतः प्रकाशितस्य "न्यू कैटलागस् कैटलागरम्" इत्याख्यस्य बृहत्सूचीपत्रस्य प्रथमे खण्डे (पृ० २६३-२६७) अप्पय्यदीक्षितः प्रथमो द्वितीयस्तृतीयश्चतुर्थ इत्येवं चत्वारस्तन्नामधेया विद्वांसस्तत्कृतयश्च उट्टङ्क्यन्ते। तेषु प्रथमोऽप्पय्यदीक्षित एव शिवार्कमणिदीपिकाकारः। तेन स्वयमेव स्वपितामहस्य नाम आचार्यदीक्षित इति, पितुश्च रङ्गराजमखिन् इति निर्दिश्यते। रङ्गराजमखिनः पञ्चमः पुत्रोऽयमिति विवरणदर्पणप्रामाण्येन, पितामहस्य च नामान्तरं नरसिंहदीक्षित इति, स च कृष्णराजदेवस्य (१५०९-१५२९ ई०) नृपतेः सभापण्डित आसीदिति च पूर्वोक्तबृहत्सूचीत एव ज्ञायते। शिवार्कमणिदीपिकाकारः स्वाश्रयदातारं चिन्नबोम्मनृपतिं स्मरति। चिन्नतिम्मः, चिन्नबोम्मः, वेङ्कटपतिरायश्चेति त्रयो राजानस्तस्य आश्रयदातार आसन्निति च बृहत्सूचीसम्पादकाः सप्रमाणं

१. त्रावणकोरविश्वविद्यालयतः १९४० ई० वर्षे प्रकाशितमिदं पाशुपतसूत्रपुस्तकं कौण्डिन्यविरचितपञ्चार्थभाष्यसहितम्।

२. लुप्तागमसंग्रहस्य प्रथमे भागे (पृ० १७-१८) संगृहीतानि किरणागमवचनानि समवलोकनीयानि।

३. डॉ. एस.एन. दासगुप्तमहोदयेन रचितस्य भारतीयदर्शनेतिहासस्य हिन्दीभाषायामनूदितस्य पञ्चमे खण्डे ६६-६७ पृष्ठे द्रष्टव्ये।

वर्णयन्ति। बहवो विद्वांसः पारम्परिकरूपेण प्रथमस्य अप्पय्यदीक्षितस्य समयः १५५२-१६२४ ई० वर्तत इति प्रतिपादयन्ति, किन्तु मद्रासविश्वविद्यालयशोधपत्रिकायाः १९२८ ई० वर्षाङ्कस्य २२५-२३७ पृष्ठेषु, १९२९ई० वर्षाङ्कस्य १४०-१६० पृष्ठेषु च तस्य समयः १५२०-१५९३ ई० इति निर्धार्यते। विषयेऽस्मिन् मद्रपुरीतः प्रकाशितस्य शिवाद्वैतनिर्णयस्य, वाणीविलासमुद्रणालयतः प्रकाशितस्य यादवाभ्युदयस्य च भूमिकाऽपि द्रष्टुं शक्यत इति च बृहत्सूचीसम्पादकाः सूचयन्ति।

१९८२ ई० वर्षे वाराणसीस्थकृष्णदाससंस्कृतग्रन्थमालायाम् अप्पय्यदीक्षितस्य आत्मार्पणस्तुतिः शङ्करनारायणकृतटीकासहिता प्रकाशिता। अस्य सम्पादको वर्तते श्रीमान् डॉ० कामेश्वरनाथमिश्रः। अत्र नीलकण्ठदीक्षितेन स्वकीये आनन्दसागरस्तवेऽप्पय्यदीक्षितस्य १०४ ग्रन्थानामुल्लेखः कृत इति, डॉ० एन० भूमेशन्महोदयेन रचिते हैदराबादनगरतः १९७२ ई० वर्षे प्रकाशिते "अप्पय्यदीक्षित" इत्याख्ये ग्रन्थे आंग्लभाषालिखिते समेषां ग्रन्थानामेषां विशिष्टं विवरणं विद्यत इति च स्वीयभूमिकायां सम्पादकः सूचयति। १०४ संख्याकानां ग्रन्थानां नामानि तत्रैव द्रष्टव्यानि। पूर्वोक्ते बृहत्सूचीपत्रे तु ग्रन्थानां तावती संख्या नास्ति। शिवार्कमणिदीपिकायाश्चतुःसूत्रीभागे दीक्षितमहोदयेन विधिरसायन-मध्वविध्वंसन-चतुर्मतसार-शिवतत्त्वविवेक-शैवकर्णामृताख्याः पञ्च ग्रन्थाः स्वीयाः स्वयमेव स्मृताः। अनयैव पद्धत्या सुपरीक्ष्य तन्निर्मितान् तदुद्धृतांश्च ग्रन्थान् पूर्वाचार्यैरनुमोदिता अप्पय्यदीक्षितग्रन्थानां १०४ संख्या सत्यापनीया।

उद्धृता ग्रन्था ग्रन्थकाराश्च

कालिदास-कैयट-कुमारसम्भव-न्यायभाष्य-व्यासभाष्यप्रभृतिभिर्ग्रन्थग्रन्थकारैः पुराणोपनिषदादिभिश्च वयं सर्वे परिचिताः स्मः। दीक्षितमहोदयो भवदासमत्र (पृ०३१) स्मरति। अनुमानतः १००-२००ई० भवस्य भवदासस्य वृत्तेरुल्लेखो भट्टकुमारिलविरचिते श्लोकवार्त्तिके (प्रतिज्ञासूत्रे, श्लो० ६३) समुपलभ्यते। "तस्य निमित्तपरीष्टिः", "सत्सम्प्रयोगे" (१।१।४-५) इति सूत्रवार्त्तिकयोरपि कुमारिलो भवदासमेव स्मरति। प्रपञ्चहृदयकारः (पृ० ३९) चतुरध्यायात्मकसङ्कर्षणकाण्डसहिताया द्वादशलक्षण्याः कर्ममीमांसाया आहत्य षोडशाध्यायानां वृत्तिकारो भवदास इति भणति। गुरुणा प्रभाकरेण रचिता शाबरभाष्यस्य लघ्वी टीका विवरणनाम्ना

प्रसिद्धा। भवनाथमिश्रेण (भवदेवेन) प्राभाकरमतानुयायिनः शालिकनाथस्य सिद्धान्तान् स्फुटीकुर्वताऽधिकरणव्याख्यानात्मको नयविवेकाख्यो ग्रन्थो रचितः। नयविवेके (पृ० २७५) स वाचस्पतिमिश्रं स्मरति। एकादशशताब्दीभव आनन्दबोधाचार्यश्च शब्दनिर्णयदीपिकायां नयविवेकमतं निर्दिशति। तेन दशमशताब्दीभवत्वं भवनाथस्य स्थापयितुं शक्यते। पूर्वोक्ते बृहत्सूचीपत्रे (भा० ९, पृ० ३४९-३५०) नयविवेकस्य सप्त व्याख्याग्रन्थानां विवरणं दृश्यते। तेनास्य ग्रन्थस्य महत्त्वं परिचीयते। मोक्षकारिकायाः (पृ० १३७), रौरववार्त्तिकस्य (पृ० १५६) च वचनं दीक्षितमहोदयाः समुद्धरन्ति। तत्र सद्योज्योतिःशिवाचार्यविरचिता मोक्षकारिकाऽष्टप्रकरणाख्ये[1] संग्रहे मुद्रिता वर्तते। रौरववार्त्तिककारस्य बृहस्पतिपादस्य, रौरववृत्तिकर्तुः सद्योज्योतिःशिवाचार्यस्य च परिचयोऽस्मदीये लुप्तागमसंग्रहद्वितीयभागस्य उपोद्घाते (पृ० ६३-६४) द्रष्टव्यः।

दीक्षितमहोदयो द्वादशे मङ्गलाचरणपद्ये "स्वप्नजागरयोः समं प्रभुः" (पृ० २) इति भणति। तत्समानैवोक्तिर्महेश्वरानन्दस्य महार्थमञ्जरीपरिमलेऽपि समुपलभ्यते—"जागरस्वप्नयोर्मध्यमध्यास्य महतीं दशाम्" (पृ० १९०) इति। दशाया अस्या वर्णनम्—"अनागतायां निद्रायां प्रनष्टे बाह्यगोचरे। सावस्था मनसा गम्या परा देवी प्रकाशते॥" (श्लो० ७४) इति विज्ञानभैरवश्लोके, "निद्रादौ जागरस्यान्ते यो भाव उपजायते। तं भावं भावयन् साक्षादक्षयानन्दमश्नुते॥" इति वासिष्ठदर्शनश्लोके च क्रियते। कृतेऽपि प्रयत्ने योगवासिष्ठे नोपलभ्यते श्लोकोऽयम्। बौद्धाचार्योऽद्वयवज्रो भास्करमतव्याख्यानावसरे—"अनागतायां निद्रायां प्रनष्टे बाह्यगोचरे। या भवेन्मनसोऽवस्था भावयेत् तां प्रयत्नतः॥" (अद्वयवज्रसंग्रहे, पृ० १६) इति विज्ञानभैरवश्लोकं किञ्चित् परिवर्त्य समुद्धरति। एवं च विज्ञानभैरव-भास्कर-श्रीकण्ठ-महेश्वरानन्द-अप्पय्यदीक्षितप्रभृतिभिर्व्याख्याताया योगपद्धतेर्दर्शनपद्धतेश्च साम्यं वैषम्यं चेदृशेषु प्रकरणेषु परीक्षणीयम्।

शिवार्कमणिदीपिकाकारेण प्रसङ्गवशादत्र (पृ० १५) दहराकाशस्य सततोदितप्रकाशता वर्णिता। सततोदितः (नित्योदितः) शान्तोदितश्चेति

---

१. भागद्वयात्मकस्य अष्टप्रकरणस्य द्वितीये भागे १९२५ ई० वर्षे वाणीविलासमुद्रणालये देवसालपुरीशिवागमसिद्धान्तपरिपालनसंघाध्यक्षैर्मुद्रापयित्वा प्रकाशितोऽयं ग्रन्थः।

द्वौ शब्दौ तन्त्रागमशास्त्रेषु श्रूयेते। तदत्र विशेषजिज्ञासुभिरस्मदीयः सात्वतसंहिताया उपोद्घातो[1] द्रष्टव्यः। षडङ्गन्यासेषु हुंफडादयः शब्दा विनियुज्यन्ते। स्तोभाक्षरत्वेन तानि दीक्षितमहोदयेन वर्णितानि, अनर्थकानि चेमानि पदानीति च (पृ० ६६)। भाष्यदीपिकयोः स्थितानामन्येषां विशिष्टानां विषयाणां परिचयोऽनुपदमेव प्रदीयते।

उद्धरणस्थलनिर्देशः

"ब्रह्माद्याः स्थावरान्ताश्च" (पृ० १७९-१८०) इत्यादयः श्लोका लिङ्गपुराणस्येत्यस्माभिरत्र सूचितम्। किन्तु तत्र त इमे श्लोका आनुपूर्व्या नोपलभ्यन्ते, दृश्यन्ते च ते शिवपुराणेऽत्रोद्धृतक्रमेणैवेति शिवपुराणत एवेमे श्लोका दीक्षितमहोदयेन गृहीता इति मन्तव्यम्। अन्यत्रापि बहुषु स्थलेषु दीक्षितमहोदयाः पुराणमिदं प्रमाणयन्तो दृश्यन्ते। तेन ज्ञायते तावत्पर्यन्तमस्य पुराणस्य प्रामाण्यं पूर्णतया प्रतिष्ठितमभवत्[2]।

आभाराभिव्यक्तिः

नैकेषां वैदिकानामन्येषां चोद्धरणानां स्थलनिर्देशस्त्वरितया गत्या ग्रन्थस्य प्रकाशनं परीक्षार्थिनां कृतेऽपेक्षितमिति धिया मुद्रणसमये विलम्बभिया परित्यक्त आसीत्। वाराणसेयानां महतां विदुषां सहयोगेन उद्धृतश्लोकार्धानुक्रमण्यां तादृशानां बहूनां वचनानां स्थलनिर्देशः कृत इति विशेषजिज्ञासुभिस्तत्परिशिष्टमवश्यमवलोकनीयम्। सर्वेषामस्माकमभिनन्दनार्हास्ते विद्वांसः सन्ति श्रीमन्तः पण्डितप्रवरा जनार्दनशास्त्रिपाण्डेय-बटुकनाथशास्त्रिखिस्ते-कैलासपतित्रिपाठि-सर्वेश्वरराजहंसमहोदयाः। श्रीमद्भिर्वेदान्तशास्त्रनिष्णातैर् एस् सुब्रह्मण्यशास्त्रिभिर्वेदान्तशास्त्रवचनानां स्थलानि निर्दिष्टान्येव, तैर्निर्दिष्टेन पथाऽस्माभिर्बहूनां वैदिकवचनानामपि स्थलानि गवेषितानि। एवं कृतेऽपि प्रयत्ने केषाञ्चन वाक्यानां स्थलनिर्देशः कर्तुं नापारीति चेखिद्यते चेतः।

---

१. सम्पूर्णानन्दसंस्कृतविश्वविद्यालयतो दुर्लभग्रन्थप्रकाशनयोजनायाः षष्ठपुष्पत्वेन १९८२ ई० वर्षे प्रकाशितोऽयं सभाष्यो ग्रन्थः।

२. प्रसङ्गेऽस्मिन्नस्मदीयः शिवपुराणीयं दर्शनमिति शीर्षको निबन्धस्तन्त्रयात्रायां काशीस्थरत्नामुद्रणालयतः प्रकाशितायां द्रष्टव्यः।

श्रीकण्ठभाष्यस्य शिवार्कमणिदीपिकासहितस्य चतुसूत्रीभागः सम्पूर्णानन्दसंस्कृतविश्वविद्यालयपरीक्षासु पाठ्यग्रन्थत्वेन निर्धारितः। यद्यपि सम्पूर्णस्य भाष्यस्याधुना पुनश्छायासंस्करणं संजातम्, किन्तु तस्य मूल्यमधिकं वर्तत इति कृपालुभिः काशीस्थज्ञानसिंहासनाधीश्वरैः श्री १००८ जगद्गुरुविश्वेश्वरशिवाचार्यमहास्वामिभिस्तेषां प्रियशिष्यैः सम्पूर्णानन्दसंस्कृतविश्वविद्यालये शक्तिविशिष्टाद्वैतवेदान्ताध्यापकैः डॉ० चन्द्रशेखरशर्ममहोदयैश्च प्रेरितोऽहमेतत्सम्पादनकार्यमकरवमिति सर्वेषामस्माकमभिनन्दनार्हावेतौ महानुभावौ।

दीक्षितमहोदयानामुभयमीमांसानिष्णातत्वं शिवार्कमणिदीपिकायां पदे पदे परिस्फुरति। अङ्गुलिगण्याः साम्प्रतं वर्तन्ते पूर्वमीमांसाशास्त्रनिष्णाता विद्वांसः। छात्राणामुपकाराय मीमांसाशास्त्रसंबद्धाः केचन विषयाः सरलया पद्धत्या उपस्थापिताः स्युरिति स्वामिप्रवरैः प्रार्थिताः पण्डितप्रवराः श्रीमन्तः पी. एन. पट्टाभिरामशास्त्रिणोऽस्माकं मीमांसाशास्त्रगुरवस्तदकार्षुरिति तेभ्यो नमोवाकं व्याहरामः। छात्राणामुपकाराय चात्र सम्पूर्णस्यापि चतुस्सूत्रीभाष्यस्य शिवार्कमणिदीपिकासहितस्य सारं समुपस्थापयामः।

भाष्यदीपिकयोः सारांशः

श्रीकण्ठभाष्ये सप्त, शिवार्कमणिदीपिकायां च तद्व्याख्यायां षोडश मङ्गलाचरणश्लोकाः सन्ति। तत्र श्रीकण्ठाचार्येण द्वाभ्यां श्लोकाभ्यां साम्बाय शिवाय नुतिर्निवेदिता। तृतीये श्लोके प्रपञ्चशिवयोः शेषशेषिभावः प्रदर्शितः। चतुर्थश्लोके नानापुराणवर्णितेष्वष्टाविंशतियोगाचार्येषु प्रथमाय नानागमविधायिने श्वेताचार्याय नमोवागुक्ता। पञ्चमे श्लोके पूर्वाचार्यैः कलुषितं व्याससूत्रं श्रीकण्ठेन निर्मलीक्रियत इत्यभाणि। षष्ठसप्तमश्लोकयोः परभाष्यादिभ्यो वैशिष्ट्यमस्य भाष्यस्य निदर्श्य शिवनिष्ठानामाचार्याणां भाष्यमेतन्महानिधिरित्युक्तम्।

अप्पय्यदीक्षितेन्द्रैस्तु द्वाभ्यां श्लोकाभ्यां भगवते शिवाय, तृतीयेन च श्वेतादिभ्यः पाशुपताचार्येभ्यः शिवावतारेभ्यो नुतिर्निवेदिता। चतुर्थेन आचार्यदीक्षिताभिधानाय स्वपितामहाय, पञ्चमेन च रङ्गराजमखिने पित्रे नमोवाग् व्याहृता। तदनु चतुर्षु श्लोकेषु यद्यपि वेदागमपुराणस्मृतिमहाभारतब्रह्मसूत्रादिष्वद्वैतसिद्धान्त एव प्रतिपाद्यते, परिगृहीतश्च स सिद्धान्तः शङ्कराचार्यप्रभृतिभिः, तथापि सा अद्वैतवासना भगवदनुग्रहेणैव प्राप्यते,

अनुग्रहश्च देवस्य चिद्रूपया शक्त्या सह सगुणं ब्रह्म ध्यायद्भिरेवाऽवाप्यत इति वेदव्यासेन ब्रह्मसूत्रेषु शिवाभिधं सगुणं ब्रह्म न्यरूपीति निदर्श्यते। दशमे श्लोके सगुणे शिवे ब्रह्मसूत्राणां तात्पर्यं प्रकटीकर्तुं श्रीकण्ठाचार्या उत्तमं भाष्यं प्रणीतवन्त इत्युक्त्वा एकादशेन तस्य भाष्यस्य गम्भीरता मादृशैर्बोद्धुमशक्येति विनेयता स्वीया प्रकाशिता। द्वादशेन चिन्नबोम्मनृपतेः शिवावतारत्वं निर्वर्ण्य ततो द्वाभ्यां श्लोकाभ्यां तदन्तःकरणे निवसतो भगवतः शिवस्याज्ञयैव मया भाष्यमेतद् व्याक्रियत इत्युक्तम्। अन्ते च श्लोकद्वयेन श्रीकण्ठीयभाष्यस्य पुष्पकविमानवदिच्छानुरूपां विशालताम्, स्वीयव्याख्यानस्य च रत्नाकरगतकतिपयरत्नोपलब्धितुल्यतां प्रदर्शयता व्याख्यात्रा पुनरपि स्वीया विनीतता प्रकटीकृता।

ततो भाष्यकारीयमङ्गलाचरणप्रथमश्लोकव्याख्यानावसरे व्याख्याकारेणोपनिषन्महाभारतपुराणादिप्रामाण्येन शिव एव परं ब्रह्मेति प्रसाध्य श्लोकगतैरोमित्यादिभिश्चतुर्भिर्विशेषणैः परब्रह्मणि शिव एव सर्वेषां वेदान्तानां समन्वयः प्रदर्शितः।

पञ्चमश्लोकव्याख्यानावसरे जैमिन्यादिसूत्रेषु क्लिष्टाध्याहारादिदोषान् प्रदर्श्य, पूर्वाचार्यैः कलुषितानि ब्रह्मसूत्राणीति तत्र कतिचन निदर्शनानि समुपस्थाप्य, विदुषां ब्रह्मदर्शन इत्यत्र विदुषामिति षष्ठीविभक्तेः ब्रह्मदर्शन इत्यत्र समासस्य च युक्तियुक्तता सप्रमाणं प्रतिपादिता।

जिज्ञासाधिकरणारम्भे भाष्यकारः—"इहौपनिषदी मीमांसा समारभ्यते" (पृ० २०) इत्याह। अत्र व्याख्याकारो धर्म(कर्म)मीमांसाशास्त्रेण ब्रह्ममीमांसाया अगतार्थतामुक्त्वा उपनिषन्मीमांसाशब्दयोर्व्युत्पत्ति पक्षान्तरसंगतिं च प्रदर्श्य धर्म(कर्म)मीमांसाशास्त्रे कार्यपरवेदभागविचार एव वृत्तो न ब्रह्मपरवेदान्तभागविचार इति धर्मविचारशास्त्रेण ब्रह्मविचारस्य सिद्ध्यभावात् तदर्थमिदं शास्त्रमारम्भणीयमिति सप्रमाणं साधयति, शास्त्रस्यास्य अनुबन्धचतुष्टयं च प्रदर्शयति। अत्र केचन धर्मशब्दस्य कर्मब्रह्मोभयसाधारणतां प्रदर्श्य अलौकिकश्रेयःसाधनस्य तस्य बलवदनिष्टाननुबन्धित्वमप्यङ्गीकृत्य धर्म(कर्म)मीमांसाशास्त्रेणैव ब्रह्मविचारोऽपि वृत्त इति ब्रह्मविचारशास्त्रस्यास्य अनारम्भणीयतां प्रतिपादयन्ति। सर्वमेतत् सयुक्तिकं निरस्य व्याख्याकारो धर्मविचारशास्त्रेण ब्रह्मविचारस्य सिद्ध्यभावात् तदर्थमिदं शास्त्रमारम्भणीयमिति साधयति।

प्रथमसूत्रगताथशब्दार्थविचारः

प्रथमं ब्रह्मजिज्ञासाधिकरणं प्रस्तुवन् भाष्यकारो विषयसंशयपूर्वपक्षसिद्धान्तनिर्णयसङ्गतीनामाधारत्वमधिकरणत्वमित्यधिकरणपदव्याख्यां विधाय प्रथमसूत्रगतस्याथशब्दस्य आनन्तर्यार्थतां प्रतिपाद्य तस्याधिकारार्थतां मङ्गलार्थतां च निषेधति।

अत्र प्राभाकरा धर्मवद् ब्रह्मणोऽपि वेदैकसिद्धत्वादनधीतवेदस्य तद्विचारानुपपत्तेरष्टवर्षत्वादियुक्तब्राह्मणाद्युपयुक्तोपनयनसंस्कारपूर्वकस्य स्वाध्यायोऽध्येतव्य इति स्वविधिप्रयुक्ततया नित्यप्राप्तस्य नियमोपासिताचार्यमुखलब्धाक्षरग्रहणरूपस्यार्थज्ञानफलस्य वेदाध्ययनस्य ब्रह्मविचारात् पूर्वभावित्वं प्रतिपादयन्ति। भाष्यकारस्त्वध्ययनविधेर्धर्मविचाराङ्गतामङ्गीकुर्वन्नपि धर्मविचारस्यैव ब्रह्मविचारात् पूर्वभावित्वं साधयति; न वयं धर्मब्रह्मविचारयोरत्यन्तभेदवादिनः, किन्त्वेकत्ववादिनः, धर्मब्रह्मणोराराधनाराध्यभूतयोः प्रतिपादकम् "अथातो धर्मजिज्ञासा" (जै. १.१.१) इत्यारभ्य "अनावृत्तिः शब्दात्" (ब्र० ४.४.२२) इत्येतावत्पर्यन्तमेकमेव शास्त्रम् (पृ० ४९) इति च स वदति।

भाष्यकारो हेत्वन्तरेणापि ब्रह्मविचारस्य धर्मविचारानन्तर्यतामुपपादयति। तथाहि—अथवा धर्मस्य ब्रह्मबोधे हेतुत्वात् तद्विचारोपयुक्तानां श्रुतिलिङ्गादीनां वेदचोदनार्थवादस्मृत्यादिप्रामाण्यप्रतिपादनादीनां ब्रह्मविचारोपयुक्तत्वाच्च धर्मविचारानन्तरं ब्रह्मविचारः, साधनं विना साध्यानिष्पत्तेः। ब्रह्मबोध प्रति धर्मस्य साधनत्वे तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्तीति श्रुतिरेव भगवती प्रमाणमिति (पृ० ५०-५५)।

अत्रेयं शङ्का समुन्मिषति यत् कर्मणो ब्रह्मबोधसाधनत्वे तदेव विचार्यमनुष्ठेयं च, किमनेन वेदान्तवाक्यविचारप्रयासेनेति ? तन्न, तस्य फलाभिसन्धिरहितस्य पापापनयनरूपचित्तशुद्धिसम्पादनद्वारा बोधहेतुत्वात्। तथा च गौतमस्मृतिः—"यस्यैते चत्वारिंशत् संस्काराः" इत्यादिना "स ब्रह्मणः सायुज्यं सालोक्यं च गच्छति" इत्यन्तेन गर्भाधानादिसकलकर्मणां पापमलापकर्षसंस्कारहेतुतां प्रकाशयति। अतो यावदुत्पद्यते ज्ञानं तावदनुष्ठेयानि कर्माणि, न ततः परम्। (पृ० ५६-५९)

ननु विविदिषन्तीति श्रवणात् कर्मणां ज्ञानेच्छासमुदयपर्यन्तमनुष्ठानमिति चेत् ? न सारमेतत्, इच्छाया अपुरुषार्थत्वात्। अतः कर्मणां ब्रह्म-

बोधसाधनानां विचारस्यानन्तरं ब्रह्मबोधकशास्त्रारम्भः समुचितः। ननु कर्मब्रह्मविचारयोः क्रमनियमः कथमुपपद्यत इति चेत्? 'विद्यां चाविद्यां च यस्तद्वेदोभयं सह", "सत्येन लभ्यस्तपसा ह्येष आत्मा सम्यग्ज्ञानेन ब्रह्मचर्येण नित्यम्" इत्यादिका ज्ञानकर्मसमुच्चयवादिन्यः श्रुतय उपलभ्यन्ते। ततः कर्मज्ञानयोर्मोक्षैकफलत्वात् तद्विचारयोरपि क्रमनियमो युक्तः। यद्यप्यक्षरग्रहणमात्रपर्यवसायित्वमध्ययनविधेस्तथापि विचारयोर्न प्रवृत्त्यसम्भवः, साङ्गाध्ययनेनापाततः पदार्थमात्रप्रतीतेः। तदनु ब्रह्मस्थूलोपासनज्योतिष्टोमादिविधायकानां वाक्यानां सूक्ष्मोपासनभूतदहरादिविद्याविधायकानां च परस्परविरोधाभासं पश्यंस्तद्विचारे पुरुषार्थाकाङ्क्षी पुरुषः स्वयमेव प्रवर्तते। ततो नानिबन्धनो विचारः। (पृ० ६०-७४)

ननु श्रोतव्य इति वाक्येन वेदान्तश्रवणं साक्षाद् विधीयत इति चेन्न, विधित्वप्रयोजकरूपसम्पत्त्यभावात्। तथा हि—वेदान्तश्रवणं नापूर्वविधिगोचरः, प्राप्तत्वात्। प्राप्तिश्च—वेदान्तश्रवणं स्वविषयोपात्तावगतिसाधनम्, शास्त्रश्रवणत्वात्, वैद्यशास्त्रश्रवणवदित्यादिभिरनुमानैः। न चास्य नियमविधिगोचरत्वम्, अवघातादिवत् कस्यचिद् दृष्टफलस्योपायान्तरस्याप्राप्तेः। न च परिसंख्याविधिविषयत्वम्, एवं हि वेदान्ताः श्रोतव्या एव नाध्येतव्या इति पर्यवस्येत्। तथा सत्यनधीतवेदान्तानां विचारायोगात् पुरुषार्थासम्भवः। यदि वेदान्तश्रवणस्य परिसंख्यापरत्वं कर्मकाण्डश्रवणनिषेधपरत्वरूपमिति विचारस्तदा विचाराभावात् कर्मानुष्ठानासम्भवः। तदभावे चित्तशुद्ध्यभावाद् ज्ञानानुत्पत्तिः स्यात्। एवं श्रवणविधौ निराकृते सति ब्रह्मविचारे पुरुषार्थाकाङ्क्षी पुरुषः स्वयमेव प्रवर्तत इत्येव मन्तव्यम्। (पृ० ७४-९६)

ततः सकलचिदचित्प्रपञ्चाकारपरमशक्तिविशिष्टाद्वितीयवैभवस्य सकलनिगमसारसामरस्यनिधानस्य भवशिवशर्वपशुपतिपरमेश्वरमहादेवरुद्रशम्भुप्रभृतिपर्यायवाचकशब्दसारप्रकाशितपरममहिमविलासस्य स्वशेषभूतनिखिलचेतनसमुपासनानुगुणसमुदितनिजप्रसादसमर्पितपुरुषार्थसार्थस्य परब्रह्मणः प्रतिपादकमुपनिषच्छास्त्रं विचारणीयम्। तन्नियोगरूपचोदनालक्षणस्य तदाराधनविशेषसाधनरूपस्य तत्तदर्थवादप्रकाशितप्राशस्त्यविलासस्य श्रुत्यादिसम्पादितसकलाङ्गपुङ्खितस्य स्वप्रमाणानुगुणश्रुतिस्मृतीतिहासपुराणाभियुक्तसूक्तिसन्दर्भकृतोपबृंहणस्य विधिनिषेधविकल्पसमुच्चयोत्सर्गापवादबाधाभ्युच्चयादिमतो निखिलपुरुषार्थरत्नाकरस्य परमप्रबोध-

साधनस्य भगवतो धर्मस्य विचारानन्तरमित्यथशब्दार्थोऽत्र भाष्ये निर्णीतः। (पृ० ९६-११२)

अत्र व्याख्याकारोऽथशब्दार्थविचारपरस्य भाष्यग्रन्थस्य विस्तरेण व्याख्यानं विदधाति। प्रथमं स "स्वाध्यायोऽध्येतव्यः" इति वाक्यविहितस्याध्ययनविधेः स्वरूपं विशदयति, तदनु जैमिनिबादरायणप्रणीतयोर्धर्मब्रह्मविचारशास्त्रयोरैकशास्त्र्यं निषेधति, अनयोः सनिदर्शनं भिन्नाभिप्रायप्रतिपादकत्वं च साधयति। "उपपद्यतां वा कथञ्चिदैकशास्त्र्यम्" (पृ० ५२) इत्येवं प्रौढ्या तदभ्युपगम्यापि तस्य प्रयोजनं पृच्छति, भाष्यकारोपस्थापितं (पृ० ५०) मतान्तरं च विशदयति (पृ० ५३)।

ज्ञानकर्मसमुच्चयवादिन आचार्याः श्रूयन्ते। तेषु श्रीकण्ठाचार्योऽन्यतमः। अत्र भाष्यकारेण संक्षेपेणोपस्थापितं वादममुं टीकाकारो विस्तरयति, पुनरपि चाध्ययनविधिविचारमातनोति। अत्रैव प्रसङ्गेन पूर्वोत्तरमीमांसयोः कथं नाम प्रतीयमानाः परस्परविरोधाभासाः परिह्रियन्त इति प्रतिपाद्याध्ययनविधेर्नाक्षरग्रहणमात्रपर्यवसायित्वमपि त्वर्थज्ञानपर्यन्तत्वमवश्यमङ्गीकरणीयमित्युपपादयति। ततः श्रोतव्य इति वाक्येऽपूर्वनियम-परिसंख्याविधयः कथं नाम नोपपद्यन्त इत्यतिविस्तरेण पूर्वमीमांसायां व्याख्यातानि विधिवाक्यानि समुद्धरन् गहनं विचारयति।

भाष्यकारः सौत्रेण ब्रह्मपदेन शिवोऽभिधीयत इत्येतदुपपादयितुं विशेषणचतुष्टयेन तद्विशिनष्टि, कैश्चन विशेषणैः कर्ममीमांसाशास्त्रोपदिष्टस्य धर्मस्य स्वरूपं च दर्शयति। व्याख्याकारः सर्वानेतान् विशेषणान् श्रुतिस्मृतिपुराणागमादिप्रामाण्येन सार्थकयति, द्वादशलक्षण्याः पूर्वमीमांसाया अध्यायपादगतविषयांश्च सनिदर्शनमतिविस्तरेण समुपस्थापयति।

अतःशब्दार्थविचारः

अथशब्दार्थविचारानन्तरं भाष्यकारोऽतःशब्दार्थविचारमातनोति। तद्यथा—अतःशब्दोऽयं वृत्तस्य हेतुभावे वर्तते। यतोऽधीतवेदेन धर्मो विचारितोऽतस्तदनुष्ठानसम्पन्नचित्तशुद्धिना तत्कालसम्पन्नविवेकादिगुणसहकृतपरमभक्तिसंभावितेनानेन ब्रह्मापि निरतिशयनिःश्रेयसकरं विचारणीयमिति (पृ० ११२-१२०)। अत्र व्याख्याकारो ननु पूर्ववृत्तस्य धर्मविचारस्य हेतुत्वमथशब्देनैव द्योतितम्, तस्य नियतसामग्रीरूपत्वाभावे पूर्ववृत्तत्वेन ग्रहणानुपपत्तेः। अतोऽयमतःशब्दो निरर्थक इत्याशङ्क्य तत्साफल्यप्रतिपादकं

भाष्यवचनमवतारयति, तदाशयं च विशदयति। ततः पुनरपि व्याख्याकारेण धर्मविषयकं मीमांसकमतमुपस्थाप्य प्रकरणसमाख्ययोः स्वरूपं च प्रदर्श्य भाष्यगतविवेकादिशब्दानामर्थः स्फुटीक्रियते।

ब्रह्मजिज्ञासापदस्यार्थः

एवमथातःशब्दौ व्याख्याय भाष्यकारः—"ब्रह्मणो जिज्ञासा ब्रह्मजिज्ञासेति कर्मणि षष्ठी" (पृ० १२०) इत्येवं प्रथमसूत्रगतान्तिमपदं विश्लेषयति, व्याख्याकारश्च प्रसङ्गेऽस्मिन् "विदुषां ब्रह्मदर्शने" (पृ० ९) इति मङ्गलाचरणपद्यगतव्याख्यानं (पृ० १७) स्मारयति।

प्रथमाधिकरणगतविषयसंशयादिनिरूपणम्

"विषयसंशयपूर्वपक्षसिद्धान्तनिर्णयसङ्गतीनामाधारत्वमधिकरणत्वम्" (पृ० ३०-३१) इत्यधिकरणलक्षणं भाष्यकारेण निर्दिष्टम्। तल्लक्षणमत्र संगमयन् भाष्यकारः प्रथमाधिकरणस्य विषय-सन्देह-पूर्वपक्षान् प्रदर्श्य सविषयं सप्रयोजनं च वेदान्तश्रवणं सिद्धान्तत्वेन व्यवस्थापयति—"अस्य तु वेदान्तशास्त्रस्य प्रमाणयुक्त्याभासप्रतिभासवशात् सन्देहास्पदं ब्रह्म विषयो भवति" (पृ० १३९) इति, "पाशविच्छेदलक्षणा भक्तिः प्रयोजनं चास्तीति" (पृ० १४०) इति। संशयस्य स्वरूपं च—"निरस्तसमस्तोपप्लवकलङ्कनिरतिशयज्ञानानन्दादिशक्तिमहिमातिशयवत्त्वं हि ब्रह्मत्वम्। अनाद्यज्ञानवासनावष्टम्भविजृम्भितविचित्रकर्मफलभोगानुगुणबहुशरीरप्रवेशनिर्गमव्यापारपरवशनिस्सीमतापसहिष्णुत्वं तु जीवत्वम्। कथमेतयोः परस्परविलक्षणयोरेकभावमाहुः श्रुतयः" (पृ० १२७-१२८) इत्येवंविधं भाष्य एव स्पष्टम्। व्याख्याकारेण च सर्वमेतत् श्रुतिस्मृतिशैवागमादिप्रामाण्येन स्पष्टतरं व्याख्यातमिति तत एव द्रष्टव्यम्। प्रसङ्गवशादत्र दीक्षितेन्द्रेण द्वैतवादिनो माध्वाः समालोचिताः, स्वीयो मध्वविध्वंसनाख्यो ग्रन्थश्च समुद्धृतः।

द्वितीयं जन्माद्यधिकरणम्

"इहोद्दिष्टस्य ब्रह्मणो यन्निश्चायकं तल्लक्षणं किमित्याकाङ्क्षायां तल्लक्षणाभिधायकं द्वितीयाधिकरणमवतारयति भगवान् सूत्रकारः" (पृ० १४१-१४५) इत्येवं भाष्यकारो द्वितीयाधिकरणसूत्रमवतारयति, संगतिं च द्वयोरधिकरणयोः संदर्शयति। व्याख्याकारश्चात्र नैयायिकसंमतान्युद्देश-

प्रमाणप्रयोजनादिलक्षणानि सम्यग् व्याख्याय शास्त्राध्यायपादाधिकरण-संगतीश्च प्रदर्श्य, द्विविधं लक्षणदोषमुद्धृत्य तन्निराकृत्य च लक्षणस्य प्रयोजनमुपपादयति। तदनु टीकाकारो नैयायिकोक्तं संशयलक्षणमुपस्थाप्य, काव्यशास्त्रपूर्वमीमांसोत्तरमीमांसागतवाक्यविचारपुरस्सरं महता डम्बरेण संशयस्वरूपं विचार्य, वृद्धनैयायिकोक्तसंशयलक्षणे स्वसंमतिं प्रदर्श्य च द्वितीयाधिकरणगतसंशयं सम्यगुपस्थापयति।

अत्र केचिदाद्यस्य सर्गादौ प्राथमिकस्य हिरण्यगर्भस्य जन्म यतो भवति, "यो ब्रह्माणं विदधाति पूर्वम्" इति श्रुतेः, तद् ब्रह्मेति सूत्रार्थमाहुः। तन्निरासाय भाष्यकारः स्वयमेव "जन्मादि अस्य यतः" (पृ० १५३) इति सूत्रपदच्छेदं प्रदर्शयति, "जन्मादिकं जन्मस्थितिप्रलयतिरोधानानुग्रहरूपं कृत्यमस्य चेतनाचेतनसंमेलनसमरसीभूतस्य प्रपञ्चविलासस्य यतो यस्मात् तद् ब्रह्मेति शेषः" (पृ० १५३-१६३) इत्येवं च सूत्रपदानि स्पष्टयति।

कृत्यपञ्चकम्

अत्र भाष्यकारेण शैवशाक्ताद्यागमसंमतं कृत्यद्वयमधिकं व्यावर्ण्यते। अनाद्यावरणरूपस्य तिरोभावस्य कथं परमेश्वरकर्तृकत्वमिति प्रश्नस्य समाधानं च व्याख्याकारेण क्रियते। व्याख्याकारो ह्यत्र योगसूत्र-योगभाष्य-आपस्तम्बधर्मसूत्रप्रभृतीन् समुद्धरन् प्रसङ्गवशात् सिद्धानां स्वरूपमुपपादयति, तिरोभावस्वरूपप्रतिपादकानि त्रीणि मतानि समुद्धृत्य तानि समालोच्य च भाष्यकारसंमतं तत्स्वरूपं निदर्शयति। दीक्षितेन्द्रा अत्र—"स्थितिः कथं परमेश्वरकार्येषु परिगण्यते ? सृष्टं यावन्न संहरति तावत् तस्य स्थितेः स्वतः एव सिद्धेः" (पृ० १५७) इति प्रश्नमुपस्थाप्य तस्य समाधानं प्रस्तुवन्ति, "केचित्तु प्रपञ्चान्तर्गतचेतनाचेतनपदार्थानां परमेश्वरनियुक्तस्वस्वकार्यकरणेन मर्यादायामवस्थितिः स्थितिरित्याहुः" (पृ० १५८) इति तल्लक्षणं च समर्थयन्ति। ततः परं व्याख्याकारा लक्षण-विषयिणीं नैयायिकमर्यादां विचार्य सूत्रगतमस्येतिपदं यत इति पदं च विवृण्वते।

षाड्गुण्यम्

एवं ब्रह्मलक्षणं प्रदर्श्य भाष्यकारो यतो वेत्यादिना (पृ० १६३) द्वितीया-धिकरणस्य विषयम्, अत्र जगतो जन्मादिकं ब्रह्मणो लक्षणतया संभवति न वेति (पृ० १६८) सन्देहम्, न संभवति संबन्धाभावादित्यादिना पूर्वपक्षं

च समुपस्थाप्य "यद्यपि जन्मादेर्जगन्निष्ठत्वेन ब्रह्मण्यसंबन्धः, तथापि ताटस्थ्येन लक्षणत्वं युज्यते। यत् सर्वज्ञत्वादिविशिष्टमष्टाभिधानाधिकरणं शिवतत्त्वं तदेव जगत्कारणं ब्रह्मेत्युच्यते। आनन्दादीनामत्रैव धर्माणां पर्यवसानं भवति"(पृ० १६९-१७०)इति सिद्धान्तं च स्थापयति। सर्वज्ञत्वादिपदेन सर्वज्ञत्वं नित्यतृप्तत्वमनादिबोधत्वं स्वतन्त्रत्वमलुप्तशक्तिमत्त्वमनन्तशक्तिमत्त्वं चेत्याख्यं महेश्वरस्य षाड्गुण्यं परिगृह्यत इति स्वयं भाष्यकार एवाह। एतच्च महेश्वरस्य षाड्गुण्यम्—

सर्वज्ञता तृप्तिरनादिबोधः स्वतन्त्रता नित्यमलुप्तशक्तिः।
अनन्तशक्तिश्च विभोर्विधिज्ञाः षडाहुरङ्गानि महेश्वरस्य॥

इत्येवं पुराणागमादिषु प्रतिपाद्यते। भाष्यकारेण सर्वेषामेषां गुणानां पदव्याख्या स्वयमेव वितानितेति तत एवावलोकनीयोऽयं विषयः (पृ० १७१-१७६)।

अभिधानाष्टकम्

सर्वज्ञत्वादिविशिष्टमिति ब्रह्मविशेषणं व्याख्याय भाष्यकारो द्वितीयमष्टाभिधानाधिकरणमिति विशेषणमपि भवशर्वेशानपशुपतिरुद्रोग्रभीममहादेवाभिधानाष्टकस्याधिकरणं वाच्यं परं ब्रह्म (पृ०१७६) इत्येवं संक्षेपेण व्याख्याय तदनु भवादिशब्दान् सर्वान् श्रुत्युदाहरणमुखेन व्युत्पादयति (पृ० १७७-१८२), "निरस्तसमस्तसंसारकलङ्कतया निखिलमङ्गलाधारतया शिवतत्त्वं यदवगम्यते, तदुक्तस्वभावतया सकलजगज्जन्मादिकारणं भवति, तत्र तादृशमहिम्नि जगदुभयकारणत्वसम्भवात्। तदेतादृशमहत्त्वाद् ब्रह्मेत्युच्यते। तदेव शिवशब्दवाच्यमानन्दादिधर्माश्रयतया सिद्धम्।....मायां तु प्रकृतिं विद्यादिति मायायाः प्रकृतित्वमीश्वरात्मिकाया एव, मायिनं तु महेश्वरमिति वाक्यशेषात्। सूक्ष्मचिदचिद्विशिष्टं ब्रह्म कारणम्, स्थूलचिदचिद्विशिष्टं तत्कार्यं भवति। अतो जगज्जन्मादिलक्षणं ब्रह्मेति सिद्धान्तः" (पृ० १८२--१९२) इत्येवं चाधिकरणमुपसंहरति।

अत्र व्याख्याकारः प्रायो भाष्यपदान्येव सम्यग् व्याकरोति। केवलं "यदा तमः" इति मन्त्रव्याख्यानप्रसङ्गेन भाष्यसूचितमर्थं विशेषेण स्पष्टीकरोति, नारायणादिपदानां श्रुतिसूत्रपुराणादिप्रामाण्येन शिवे पर्यवसानं प्रदर्शयन् हिरण्यगर्भनारायणादीनां जगज्जन्मादिकारणत्वं निषेधति, अन्ततश्च विष्णुवासुदेवादिपदानामप्यन्यदेव प्रवृत्तिनिमित्तमिति प्रतिपाद्य

"तस्मादुक्तन्यायानुगृहीतस्वतःप्रबलमन्त्रोपनिषन्मन्त्रजातबलाच्छिव एव जगत्कारणमित्येतदुपपन्नम्" (पृ० १८३-१९१) इत्येवं प्रकरणमुपसंहरति।

तृतीयं शास्त्रयोनित्वाधिकरणम्

"लक्षणप्रमाणाधीना हि वस्तुसिद्धिः" (पृ० १९३) इत्युक्त्वा जगत्कारणं ब्रह्म किंप्रमाणकमित्यापृच्छ्य च भाष्यकारस्तृतीयं शास्त्रयोनित्वादिति सूत्रमवतारयति। ततो "यतः शास्त्रं योनिः प्रमाणम्,अत एव जगज्जन्मादि-लक्षणं ब्रह्म भवतीति शेषः" (पृ० १९३) इति सूत्रार्थं प्रदर्श्य सन्देहपूर्वपक्षौ वर्तमानाधिकरणगतौ निदर्शयति—"अत्र जगत्कारणं ब्रह्म शास्त्रैकगम्य-मुत प्रमाणान्तरेणापि गम्यमिति सन्देहः। जगदिदं सावयवं कार्यमेव। तच्च वैचित्र्यगर्भितत्वेन स्वोचितकर्तृकमिति कल्पनीयः सर्वज्ञत्वादिमान्। नासौ शास्त्रैकगम्य इति नास्मिन् शास्त्रस्य प्रामाण्यम्, शास्त्रस्य प्रमाणा-न्तराप्राप्तविषयत्वादिति पूर्वपक्षः" (पृ० १९३-२०५) इति। सिद्धान्तस्तु—जगत्कारणं ब्रह्म वेदान्तशास्त्रैकगम्यम्, नावेदविन्मनुते तं बृहन्तमित्यादिषु वेदान्तशास्त्रमन्तरेण ब्रह्मणो बोधासम्भवश्रवणात्। यदुक्तं सावयवत्वात् कार्यत्वासिद्धौ प्रपञ्चस्य कर्ता समुचितः कल्प्य एक इति, तदसत्, विचित्र-रचनस्य गोपुरप्रासादादेर्बहुकर्तृकत्वदर्शनात्। तथा च नानुमानेनैककर्तृक-त्वसिद्धिः, व्याप्तिबलेन तस्य कर्मपारवश्यादिप्रसङ्गश्च। हेतोः पक्षधर्मता-बलादनुमानेन जगतो विलक्षणैककर्तृकत्वसिद्धावपि निमित्तोपादानशक्ति-युक्तैककर्तृकत्वासिद्धिर्नास्ति। ततो वेदान्तशास्त्रैकम्यं तत्प्रमाणकं ब्रह्मेति सिद्धमिति (पृ० २०७-२१२)।

नैयायिका अनुमानप्रमाणादीश्वरं साधयन्ति। तेषां मतमत्र व्याख्याकारो विस्तरेण पूर्वपक्षभाष्यव्याख्यानप्रसङ्गे समुपस्थापयति (पृ० १९४-२०१)। शास्त्रैकगम्य एवार्थे शास्त्रस्य प्रामाण्यम्, न तु प्रमाणान्तरविषयेऽपि। यतोऽनुमानप्रमाणगम्यमपि ब्रह्म, अतोऽत्र शास्त्रप्रामाण्यं न प्रवर्तेतेति सम-ग्रस्य प्रकरणस्याभिप्रायः। अत्र प्रमाणान्तरविषयेऽपि शास्त्रस्य प्रामाण्यं दृश्यते, यथा व्रीहीनवहन्तीति शास्त्रस्यावहनन इति मीमांसकाः प्रत्यवतिष्ठन्ते। अमुमपि पक्षं व्याख्याकारः सम्यग् विचारयति (पृ० २०१-२०६), सिद्धान्तभाष्यव्याख्यानप्रसङ्गे च पूर्वोक्तं नैयायिकमतं सम्यगालोचयति (पृ० २०७-२१३)।

वर्णकान्तरम्

कुत्रचित् शास्त्रयोनित्वाधिकरणमेतदन्यथा व्याख्यायते। तत्रत्यं व्याख्यानं वर्णकान्तरमुखेन भाष्यकार इत्थं समुपस्थापयति—अनेन सूत्रेण पूर्वाधिकरणप्रतिपादितजगत्कारणत्वसिद्ध्युपयोगी सर्वज्ञत्वं ब्रह्मणः शास्त्राणां वेदानां योनित्वात् कारणत्वात् सिद्ध्यतीत्यपि प्रतिपाद्यत इति केचिदाहुः। सूत्रस्य सूचनात्मकस्यार्थद्वयाभिधाने श्लेषकाव्यवद् वाक्यभेदादिदोषाभावात् पुनरधिकरणान्तरप्रस्तावः। अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेद इत्यादिः श्रूयतेऽस्य विषयः। ब्रह्मणो वेदकर्तृत्वं युक्तं न वेति सन्देहः। न युक्तमिति पूर्वपक्षः, वाचा विरूपनित्ययेत्यादेर्वाचो नित्यत्वप्रतिपादिकायाः श्रुतेर्विरोधात्, वेदानां ब्रह्मकार्यत्वे पौरुषेयत्वादप्रामाण्यप्रसङ्गाच्च। तस्माद् ब्रह्मणो वेदकर्तृता कथमिति प्राप्ते ब्रूमः—युक्तमेव ब्रह्मणो वेदकर्तृत्वम्, अस्य महतो भूतस्येत्यादिश्रुतेर्निःश्वसितवद् वेदराशेरप्रयत्नेन ब्रह्मणः प्रादुर्भावावगमात्, "अष्टादशानामेतासां विद्यानां भिन्नवर्त्मनाम्। आदिकर्ता कविः साक्षात् शूलपाणिरिति श्रुतिः॥" इति परमेश्वरस्य सकलविद्याकर्तृत्वप्रतिपादनाच्च। सृष्टेः प्राक् स्वात्मनि विलीनानां वेदानां पूर्वपूर्ववर्णानुपूर्व्यनुरूपरचनया पुनः कर्ता भवति सर्वज्ञः परमेश्वरः। अत एव वेदानामपौरुषेयत्वमीश्वरकार्यत्वं च। येषां रागद्वेषादयस्तेषां वचनं प्रमाणमप्रमाणमपि भवति। निरस्तसमस्तदोषकलङ्कस्य निरुपप्लवनिरतिशयज्ञानप्रत्यक्षानुभूयमानत्रैकालिकवस्तुविलासस्य स्वतःप्रमाणस्य परमेश्वरस्य परमाप्तस्यावाप्तसमस्तकामस्य शिवस्य ब्रह्मणो वचनं तु प्रमाणमेव भवति। "ईशानः सर्वविद्यानामीश्वरः सर्वभूतानाम्", "स नो देवः शुभया स्मृत्या संयुनक्तु" इति हि परमेश्वरस्य सर्वविद्याप्रवर्तकत्वं शुभस्मृतिहेतुत्वं च श्रूयते। अतः सर्ववस्त्ववभासकानां वेदानां परमेश्वरकर्तृकतया परमेश्वरस्य सर्वज्ञता निश्चीयते, अज्ञातस्य वक्तुमशक्यत्वात्।

ननु परमेश्वरस्य सर्वज्ञत्वं नाम वेदोक्तसकलपदार्थाभिज्ञत्वम्, तर्हि महर्षीणामपि वेदार्थवेदिनां सर्वज्ञत्वं सिद्धम्। किमत्र वैषम्यमिति चेन्न, तत्कर्तुरीश्वरस्याधिकं ज्ञानमस्ति। व्याकरणादेरधिकार्थविदां हि पाणिनिप्रभृतीनां तत्प्रणेतृत्वं दृश्यते। वेदश्च सर्वार्थावभासकोऽपि न सर्वं मुख्यतः प्रकाशयति, किन्तु किमपि लक्षणया किमपि सामान्येन किमपि विशेषेण। परमेश्वरः सर्वसाक्षी सर्वं प्रत्यक्षयतीति वेदेश्वरयोरेतावद् वैषम्यमिष्यते।

ननु परमेश्वरस्यैव वेदकर्तृत्वमिति न नियमः, "षड्ढोता वै भूत्वा प्रजापतिरिदं सर्वमसृजत ऋचो यजंषि सामानि" इत्यादिश्रवणाद् हिरण्यगर्भादेरपि तत्कर्तृत्वावगमादिति चेन्न, हिरण्यगर्भोत्पत्तेः प्रागपि वेदानां सद्भावात् । श्रूयते हि—"यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै" इति । यः सर्वदेवानामादिमस्य हिरण्यगर्भस्यापि कर्ता, तस्मै सर्वान् वेदानुपदिशति, स एव सर्वाधिको वेदकर्ता परमदेशिकः । तथा हि श्रुत्याऽभिव्यज्यते—"यो देवानां प्रथमं पुरस्ताद् विश्वाधिको रुद्रो महर्षिः । हिरण्यगर्भं पश्यत जायमानं स नो देवः शुभया स्मृत्या संयुनक्तु ॥" इति । महर्षिर्वेदकर्ता यः सर्वज्ञत्वादिना विश्वस्माच्चिदचित्प्रपञ्चादधिको रुद्रः परब्रह्मभूतः सर्वेषां देवानामिन्द्रादीनां प्रथममादिमं हिरण्यगर्भं ब्रह्माणं स्वसङ्कल्पेन प्रकृतेरुपादानात्मनो जायमानं सृष्टिकाले सर्वज्ञानोपायसकलवेदोपदेशरूपयाऽपश्यत्, स परमदेशिको नः अस्मानपि सकलसंसारपाशमहानर्थनिवृत्तिहेतुभूतया परमामृतलक्ष्मीसमावेशपरानन्दप्राप्तिकारिण्या, अत एव परममङ्गलरूपया वेदान्तसारसामरस्यसिद्धया स्मृत्या बोधकलया स्वविषयया संयोजयत्विति तात्पर्यम् । ततः सकलवेदकर्तृत्वमीश्वरस्यसिद्धम् । वाचो नित्यत्वश्रुतिरीश्वरेण पूर्वसमानुवृत्त्या विहितत्वाद् वेदानामविरुद्धा । ततो वेदानामीश्वरप्रणीतत्वं नित्यत्वं चाविरुद्धमेवेति (पृ० २१३-२२९) ।

अत्र व्याख्याकारोऽष्टादशानामेतासां विद्यानामिति श्लोकोपदिष्टा अष्टादशविद्याः सम्यक् प्रदर्शयति (पृ० २१६-२१७), तार्किकाणां वेदपौरुषेयत्वानुमानानि, पूर्वमीमांसकानां तदकर्तृकत्वानुमानानि च निरस्य वेदानामीश्वरप्रणीतत्वं नित्यत्वं च भाष्योक्तं स्थापयति (पृ० २१९-२२९) ।

चतुर्थं समन्वयाधिकरणम्

अधिकरणसंगतिप्रदर्शनपूर्वकं चतुर्थाधिकरणं भाष्यकार इत्थमवतारयति—प्रथमाधिकरणे जिज्ञास्यतया प्रतिपादितस्य परब्रह्मणः शिवस्य परिज्ञाने लक्षणापेक्षायां द्वितीयाधिकरणेन लक्षणं जगज्जन्मादिरूपमभिहितम् । तस्मिन् किं प्रमाणमित्याकाङ्क्षायां तृतीयाधिकरणेन वेदान्तशास्त्रस्य तद्विषये प्रामाण्यं तन्मूलत्वं च निरूपितम् । येन यदव्यभिचारेण सिद्ध्यति तद्धि तस्य प्रमाणमुच्यते । वेदान्तवाक्यानां कथं वा ब्रह्मसाधकत्वमित्याकाङ्क्षायां चतुर्थाधिकरणमवतार्यते—तत्तु समन्वयादिति (पृ० २३०-२३६) । अत्र व्याख्याकारः प्रमाकरणं प्रमाणमिति तार्किकाभिमतं प्रमाणलक्षणं समालोच्य, अप्राप्ते शास्त्रमर्थवदिति मीमांसकमर्यादां परीक्षते ।

ततः परं भाष्यकारः—तच्छब्देन प्रकृतं ब्रह्म परामृश्यते। तुशब्देन सर्वाणि वेदान्तवाक्यानि समाह्रियन्ते। समन्वयशब्देन तात्पर्येण संबन्ध उच्यते। तद् ब्रह्म वेदान्तवाक्यानि तात्पर्यलिङ्गसंबन्धाद् बोधयन्तीति सूत्रार्थं प्रदर्श्य विषयसंशयपूर्वपक्षानुपस्थापयति—अस्य सर्वाणि वेदान्तवाक्यानि विषयः। वेदान्तवाक्यानां ब्रह्मबोधकत्वं युक्तं न वेति संशयः। सर्वत्र संबन्धग्रहणसापेक्षं शब्दस्यार्थावबोधकत्वम्। शब्दार्थयोः संबन्धज्ञानमन्तरेण हि पुरुषस्य शब्दार्थप्रत्ययो न भवति। संबन्धज्ञानं च वृद्धव्यवहारसापेक्षम्। व्यवहारश्च कार्यैकगोचरः। तथा हि—गामानय, गां बधानेति वृद्धवाक्यश्रवणसमनन्तरं प्रवर्तमानं प्रयोज्यवृद्धमवगम्य पार्श्वस्थो व्युत्पित्सुरेवमवधारयति सर्वथाऽयं कार्यावगतिसमनन्तरमेव प्रवर्तते। सा च कार्यावगतिरेतस्मादेव वाक्यात् समुत्पन्ना, अन्यथा कथमस्यैतद्वाक्यश्रवणसमनन्तरं प्रवृत्तिरिति। पुनर्गवानयनबन्धनदर्शनात् कार्यविशेषं निश्चिनोति। तदेवं कार्यार्थत्वाद् व्युत्पत्तेर्न सिद्धे ब्रह्मणि शब्दस्य प्रामाण्यम्। किञ्च, कार्यविशेषत्वाज्जगतः कर्तृविशेषस्य ब्रह्मणोऽनुमानादपि सिद्धेः कथमस्मिन्नप्राप्तविषयाणां वेदान्तवाक्यानां प्रामाण्यम्। अथवा विधिपराण्येव वेदान्तवाक्यानि न ब्रह्मपराणि। उभयपरत्वे वाक्यभेदः स्यात्। अतो वेदान्तवाक्यानां न ब्रह्मबोधकत्वं युक्तमिति पूर्वः पक्षः (पृ० २३७-२४२)। अत्र व्याख्याकारः शक्तिग्रहं व्याकरणोपमानेत्यादिकं श्लोकमनुद्धृत्याऽपि तत्रत्यं सर्वं विषयजातमुपस्थापयति, पूर्वपक्षभाष्यं च सम्यग् विशदयति (पृ० २३७-२४०)। ततः परं जगत्कर्तुरनुमानतः प्राप्तिर्वेदान्तवादिभिरप्यवश्यं समर्थनीयेति पूर्वपक्षं प्रतिष्ठापयति (पृ० २४१-२४२)।

एवं विषयसंशयपूर्वपक्षान् प्रदर्श्य भाष्यकारोऽस्याधिकरणस्य सिद्धान्तमेवं स्थापयति—सर्वेषां वेदान्तवाक्यानां ब्रह्मबोधकत्वं युक्तमिति सिद्धान्तः, तात्पर्यलिङ्गसमन्वयेन ब्रह्मबोधनसमर्थत्वात्। कार्यार्थत्वाद् व्युत्पत्तेर्न सिद्धे ब्रह्मणि शब्दस्य प्रामाण्यमिति यदुक्तम्, तदसत्, पुत्रस्ते जात इत्यादिषु सिद्धार्थेष्वपि वाक्येषु संबन्धग्रहणदर्शनात्। वृद्धव्यवहारेऽपि व्युत्पित्सुः स्वस्य प्रवृत्तिहेतुभूतायाः कार्यावगतेः पदार्थज्ञानपूर्वकत्वावगमात् प्रयोज्यवृद्धस्य प्रयोजकवाक्यं पदार्थज्ञानमुत्पादयतीति निश्चिनोति। ततः सिद्धार्थेष्वपि शब्दस्याभिधाननिश्चयः। अथवा किमिह वृद्धव्यवहारेण, व्युत्पत्तेः प्रकारान्तरेणापि सिद्धत्वात्। तथा हि—बाला मात्रादिभिः शिशुपशुप्रभृतीनर्थानङ्गुल्यादिना निर्दिश्य तत्तच्छब्दांस्तेषु प्रयुञ्जानैर्बहुशः

शिक्षितास्तेषु तेष्वर्थेषु व्युत्पद्यन्ते। काव्यनाटकानभिज्ञाः पुरुषास्तदभिज्ञ-पुरुषसमीपमेत्य पदविच्छेदं कृत्वाऽस्य शब्दस्यायमर्थं इति सर्वशब्दानामर्थ-मवगच्छन्ति। अतः सिद्धार्थेऽपि व्युत्पत्तिसम्भवात् तत्र शब्दस्य प्रामाण्य-मस्ति। ततो वेदान्तवाक्यानां ब्रह्मणि प्रामाण्यम्। यदुक्तं जगतः कार्य-विशेषत्वात् कर्तृविशेषस्य ब्रह्मणोऽनुमानादपि सिद्धिरिति, तन्न संभवति, विचित्ररचनस्य रथप्रासादादेरनेककर्तृकत्वदर्शनादनुमानेनास्य जगत एक-कर्तृकत्वसाधनायोगात्, व्याप्तिबलात् कर्मदृश्यत्वादीनां कर्तरि प्राप्तेश्च पूर्वमुक्तत्वात्। अतो नानुमानगम्यं ब्रह्म भवति। किञ्च, श्रुत्यानुगुण्यादनु-मानमपि ब्रह्मणि प्रमाणं भवतु नाम। यत्र वाक्यानां तात्पर्यं तत्र हि तेषां प्रामाण्यं न प्रत्यक्षादीनामिव सर्वत्रेति (पृ० २४२-२५०)।

अत्र अङ्गुलिनिर्देशसहितवाचकशब्दप्रयोगदर्शनमात्रेण कथं बालोऽस्य शब्दस्यायमर्थ इति निश्चिनुयादिति प्रश्नं समुपस्थाप्य टीकाकारो महाभाष्य-प्रामाण्यं प्रस्तौति, तदनुगुणं च बहुशः शिक्षिता इति सिद्धान्तभाष्यग्रन्थं लापयति (पृ० २४७-२४९)।

तात्पर्यनिर्णायकानि लिङ्गानि

एवं पूर्वपक्षखण्डनपुरस्सरं सिद्धान्तं व्यवस्थाप्य भाष्यकारो वेदान्त-वाक्यानां ब्रह्मणि तात्पर्यनिर्णायकानि लिङ्गानि पूर्वाचार्यकारिकया परि-गणयति—"उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम्। अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये॥" इति, "तदिह उपक्रमादिभिर्लिङ्गैर्वेदान्तवाक्यानां ब्रह्मणि तात्पर्यं निश्चीयते। य उपक्रमादिभिस्तात्पर्यनिर्णयस्तदेव वेदान्तवाक्यानां श्रवणमित्युच्यते। तथा ह्युच्यते—"अज्ञानप्रभवं दुःखं ज्ञानं तस्य निव-र्तकम्। सर्ववेदान्तवाक्यानां श्रवणं तत्प्रवर्तकम्॥ श्रवणं नाम वाक्यानां वैदिकानां परात्परे। उपक्रमादिभिर्लिङ्गैः शिवे तात्पर्यनिर्णयः॥" इति च वक्ति। ततः परम्—"उपक्रमोपसंहारावेकं लिङ्गं वेदान्तवाक्यानां ब्रह्मणि शिवे तात्पर्यनिर्णये। तत्र तात्पर्यं नाम तत्स्वरूपोपासनाविषयत्वम्" इत्यादिना पूर्वोदाहृतश्लोकगत-उपक्रमोपसंहार-अभ्यास-अपूर्वता-फल-अर्थ-वाद-उपपत्तिपदानि सनिदर्शनं विवेचयति (पृ० २५१-२५७)।

ब्रह्मपरास्तज्ज्ञानविधिपराश्च वेदान्ताः

एवं वेदान्तानां ब्रह्मणि तात्पर्यं प्रसाध्य उपासनाविधिष्वपि तेषां तात्पर्यमावश्यकमिति भणति भाष्यकारः—न केवलं ब्रह्मपरा वेदान्ताः,

किन्तु "आत्मा वा अरे द्रष्टव्यः" इत्यादिषु तज्ज्ञानविधिपरा अपि ज्ञायन्ते। उभयपरत्वे वाक्यभेदप्रसङ्ग इति यदुक्तं तन्न, रूपप्रत्यायकेन चक्षुषा यथा द्रव्यस्यापि सिद्धिस्तथा विधिपरैरपि वेदान्तैर्ब्रह्मसिद्धिरिति नोभयपरत्व-विरोधः। शाब्दं हि ब्रह्मज्ञानम्। तद् ब्रह्मवाचिशब्दादेव प्राप्तम्। तद्विधिना किं प्रयोजनमिति चेत्, प्राप्तावपि मन्त्रादिष्विव विधेरविरोधः। यथा द्रव्य-देवतादिप्रकाशकेषु मन्त्रेष्वधीयमानेषु द्रव्यादिज्ञाने जातेऽपि पुनरनुष्ठानकाले मन्त्रैरनुस्मर्तव्यमिति प्रयोगविधिर्ज्ञानान्तरमनुष्ठापयति तथात्रापि।

ननु ब्रह्मज्ञानस्य विधेयत्वमनुपपन्नम्, आत्मा वा अरे द्रष्टव्य इत्यादौ नित्ये ब्रह्मणि निर्विकारे विशुद्धे चात्मनि न कर्मकारकभावो युज्यते, येन विधिसंभवः, उत्पत्तिप्राप्तिविकारसंस्काराणामत्रासंभवात्। अतो वेदान्तानां न ब्रह्मज्ञानविधिपरत्वमिति चेन्न, आत्मनि कर्मत्वप्रयुक्तोत्पत्त्याद्यभावेऽपि कर्तृस्थमोक्षफलाय विध्युपपत्तेः। प्राप्ते कथं विधिरिति चेत्, प्राप्तिः पाक्षिकी नित्या वा। उभयथापि नियमादिविधिः संभवति।

ननु तथा सति वेदान्तानां विधिपरत्वेन ब्रह्मपरत्वमनुपपन्नम्। यदुक्तं रूपप्रत्यायकेन चक्षुषा द्रव्यसिद्धिवद् विधिपरैरपि वेदान्तैर्ब्रह्मसिद्धिरिति, तदयुक्तम्, चक्षुर्हि सम्प्रयोगे सति निरपेक्षमेव प्रतिवस्तु प्रमापकम्। न तथा शब्दः, किन्तु यत्र तात्पर्यं तत्र प्रमाणम्। तस्माद् वेदान्तानां ब्रह्म-प्रमापकत्वं ब्रह्मज्ञानविधायकत्वं च न सम्भवतीति चेन्न, समिधो यजती-त्यादीनां वाक्यानां पञ्चप्रयाजविधायकत्वं तदनुष्ठानक्रमविधायकत्वं चेत्यु-भयपरत्वदर्शनाद् वेदान्तवाक्यानामपि ब्रह्मप्रमापकत्वं ब्रह्मज्ञानं मोक्षोप-कारकं प्रति विधायकत्वं च युक्तमेवेति (पृ० २५७-२६३)।

ब्रह्मपराण्युपासापराणि च वाक्यानि

एवं वेदान्तानां ब्रह्मणि विधौ च तात्पर्यसत्त्वादुभयत्रापि प्रामाण्यं सिद्धमित्युपसंहरन् भाष्यकारो ब्रह्मपरवाक्यान्युपासनापरवाक्यानि च विविच्योदाहरति—तस्मात् सत्यं ज्ञानमनन्तं ब्रह्म, आनन्दो ब्रह्म, आकाश-शरीरं ब्रह्म सत्यात्म प्राणारामं मनआनन्दं शान्तिसमृद्धममृतम्, ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम् ऊर्ध्वरेतं विरूपाक्षमिति सत्यज्ञानानन्तं स्वात्मारामम्उपशान्तसकलोपद्रवकलङ्कं सकलमङ्गलात्मकं परमशक्त्यविना-भूततया शबलरूपत्वेन कृष्णपिङ्गलं विरूपाक्षं त्रिलोचनं ब्रह्म उपक्रमादि-तात्पर्यलिङ्गैर्निरूप्यते। यो वेद निहितं गुहायाम्, इति प्राचीनयोग्योपास्वेति

ज्ञानाविनाभूतं तदुपासनं च विधीयते। सर्वान् कामानित्यादिषु सकलकामावाप्तिर्ब्रह्मणा सहोपासकानामवगम्यते।

अतो निष्कामनिजधर्मोपेतो निषिद्धकाम्यकर्मरहितो यथाश्रुतिस्मृतिचोदितकर्मानुष्ठानसम्पन्नचित्तशुद्धिः शमाद्यनुगृहीतपरमशिवभक्तिभावित एव मुमुक्षुः श्रुतिसारेभ्यः शिवाभिधेयं परं ब्रह्म विदित्वा तदुपासीतेति ज्ञानोपासनाविधिरुपपन्नः। अत्र शिवोपपदग्रहणं विरूपाक्षस्य ब्रह्मणः परमविशुद्धिमङ्गलभाजनत्वान्मुमुक्षूणामुपासनैकविषयत्वद्योतनार्थम्। तथाऽथर्वशिखायां शिव एको ध्येयः शिवङ्करः सर्वमन्यत् परित्यज्येति श्रूयते शिवशब्दवाच्यस्य वस्तुन एव ध्येयत्वमिति। अन्यथा कथं संसारनिवृत्तिः स्यात्। निरस्तसमस्तदोषकलङ्कनिरतिशयमङ्गलाधारत्वं हि शिवत्वम्। यद्विज्ञानान्मोक्षरूपं फलमुच्यते। "यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः। तदा शिवमविज्ञाय दुःखस्यान्तो भविष्यति॥" इति, "शिव एको ध्येयः शिवङ्करः सर्वमन्यत् परित्यज्य" इति शिवव्यतिरिक्तस्य मुमुक्षूणां ध्येयत्वं परिसंख्यायते। अतः शिव एव परं ब्रह्म मोक्षकामैर्ध्यातव्यो ज्ञातव्यश्चेति। अतस्तात्पर्यलिङ्गसमन्वयेन ब्रह्मपरा वेदान्तास्तदुपासनापराश्चेत्यविरोध इति (पृ० २६६-२६८)।

एवमत्र संक्षेपेण चतुःसूत्रीभाष्यस्था विषया विचारिताश्छात्राणामुपकाराय। प्राक्कथनोपस्थापितान् मीमांसाशास्त्रसंबद्धान्, अत्रोपस्थापितानन्यांश्च विविधान् विषयानधीत्य तेषु शास्त्रानुशीलनरुचिरुत्पद्येत चेत्, सफलोऽयं परिश्रमः स्यादित्येवोक्त्वा साम्प्रतं विरम्यते॥

श्रावणी पूर्णिमा, २०४३ वि० — **व्रजवल्लभद्विवेदः**

वाराणसी। — १९-८-८६ ई०

विषयानुक्रमणी

	पृष्ठसंख्या
शुभाशंसनम्	३-४
प्रकाशकविज्ञप्तिः	५-६
प्राक्कथनम्	७-१६
प्रस्तावना	१७-३९

ग्रन्थस्य उपोद्घातः

मङ्गलाचरणं टीकाकृत्कृतं पितृपितामहवन्दनं च	१
श्रीकण्ठभाष्यवैशिष्ट्यं तद्व्याख्यानप्रतिज्ञा च	२
चिन्नबोम्मनृपतिप्रेरणयाऽत्र प्रवृत्तिरिति प्रदर्शनम्	२
प्रथमश्लोकव्याख्यानप्रसङ्गेन परमात्मा शिवादन्य इति पक्षनिरासः	२
विशेषणचतुष्टयमुखेन शिवस्वरूपप्रतिपादनम्	४
शक्तिसहितः शिव एवोपनिषदादिप्रतिपाद्यः	७
श्वेताचार्यवन्दनम्	८
पूर्वाचार्यैः कलुषितं व्याससूत्रमिदं श्रीकण्ठेन प्रसाद्यते	९
जैमिनिसूत्रेषु क्लिष्टाध्याहारादिदोषप्रदर्शनम्	९
व्याससूत्राणां सर्वदोषरहितत्वम्	१२
व्याससूत्राणि पूर्वाचार्यैः कलुषितानीत्यत्र कानिचन निदर्शनानि	१३
विदुषां ब्रह्मदर्शने—इत्यत्र षष्ठीविभक्तेः समासस्य च समर्थनम्	१७
श्रीकण्ठीयभाष्यवैशिष्ट्यवर्णनम्	१८

१—जिज्ञासाधिकरणम्

औपनिषद्या मीमांसाया समारम्भः	२१
धर्म-ब्रह्म-उपनिषदादिपदार्थविचारः	२१
धर्ममीमांसाशास्त्रे कार्यपरवेदभागविचार एव कृतो न ब्रह्मपर-वेदान्तभागविचारः	२२
अनुबन्धचतुष्टयविचारः	२७
प्रथमाधिकरणप्रथमसूत्रावतारणम्	३०

अधिकरणपदार्थविचारः ३०
अथशब्दस्यानन्तर्यार्थत्वम्, न तु मङ्गलार्थत्वम् ३१
स्वाध्यायाध्ययनविधिविचारः ३४
वेदाध्ययनस्य ब्रह्मविचारात् पूर्वभावित्वम् ३९
धर्मवद् ब्रह्मणोऽपि वेदैकगम्यत्वम् ४२
धर्मब्रह्मविचाररूपयोः शास्त्रयोर्नात्यन्तिको भेदः ४९
अथवा धर्मविचारानन्तरं ब्रह्मविचारो विधेयः ५०
अत्र भगवती श्रुतिरेव प्रमाणम् ५५
ज्ञानोत्पत्तिपर्यन्तं कर्मणामनुष्ठानम् ५६
कर्मब्रह्मविचारयोः क्रमनियमपरीक्षा ६१
ज्ञानकर्मसमुच्चयवादविमर्शः ६४
अध्ययनविधेरक्षरग्रहणमात्रपर्यवसायित्वम् ६६
श्रवणविधेरप्रवर्तकत्वम् ७४
नियमविधिपरिसंख्याविधिविचारः ८४
सौत्रेण ब्रह्मपदेन विशेषणचतुष्टयान्वितः शिवोऽभिधीयते ९७
तन्नियोगेत्यादिभिः सप्तभिर्विशेषणैर्धर्मस्वरूपविमर्शः १०१
द्वादशलक्षण्या धर्ममीमांसाया प्रतिपाद्यविषयसंक्षेपः १०२
अथशब्दार्थनिर्णयानन्तरमतःशब्दार्थविचारारम्भः ११२
ब्रह्मजिज्ञासापदस्यार्थः १२०
प्रथमाधिकरणविषयसन्देहपूर्वपक्षोपक्षेपः १२२
ब्रह्मविचारशास्त्रस्य समारम्भणीयताप्रयोजनम् १२६
ब्रह्मजीवयोर्लक्षणनिर्देशः १२७
सन्देहान्तरोपस्थापनम् १२८
बहुधा सन्दिग्धं ब्रह्म विचारार्हं भवति १२८
ब्रह्मविचारप्रयोजनोपपादनम् १२९
सविषयप्रयोजनं वेदान्तशास्त्रमिति ब्रह्मविचारशास्त्रस्यास्य सोद्देश्यत्वम् १३०
वेदान्तशास्त्राधिकारिणः पाशविच्छेदलक्षणा भक्तिः प्रयोजनम् १३२

२—जन्माद्यधिकरणम्

ब्रह्मलक्षणविचारारम्भः १४१
नैयायिकोक्त-उद्देशलक्षणपरीक्षा १४१

ब्रह्मलक्षणाभिधायकद्वितीयाधिकरणावतारणम् १४५
अधिकरणादिसंगतिप्रतिपादनम् १४५
द्विविधलक्षणदोषविचारः १४५
नैयायिकोक्तसंशयलक्षणपरीक्षणम् १४८
वृद्धनैयायिकोक्तसंशयलक्षणाङ्गीकरणम् १५१
मतान्तरेण सूत्रव्याख्यानं तत्खण्डनं च १५२
कृत्यपञ्चकनिरूपणम् १५३
तिरोभावस्यापि परमेश्वरकर्तृकत्वम् १५४
योगशास्त्रोक्ताः सिद्धयः १५४
तिरोभावविषयकाणि मतमतान्तराणि १५५
स्थितेरपि कार्यत्वसिद्धिस्तल्लक्षणं च १५७
नैयायिकोक्तलक्षणमर्यादापरीक्षा १५९
सूत्रगतस्य अस्यपदस्य व्याख्यानम् १६१
सूत्रगतस्य यत इति पदस्य व्याख्यानम् १६२
द्वितीयाधिकरणगतविषयसन्देहपूर्वपक्षोपक्षेपः १६३
अचेतनाया मायाया जगत्कारणत्वपरीक्षा १६८
सर्वज्ञत्वादिविशिष्टमष्टाभिधानाधिकरणं शिवतत्त्वमेव जगत्कारणं ब्रह्म १७०
सर्वज्ञत्वनित्यतृप्तत्वादिशिवषाड्गुण्यनिरुक्तिः १७०
भवशर्वेत्यादिशिवाभिधानाष्टकनिरुक्तिः १७६
नानाश्रुतिस्मृतिपुराणादिप्रामाण्येन शिवस्यैव ब्रह्मत्वसाधनम् १८२
शिवस्यैव आनन्दादिधर्माश्रयत्वम्, तस्यैव च जगज्जन्मादिकारणत्वम् १९१

३—शास्त्रयोनित्वाधिकरणम्

जगत्कारणं ब्रह्म किंप्रमाणकमिति प्रश्नमुखेन शास्त्रयोनित्वाधिकरणावतारणम् १९३
जगत्कारणं ब्रह्म शास्त्रैकगम्यमुत प्रमाणान्तरगम्यमपीति सन्देहः १९४
पूर्वपक्षप्रदर्शनम् १९४
जगत्कर्तृत्वविषयकनैयायिकमतसमीक्षा १९५
प्रमाणान्तरविषयेऽपि शास्त्रस्य प्रामाण्यं वर्तते न वा ? २०१
मीमांसकमर्यादाविमर्शः २०५
जगत्कारणं ब्रह्म वेदान्तशास्त्रैकगम्यमिति सिद्धान्तोपस्थापनम् २०७
पूर्वपक्षनिरसनम् २०७

भाष्यान्तरप्रदर्शितवर्णकान्तरनिरसनम् २१३
ब्रह्मणो वेदकर्तृत्व-अष्टादशविद्याविधातृत्वसमर्थनम् २१६
तार्किक-मीमांसकोपस्थापितानुमाननिरासः २१९
शास्त्रप्रामाण्यविचारः २२२
परमेश्वरस्यैव सर्वज्ञत्वं नान्येषां पाणिनिप्रभृतीनाम् २२३
वेदेश्वरयोः किञ्चिदिव वैषम्यम् २२५
परमेश्वरस्यैव वेदकर्तृत्वम् २२६
वेदानामीश्वरप्रणीतत्वं नित्यत्वं च २२८

४—समन्वयाधिकरणम्

पूर्वाधिकरणत्रयविषयपरामर्शः २३०
चतुर्थाधिकरणसंगतिप्रदर्शनम् २३२
वेदान्तवाक्यानां कथं वा ब्रह्मसाधकत्वमिति चतुर्थाधिकरणारम्भः २३६
सूत्रार्थनिरूपणम् २३७
समन्वयाधिकरणविषयसंशयपूर्वपक्षप्रदर्शनम् २३७
वेदान्तवाक्यानां ब्रह्मबोधकत्वं युक्तमिति सिद्धान्तः २४२
सिद्धेऽपि ब्रह्मणि शब्दस्य प्रामाण्यमिति समर्थनपुरस्सरं पूर्वपक्ष-निरसनम् २४३
ब्रह्मणोऽनुमानादपि सिद्धिरिति पक्षस्यापि खण्डनम् २५०
वेदान्तवाक्यानां ब्रह्मणि तात्पर्यनिर्णायकान्युपक्रमादीनि लिङ्गानि २५१
उपक्रमादिपदानां सोदाहरणं व्याख्यानम् २५२
ब्रह्मपरा वेदान्तास्तज्ज्ञानविधिपराश्च २५२
विधिविषयकविचारः २५८
वेदान्तानां विधिपरत्वं ब्रह्मपरत्वं च २६२
विरूपाक्षं त्रिलोचनं ब्रह्म उपक्रमादिभिस्तात्पर्यलिङ्गैर्निरूप्यत इति शिव एव परं ब्रह्म २६६

परिशिष्टानि

ग्रन्थग्रन्थकार-मतमतान्तरसूची २६९
संकेतसूची २७३
उद्धृतवचनानुक्रमणी २७५

——

ॐ

शिवाभ्यां नमः

श्रीमच्छ्रीकण्ठाचार्यकृतं

ब्रह्मसूत्रभाष्यम्

श्रीमदप्पयदीक्षितकृतशिवार्कमणिदीपिकासहितम् ।

ॐ नमोऽहंपदार्थाय लोकानां सिद्धिहेतवे ।
सच्चिदानन्दरूपाय शिवाय परमात्मने ॥ १ ॥

यस्याहुरागमविदः परिपूर्णशक्तेरंशे कियत्यपि निविष्टममुं प्रपञ्चम् ।
तस्मै तमालरुचिभासुरकन्धराय नारायणीसहचराय नमः शिवाय ॥ १ ॥
आकर्णकृष्टधनुराहितमोहनास्त्रमाराान्निरीक्ष्य मदनं कुपितस्य किञ्चित् ।
शम्भोः समाधिसमये विकसत्कृशानुज्वालाकलापजटिलं निटिलं स्मरामि ॥ २ ॥

महापाशुपतज्ञानसम्प्रदायप्रवर्तकान् ।
अंशावतारानीशस्य [1]योगाचार्याननुपास्महे ॥ ३ ॥

आसेतुबन्धतटमा च तुषारशैलादाचार्यदीक्षित इति प्रथिताभिधानम् ।
अद्वैतचित्सुखमहाम्बुधिमग्नभावमस्मत्पितामहमशेषगुरुं प्रपद्ये ॥ ४ ॥
यं ब्रह्म निश्चितधियः प्रवदन्ति साक्षात् तद्दर्शनादखिलदर्शनपारभाजः ।
तं सर्ववेदसमशेषबुधाधिराजं श्रीरङ्गराजमखिनं पितरं नतोऽस्मि ॥ ५ ॥

यद्यप्यद्वैत एव श्रुतिशिखरगिरामागमानां च निष्ठा
साकं सर्वैः पुराणस्मृतिनिकरमहाभारतादिप्रबन्धैः ।
तत्रैव ब्रह्मसूत्राण्यपि च विमृशतां भान्ति विश्रान्तिमन्ति
प्रत्नैराचार्यरत्नैरपि परिजगृहे शङ्कराद्यैस्तदेव ॥ ६ ॥

---

१. योगाचार्या इति श्रीकण्ठाचार्याणामेव नामान्तरमिति टिप्पणीकारः । वस्तुतस्त्वष्टाविंशतियोगाचार्याणां द्वादशोत्तरशतं तच्छिष्याणां च नामावली कूर्मपुराणादिषु द्रष्टव्या । एते हि भगवतः शिवस्यांशावताराः । चतुर्थश्लोकव्याख्यायां दीक्षितमहोदयैः स्वयमेषामुल्लेखो व्यधायि ।

तथाप्यनुग्रहादेव तरुणेन्दुशिखामणेः ।
अद्वैतवासना पुंसामाविर्भवति नान्यथा ॥ ७ ॥
अनुग्रहश्च देवस्य शक्त्या चिद्रूपया सह ।
यथावत्तं परिज्ञाय ध्यायद्भिः समवाप्यते ॥ ८ ॥
इति भगवता वेदव्यासेन सूत्रयता परं
सगुणमपि तत्साम्बं ब्रह्म न्यरूपि शिवाभिधम् ।
यदनुकरणादर्थानन्येऽपि संजगृहुर्बहून्
पणिनजमुखाः[1] सूत्रैर्विष्वङ्मुखत्वविभूषणैः ॥ ९ ॥
तदिदं ब्रह्मसूत्राणां तात्पर्यं सगुणे शिवे ।
प्रकटीकर्तुमाचार्यः प्रणिन्ये भाष्यमुत्तमम् ॥१०॥
श्रीकण्ठाचार्यकृतं भाष्यं यद् ब्रह्मसूत्राणाम् ।
प्रतिपदमतिगम्भीरं न शक्यते मादृशैर्बोद्धुम् ॥११॥
भाष्यमेतदनघं विवृण्विति स्वप्नजागरणयोः समं प्रभुः ।
चिन्नबोम्मनृपरूपभृत् स्वयं मां न्ययुङ्क्त महिलार्धविग्रहः ॥१२॥
श्रीचिन्नबोम्मनृपतिः श्रितपारिजातः सर्वात्मना पशुपतिं शरणं प्रपन्नः ।
यः सार्वभौमपदवीमधिगम्य धीरस्तत्पूजयैव मनुते सफलत्वमस्याः ॥१३॥
अस्य क्षितीशितुरपारगुणाम्बुराशेरष्टासु दिक्षु विततोर्जितशासनस्य ।
अन्तः सदैव वसता विभुना नियुक्तो भाष्यं यथामतिबलं विशदीकरोमि ॥१४॥
यावन्तो निविशन्ते विदुषां व्याख्यानभारतीगुम्भाः ।
सर्वेषामपि तेषां ददाति पुष्पकमिवैतदवकाशम् ॥१५॥
तस्मादत्र यथामति कियदाशयवर्णनं मया क्रियते ।
तुष्यन्तु ततो विबुधाः कतिपयरत्नग्रहादिवाम्बुनिधेः ॥१६॥

भगवद्बादरायणप्रणीतब्रह्मसूत्रनिकुरुम्बरूपस्य वेदान्तमीमांसाशास्त्रस्य लोकानुजिघृक्षया भाष्यं निर्मित्सुराचार्यो निरन्तरशिवध्याननिर्धूतनिखिलान्तरायोऽपि शिष्टाचारपरिपालनार्थं व्याचिख्यासितशास्त्रप्रतिपाद्यां परां देवतां नमस्करोति—ॐ नमः इति। दहरविद्यानिष्ठोऽयमाचार्यः। अत एव तस्यां रूपसमर्थकं "ऋतं सत्यं परं ब्रह्म" (महाना० १२.१) इति मन्त्रमिह भाष्ये पुनः पुनरादरातिशयाद् व्याख्यास्यति, कामाद्यधिकरणे च स्वयं दहरविद्याप्रियत्वात् सर्वासु परविद्यासु दहरविद्योत्कृष्टेति वक्ष्यति। अतः स्वशाखाम्नातदहरविद्यायां विशेष्यनिर्देशकेन पदेन स्वोपास्यं नमस्कार्यं

१. पणिनजः पाणिनिः। 'फणिपतिमुखाः' इति पाठे फणिपतिः पतञ्जलिरित्यर्थः।

निर्दिशति—परमात्मन इति। श्रूयते हि तैत्तिरीयोपनिषदि—"तस्याः शिखाया मध्ये परमात्मा व्यवस्थितः" (महाना० ११.१३) इति।

केचन स परमात्मा शिवादन्य इति कथयन्तः परान् भ्रमयन्ति, तदनुवर्तनेन साधवो मा भ्रमिषुरित्यभिप्रेत्य विशिनष्टि—शिवायेति। दहरविद्योपास्यः परमात्मा शिव एवेत्याचार्यः शारीराधिकरणे निपुणतरमुपपादयिष्यति। यद्यपि तैत्तिरीयोपनिषद्गतस्य परमात्मशब्दस्य विशेषोपसंहारार्थं "धातुः प्रसादान्महिमानमीशम्" (महाना० ८.३), "विश्वाधिको रुद्रो महर्षिः" (महाना० १०.३), "यः परः स महेश्वरः" (महाना० १०.८) इति तदुपक्रमगतानामीशरुद्रमहेश्वरनाम्नामन्यतमस्य "ऊर्ध्वरेतं विरूपाक्षम्" (महाना० १२.१) इति तदुपसंहारगतस्य विरूपाक्षनाम्नो वात्र सङ्कीर्तनं युक्तम्, तथापि "समेधयति यन्नित्यं सर्वार्थानामुपक्रमम्। शिवमिच्छन्मनुष्याणां तस्माद्देवः शिवः स्मृतः॥" (७.१७३.९०) इति महाभारते शिवशब्दस्य मनुष्यादिहितैषित्वतत्प्रारीप्सितपुरुषार्थोपयोगिसकलव्यापारसमेधयितृत्वप्रवृत्तिनिमित्तकत्वेन व्याख्याततया शिष्याणां तत्सङ्कीर्तनतदर्थानुसन्धानपूर्वकमेतद्भाष्यपाठारम्भे सति शिवप्रसादान्निरन्तरायपाठपरिसमाप्तिस्तदभिलषितसकलपुरुषार्थसिद्धिश्च भवतीति तत्सिद्ध्यर्थं शिवशब्देन विशेषणनिर्देशः कृतः। तदुदाहृते महाभारतवचने "हृद्यपेक्षया तु मनुष्याधिकारत्वात्" (ब्र० १.३.२५) इति सूत्र इव मनुष्यग्रहणं देवादीनामप्युपलक्षणम्। यतो महाभारत एव शिववचनम्—"समा भवन्ति मे सर्वे दानवाश्चामराश्च ये। शिवोऽस्मि सर्वभूतानां शिवत्वं तेन मे सुराः॥" (८.२.३-४) इति। "वश कान्तौ" (१०८१ अदा०) इति धातोर्वर्णव्यत्ययेन सिद्धः शिवशब्दः पृषोदरादिः। तदाहुः—"हिंसिधातोः सिंहशब्दो वशकान्तौ शिवः स्मृतः। वर्णव्यत्ययतः सिद्धौ पश्यकः कश्यपो यथा॥" इति।

तेन शिवशब्दस्य इच्छावानित्यर्थलाभे कस्मिन्निति तद्विषयाकाङ्क्षायां देवासुरमनुष्यादीनां शिवे विषय इत्ययमर्थः—"शिवमिच्छन्मनुष्याणाम्" इत्यार्षवचनप्रामाण्याल्लभ्यते। 'समेधयति' इति व्युत्पत्त्यन्तरं तु शिवशब्दात् शुभवाचिनस्तत्करोतिण्यन्तात्पचाद्यच्प्रत्ययेन लभ्यते। व्युत्पत्तिद्वयनिष्पन्नस्यापि शिवशब्दद्वयस्य परमेश्वरवाचकस्य तन्त्रेणोच्चारणादुक्तार्थसिद्धिः। अपि च, शिवशब्दः सकृदुच्चारणमात्रेण सकलदुरितहरः, "अपि वा यश्चण्डालः शिव इति वाचं वदेत्तेन सह संवदेत्तेन सह संवसेत्तेन सह भुञ्जीत", "यद् द्व्यक्षरं नाम गिरेरितं नृणां सकृत्प्रसङ्गादघमाशु हन्ति

तत्" इत्यादिश्रुतिपुराणप्रामाण्यात् । अत एव चाष्टादशविद्यास्थानमध्ये सर्वतः सारतरत्वमस्य पौराणिका वर्णयन्ति—"विद्यासु श्रुतिरुत्कृष्टा रुद्रैकादशिनी श्रुतौ । तत्र पञ्चाक्षरी तस्यां शिव इत्यक्षरद्वयम् ॥" इति । एवं सकलदुरितहरस्य शिवनाम्नः प्रथमं सङ्कीर्तनेन श्रोतॄणां श्रवणादिप्रतिप्रतिबन्धकसकलदुरितनिवृत्तिर्भवतीत्येतदपि प्रयोजनमिह शिवनामसङ्कीर्तनस्य ।

एवं परमात्मशब्देन तैत्तिरीयोपनिषदाम्नातदहरविद्योपास्यतया शिवशब्देन तत्रत्यमहेश्वरादिशब्दप्रदर्शितपरमेश्वररूपतया चावगमितस्य नमस्कार्यस्योपनिषदन्तराम्नातदहरविद्यागुणोपसंहारेण क्रियमाणानुसन्धानसूचनाय उपनिषदन्तराम्नातदहरविद्याप्रकरणगतैरर्थैर्विशिनष्टि–ओमित्यादिभिश्चतुर्भिर्विशेषणैः । ॐमिति शब्दो ब्रह्मवाचकः, "ॐ मिति ब्रह्म" (तै. उ० १.८.१) इत्यादिश्रुतेः, "हरः सर्वस्य हरणाद्विभुत्वाद्विष्णुरुच्यते । सर्वज्ञः सर्वविज्ञानादवनादोमिति स्मृतः ॥" (१.४. ६१-६२) इति कूर्मवचनाच्च । "अर्तिस्तुसुहुसृधृक्षिक्षुभायावापदियक्षिनीभ्यो मन्" (१४५ उ०) इति सूत्रान्मन्प्रत्ययानुवृत्तौ "अवतेष्टिलोपश्च" (१४७ उ०) इति सूत्रेणावतिधातोर्मन्प्रत्यये प्रत्ययस्य टिलोपे "ज्वरत्वरस्रिव्यविमवामुपधायाश्च" (पा० ६.४.२०) इति सूत्रेण वकाराकारयोरूठि सवर्णदीर्घे "सार्वधातुकार्धधातुकयोः" (पा० ७.३.८४) इति गुणे च सति निष्पन्नस्य तस्य [1]"कृन्मेजन्तः" (पा० १.१.३९) इति सूत्रेण मान्तत्वेनाव्ययत्वात् "अव्ययादाप्सुपः" (पा० २.४.८२) इति ततश्चतुर्थ्या लोपः । अनेन "यः पुनरेतं त्रिमात्रेणोमित्येनेनैवाक्षरेण परं पुरुषमभिध्यायीत" (प्रश्नो० ५.५) इत्याथर्वणोपनिषदि दहरोपासना परब्रह्मवाचकेन त्रिमात्रेण प्रणवेन तदनुसन्धानपूर्वकं कर्तव्येति विधानात् तदाम्नातगुणविशेषोपसंहारेणानुसन्धानं सूचितम् । 'अहंपदार्थाय' इत्यस्य जीवे प्रयुज्यमानस्याहंपदस्य अन्तरात्मत्वेनापरिच्छिन्नोपासकाहंभावपर्यवसानास्पदत्वेन वा मुख्यार्थभूतायेत्यर्थः । अनेन "य एषोऽन्तर्हृदय आकाशस्तस्मिन्शेते" (२.१.१७) इति बृहदारण्यकोपनिषदाम्नातदहरविद्याप्रकरणगते "अहमेवेदं सर्वोऽस्मीति मन्यते सोऽस्य परमो लोकः" (४.३.२०) इति वाक्ये श्रुतस्याहंपदस्य तथा मन्यमानजीवान्तरात्मनि तदीयापरिच्छिन्नाहंभावपर्यवसानास्पदे वा शिवे पर्यवसानात् तदाम्नातगुणविशेषोपसंहारेणानुसन्धानं सूचितम् ।

१. अत्रेदं बोध्यम् । भट्टोजिदीक्षितास्तु—"चादिपाठादव्ययत्वमिति उज्ज्वलदत्तः । तन्न । तेषामसत्त्वार्थत्वात् । वस्तुतस्तु स्वरादिपाठादव्ययत्वम्" इत्याहुः ।

लोकानां सिद्धिहेतव इत्यस्य दहरोपासकाभिलषितसकललोकप्राप्तिहेतव इत्यर्थः। एतेन "अथ य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान् कामान् तेषां सर्वेषु लोकेषु कामचारो भवति" (८.१.६) इति छान्दोग्योपनिषदि दहरोपासकस्य सर्वलोकावाप्तिफलसङ्कीर्तनात्तदाम्नातगुणविशेषोपसंहारेणानुसन्धानं सूचितम्।

सच्चिदानन्दरूपायेत्यनेन "तमादिमध्यान्तविहीनमेकं विभुं चिदानन्दमरूपमद्भुतम्" (१.७) इति कैवल्योपनिषदि सच्चिदानन्दरूपत्वकीर्तनात्तदाम्नातगुणविशेषोपसंहारेणानुसन्धानं सूचितम्। कैवल्योपनिषदि—"उमासहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकण्ठं प्रशान्तम्। ध्यात्वा मुनिर्गच्छति भूतयोनिं समस्तसाक्षिं तमसः परस्तात्॥" (१.७) इति तदनन्तरमन्त्रे भूतयोनिशब्देन शिवस्य सकलकार्योपादानत्वमुक्तम्। तथा सति दधिभावापन्नस्य क्षीरस्येव कार्यप्रपञ्चभावापन्नस्य शिवस्य चिदानन्दात्मकपूर्वरूपपरित्यागः स्यादित्याशङ्कावारणार्थमेव 'आदिमध्यान्तविहीनम्' इति विशेषितम्। स एवार्थोऽत्रापि सदिति विशेषणेन प्रदर्श्यते। सदैवायं चिदानन्दरूपेण सन्न कदाचिदपि सद्रूपं परित्यजतीति तदर्थः।

अपि च, एतैरोमित्यादिभिश्चतुर्भिर्विशेषणैरस्मिन् शास्त्रे चतुरध्यायीप्रतिपाद्यैरर्थैः परमात्मा विशेष्यते। तथा हि—ॐमिति पदप्रयोगेण तद्वाच्ये परब्रह्मणि शिवे सर्वेषां वेदान्तानां समन्वय आक्षिप्यते। कठवल्लीषु—"सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति। यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण ब्रवीमि॥" (२.१५) इति प्रतिज्ञाय तदनन्तरम्–"ओमित्येतत्। एतद्ध्येवाक्षरं ब्रह्म" (कठो० २.१५-१६) इत्यादिना सर्ववेदप्रतिपाद्यत्वेनोपक्रान्तस्य परब्रह्मणः प्रतिपादकतया ॐमिति पदमुपक्षिप्य तत्प्रशंसादर्शनात्। अपि चास्य मात्रात्रयमृग्यजुस्सामरूपत्वेनाथर्वणोपनिषदादिषु प्रसिद्धम्। [1]प्रपञ्चसारादिषु च "अग्निमीळे पुरोहितम्" (ऋ० १.१.१) इत्याद्यवेदाद्यवर्णस्य, "योनिः समुद्रो बन्धुः" इति मध्यवेदमध्यवर्णस्य "समानं वरम्" इत्यन्तिमवेदान्तिमवर्णस्य च समाहृतिरोमिति पदमिति प्रसिद्धम्। अतोऽपि तत्प्रयोगेण सर्ववेदप्रतिपाद्यत्वमाक्षिप्यते। तेन सर्वेषां वेदान्तानां ब्रह्मणि समन्वयः [2]शते पञ्चाशन्न्यायेन लभ्यते।

---

१. प्रपञ्चसारे १९ तमे पटले (३४–३६ श्लोकेषु) विषयोऽयं द्रष्टव्यः।

२. पञ्चाशदर्थिनः पुरुषस्य शतस्य लाभे यथा वा पञ्चाशतोऽपि लाभः सिद्धः, तद्वत्

यद्वा "तपांसि सर्वाणि च यद्वदन्ति" (कठो० २. १५) इत्यत्र तपश्शब्दो ज्ञानवाची 'तप आलोचने'[१] इति धातोर्निष्पत्तेः । तेन ज्ञानप्रधाना वेदान्ता लक्ष्यन्ते । तेन सर्ववेदान्तप्रतिपाद्यत्वस्य साक्षादप्योमिति पदप्रयोगेणाक्षेपो लभ्यते । यद्यपि वेदान्तानां ब्रह्मणि समन्वयः केनचिद्विशेषणेन साक्षाद् दर्शयितुं शक्यते, तथापि प्रथमपादगताभ्याम् 'ॐ नमः' इति पदाभ्यां चतुर्थपादगतेन 'शिवाय' इति पदेन च श्रीषडक्षरमहामन्त्रस्मरणमपि श्रोतृणां लभ्यतामित्यभिप्रायेणादावोमिति पदं प्रयुञ्जानस्तेनैवाक्षेपतः प्रथमाध्यायार्थलाभमाचार्योऽनुमेने । परब्रह्मणः शिवस्याद्वितीयत्वाभ्युपगमे द्वैतश्रुतीनां विरोधः, सद्वितीयत्वाभ्युपगमे त्वद्वैतश्रुतीनामिति विरोधशङ्कायां निखिलप्रपञ्चाकारशक्तिविशिष्टस्य शिवस्याद्वितीयत्वादान्तर्गणिकभेदाप्रतिक्षेपाच्च न कोऽपि विरोध इत्यविरोधरूपद्वितीयाध्यायार्थोऽहंपदार्थायेति विशेषणेन दर्शितः । "अहमिति पदं सकलप्रपञ्चाकारशक्तिविशिष्टशिवाद्वैतवाचकम्" इत्याचार्य एव चतुर्थाध्याये वक्ष्यति । लोकयन्ते स्वात्मानमिति लोकाः शिवसाक्षात्कारवन्तः, तेषां सिद्धिर्मुक्तिफललाभः, तस्य हेतव इति तृतीयविशेषणार्थः । तेन श्रवणमननोपासनानन्तरं साक्षात्कृतः शिव एव पञ्चकृत्यकारी मुक्तिं प्रयच्छति । अतः स एव मुक्तेः साक्षात्साधनतया तृतीयाध्यायेन विवक्षित इति तस्यार्थो दर्शितः ।

सच्चिदानन्दरूपायेत्यत्रानन्दरूपायेत्यनेन निरतिशयानन्दरूपं ब्रह्मैवानुभूयमानं मुक्तानां फलतया फलाध्यायेन विवक्षितमिति तदर्थो दर्शितः । ब्रह्मानन्दो यद्यनुभूयमानतया ब्रह्मणः फलं स्यात्तदा मुक्तानामपि फलं भवेत् । "निरञ्जनः परमं साम्यमुपैति" (मुण्डको० ३.१.३) इति मुक्तिफलस्य ब्रह्मसाम्यरूपत्वश्रवणादिति । ब्रह्मणोऽनुभूयमानत्वेन तत्फलत्वसिद्ध्यर्थं चिद्रूपतयानन्दो विशेषितः, आनन्दवल्ल्यां निरतिशयानन्दतया श्रुतस्य ब्रह्मण एव "तदात्मानं स्वयमकुरुत" (तै० उ० २.७) इति रूपान्तरापत्तिश्रवणात् । कदाचिच्चिदानन्दरूपपरित्यागेन मुक्तानामपि भोग्यं फलं क्षयिष्णु स्यादित्याशङ्कापरिहाराय सद्रूपतया चिदानन्दो विशेषितः । जगदुपादानत्वेऽप्यविकारित्वं शिवस्य प्रकृत्यधिकरणादिषु व्यवस्थापयिष्यते ॥ १ ॥

सकलवेदप्रतिपाद्यस्य ब्रह्मणः सिद्धमेव सर्वोपनिषत्प्रतिपाद्यत्वमिति शते पञ्चाशन्न्यायस्यात्र समन्वयो वेद्यः ।

१. आलोचनार्थकस्तपधातुः पाणिनिधातुपाठे न दृश्यते ।

निजशक्तिभित्तिनिर्मितनिखिलजगज्जालचित्रनिकुरुम्बः ।
स जयति शिवः परात्मा निखिलागमसारसर्वस्वम् ॥२॥
भवतु स भवतां सिद्धयै परमात्मा सर्वमङ्गलोपेतः ।
चिदचिन्मयः प्रपञ्चः शेषोऽशेषोऽपि यस्यैषः ॥३॥

एवं नमस्काररूपं प्रबन्धमुखमारचय्य वस्तुनिर्देशरूपं तदारचयति—निजशक्तीति। परात्मा संसारिव्यतिरिक्तात्मा। शिवः नित्यनिर्धूतनिखिलदोषः सकलमङ्गल्यगुणनिधिश्च। स इत्यनेन "उत्तमः[1] पुरुषस्त्वन्यः परमात्मेत्युदाहृतः। अनादिमलसंश्लेषप्रागभावात् स्वभावतः॥ अत्यन्तपरिशुद्धात्मा शिव इत्यभिधीयते। अथवाऽनन्तकल्याणगुणैकघन ईश्वरः॥ शिव इत्युच्यते सद्भिः शिवतत्त्वार्थवेदिभिः॥" इति वचनसिद्धामुक्तविशेषणार्थप्रसिद्धिं द्योतयति। जयति सर्वोत्कर्षेण वर्तते। "जि जये"(५६१ भ्वा०) इति धातुरकर्मक उत्कर्षार्थः। नित्यनिर्धूतनिखिलदोषस्य सकलमङ्गल्यगुणरत्नाकरस्य च सर्वस्माच्चेतनाचेतनप्रपञ्चादुत्कर्षो युक्त इति भावः। तत्र लक्षणप्रमाणे दर्शयत्यवशिष्टविशेषणद्वयेन। निजा आत्मीया शक्तिरेव भित्तिः, तस्यामाश्रयभूतायां निर्मितं निखिलं जगज्जालं सकलावान्तरभेदयुक्तं जगद्वृन्दमेव चित्रनिकुरुम्बमालेख्यवृन्दं येन स तथोक्तः। अनेन जगत्कारणत्वं लक्षणं दर्शितम्। सकलानामागमसाराणामुपनिषदां सर्वस्वं सर्वस्वमिवादरणीयः। तन्महातात्पर्यविषय इति यावत्। अनेनोपनिषदस्तत्र प्रमाणमिति दर्शितम्॥ २॥

अथाशीर्वचनरूपं प्रबन्धमुखमारचयति—भवत्विति। सर्वमङ्गलया श्रीगौर्या सर्वैः कल्याणगुणैश्चोपेतः। सः "पुरुषं कृष्णपिङ्गलम्" (महाना० १२.१) इत्यादिश्रुतिषु तथा प्रसिद्धः। परमात्मा परा उत्कृष्टा मा लक्ष्मीर्यस्य तथाभूत आत्मा शिवः। भवतामनुग्राह्यत्वेन सन्निहितानां श्रोतॄणां सिद्धयै अभिलषितसकलफलावाप्तये भवतु। सर्वोत्कृष्टलक्ष्मीशालिनः सर्वाभिलषितफलप्रदानसामर्थ्यं युक्तमिति भावः। सर्वोत्कृष्टलक्ष्मीशालित्वमुपपादयत्युत्तरार्धेन—चिदचिन्मयश्चेतनाचेतनरूपः। स्वरूपार्थे मयट्प्रत्ययः। अशेषः कृत्स्नोऽपि प्रपञ्चो यस्य शेषः, तदाराधनोपयोगितया तदर्थः। स भवत्विति पूर्वेण सम्बन्धः। अपिशब्दो निरवशेषग्रहण-

---

१. उत्तम इति श्लोकार्धो भगवद्गीतायामपि (१५।१७) दृश्यते।

नमः श्वेताभिधानाय नानागमविधायिने ।
कैवल्यकल्पतरवे कल्याणगुरवे नमः ॥४॥

दार्ढ्यार्थः, विरोधाभासार्थश्च । शिवाराधनोपयोगित्वं चेतनवर्गस्य तत्तदधिकारानुसारेण शिवाराधनरूपज्ञानकर्मानुष्ठातृत्वम्, अचेतनवर्गस्य तदाराधनस्थानतदुपकरणादिभावेन तदाराधनोपकारकत्वम् । इदं पशुपाशपतेः शिवस्य चेतनाचेतनसर्वशेषित्वम्–"ब्रह्मादिस्तम्बपर्यन्तान् पशून् बद्ध्वा महेश्वरः । पाशैरेतैः पतिर्देवः कार्यं कारयति स्वकम् ॥" इत्यादिपुराणवचनेषु प्रसिद्धम् । एवं च परमेश्वरस्य लक्ष्मीर्नान्येषामिव गजतुरगधनाभरणादिकतिपयचेतनाचेतनरूपेति तस्य लक्ष्मीः सर्वोत्कृष्टेति भावः ॥ ३ ॥

अथैतद्भाष्यनिर्माणोपयुक्तनिखिलोपनिषदर्थबोधप्रदातारमात्मीयं विद्यागुरुं नमस्करोति-नम इति । नानाविधान् नानाप्रकारान् परस्परविरुद्धार्थत्वेनावभासमानान् आगमान् वेदान्तान् विधातुम् अविरुद्धार्थोपदेशेन प्रसाधयितुं शीलमस्येति नानागमविधायी । "सुप्यजातौ णिनिस्ताच्छील्ये" (पा० ३.२.७८) इति णिनिप्रत्ययः । सुपीत्यनुवृत्तौ पुनः सुब्ग्रहणेन केवलस्यैवोपसर्गस्य व्यावृत्तिः । एवं ताच्छील्यप्रतिपादनात् सर्वेषां वेदान्तानामविरोधेन शिवे तात्पर्यमुपदिश्य लोकाननुग्रहीतुमवतीर्णं इति व्यज्यते । कैवल्यस्य मुक्तेः कल्पतरुरिव कल्पतरुः । यथा कल्पतरुरर्थिनाममोघाभिगमनस्तथा कैवल्यार्थिनामयमिति तत्साम्यम् । प्रसिद्धकल्पतरुर्भोग्यवस्त्वादिरूपक्षुद्रफलार्थिनामेवामोघाभिगमनः, अयं तु कैवल्यरूपमहाफलार्थिनामिति तत उत्कर्षश्चेति रूपकविशेषस्तदुत्थापितव्यतिरेकालङ्कारो वा ।

नन्वयं स्वयं केवलकैवल्यप्रदः, न तु भोग्यवस्त्वर्थिनां तत्प्रद इति न प्रसिद्धकल्पतरोरस्योत्कर्ष इत्याशङ्क्य तत्प्रदत्वमपि दर्शयति—कल्याणगुरव इति । कल्याणमर्थिनामैहिकामुष्मिकभोगादिरूपमभ्युदयफलं कुर्वन्तीति कल्याणाः । कल्याणशब्दात् तत्करोतिण्यन्तात् पचाद्यच् । तेषां गुरव इत्यर्थः । "यं यं लोकं मनसा संविभाति विशुद्धसत्त्वः कामयते यांश्च कामान् । तं तं लोकं जयते तांश्च कामान् तस्मादात्मज्ञं ह्यर्चयेद् भूतिकामः ॥" (मुण्डको० ३.१.१०) इति श्रुतेरस्य शिष्या अपि परमेश्वरसाक्षात्कारवत्तया स्वपूजकेभ्यः सर्वाण्यभ्युदयफलानि प्रयच्छन्ति, अस्य तत्प्रदत्वे किं वक्तव्यमिति भावः । कल्याणाय गुरव इति समानाधिकरणसमासो वा । यद्वा कैवल्य-

व्याससूत्रमिदं नेत्रं विदुषां ब्रह्मदर्शने ।
पूर्वाचार्यैः कलुषितं श्रीकण्ठेन प्रसाद्यते ॥५॥

प्रदत्वोपयोगिज्ञानभक्तिवैराग्यादिकल्याणगुणसमृद्धिप्रतिपादनार्थो वायं कल्याणशब्दो मत्वर्थीयाच्प्रत्ययान्तः । अथवा यस्य गुरोरभिगमनमात्रेण शिष्याणामानन्दाद्युपलब्धिर्ज्ञानोदयश्च भवति स कल्याणगुरुः, तथा प्रसिद्धेः । अनेन श्लोकेन शिवशास्त्रप्रचारणार्थंशिवावताररूपाणामष्टाविंशतेर्योगाचार्याणामाद्यस्य श्वेताचार्यस्यापि नमस्कारः क्रियते । अस्मिन् पक्षे नानागमविधायिन इत्यस्य नानाविधपाशुपताद्यागमनिर्मात्र इत्यर्थः । अन्यत् समानम् । द्वितीयो नमःशब्द आदरार्थः, "नमो हिरण्यबाहवे सेनान्ये दिशां च पतये नमः" (तै० सं० ४.५.२.१) इत्यादिवत् । अथवोत्तरार्धेन आश्रमगुरोर्नमस्कारः क्रियते ॥ ४ ॥

अथाचार्यः स्वचिकीर्षितस्य भाष्यस्य भाष्यान्तरेभ्योऽतिशयमाविष्कुर्वन्नेव चिकीर्षितं प्रतिजानीते—व्यासेति । इदं व्याख्यास्यमानतया बुद्धिसन्निहितं व्याससूत्रम् । जातावेकवचनम् । व्यासप्रणीतं सूत्रजातम् । विदुषां साङ्गसशिरस्कवेदाध्ययनेनापाततोऽधिगतब्रह्मस्वरूपाणाम् । ब्रह्मदर्शने ब्रह्मणो दर्शने इदमित्थंभूतमिति परिच्छेदात्मके निर्णये । नेत्रं घटादिपरिच्छेदे नेत्रमिव निरपेक्षकारणमिति पूर्वार्धस्यार्थः । अत्र नेत्रत्वारोपरूपेण रूपकालङ्कारेण व्याख्यानसाध्यात्यन्ताप्रतीताध्याहारगौणलक्षणाविपरिणामव्यवधारणविकल्पनादिक्लेशयुक्तेभ्यो जैमिनिसूत्रादिभ्य उत्कर्षरूपो व्यतिरेकालङ्कारो व्यज्यते । तथाभूतानि जैमिन्यादिसूत्राणि । तत्र स्थालीपुलाकन्यायेन जैमिनिसूत्रेषु क्लिष्टाध्याहारादिस्थलान्युदाह्रियन्ते ।

प्राशित्रभक्षणार्थं गृहीतस्य हविःशेषस्य दैवान्नाशे तदर्थं पुनरपि हविःशेषाद् ग्राह्यमिति प्राप्ते स्थितस्य शेषस्य इडाभक्षणादिप्रतिपत्त्यन्तरावरुद्धत्वात् प्रतिपत्तिकर्मणां यज्ञोपयुक्तशेषैराकीर्णस्य यज्ञदेशस्य विविक्ततापादनरूपविशिष्टप्रयोजनकारणत्वात् तस्य च प्रयोजनस्य प्रतिपाद्यनाशेनापि सिद्धत्वात् प्रतिपाद्यशेषनाशे तदाश्रयाणां प्राशित्रभक्षणादिकर्मणां लोप एवेतिनिर्णयार्थं प्रवृत्तस्याधिकरणस्येदं सूत्रम्—"अपि वा शेषभाजां स्याद् विशिष्टकारणत्वात्" (जै० ६.४.३) इति । अत्र शेषभाजां लोप इत्यध्याहारः । अयमतिक्लिष्टः । नह्ययं पदान्तरसमभिव्याहारवत् सूत्रतात्पर्यनिर्णयाल्लभ्यते । सूत्रोक्तपूर्वपक्षनिराकरणार्थतयाधिकरणान्तरेषु दृष्टस्यापि वाशब्दस्य दर्शनेन

पूर्वपक्षसूत्रस्य चादर्शनेन विशिष्टकारणत्वादिति हेतोश्चानभिव्यक्तार्थत्वेन ततस्तत्तात्पर्यस्य निर्णेतुमशक्यत्वात्। नापि पूर्वाधिकरणसूत्रपर्यालोचनात्तल्लभ्यते। पूर्वाधिकरणे हि प्रधानार्थावत्तहविरपचारे शेषादवदेयमिति "शेषाद्व्यवदाननाशे स्यात्तदर्थत्वात्" (जै० ६. ४. १) इति सूत्रेण पूर्वपक्षं परिगृह्य "निर्देशाद्वान्यदागमयेत्" (जै० ६.४.२.) इति सूत्रेण मध्यात् पूर्वार्धादवदेयमिति निर्देशात् प्रधानार्थं मध्यपूर्वार्धाभ्यामवत्तस्य हविषस्तस्य नष्टत्वात्तदर्थं हविरन्तरं सम्पादनीयमिति सिद्धान्तितम्। तत्र सिद्धान्तानुसरणे शेषभाजामर्थेन हविरन्तरमागमयितव्यमिति पूर्वपक्षानुसरणे तेषामर्थेन शेषादवदेयमिति चाध्याहारो लभ्यते। न तु लोप इति। शेषभाजामित्यस्य सम्बन्धाकाङ्क्षायामपि पूर्वाधिकरणपूर्वपक्षसिद्धान्तसाध्ययोरन्यतरस्यैवाध्याहारो लभ्यते। "निर्देशाच्छेषभक्षोऽन्यैः" (जै० ६.४.४) इत्याद्युत्तरसूत्राणां हविःशेषभक्षणकर्तृविचारार्थत्वेन ततोऽध्याहार्यविशेषलाभासम्भवात्। तस्माच्चतुर्थाध्याये निर्णीतं प्रतिपत्तिकर्मणामप्रयोजकत्वं विद्यमानशेषस्य प्रतिपत्त्यन्तरावरुद्धत्वं चालोच्यैव कर्तव्योऽयमध्याहारोऽतिक्लिष्टः।

आदित्यादोनामयनादिषु संवत्सरसत्रेष्वहर्गणत्वसामान्याद् द्वादशाहविध्यन्तप्राप्तौ संवत्सरसत्रत्वाद्यन्तरङ्गसादृश्याद् गवामयनविध्यन्त इति निर्णयार्थं प्रवृत्तस्याधिकरणस्य सूत्रम्—"गव्यस्य च तदादिषु"(जै० ८.१.१८) इति। अत्र गव्यशब्दो न गवामयनस्य वाचकः, "गोपयसोर्यत्"(पा० ४.३.१६०) इति गोशब्दाद्विकारावयवयोरेव यत्प्रत्ययस्मरणात्। अतो गोविकारादिवाचिनो गव्यशब्दस्यात्र "गावो वा एतत्सत्रमासत" इत्यर्थवादकल्पितगोसम्बन्धित्वसादृश्याद् गवामयने गौणी वृत्तिः। "एकविंशतिमनुब्रूयात् प्रतिष्ठाकामस्य" इत्यादिसामिधेनीविवृद्धिश्रुतावागमयितव्यानां सर्वासामृचामन्ते निवेशः, "अन्ते तु बादरायणः" (जै० ५.२.१९) इति न्यायात्। यदि तु "इयं वै समिध्यमानवती असौ समिद्धवती यदन्तरा तद्धाय्या" इति श्रुत्या द्यावापृथिवीसंस्तुतयोः समिध्यमानवतीसमिद्धवत्योर्मध्ये धाय्यानां विधानमनुमीयते, तदा सर्वासामप्यागमयितव्यानामृचां तयोर्मध्ये निवेशः। "पाय्यसान्नाय्यनिकाय्यधाय्या मानहविर्निवाससामिधेनीषु" (पा० ३.१.२९) इति व्याकरणस्मृत्या सर्वासां सामिधेनीनां धाय्याशब्दवाच्यत्वावगमेन धाय्याशब्दस्य सामिधेन्यन्तर्गतकतिपयऋग्विशेषवाचित्वाभावादिति प्राप्तौ सामिधेन्यन्तर्गतास्वपि "पृथुपाजवत्यौ धाय्ये भवतः", "मानवी ऋचौ धाय्ये

कुर्यात्'' इत्यादिषु कासुचिदेव ऋक्षु धाय्याशब्दप्रयोगदर्शनात् प्रयोगमूले व्याकरणे लाघवार्थं सान्नाय्यार्थनिर्देशकहविःशब्दरीत्या सामान्यशब्देनार्थनिर्देश इत्युपपत्तेर्धाय्याशब्दितानां मध्ये निवेशः, अन्यासामन्ते निवेश इति निर्णयार्थं प्रवृत्तस्य ''समिध्यमानवतीं समिद्धवतीं चान्तरेण धाय्याः स्युः द्यावापृथिव्योरन्तरालसमर्हणात्'' (जै० ५.३.४) इत्यधिकरणस्येदं गुणसूत्रम्—''उष्णिक्ककुभोश्चान्ते दर्शनात्'' (जै० ५.३.६) इति।

इदं सूत्रं केचिदेवं व्याचक्षते—सर्वासामागमयितव्यानामृचामन्ते निवेश इति प्रथमपूर्वपक्षनिराकरणेऽभ्युच्चययुक्तिरनेनोच्यते। यत्र सामिधेनीविवृद्ध्या धाय्याशब्दितान्यूनाक्षरगायत्र्यागमस्तथाभूत एव क्वचिदुदाहरणे ''त्रिष्टुभा परिदधाति'' इति श्रूयते, तत्र यदि यथा प्रकृत्या[1]जुहोतैव परिधानीया, तदा त्रिष्टुभेत्यनेन धाय्यानन्तरं समिद्धवत्याजुहोतेति द्वयोर्न्यूनाक्षरगायत्र्योश्चतुश्चत्वारिंशदेवाक्षराणीति तदृग्द्वयाभिप्रायेण त्रिष्टुभा परिदधातीत्युपपद्यते, अक्षरसंख्यासाम्यात्। यदि तत्रान्ते धाय्यानिवेशः, तदायमर्थवादोऽनुपपन्नः स्यादिति।

अन्ये त्वन्यथा व्याचक्षते—अधाय्याशब्दितानामपि मध्ये निवेश इति द्वितीयपूर्वपक्षनिराकरणेऽभ्युच्चययुक्तिरनेनोच्यते। त्रैधातवीयायां ''अग्ने त्रीते वाजिना त्रीषधस्थ'' (तै.सं. २.४.११.२) इत्यधाय्याशब्दिताधिका सामिधेन्याम्नाता। तत्र ''त्रिष्टुभा परिदधाति'' इति श्रूयते। यद्यधाय्याशब्दितानामपि मध्ये निवेशस्तदा 'अग्ने त्रीते' इति त्रिष्टुभोऽपि मध्ये निवेशात् 'त्रिष्टुभा परिदधाति' इति श्रवणमनुपपन्नं स्यादिति। उभयथापि 'त्रिष्टुभश्चान्ते दर्शनात्' इति सूत्रणीयम्। उष्णिक्ककुभोरित्ययुक्तमेव। तस्मादुष्णिक्ककुभावित्यस्य त्रिष्टुभि लक्षणा ''त्रिष्टुभो वा एतद्वीर्यं यदुष्णिक्ककुभौ'' इत्यर्थवादकल्पितकार्यकारणभावसम्बन्धमूला।

ज्योतिष्टोमे सौत्येऽहन्यस्ति सवनीयः पशुः, सन्ति च सवनीयाः पुरोडाशाः। तत्र तन्त्रिणो धर्माः प्रसङ्गिण उपकुर्वन्तीति मर्यादा। एवं सति पशुस्तन्त्री। पुरोडाशाः प्रसङ्गिणः। न तु वैपरीत्यम्, पशुप्रयोगस्य व्यापित्वात्, पुरोडाशप्रयोगाणां छिद्राभिधानीयतन्मध्यपातित्वादिति प्रतिपादयितुं सूत्रम्—''पशोश्च[2] विप्रकर्षस्तन्त्रमध्ये विधानात्'' (जै० १२.२.३२) इति।

१. आजुहोतेति कस्याश्चिदृचः प्रतीक इति वेद्यम्।

२. एतत्सूत्रस्थं प्रथमापञ्चम्योर्व्यत्यासं निर्दिश्यैव दीक्षितेन्द्रा वरदराजस्तवे भगवतो नाभिवर्णनप्रस्तावे काञ्चिच्चमत्कृतिमकल्पयन्। तथाहि—

तद्यथाश्रुतं न विवक्षितार्थसमर्पणक्षमम्। विप्रकर्षो ह्यत्र प्रथमान्तनिर्दिष्टः साध्यत्वेनावगम्यते। तन्त्रमध्ये विधानं पञ्चम्यन्तनिर्दिष्टं हेतुतया। एवमन्वयो न सङ्गच्छते। विप्रकर्षो ह्यत्र पशोः प्रातरादिकालत्रयसम्बन्धः। स तु—"वपया प्रातःसवने चरन्ति पुरोडाशेन माध्यन्दिने सवने अङ्गैस्तृतीयसवने" इति प्रत्यक्षवचनसिद्धो न साधनीयः। पुरोडाशानां पशुतन्त्रमध्ये विधानं तु साधनीयम्, न हेतुतया निर्देशार्हम्। अतः प्रथमापञ्चम्योर्व्यत्यासेन विभक्तिविपरिणामः कार्यः। पशोर्विप्रकर्षात् प्रातरादिकालत्रयव्यापित्वात् पुरोडाशानां पशुतन्त्रमध्ये विधानमिति। ज्योतिष्टोमेऽग्नीषोमीयसवनीयानुबन्ध्यास्त्रयः पशवः। तत्रोपाकरणादयः पशुधर्माः किमविशेषेण सर्वपश्वर्था उत सवनीयार्था उताऽग्नीषोमीयसवनीयार्था अथवाऽग्नीषोमीयार्था एवेति सन्देहे ज्योतिष्टोमप्रकरणाम्नाताः पशुधर्मास्तद्गृहीताः सन्तस्तत्रानर्थक्यात् तदङ्गेषु पशुष्ववतरन्तस्तत्प्रकरणाविशेषात्तदङ्गसर्वपश्वर्था इति प्राप्ते सवनीयावान्तरप्रकरणात्तदर्था इति पक्षान्तरपरिग्रहार्थमिदं सूत्रम्—"तुल्यः सर्वेषां पशुविधिः प्रकरणाविशेषात्" (जै० ३.६.१८) इति। इदं यथाश्रुतिगृहीतं न तस्य पक्षस्य साधकम्, प्रत्युत प्रथमपक्षसाधकमेव प्रतिभाति। अतोऽन्यथाकरणीयमिदं सूत्रं 'प्रकरणाविशेषात् खलु सर्वेषां तुल्यः पशुधर्मः स्यात्।' असिद्धः प्रकरणाविशेषः, "आग्नेयः पशुरग्निष्टोम आलभ्यते" इत्यौपवसथ्येऽहनि सवनीयविधानेन तदवान्तरप्रकरणसत्त्वात्। अतस्तदर्था एवेति। इयमेव व्यवधारणकल्पना। अन्यथा वाक्यार्थप्रतिभासेऽपि प्रमाणान्तरबलेन यदन्यथा वाक्यार्थवर्णनम्। व्याकरणे त्वत्यन्ताप्रतीतपारिभाषिकपदार्थग्रहणदूरस्थानुवृत्तिविपरिणामयोगविभागादिक्लेशः प्रसिद्ध एव।

नैवं वैयासिकेषु सूत्रेषु क्लेशोऽस्ति, किन्तु प्रसन्नानि सन्त्येव तानि गम्भीराणीति स्पष्टो जैमिनिसूत्रादित उत्कर्ष इति। एवम्भूतमेवेदं व्याससूत्रजातं प्राचीनैर्व्याख्यातृभिः क्लिष्टाध्याहारादिना कलुषीकृतम् अभिभूतस्वाभा-

---

"नाभेरभूत्तव चतुर्भुज नान्तरिक्षं यन्नाभिरेव यदुनेतरियं ततोऽभूत्।
नाभ्या इति श्रुति विपर्ययगे विभक्ती तां जैमिनेरनुससार पशोश्च सूत्रम्॥"
अत्र श्रुति श्रुतावित्यर्थः। अन्तरिक्षान्नाभिरासीदिति वक्तव्ये नाभ्या आसीदिति प्रवृत्तां श्रुतिं जैमिनीयमिदं "पशोश्च विप्रकर्षस्तन्त्रमध्ये विधानात्" (१२.२.३३) इति सूत्रमप्यन्वसरदिवेत्युत्प्रेक्षा चमत्कृतिमती इत्यवधेयम्।

विकप्रसादतां नीतम् । तदिदानीमाचार्यप्रवरेण श्रीकण्ठयोगिना प्रसाद्यते सूत्रकाराशयस्थितऋजुयोजनाप्रदर्शनेन सम्यग्व्याख्यानेनाविर्भूतस्वाभाविकप्रसादं क्रियते । यथा स्फुटावलोकनक्षममेव नयनं प्राक्कैश्चन पुराणाचार्यपदव्यपदेशकैर्भिषग्भिरहिताञ्जनदानादिना कलुषीकृतं भिषग्वरेण हिताञ्जनदानादिना प्रसाद्यते. तद्वदित्युत्तरार्धस्यार्थः ।

अत्र पूर्वाचार्यैरिति स्थाने वृद्धवैद्यैरिति पाठः क्वचिद् दृष्टः । कलुषितमित्यनेन प्राचीनभाष्यादिग्रन्थानां सामान्येनोद्घाटितमपि सूत्राक्षराननुसारित्वं तत्तत्सूत्रव्याख्यानावसरे विशिष्य भाष्यकृता नोद्घाटयिष्यते । तथा सति केषाञ्चिदाग्रहप्रवृत्तानां भाष्यादिग्रन्थवदिदमपि भाष्यं पौरोभाग्यमात्रावलम्बनं स्यात्, न च तदस्मत्कृतेर्युक्तमिति स्वशैलीख्यापनाय श्रीकण्ठेनेति स्वनामकीर्तनम् । श्रीः ग्रस्तस्य कालकूटस्य कण्ठे नियमनप्रयुक्ता धवलस्य कण्ठस्य नैल्यकृतपरभागशोभा । तयोपलक्षितः कण्ठोऽस्येति व्युत्पत्त्या श्रीकण्ठशब्दः शिवे प्रवृत्तः । इहापि तद्व्युत्पत्तिस्मारणेन विषसदृशस्य गृहीतस्य परदोषजालस्य कण्ठे नियमयितृत्वमात्मनः शैली, या—"गुणदोषौ बुधो गृह्णन्निन्दुक्ष्वेळाविवेश्वरः । शिरसा श्लाघते पूर्वं परं कण्ठे नियच्छति ॥" इति सत्पुरुषधर्मत्वेन प्रसिद्धेति तेन नाम्ना ख्याप्यते । एवं परदोषानुद्घाटयितृस्वभावेनाप्याचार्येण पूर्वाचार्यैः कलुषितमित्येतावन्मात्रं सामान्येनोद्घाटितं श्रोतृणां तत्र तत्र स्वपरभाष्यकृतव्याख्यानयोर्विशेषालोचने दृष्टिनिधानेन स्वभाष्यस्य प्रामाणिकैरादरणीयत्वं यथा स्यादिति । एवं भाष्यकारेण परभाष्येष्वनुचिताध्याहारादिक्लेशं विशिष्यानुद्घाटितमपि श्रोतृणां दिक्प्रदर्शनाय तत्र तत्र वयं किञ्चित् प्रदर्शयामः ।

ब्रह्मणः सर्वशक्तिमत्त्वप्रतिपादनार्थं सूत्रम्—"सर्वोपेता च तद्दर्शनात्" (ब्र० २.१.३०) इति । तत्र भाष्यान्तरेषु—सर्वोपेतेत्यस्य सर्वशक्त्युपेतेत्यर्थं परिगृह्य स्त्रीलिङ्गनिर्देशोपपादनाय देवतेति विशेष्यमध्याहृतम् । तदध्याहारो न पूर्वापरसूत्रानुसारी । पूर्वम् "अधिकं तु भेदनिर्देशात्" (ब्र० २.१.२२) इति सूत्रे ब्रह्मणो नपुंसकलिङ्गनिर्देशात् क्वचिदपि सूत्रे स्त्रीलिङ्गपदेन ब्रह्मनिर्देशाभावाच्च । नापि विषयवाक्यानुसारी, "पराऽस्य शक्तिर्विविधैव श्रूयते" (श्वेता० ६.८) इत्यादिषु भाष्यान्तरोदाहृतेषु प्रसिद्धेषु विषयवाक्येषु स्त्रीलिङ्गपदेन तन्निर्देशाभावात् । अतस्तत्र देवतेति विशेष्याध्याहारः क्लिष्टः । इह तु भाष्ये सर्वापि शक्तिर्ब्रह्माश्रितेति द्वितीयान्तपदाध्याहारेण योजना कृता । परव्याख्याने सर्वोपेतेत्येकं पदमिह पदद्वयमिति विशेषः ।

ऐकपद्यमाश्रित्य क्लृप्तोऽपि देवतापदाध्याहारः शाङ्करभाष्ये सूत्रस्यार्थान्तरमप्यैकपद्यलभ्यमस्ति, "मायां तु प्रकृतिं विद्यात्" (श्वेता० ४.१०) इति श्रुतिसिद्धमायाशब्दितानिर्वचनीयाविद्यैव तथाभूतप्रपञ्चप्रकृतितया सर्वप्रपञ्चोपेता। ब्रह्म तु तथातथाप्रतिभासमानप्रपञ्चविवर्तस्याधिष्ठानमेव केवलम्। तथा च मायावशात् सेनासमुद्रादिरूपेण प्रतिभासमानस्यैन्द्रजालिकस्येव ब्रह्मणो न कृत्स्नैकदेशपरिणामप्रसक्तिरस्तीत्येवंरूपमिति ज्ञापयितुमाश्रितः। स त्वर्थः—"श्रुतेस्तु शब्दमूलत्वात्" (ब्र० २.१.२७) इति सूत्र एवाकाङ्क्षादशादुपन्यस्त इति तस्मिन् सूत्रे नाविष्कृतः। अन्यदीयभाष्यादिग्रन्थेषु तु क्लिष्टो देवतापदाध्याहारः केवलं गतानुगतिकतया समाश्रितः।

न च प्रकृतिविशिष्टब्रह्मोपादानवादेऽपि प्रकृतिरेव सर्वकार्योपेतेति न ब्रह्मणि कृत्स्नैकदेशविकल्पावसर इति परिहारान्तरमप्यनेन सूत्रेण विवक्षितमस्तीति द्योतनार्थतयैकपद्याश्रयणं स्यादिति वाच्यम्, सूक्ष्मचिदचिद्वस्तुशरीरकं ब्रह्म कारणं स्थूलचिदचिद्वस्तुशरीरकं ब्रह्म कार्यमिति वादे ब्रह्मरूपकार्यस्य ज्ञानेच्छादीनां च प्रकृत्युपादानकत्वाभावेनाद्वैतवाद इव प्रकृतिः सर्वकार्योपेतेति वक्तुमशक्यत्वात्, ब्रह्मरूपकार्ये ब्रह्मणस्तत्तच्छरीरावच्छेदे च कृत्स्नैकदेशविकल्पप्रसराप्रतिक्षेपाच्च। तथा—"विप्रतिषेधाच्च" (ब्र० २.२.४५) इति पाञ्चरात्राधिकरणसूत्रे विप्रतिषेधादिति पदस्य पाञ्चरात्रप्रामाण्यसमर्थनार्थत्वोपपादयिषया पाञ्चरात्रेऽपि जीवोत्पत्तिप्रतिषेधादित्यर्थो दर्शितः। विस्मरणशब्दस्य स्मरण इव विरोधवाचिनो विप्रतिषेधशब्दस्य न प्रतिषेधे शक्तिरस्तीति गौणी लक्षणा वा क्लिष्टा जघन्यवृत्तिरेव तत्र गतिः। पाञ्चरात्रगतैरेव जीवोत्पत्तिप्रतिषेधवचनैस्तत्रत्यतदुत्पत्तिप्रतिपादकवचनानां विरोधात् तद्विरोधसमाधानार्थं तदुत्पत्तिवचनानां गौणोऽर्थः कल्पनीय इत्येवं विप्रतिषेधादिति पदस्य "विप्रतिषेधाच्चासमञ्जसम्" (ब्र० २.२.१०) इत्यत्रेव परस्परविरोधादप्रामाण्यसमर्थनार्थत्वेन प्रतीयमानस्य प्रामाण्यसमर्थने तात्पर्याङ्गीकारे "तुल्यः सर्वेषाम्" (३.६.१८) इति जैमिनिसूत्र इव व्यवधारणकल्पना समाश्रयणीया।

तथा "अनुकृतेस्तस्य च" (ब्र० १.३.२२) इति दहराधिकरणगुणसूत्रस्य दहराकाशो जीवो न भवति, जीवानुकार्यत्वात्, अनुकर्त्रनुकार्ययोर्भेदावश्यम्भावादिति स्वरसतोऽर्थः प्रतीयते। कथम्? "दहर उत्तरेभ्यः" (ब्र०१.३.१४) इति सूत्रमारभ्य दहरः परमेश्वरोऽन्यो वेति विचारे दहरो धर्मित्वेनानुवर्तते। स एव "अल्पश्रुतेरिति चेत्तदुक्तम्" (ब्र० १.३.२१) इत्यव्यवहित-

सूत्रेऽप्यल्पपरिमाणश्रुतेर्दहरो जीव इति शङ्कानिराकरणार्थे धर्मीत्यत्रापि धर्मिणस्तस्यानुवृत्तिः स्वरसतो लभ्यते। "इतरपरामर्शात् स इति चेन्नासम्भवात्" (ब्र० १.३.१८) इति सूत्रमारभ्य दहरप्रकरणे—"य एष सम्प्रसादोऽस्माच्छरीरात् समुत्थाय" (छान्दो० ८.३.४) इत्यादिवाक्ये जीवपरामर्शाद् दहरो जीव इति पूर्वपक्षनिराकरणस्य प्रवृत्तत्वान्न जीव इति साध्यं लभ्यते। तस्येत्यस्य जीवपरामर्शित्वमपि तस्मिन् सूत्रे 'स' इति तस्य प्रस्तुतत्वादेव लभ्यते। "दहर उत्तरेभ्यः" (ब्र० १.३.१४) इति सूत्रे दहरस्य प्रस्तुतत्वेऽपि तत्रैव तदनुक्तेरसम्भवेन तत्परामर्शानौचित्यात्तस्यानुकृतेरिति हेतोस्तत्कर्मकानुकृतिकर्तृत्वमर्थ इति यद्यपि झटिति प्रतीयते, तथापि—"एतं सेतुं तीर्त्वापि नक्तमहरेवाभिनिष्पद्यते सकृद्विभातो ह्येष ब्रह्मलोकः" (छान्दो० ८.४.२) इति दहरवाक्यशेषे दहराकाशं प्राप्तस्य सततोदितप्रकाशत्वे दहराकाशस्य सततोदितप्रकाशताया हेतुत्वाभिधानात् तदर्थविषयस्यापि सौत्रहेतोस्तत्कर्तृकानुकृतिकर्मत्वरूपं तदनुकार्यत्वमर्थ इति लभ्यते। एवमेवार्थः संक्षिप्य भाष्ये प्रदर्शयिष्यते।

परभाष्ये त्विदं सूत्रं प्रजापतिवाक्योदितापहतपाप्मत्वादिगुणको विमुक्तबन्धः प्रत्यगात्मा दहराकाशो न भवति, दहराकाशानुकर्तृत्वादित्यर्थपरत्वेन व्याख्यातम्। तस्य तदनुकर्तृत्वं "निरञ्जनः परमं साम्यमुपैति" (मुण्डको० ३.१.३) इत्यत्र श्रूयत इति चोदाहृतम्। तत्र "दहर उत्तरेभ्यः" (ब्र० १.३.१४) इति सूत्रामारभ्य धर्मित्वेनानुवृत्तं दहरं "इतरपरामर्शात्" (ब्र० १.३.१८) इति सूत्रतः साध्यत्वेनानुवृत्तं जीवत्वाभावं च परित्यज्य तथात्वेनाननुवृत्ततयाऽत्यन्ताप्रतीतधर्मिसाध्यापेक्षणेन सूत्रयोजनायामतिक्लेशः स्पष्ट एव। व्यर्थश्चायं क्लेशः, अनुवृत्तधर्मिसाध्यापेक्षणेनैवेष्टसिद्धेः। न च तदपेक्षणे तस्यानुकृतेरित्यनेन निर्दिष्टस्य दहराकाशानुकर्तृत्वस्य हेतोरन्वयो न स्यादिति वाच्यम्, तस्य जीवानुकार्यत्वार्थताया दर्शितत्वात्, अनुकृतेरनुकर्तर्येव सम्बन्धस्वारस्ये तस्येत्यस्य जीवपरतया जीवस्य दहराकाशानुकर्तृत्वादित्यर्थपरत्वसम्भवाच्च। तथा सति हेतुः पक्षवृत्तिर्न स्यादिति चेत्, सत्यम्। तथापि पक्षवृत्तिहेतोर्जीवानुकार्यत्वस्य समानसंवित्संवेद्यतयोपनायको भवत्येव। नहि साक्षात्पक्षवृत्तिहेतुरेव सूत्रेषु व्यपदिश्यते, किन्तु यथाकथञ्चित् पक्षवृत्तिहेतोरुपनायकोऽपि प्रायेण सर्वैरपि सूत्रकारैः "तदशिष्यं संज्ञाप्रमाणत्वात्" (पा० १.२.५३), "लुब्योगाप्रख्यानात्" (पा० १.२.५४), "आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्" (जै० १.२.१), "धर्मस्य

शब्दमूलत्वादशब्दमनपेक्षं स्यात्" (जै० १.३.१) [1]"मन्त्रायुर्वेदप्रामाण्यमाप्तप्रामाण्यात्" (न्या० २।१।६९), "न चतुष्ट्वमैतिह्यार्थापत्तिसम्भवाभावप्रामाण्यात्" (न्या० २।२।१), "ज्योतिश्चरणाभिधानात्" (ब्र० १.१.२४), "न प्रयोजनवत्त्वात्"(ब्र० २.१.३२) इत्यादिसूत्रेषु हेतुतया निर्दिष्टो दृश्यते।

किञ्च, परकल्पितधर्मिसाध्यापेक्षण एव हेतोरन्वयः। नहि प्रजापतिवाक्यनिर्दिष्टदहराकाशानुकर्तृत्वं "निरञ्जनः परमं साम्यमुपैति" (३.१.३) इति मुण्डकश्रुतिः प्रतिपादयतीति भ्रान्तोऽपि भणति। न वात्र प्रजापतिविद्यायां तथाभूतं वाक्यमस्ति। "एष सम्प्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते" (छान्दो० ८.१२.३) इति तत्र श्रूयत इति चेत्, किं ततः ? तद्धि जीवस्य मुक्तिदशायामपहतपाप्मत्वाद्यभिव्यक्तिमात्रं प्रतिपादयति, न तु तदभिव्यक्त्या दहराकाशमनुकरोतीति प्रतिपादयति। ततोऽर्थतः सिद्ध्येदिति चेत्, सिद्ध्येद् यदि जीवस्यापहतपाप्मत्वादिप्राप्तौ दहराकाशस्यापहतपाप्मत्वादिकं हेतुत्वेन निर्दिशेत्। न तु निर्देशोऽस्ति।

ननु दहरस्यापहतपाप्मत्वादिकमुक्त्वा तदुपासनाफलत्वेन जीवस्य तदभिव्यक्त्युक्त्या तस्य दहरानुकरणमर्थतः सिद्ध्येदिति चेन्न, प्रजापतिविद्योदितो जीव एव दहरः। तदुदितमुक्तिदशाभिव्यङ्ग्यजीवगतापहतपाप्मत्वादिव्यतिरेकेण दहराकाशगतनित्याभिव्यक्तापहतपाप्मत्वादिसद्भावे नास्ति प्रमाणम्। जीवगतं स्वोपासनाभिव्यङ्ग्यमेव तद्दहरवाक्येऽपि कीर्त्यंत इत्याशङ्कानिराकरणाय हि परमतेऽस्य सूत्रस्य प्रवृत्तिः। तथाशङ्कमानं प्रति जीवगतापहतपाप्मत्वाद्यनुकार्यं दहराकाशेऽन्यदपहतपाप्मत्वादिकं सिद्धं कृत्वा जीवे दहराकाशानुकर्तृत्वहेतुः कथमुपादीयेत। ननु जीवगतापहतपाप्मत्वाद्यभिव्यक्तिरवश्यमन्यानुकरणरूपा वाच्या, "परमं साम्यमुपैति" (मुण्डको० ३.१.३) इति श्रुत्यन्तरात्। तथा च जीवादन्यत्र क्वचिदपहतपाप्मत्वादिसिद्धिरन्वेषणीया। न च दहरवाक्यं विना श्रुत्यन्तरे तदुक्तमस्ति। अतो दहरवाक्यमेवानुकार्यसमर्पकं पर्यवस्येदिति दहराकाशानुकर्तृत्वहेतुसिद्धिरिति चेत्, तर्हि हेतुः सिद्ध्यन् जीवदहराकाशयोर्भेदमादायैव सिद्ध्यतीति तेन हेतुना किं साधनीयम्। अपि च, न केवलं भेदमात्रमपेक्ष्य हेतुः सिध्यति, किन्तु दहराकाशस्य ब्रह्मत्वं चापेक्ष्य, "परमं साम्यमुपैति" (मुण्डको० ३.१.३) इति श्रुतौ ब्रह्मानुकरणस्य श्रुतत्वात्। अतः प्रयाससाध्यस्यापि प्रागेव सिद्धिमपेक्ष्य प्रवृत्तोऽयं हेतुरिति सुतरां व्यर्थः स्यादित्यलं प्रपञ्चेन।

---

१. "मन्त्रायुर्वेदप्रामाण्यवच्च तत्प्रामाण्यमाप्तप्रामाण्यात्" इति सम्पूर्णं सूत्रम्।

तथा "शास्त्रयोनित्वात्" (ब्र. १.१.२) इति सौत्रहेतौ पूर्वसूत्र एव प्रतिज्ञात्वेन योजयितुं शक्ये परभाष्ये ब्रह्म शास्त्रप्रतिपाद्यमिति प्रतिज्ञामध्याहृत्य हेतोः साध्यावैशिष्ट्यपरिहारार्थमब्भक्षादिवदवधारणगर्भतया शास्त्रेतराप्रमाणकत्वादित्यर्थे पर्यवसानमुक्तम्। तदप्यतिक्लिष्टमिति स्पष्टमेव। एवमन्यान्यप्युदाहरणान्यूहनीयानि। अप्रसिद्धश्रुतिस्मृत्यादिकल्पनावलम्बकभाष्यकारादिभिस्तु कृत्स्नमपि शास्त्रं कलुषितमिति स्पष्टमेव। एवमर्वाचीनभाष्यादिप्रणेतृणां ये पूर्वपूर्वोपदेष्टार आसंस्तानुद्दिश्य पूर्वाचार्यैः कलुषितमित्युक्तिः।

नन्वत्र श्लोके विदुषां ब्रह्मदर्शन इत्यत्र विदुषामिति षष्ठी न युक्ता, "उभयप्राप्तौ कर्मणि" (पा० २.३.६६) इति सूत्रेण कर्तृकर्मोभयप्राप्तिमतः कृतो योगे कर्तरि षष्ठ्याः प्रतिषिद्धत्वात्। किन्तु "अन्तर्धौ येनादर्शनमिच्छति" (पा० १.४.२४) इति सूत्रगते यत्पद इव दर्शनकर्तृपरे विद्वत्पदे तृतीयया भाव्यम्। उच्यते—यत्र कर्तृकर्मणोरुभयोर्विशिष्य विवक्षाविषयतया प्राप्तिः, स एवोभयप्राप्ताविति सूत्रस्य विषयः, यथा 'आश्चर्यो गवां दोहोऽशिक्षितेनागोपालकेन' इति। गावः किलाऽजादिवत् सुदोहा न भवन्ति। अयं चाशिक्षितो नापि गोपालः, तथाप्यनेनैतासां दोहोऽयमाश्चर्य इति प्रतिपिपादयिषिताश्चर्योपपादनार्थतयाऽत्र कर्तृकर्मणोरुभयोरपि विशिष्य विवक्षाया विषयतया प्राप्तिरस्ति। अन्तर्धाविति सूत्रे शब्दानुपात्तत्वेऽप्यन्तरङ्गप्रत्यासत्त्या लब्धस्यात्मनः कर्मणोऽपि येनेति निर्दिष्टस्य कर्तुरिव साऽस्ति। अन्यकर्मकोपाध्यायादर्शनेच्छायामुपाध्यायस्यापादानसंज्ञा मा भूदित्येवमर्थम्। इह तु व्याससूत्रमिदमत्यन्तमपरिच्छेद्यस्य ब्रह्मणोऽपि परिच्छेदे निरपेक्षकारणमित्येवं सूत्रोत्कर्षप्रतिपादनपरे वाक्ये कर्मविशेषवत् कर्तृविशेषस्य विदुषामित्युपात्तस्यापि न विशिष्य विवक्षाविषयतया प्राप्तिरस्ति। तस्मात् "उभयप्राप्तौ कर्मणि" (पा० २.३.६६) इत्यस्य नायं विषयः। तद्विषयत्वेऽपि वा "शेषे विभाषा" (पा० २.३.६६) इति वार्त्तिकेन तस्य विकल्पितत्वात्। शब्दानामनुशासनमाचार्येणाचार्यस्य वेति पक्षे षष्ठ्यपि युज्यत एव।

ननु तथापि ब्रह्मदर्शनमिति समासो न युज्यते, "प्रतिपदविधाना षष्ठी न समस्यते" (पा० २.२. १० वा०) इत्यपोदितस्य षष्ठीसमासस्य 'कृद्योगलक्षणा षष्ठी समस्यते" (पा० २.२.९ वा०) इति वार्त्तिकान्तरेण प्रतिप्रसूतत्वेऽपि "कर्मणि च" (पा० २.२.१४) इति सूत्रेण कर्मणि

श्रीमतां व्याससूत्राणां श्रीकण्ठीयः प्रकाशते ।
मधुरो भाष्यसन्दर्भो महार्थो नातिविस्तरः ।। ६ ।।

षष्ठ्याः समासप्रतिषेधादिति चेत्, अत्रेयं शाब्दिकमर्यादा। कर्मणीति शब्दमुच्चार्य या षष्ठी विहिता तस्याः समासनिषेधः, न कर्मणि षष्ठीमात्रस्य। तथा सति 'पुरां भेत्ता' इत्यादौ षष्ठीसमासनिषेधस्येत एव सिद्धतया कर्तरि विहिताभ्यां तृजकाभ्यां योगे षष्ठीसमासनिषेधकस्य "तृजकाभ्यां कर्तरि" (पा० २.३.१५) इति सूत्रस्यानारम्भणीयतापत्तेः। तथा चात्रोभयप्राप्ताविति सूत्राप्रवृत्तेर्न कर्मणि शब्दमुच्चार्य षष्ठी विहिता, किन्तु "कर्तृकर्मणोः कृति" (पा० २.३.६५) इति सूत्रगतं कर्तृकर्मणोरिति शब्दमुच्चार्येति नात्र समासनिषेधप्रसङ्ग इति।

अत्र चिन्त्यते—उभयप्राप्ताविति सूत्रं कर्मणि षष्ठ्याः प्राप्त्यर्थं नियमार्थं वा न भवति, "कर्तृकर्मणोः कृति" (पा० २.३.६५) इति पूर्वसूत्रतस्तस्या नित्यमेव प्राप्तत्वात्। किन्तु कृद्योगे सर्वत्र कर्तरि षष्ठी प्राप्ता उभयप्राप्तिमति तत्प्रतिषेधार्थम्। अत एवोभयप्राप्तौ कर्मणीति प्रतिषेधे–"अकादिप्रयोगेऽप्रतिषेधः", "शेषे विभाषा" (पा० २.३.६६ वा०) इति तत्सूत्रवार्त्तिके षष्ठीप्रतिषेधमेव तस्य सूत्रस्यार्थं कृत्वा तस्य प्रतिषेधस्य—"भेदिका रुद्रस्य जगतो बिभित्सा रुद्रस्य जगतः" इत्यादिप्रयोगेऽपवादः, शेषे प्रतिषेधस्य विकल्पश्च दर्शितः। एवं च कर्मणीति विहिता षष्ठ्येव नास्तीति कथं तद्विषयत्वं "कर्मणि च" (पा० २.२.१४) इति सूत्रस्य स्यादिति। अत्रेदं विवक्षितम्—कर्मणीति शब्दोच्चारणपूर्वकं कर्तरि षष्ठ्याः प्रतिषेधेन या षष्ठी परिशेषिता, तस्याः समासनिषेध इति। अत एव महाभाष्ये कर्मणीति शब्दमुच्चार्य या षष्ठीत्येतावदेवोक्तं न तु विहितेति। तस्मात् सर्वथापि ब्रह्मदर्शनमिति समासो युक्तः ॥ ५ ॥

एवं चिकीर्षितप्रतिज्ञायामेव स्वचिकीर्षितस्य भाष्यस्य परभाष्यादिभ्योऽतिशयः सूत्राञ्जस्यानुसारित्वप्रदर्शनेनाविष्कृतः। अथ गुणान्तरप्रदर्शनेनाप्याविष्क्रियते—श्रीमतामिति। श्रीस्त्रिवेदी, "ऋचः सामानि यजूंषि। सा हि श्रीरमृता सताम्" (तै० ब्रा० १.२.१.२६) इति श्रुतेः। तद्वतां तत्प्रचुराणामित्यर्थः। भूम्नि मतुप्प्रत्ययः। यद्यपि तत्तदधिकरणसूत्राण्येकैकं विषयवाक्यमधिकृत्य प्रवृत्तानीव भान्ति, तथापि व्यस्तसमस्तवेदतया सकलवेदतदर्थाभिज्ञेन भगवता बादरायणेन प्रणीतानि तानि सूत्राणि तत्तत्समानन्यायानि

सर्ववेदान्तसारस्यसौरभास्वादमोदिनाम् ।
आर्याणां शिवनिष्ठानां भाष्यमेतन्महानिधिः ।। ७ ।।

बहूनि विषयवाक्यान्यवगाहन्त इति भावः । एवंभूतानां व्याससूत्राणां श्रीकण्ठप्रणीतो भाष्यसन्दर्भः प्रकाशते प्रकर्षेण भासते । श्रीकण्ठनाम्ना हि श्रीस्त्रिवेदी, तदलङ्कृतः कण्ठोऽस्येति व्युत्पत्त्या सकलवेदतदर्थाभिज्ञत्व-माचार्यस्य प्रतीयते । अतः सकलवेदतदर्थाभिज्ञेन कृतानां तथाभूतेन कृतमेव भाष्यं शोभावहमिति भावः ।

मधुरो रसवद्वागर्थयुक्तः । "मधुरं रसवद्वाचि वस्तुन्यपि रसः स्थितः । येन माद्यन्ति धीमन्तो मधुनेव मधुव्रताः ॥" इति हि काव्यलक्षणविदः । तत्र ललितवर्णपदविन्यासादिकृतं सन्दर्भरामणीयकं वाचो माधुर्यम् । अर्थस्य तु काव्येषु सहृदयास्वादनीयमहानन्दप्रतिबिम्बनोपयोगिरीत्यादिवृत्तिवासनाभि-व्यञ्जनक्षमविभावानुभावादिरूपत्वम् । इह तु "रसो वै सः" (तै.उ.२.७)इत्यादि श्रुतिवर्णितनिरतिशयानन्दरूपपरशक्तिविशिष्टपरब्रह्मरूपत्वमेव । न च तथा-त्वेऽपि काव्यवद् यथासिद्धपरब्रह्मगुणवर्णनमात्रविश्रान्तोऽयं सन्दर्भः, किन्तु तन्निर्णयोपयोगिन्यायसहस्रभरित इत्याह—महार्थं इति । तथाप्यत्र भूयान्नास्ति शब्दप्रपञ्चः,साभिप्रायविशेषणविन्यासेनैव प्रायस्तत्र तत्र दर्शनीय-न्यायानामाविष्करणात्, "व्याख्यानतो[1] विशेषप्रतिपत्तिः" इति न्यायेन तेषां व्याख्यानतः सुगमत्वादित्यभिप्रेत्याह—नातिविस्तर इति । महावि-भाषया नञः समासाभावः,"वृत्तानुपूर्वं च न चातिदीर्घं" इतिवत् । नसमासो वा, "गमिकर्मीकृतनैकनीवृता" इतिवत् ॥ ६ ॥

एवंगुणवदप्येतद्भाष्यमेतदभिमतां शास्त्रार्थमर्यादामनङ्गीकुर्वतामना-दरणीयमिति सर्वोपादेयत्वाभावं दोषमाशङ्क्य नायं दोषः, किन्तु गुण एवेत्यभिप्रेत्याह—सर्वेति । सर्वेषां वेदान्तानां यत्सारस्यं निरतिशयास्वाद-नीयरसरूपे परब्रह्मणि तात्पर्यम्, तत्सौरभमिव । यदेकदेशस्थितस्यापि दिव्यपुष्पस्य सौरभमनेकदेशविसृमरं भवति, एवं परब्रह्मणि निविष्टमपि वेदान्तवृन्दतात्पर्यं तत्तद्विद्योपक्रमगतोपाख्यानादिप्रदर्शितार्थद्वारा गुरुशिष्य-क्रमाद्यनेकार्थपर्यवसायीति तत्साम्यम् । यद्यपि सारस्यमेव सौरभमिति

---

१. व्याख्यानतो विशेषप्रतिपत्तिर्नहि संदेहादलक्षणमिति परिभाषा परिभाषेन्दुशेखरा-दिषु व्याख्याता/द्रष्टव्या ।

मयूरव्यंसकादिसमासोऽपि सम्भवति, तथाप्यास्वादः सारस्यशब्देन रसरूपतयाध्यवसिते तात्पर्य एव प्रथमान्वयदशायां मुख्यतयान्वेतीति पूर्वपदार्थप्राधान्यसिद्ध्यर्थमुपमितिसमासोऽत्र ग्राह्यः। एवं च तात्पर्यं सौरभमिवेत्युपमया तात्पर्यवतो वेदान्तवृन्दस्य दिव्यसौरभवत्पारिजातस्तवकोपमा व्यज्यत इत्येकदेशविवर्तिरूपकवदेकदेशविवर्तिन्युपमेयम्। प्रसिद्धं हि पारिजातस्तबकस्य सङ्कल्पितसकलार्थप्रदायित्वं हरिवंशे पारिजातसंहितायाम्। तथा वेदान्तवृन्दमपि स्वसेविनां मोक्षप्रापणेन—"स यदि पितृलोककामो भवति, सङ्कल्पादेवास्य पितरः समुत्तिष्ठन्ति" (छान्दो० ८.२.१) इत्यादिश्रुत्युक्तरीत्या सङ्कल्पितसकलार्थप्रदायीति तत्साम्यम्। एवं पारिजातस्तबकसौरभवद्व्यापिनो वेदान्तवृन्दतात्पर्यस्यास्वादः आ समन्तात् साकल्येनानुभवः, तेन मोदितुं शीलमेषामिति ताच्छील्यार्थे णिनिप्रत्ययः। स्वभावसिद्धवेदान्तार्थतात्पर्यश्रद्धावतामित्यर्थः। अवश्यं मोदन्त इत्यर्थे वा—"आवश्यकाधमर्ण्ययोर्णिनिः" (पा०. ३.३.१७०) इति सूत्रेण णिनिप्रत्ययः। भक्तिपारवश्यात् तदाकर्णनमात्रेणावश्यमाकस्मिकमानन्दं प्राप्नुवतामित्यर्थः।

एवंभूतानां शिवनिष्ठानां सर्वात्मना शिवं प्रपद्य तमेव सर्वदा ध्यायतामार्याणां पूज्यानां सत्पुरुषाणामेतद्भाष्यं महानिधिः। यथा महानिधिरतिदरिद्रैरकस्माल्लब्धो दर्शनमात्रेण महानन्दकरः, तदभिमतसकलार्थप्रदश्च, तथेदमपि भाष्यमुक्तरूपैः सत्पुरुषैर्दृष्टं दर्शनमात्रेण सद्यः परनिर्वृतिकरं सकलवेदान्तार्थनिर्णयेन निरन्तरशिवध्यानोपयुक्ततदीयनिखिलमङ्गल्यगुणविग्रहादियाथार्थ्यबोधसमर्पकं चेति तत्साम्यम्। एवं च यानुद्दिश्येदं भाष्यं विरच्यते, तदादरणीयत्वस्यावैकल्ये किमन्येषामनादरेण, "मदुक्तिश्चेदन्तर्मदयति सुधीभूय सुधियः किमस्या नाम स्यादलसपुरुषानादरभरैः" इति न्यायात्। प्रत्युत दधीचादिशापदग्धेभ्यस्तेभ्यस्तेभ्यश्चोरेभ्यो महानिधिवद् यत्नाद् गोपनीयमेतदिति तदनादरणमनुगुणमेवेति भावः॥ ७॥

अथ जिज्ञासाधिकरणम् ॥१॥

इहौपनिषदो मीमांसा समारभ्यते ।

नन्विदं शास्त्रं नारम्भणीयम्, अत्र चिकीर्षितस्य वेदान्तविचारस्य सकलवेदविचारार्थं प्रवृत्तेन धर्ममीमांसाशास्त्रेण सिद्धत्वात् । न च तत्र धर्मपरस्यैव वेदभागस्य विचारो वृत्तो न कृत्स्नस्य, "अथातो धर्मजिज्ञासा" (जै० १.१.१) इति तदुपक्रमादिति वाच्यम्, तत्रत्याथातःशब्दार्थपर्यालोचनया तत्र कृत्स्नस्य वेदस्य विचारश्चिकीर्षित इत्यवधारणात् । तत्र ह्यथशब्देन कृत्स्नस्वाध्यायाध्ययनानन्तर्यं कर्तव्यस्य विचारस्योच्यते । अतःशब्देन कृत्स्नस्य स्वाध्यायस्य विवक्षितार्थत्वं तत्र हेतुत्वेनोच्यते । यदि तत्र कृत्स्नस्य वेदस्य विचारः, तदैव कृत्स्नस्य स्वाध्यायस्याध्ययनं पूर्ववृत्तमपेक्ष्यत इति तदानन्तर्यवचनमुपपद्यते, कृत्स्नस्य स्वाध्यायस्य विवक्षितार्थतायास्तस्मिन् साध्ये हेतुत्वं च तदैवोपपद्यते । अतो यथा–"चतुर्गृहीतान्याज्यानि भवन्ति, न ह्यत्रानूयाजा इज्यन्ते" इत्यातिथ्याप्रकरणगतेन वाक्येनातिथ्यायामेवौपभृताष्टगृहीतव्यवच्छेदे क्रियमाणेऽप्यनूयाजाभावरूपहेतुसाधारण्यादन्यत्रापि यत्रेष्ट्यन्तरेऽनूयाजानामभावः प्रमितस्तत्र सर्वत्रापि स सिध्यति, यथा वा क्षितिमात्रं निर्दिश्य सकर्तृकत्वे साध्यमानेऽपि कार्यत्वहेतुसाधारण्यादन्यत्रापि यत्राङ्कुरादौ कार्यत्वमनुसंहितमस्ति तत्र सर्वत्रापि तत्सिध्यति, तथाऽत्र धर्मजिज्ञासेति विशिष्य प्रतिज्ञानेऽपि हेतुसाधारण्याद् धर्मपरादन्यत्रापि वेदभागे विचारः कर्तव्यः सिद्ध्यति ।

किञ्च, धर्मशब्दो धर्मब्रह्मसाधारण्येनालौकिकश्रेयःसाधनमात्रवाचीति प्रतिज्ञापि साधारण्येव । तस्य कार्यमात्रवाचित्वेऽपि कृतसाङ्गवेदाध्ययनस्य वेदार्थ एव जिज्ञासौचित्यादत्रत्यं धर्मपदं वेदार्थमात्रोपलक्षणं पर्यवस्यति । तस्य वेदार्थमात्रपरत्वेऽपि—"स्याच्चैकस्य ब्रह्मशब्दवत्" (ब्र० २.३.५) इति न्यायेन चोदनालक्षणोऽर्थो धर्म इति द्वितीयसूत्रगतधर्मशब्दस्यालौकिकश्रेयःसाधनकार्यपरत्वोपपत्तेश्चोदनाशब्दस्य लिङादियुक्तद्रहितवाक्यसाधारण्येन प्राप्तिबाधरहितार्थकवेदमात्रपरत्वे द्वितीयसूत्रगतस्यापि धर्मशब्दस्यालौकिकश्रेयःसाधनमात्रपरत्वस्य वेदार्थमात्रपरत्वस्य वोपपत्तेश्च । तस्मान्निर्विषयमिदं शास्त्रं नारम्भणीयमित्याशङ्कां निराकुर्वन्नेव

प्रथमसूत्रव्यावर्तनीयप्रयोजनाद्यभावप्रयुक्तशास्त्रानारम्भशङ्कोत्थापनाय भूमिकामारचयति—इहेति। इह सूत्रसन्दर्भरूपे शास्त्रे। औपनिषदी उप समीपे परब्रह्मणो निषीदन्ति वर्तन्त इत्युपनिषदो वेदान्ताः। ते हि साक्षात् परे ब्रह्मणि तात्पर्येण वर्तन्ते, न तु कर्मभागवत् तदाराधनरूपयज्ञादिविधानद्वारा तत्सम्बन्धिनि। तद्विषया मीमांसा तदर्थाभिधानोपयोगिन्यायग्रथनात्मिका समारभ्यते भगवता बादरायणेन प्रस्तूयते। उपनिषदीति सप्तम्यन्तपाठेऽप्येवमेवार्थः। यद्वा इह कर्मब्रह्मपरभागद्वयसमुदायात्मके वेदे य उपनिषद्भागस्तत्र मीमांसा तदर्थनिर्णयोपयोगिन्यायग्रथनपरसूत्रसन्दर्भात्मिका समारभ्यत इत्यर्थः। पूजितविचारवाची मीमांसाशब्दोऽत्र तदुपयोगिन्यायग्रथने तदर्थसूत्रसन्दर्भरूपे शास्त्रे वा लक्षणया वर्तते।

केचिद् उपनिपूर्वात् "षद्लृ विशरणगत्यवसादनेषु" (८५४ भ्वा०) इति धातोरवसादनार्थविषयात् क्विपि निष्पन्न उपनिषच्छब्दः साक्षात्संसारमूलस्य नितरामवसादनीषु ब्रह्मविद्यास्वेव प्रसिद्ध इति सोऽपि तत्साधनेषु वेदान्तेषु लक्षणया वर्तत इति वदन्ति। यदाहुः—"प्रवृत्तिहेतून् निश्शेषांस्तन्मूलोच्छेदकत्वतः। यतोऽवसादयेद् विद्या तस्मादुपनिषद्भवेत्॥ यथोक्तविद्याबोधित्वाद् ग्रन्थोऽपि तदभेदतः। भवेदुपनिषन्नामा लाङ्गलं जीवनं यथा॥" इति। तस्मिन् पक्षे मोक्षसाधनविद्यावाचकस्योपनिषच्छब्दस्य तत्साधनेषु वेदान्तेष्विव तद्विषये ब्रह्मण्यपि लक्षणोपपत्तेः, "श्रुतोपनिषत्कगत्यभिधानाच्च" (ब्र० १.२.१६) इति सूत्रगतोपनिषत्पदस्य भाष्ये ब्रह्मपरतया व्याख्यास्यमानत्वात्, "उपनिषदं भो ब्रूहि" (केनो० ४.७), "य एतामेवं ब्रह्मोपनिषदं वेद" (छान्दो० ३.११.३) इत्यादिश्रुतिषूपदेश्ये वेद्ये चार्थ एवोपनिषच्छब्दप्रयोगदर्शनाच्चोपनिषदीत्यस्य ब्रह्मणीति वार्थो ग्राह्यः। विचारशास्त्रस्य ह्यव्यवधानेन वेदान्तवदव्यवधानेन ब्रह्मापि विषय इति भाष्यकारः प्रथमसूत्रव्याख्यानसमये क्वचिदुपनिषच्छास्त्रं विचारणीयमित्यन्यत्र ब्रह्मापि निरतिशयनिःश्रेयसकरं विचारणीयमित्युभयथापि सूत्रतात्पर्यं वक्ष्यति। एवं च इह कर्मब्रह्मरूपवेदार्थसमुदाये ब्रह्मणि मीमांसा समारभ्यत इति वाक्यस्यार्थः।

अत्रायमाशयः—धर्ममीमांसाशास्त्रे कार्यपरवेदभागविचार एव वृत्तो न ब्रह्मपरवेदान्तभागविचारः। नह्यन्यस्मिन् शास्त्रे जन्मादिसूत्रमारभ्य प्रवर्तयिष्यमाणं वेदान्तभागविचारं तत्र क्वचिदाहत्य कृतमुपलभामहे। न च न्यायसाम्यात्तत्सिद्धिः, तत्र वर्णितेभ्यः कार्यपरवाक्यार्थनिर्णा-

यकन्यायेभ्योऽत्र वर्णयिष्यमाणानां सिद्धब्रह्मपरवाक्यार्थनिर्णायकन्यायानां भिन्नत्वात् । ननु कृत्स्नवेदार्थविवक्षारूपहेतुसाधारण्याद्वेदान्तार्थनिर्णयोपयोगिन्यायग्रथनमपि तत्र कृतमेवेति यथाकथञ्चिदुपपादनीयमिति चेन्न, वेदाध्ययनानन्तरं तदध्ययनादेव कारकहेतोर्वेदस्य विवक्षितार्थत्वाद् ज्ञापकहेतोर्वा सर्वैरप्यधीतवेदैर्धर्मविचारः कर्तव्य इति हि धर्मजिज्ञासासूत्रेण प्रतिज्ञायते, न तु तच्छास्त्रप्रणेत्रैव सकलवेदार्थविचारोपयोगिन्यायग्रथनं कर्तव्यमित्यपि । ततश्च यदि नाम हेतुसाधारण्यात् सर्वैरप्यधीतवेदैः कर्मभागविचारवद् ब्रह्मभागविचारोऽपि कर्तव्य इति सिद्ध्येत्, तथापि तावता कार्यपरवेदमात्रविचारोपयोगिन्यायग्रथनपरशास्त्रचिकीर्षया तत्र प्रेक्षावतां प्रवृत्त्यर्थं तत्प्रमेयधर्मविचारकर्तव्यतां प्रतिजानानेनैव ब्रह्मपरभागविचारोपयोगिन्यायग्रथनमपि कर्तव्यमिति न सिद्ध्यति । न खलु वैद्यशास्त्रं चिकीर्षता तत्र प्रेक्षावत्प्रवृत्त्यर्थं तत्प्रमेयौषधसेवनं रोगिभिरवश्यं कर्तव्यमिति प्रतिजानानेनैव–"जन्मान्तरकृतं पापं व्याधिरूपेण बाधते । तच्छान्तिरौषधैर्दानैर्जपहोमार्चनादिभिः ॥" इत्यौषधदानजपादीनां रोगशान्तिकरत्वं हेतुतयोपन्यस्तमिति हेतुसाधारण्याद् रोगिभिरौषधसेवनवद् दानादिकमपि कर्तव्यमिति सिद्धावपि तेनैव वैद्यशास्त्रकृता कर्मविपाकशास्त्रनिरूपणीयरोगनिवृत्त्यर्थदानादिनिरूपणमपि कर्तव्यमिति सिद्ध्यति, न वा पर्वते वह्न्यर्थं प्रविवर्त्सता तत्र वह्निसत्त्वपरिज्ञानार्थं परामृष्टं धूमलिङ्गमन्यत्रापि क्वचिद् दृष्टमासीदित्येतावता तत्रापि वह्न्यनुमित्युदयेऽपि प्रवर्तितव्यमिति सिद्ध्यति ।

किञ्च, हेतुसाधारण्यमात्रेणावश्यकर्तव्याग्निहोत्राद्यनुष्ठानोपयोगिसौत्रप्रतिज्ञाविषयधर्मविचारवदतथाभूतब्रह्मविचारेऽपि प्रवर्तितव्यमित्येतदेव न सिद्ध्यति, कुतो धर्ममीमांसासूत्रकृतैव ब्रह्मविचारोपयोगिन्यायग्रथनमपि कर्तव्यमिति सिद्धिप्रत्याशा । वस्तुतस्तु धर्मजिज्ञासासूत्रगतस्यातःशब्दस्य ज्ञापकहेतुपरत्वे धर्मस्य विचार्यत्वं साध्यं प्रति वेदस्य विवक्षितार्थत्वं साधकहेतुत्वेन नोपन्यस्यते, यो विवक्षितार्थः सोऽधीतवेदकर्तव्यार्थविचार इति सामान्यव्याप्तावसच्छास्त्रादिषु व्यभिचारात्, यो वेदो विवक्षितार्थ इति विशेषणे व्याप्तिग्रहस्थानाभावात् । किन्तु साङ्गवेदाध्ययनवतामापातप्रतिपन्नधर्मनिर्णयार्थमग्निहोत्रादिवाक्यार्थविचारं चिकीर्षतां विषनिर्हरणादिमन्त्रवत् तत्राप्यविवक्षितार्थत्वशङ्कया विचारप्रवृत्तिप्रतिबन्धकप्रसक्तौ तन्निरासार्थत्वेनोच्यते । बाधकनिरासार्थं च विवक्षितार्थत्वं ब्रह्मपरभागसाधारण्येनोपपादनीयम् । अन्यथा हि तद्वत् कर्मपरभागोऽप्य-

विवक्षितार्थोऽस्त्विति शङ्का स्यात्। कृत्स्नस्वाध्यायाध्ययनानन्तर्यं च वक्तव्यम्। स्वचिकीर्षितशास्त्रे प्रेक्षावतां प्रवृत्त्यर्थं कर्तव्यत्वेन प्रतिज्ञायमाने धर्मविचारे प्रयोजकतया कार्यपरवेदाध्ययनमात्रस्यापेक्षितत्वेऽप्यध्ययनविधेः कृत्स्नस्वाध्यायविषयत्वेन तदेकदेशमधीत्योपरन्तुमशक्यत्वात्।

ननु मा भूदथातःशब्दार्थपर्यालोचनया धर्ममीमांसाशास्त्रे ब्रह्मपरवाक्यविचारोऽपि वृत्त इत्यवगमः, धर्मजिज्ञासा कर्तव्येति प्रतिज्ञयैव तदवगमः स्यात्, धर्मशब्दस्य कर्मब्रह्मोभयसाधारणत्वात्। तथा हि—धर्मशब्दो न यागादिजन्यापूर्ववाची, किन्तु यागादिकर्मवाची, अपूर्वमजानतामपि महात्माय-मुपसर्पणीयो धर्मं चरतीति यागादिकमनुतिष्ठन्तं दृष्ट्वा व्यवहारदर्शनात्, "लोके धर्मिष्ठं प्रजा उपसर्पन्ति" (महाना० १०.६) इति श्रुतावपि तथैव लोकव्यवहारस्यानुवाददर्शनाच्च, "यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्" (ऋ० ८.४.१९) इति श्रुतौ यज्ञे धर्मशब्दप्रयोगाच्च। यागादिषु च न धर्मत्वजातिरेकानुगतास्ति, या तस्य प्रवृत्तिनिमित्तं स्यात्। किन्तु धृञः प्रीतिवाचिनो धातोः "अर्त्ति-स्तु-सु-हु-सृ-धृ-क्षि-क्षु-भा-या-वा-पदि-यक्षि-नीभ्यो मन्"(१४५ उ०)इति सूत्रेण साधनार्थे मन्प्रत्यये सति निष्पन्नो धर्मशब्दः श्रेयःसाधनत्वं योगेन समर्पयन् भोजनादिषु प्रयोगाभावादलौकिकश्रेयःसाधनवाचको योगरूढ्या पर्यवस्यति। न तु कार्यत्वं विधेयत्वं वा तत्प्रवृत्तिनिमित्ते विशेषणान्तरमपि निवेशनीयम्, गौरवात्।

एवं प्रवृत्तिनिमित्तानुरोधेन धर्मशब्दस्य ब्रह्मसाधारण्ये सति धर्मजिज्ञासा कर्तव्येति प्रतिज्ञा अधीतवेदेन ब्रह्मविचारस्यापि कर्तव्यतामवगाहत इति साधारणप्रतिज्ञासामर्थ्येन ब्रह्मविचारोपयोगिन्यायग्रथनमपि चिकीर्षितमिति धर्ममीमांसासूत्रकृदाशयपरिज्ञानात् तद्विचारोऽपि तत्र वृत्त इत्यवगम्यते, नहि सर्वज्ञानां महर्षीणां ग्रन्थचिकीर्षार्वाचीनानामिव मध्ये विहतेति वक्तुं शक्यत इति चेन्मैवम्, धर्मशब्दस्यालौकिकश्रेयःसाधनमात्रवाचित्वे श्येनयागादीनामपि धर्मत्वापत्तेः। बलवदनिष्टाननुबन्धित्वं विशेषणान्तरं क्रियत इति चेत्, किं तदनुबन्धित्वं तदविनाभूतत्वं तज्जननयोग्यत्वं वा ? आद्ये श्येनादीनां धर्मत्वापत्तिस्तदवस्था, तज्जन्यदुरितस्य प्रायश्चित्तेन ब्रह्मज्ञानेन वा क्षपणे सत्यनिष्टानुत्पत्त्या तत्रापि भाव्यनिष्टाविनाभावाभावात्। द्वितीये तज्जननायोग्यत्वं श्रेयसो विशेषणं तत्साधनस्य वा ? आद्ये स दोषस्तदवस्थः, वैरिविपत्त्युद्देश्यकतदनुकूलव्यापाररूपाणां श्येनादीनामेव हिंसात्वेन दुरितोत्पादनद्वारा नरकजनकतया वैरिविपत्तेस्तज्जन्य-

प्रीतेर्वा श्रेयसस्तदजनकत्वात्। द्वितीये धर्मशब्दप्रवृत्तिनिमित्तस्य न ब्रह्मसाधारण्यम्, सर्वकर्मफलप्रदस्य ब्रह्मणः श्रेयसीवानिष्टफलेऽपि जनकत्वात्।

ननु बलवदनिष्टाननुबन्धित्वमित्यस्य बलवदनिष्टजननायोग्यत्वं नार्थः, तथा सति नित्यबुद्ध्या स्वर्गोद्देशेन वानुष्ठितस्य ज्योतिष्टोमस्य धर्मत्वाभावापत्तेः, "एकस्मै वा अन्ये यज्ञक्रतवः कामायाह्रियन्ते सर्वेभ्यो ज्योतिष्टोमः" इति श्रुत्या सर्वफलसाधनत्वेनावगतस्य तस्य वैरिविपत्तिं प्रत्यपि साधनतया श्येनयागादिवद् बलवदनिष्टजननयोग्यत्वात्। किन्तु श्रेयोऽर्थमनुष्ठिते यस्मिन् बलवदनिष्टजननार्थं तस्य प्रयोगान्तरं नापेक्ष्यते, तद्बलवदनिष्टानुबन्धीति तद्भिन्नत्वमर्थः। तथा च स्वर्गाद्यर्थमनुष्ठितेऽपि ज्योतिष्टोमे बलवदनिष्टजननार्थं योगसिद्ध्यधिकरणन्यायेन वैरिविपत्तिफलोद्देश्यकं प्रयोगान्तरमपेक्ष्यत इति प्रयोगान्तरानपेक्षभिन्नत्वाद्धर्मः, वैरिविपत्त्यर्थमनुष्ठिते तदर्थं प्रयोगान्तरं नापेक्ष्यत इति तद्भिन्नत्वाभावादधर्म इति व्यवस्था सङ्गच्छते। एवं चाननुष्ठिते ब्रह्मण्यनुष्ठितमनुष्ठानान्तरं नापेक्षत इति विशेषणयोरनन्वयात् तथाभूतं तद्भिन्नत्वमस्तीति प्रवृत्तिनिमित्तस्य ब्रह्मसाधारण्यं लभ्यते। यद्युद्गात्रपच्छेदवतः श्येनयागस्याङ्गविकलतया वैरिविपत्तिफलापर्यवसाने तत्पर्यवसानपूर्वकबलवदनिष्टजननार्थमपच्छेदप्रायश्चित्तरूपप्रयोगान्तरापेक्षत्वेन तदनपेक्षभिन्नतया धर्मत्वप्रसङ्गो दोषः स्यात्, तदा यस्मिन् साङ्गेऽनुष्ठित इति विशेषणीयम्। यद्येवमपि क्रत्वाश्रितो यो गुणो वैरिविपत्तिफलकस्तस्य साङ्गत्वेऽपि तदाश्रयस्याङ्गवैकल्ये "गुणाच्च न फलं सिद्ध्येद् विगुणः क्रत्वपाश्रयात्" इति न्यायतः फलपर्यवसानाभावेन तत्पर्यवसानपूर्वकबलवदनिष्टजननार्थं प्रयोगान्तरापेक्षतया तदनपेक्षभिन्नत्वेन धर्मत्वप्रसङ्गो दोषः स्यात्, तदा साङ्गमित्यस्य फलजननार्थमपेक्षितेन सर्वेण सहितत्वमर्थोऽस्तु। एवमपि श्येनजन्यदुरितस्य प्रायश्चित्तादिना क्षपणे सति बलवदनिष्टजननार्थं प्रयोगान्तरापेक्षासत्त्वात् तस्य धर्मत्वप्रसङ्गो दोष इति चेन्न, फलान्यतज्जन्यापूर्वनाशकाभावे सतीत्यपि विशेषणोपादानात्। एवं च फलजननापेक्षितसर्वसहिते यस्मिन्ननुष्ठिते फलान्यतज्जन्यापूर्वनाशकाभावे च सति बलवदनिष्टजननार्थं प्रयोगान्तरं नापेक्ष्यते तद्बलवदनिष्टानुबन्धि, न तु फलजननापेक्षितसर्वसहिते यस्मिन्ननुष्ठिते फलान्यतज्जन्यापूर्वनाशकाभावे च सत्यपि बलवदनिष्टजननार्थं प्रयोगान्तरमपेक्ष्यते तद्भिन्नं बलवदनिष्टानुबन्धि, येन ब्रह्मापि बलवदनिष्टानुबन्धीति प्रवृत्तिनिमित्तस्य तत्साधारण्यं न स्यात्।

यद्वा बलवदनिष्टाननुबन्धित्वं श्रेयसो विशेषणं न तु तत्साधनस्य । तच्च यत्फलोद्देशोऽनुष्ठाने बलवदनिष्टप्रयोजको न भवति, तत्त्वं तथाभूतश्रेयोऽलौकिकसाधनत्वम् । ब्रह्मसाधारणमिदं धर्मशब्दस्य सिद्धसाध्यसाधारण्यं कर्ममीमांसकानामपि सम्मतमेव । यदाहुः—"द्रव्यक्रियागुणादीनां धर्मत्वं स्थापयिष्यते । तेषामैन्द्रियकत्वेऽपि न ताद्रूप्येण धर्मता ॥" (श्लो० वा० चो० १३) इति । तस्माद् ब्रह्मसाधारणो धर्मशब्द इति चेन्मैवम्, "अथातो धर्मजिज्ञासा" (जै० १.१.१) इति धर्मविचारप्रतिज्ञानन्तरं को धर्म इति विचार्य परधर्मशब्दार्थजिज्ञासायां प्रवृत्ते "चोदनालक्षणोऽर्थो धर्मः" (जै० १.१.२) इति सूत्रे यः "चुद प्रेरणे" (१५९३ चु०) इति धातुनिष्पन्नचोदनाशब्दोक्तप्रवर्तकवाक्यप्रमेयोऽर्थः, स धर्म इति तदर्थकथनेन यस्य श्रेयःसाधनत्वं विध्येकगम्यं तस्यैव धर्मशब्दार्थत्वावगमात् । न च शब्दतदुपजीविप्रमाणेतरप्रमाणजन्यप्रमित्यविषयकार्थकत्वरूपालौकिकत्वापेक्षया प्रवर्तकत्वरूपशब्दविशेषणाधिकस्य विध्येकगम्यत्वस्य गुरुत्वादलौकिकत्वमेव लघु धर्मशब्दप्रवृत्तिनिमित्ते निवेशनीयमिति वाच्यम्, वृद्धव्यवहारेण हि शब्दार्थो निश्चेयः, न तमनादृत्य लाघवमनुसर्तुं युक्तम् । नहि—"अधिकं च विवर्णं च जैमिनिः स्तोभशब्दत्वात्" (जै.९.२.३९) इत्यनादिवृद्धव्यवहारप्रसिद्धस्तोभशब्दार्थकथने लाघवादृगक्षराधिकत्वमेव तत्प्रवृत्तिनिमित्तम्, न तु विवर्णत्वमपि निवेश्यमिति वक्तुं शक्यम् । न च "कृष्णं धर्मं सनातनम्" (म० भा० ३.८६.२२) इति विध्यस्पृष्टे सिद्धरूपे वासुदेवेऽपि धर्मशब्दस्य व्यवहारो दृष्ट इति वाच्यम्, "प्रणम्रेषु महीपेषु प्रसादो मूर्तिमानयम्" इत्यस्य मूर्तिमत्त्वरूपप्रसिद्धप्रसादवैलक्षण्यविशिष्टप्रसादत्वारोप इव "धर्मो विग्रहवान् रामः" इत्यस्य विग्रहवत्त्वरूपप्रसिद्धधर्मवैलक्षण्यविशिष्टधर्मत्वारोप इव च सनातनत्वरूपप्रसिद्धधर्मवैलक्षण्यविशिष्टधर्मत्वारोपे तात्पर्येणोपपन्नस्यार्थवादरूपपौराणिकवचनस्य "चोदनालक्षणोऽर्थो धर्मः" (जै० १.१.२) इति विचार्यपरधर्मशब्दार्थनिर्णयैकप्रयोजनकसूत्रवच्छब्दशक्तिनियामकत्वाभावात् ।

अस्तु वा यथाकथञ्चिद् धर्मशब्दस्यालौकिकश्रेयःसाधनमात्रवाचित्वेन ब्रह्मसाधारण्यम्, तथापि प्रत्यक्षौत्पत्तिकसूत्राभ्यां विचार्यस्य धर्मस्य प्रत्यक्षादिविषयत्वनिराकरणपूर्वकमुपदेशैकगम्यत्वव्यवस्थापनात् । "दध्ना जुहोत्यरुणया क्रीणाति" इत्यादिभिर्विधिभिर्होमकरणादिभावेन विहितानां दध्यारुण्यादीनां विधिगम्यधर्मत्वेनैव रूपेण यथा विचार्यता न लोकसिद्धेन दधित्वादिना रूपेण, नापि वैशेषिकादिविचारितेनावयव्या-

तदारम्भो ह्यत्र किंपुरुषार्थः। पुरुषार्थो हि निरुपाधिकप्रेमद्वेषास्पदयोः सुखदुःखयोः प्राप्तिरत्यन्तनिवृत्तिर्वा। कश्चेहाधिकारी, यस्यार्थित्वादयो धर्माः। किमस्य विषयः, यत्प्रसिद्ध-

---

रब्धत्वतत्संघातत्वधर्मभिन्नत्वादिना, तथा ब्रह्मणोऽपि "ब्रह्मणेऽभिजिते चरुम्" इत्यादौ देवताभावेन विधिस्पर्शोऽस्तीति विधिगम्येन वा "एष ह्येव साधु कर्म कारयति यमेभ्यो लोकेभ्य उन्निनीषते" (कौ० उ० ३.८) इत्याद्युपनिषद्गम्येन वा अलौकिकश्रेयस्साधनत्वात्मना धर्मत्वेनैव रूपेण धर्मविचारशास्त्रे विचार्यता सिद्ध्येत्, न तु "अथातो ब्रह्मजिज्ञासा" (ब्र० १.१.१) इति प्रतिज्ञापूर्वकमेतच्छास्त्रविचार्येणोपनिषन्निकुरुम्बगम्येन त्रिविधपरिच्छेदराहित्यानन्तमङ्गलयगुणाकरत्वनिरतिशयानन्दात्मकश्रेयोरूपत्वादिना। तस्मात् प्रतिज्ञासाधारण्याद् ब्रह्मविचारो वृत्तोऽवगम्यत इत्येतन्न सङ्गच्छते।

स्यादेतत्। धर्मत्वेन धर्मे विचार्यत्वप्रतिज्ञा न भवति, किन्तु वेदार्थत्वेन, अथातःशब्दोक्तयोर्वेदाध्ययनानन्तर्यतदर्थविवक्षाहेत्वोर्वेदार्थं एवान्वयसामञ्जस्यात्। वेदार्थत्वं च दध्यादिगते होमकरणत्वादाविव ब्रह्मगते देवतात्व इव च तद्गते त्रिविधपरिच्छेदराहित्यादावप्यविशिष्टम्। एवं चोपक्रमानुसारेण द्वितीयसूत्रगतं चोदनापदं मानान्तरप्राप्तिबाधरहितार्थकवाक्यपरं स्यादिति चेन्मैवम्, धर्मशब्दस्य वेदार्थमात्रपरत्वे श्येनयागादेरपि वेदार्थतया लक्ष्यत्वेन संग्राह्यत्वमस्तीति तद्व्यावृत्त्यर्थस्य बलवदनिष्टाननुबन्धित्वपरस्याथपदस्य वैयर्थ्यापत्तेः, वस्तुतो धर्मस्य वेदार्थत्वेन तद्विचारे वेदाध्ययनानन्तर्यतदर्थविवक्षाहेत्वोरन्वयानुपपत्त्यभावाच्चेति दिक्। तस्माद्धर्मविचारशास्त्रेण ब्रह्मविचारस्य सिद्ध्यभावात् तदर्थमिदं शास्त्रमारम्भणीयमिति।

ननु तर्हि ब्रह्मणः स्वरूपप्रमाणसाधनफलैर्विचारार्थं "जन्माद्यस्य यतः" (ब्र० १.१.२) इत्याद्येव शास्त्रमारभ्यतां किमाद्यसूत्रेणेत्याशङ्क्य तद्व्यावर्त्यं शङ्काचतुष्टयं प्रदर्शयति—तदारम्भ इत्यादिना। शास्त्रस्यैवानुबन्धचतुष्टयं तदारम्भस्योपक्रमापरपर्यायस्य प्रथमप्रवृत्तिरूपस्योपचारेण व्यपदिश्य तदारम्भ इति विशेष्यनिर्देशः कृतः। किंपुरुषार्थ इति। किंप्रयोजनक इत्यर्थः।

मनतिप्रसिद्धं च सन्देहजालसमारूढं वर्तते। कस्यानन्तरमस्यारम्भः, यस्य नियतप्रयोजकतया पूर्वभावित्वमवगम्यते।

ननु विचारशास्त्रस्य विचार्यनिर्णयः प्रयोजनमिति प्रसिद्धमेव, किमत्र प्रष्टव्यमित्याशङ्क्याह—पुरुषार्थो हीति। मुख्यपुरुषार्थभूतसुखदुःखनिवृत्त्यन्यतरपर्यवसायित्वेनैव विचार्यनिर्णयस्य प्रयोजनत्वमुपपादनीयमिति भावः। समासोपात्तयोरपि सुखदुःखयोर्बुद्ध्या निष्कृष्टयोर्यथासंख्यं प्राप्तेरत्यन्तनिवृत्तेश्चान्वयः। दुःखनिवृत्तेरात्यन्तिकत्वमिह स्वसमानाधिकरणदुःखासमानकालत्वरूपं न विवक्षितम्, भेषजादिना व्याध्यादिदुःखनिवृत्तेः कालान्तरे दुःखासमानकालत्वात्। किन्तु किञ्चिज्जातीयदुःखनिवृत्तेः कतिपयकालावच्छेदेन यत्तज्जातीयदुःखासामानाधिकरण्यं तात्कालिकोपशमरूपं तत्साधारण्यं विवक्षितम्। ततश्च सांसारिकं सुखदुःखनिवृत्त्योरन्यतरदस्य प्रयोजनमुत संसारनिवृत्तिरूपापवर्गकालभावित्वेनाभिमतम्? नाद्यः, तत्र प्रमाणाभावात्। न द्वितीयः, अनादेः संसारस्य निवर्तयितुमशक्यत्वादिति भावः। कश्चेति। "अर्थी समर्थो विद्वान् शास्त्रैरपर्युदस्तो वैदिककर्मण्यधिकारी" इत्यर्थित्वादयो गुणास्तावद्वाच्याः। न तावदेवात्राधिकारिविशेषणम्, किन्तु नित्यानित्यवस्तुविवेकादिकमपीत्यभिमतम्। तन्न सङ्गच्छते। अक्षय्यादिवाक्यैः कर्मफलानामपि नित्यत्वावगत्या तद्विवेकासम्भवादिति भावः। किमस्येति। यत्सामान्यतः प्रसिद्धं विशेष्याप्रसिद्धं च सन्देहयोग्यं भवति स एव विषयः। ततश्च यदि "अयमात्मा ब्रह्म" (बृ० उ० २.५.१९) इत्यादिश्रुत्यनुसारेणाहमित्यनुभूयमानो जीव एव ब्रह्मेति मतं तदातिप्रसिद्धत्वान्न तस्य विषयत्वम्। यदि "यन्मनसा न मनुते" (केनो० १.६) इत्यादिश्रुत्यनुसारेण वाङ्मनसातीतं ब्रह्मेति मतं तदा अत्यन्ताप्रसिद्धत्वान्न तस्य विषयत्वमिति भावः। कस्यानन्तरमिति। न वेदाध्ययनानन्तरमस्यैतच्छास्त्रकर्तव्यविचारस्यारम्भः, तदनन्तरकालस्य कर्मविचारावरुद्धत्वात्। नापि कर्मविचारस्यानन्तरम्, तस्यात्रोपयोगानिरूपणादिति भावः।

नन्वनुबन्धचतुष्टयाक्षेपप्रस्तावे प्रयोजनाधिकारिविषयेष्वनुपपन्नत्वाभिप्रायगर्भतया पृष्टेष्वनेन प्रयोजनेन विषयेण वास्य शास्त्रस्य कः सम्बन्ध इति सम्बन्धे प्रष्टव्ये पूर्ववृत्तविशेषप्रश्नोऽत्र न सङ्गच्छते। किञ्च, पूर्ववृत्तमधिकारिविशेषणमित्यग्रे भाष्यकार एव वक्ष्यति—"यस्य सम्पत्ति-

रिहाधिकारिविशेषणतया ब्रह्मविचारस्य साधनं तत्पूर्वभावीति विज्ञायते" इति। इहापि स एवार्थः संगृह्य दर्शितः—"यस्य नियतप्रयोजकतया पूर्वभावित्वमवगम्यते" इति। ततश्चाधिकारिविशेषणविशेषप्रश्नोऽयमधिकारिप्रश्न एवान्तर्गत इति न पृथक् कर्तव्यः। अपि च, विषयप्रयोजनादिमच्छास्त्रारम्भे पूर्ववृत्तविशेषो नापेक्षितः। अत एव—"अथ योगानुशासनम्"(यो० १.१), "अथ शब्दानुशासनम्" (पा० म० प०), "प्रमाणप्रमेय" (न्या० १.१.१) इत्यादिशास्त्रारम्भेषु पूर्ववृत्तप्रदर्शनं न दृश्यते। यत्रापि—"अथातो धर्मं व्याख्यास्यामः" (वै० १.१.१) इति कणादसूत्रे शिष्यप्रश्नः पूर्ववृत्तोऽथशब्देन प्रदर्श्यत इति व्याख्यातम्, तत्रापि तन्निरर्थकमेव, शिष्यप्रश्नेन प्रवृत्तेऽपि शास्त्रे विषयप्रयोजनाद्यभावे श्रोतॄणां प्रवृत्त्यसम्भवात्, तत्सद्भावे तमन्तरेण प्रवृत्तेऽपि शास्त्रे तेषां प्रवृत्तिसम्भवाच्च।

धर्मविचारशास्त्रे वेदाध्ययनं पूर्ववृत्तं प्रदर्शितमपेक्षितं दृष्टमिति चेत्, किं ततः। नहि क्वचित् पूर्ववृत्तमपेक्षितं दृष्टमित्येतावन्मात्रेण सार्वत्रिकनियतापेक्षारहितस्य तस्याभावेनात्र शास्त्रानारम्भशङ्का प्रवर्तते। तस्मात् पूर्ववृत्तप्रश्नोऽयमसङ्गत इति चेत्, उच्यते—शास्त्रस्य विषयप्रयोजनाभ्यां सम्बन्धो न पृथग् व्युत्पाद्यः, अस्यायं विषय इत्युक्ते तेन प्रतिपाद्यप्रतिपादकभावः सम्बन्ध इति, अस्येदं प्रयोजनमित्युक्ते तेन कार्यकारणभावः सम्बन्ध इति च तत एवावगन्तुं शक्यत्वात्। तत्तत्सम्बन्धानुपपत्तिशङ्का तु विषयत्वप्रयोजनत्वानुपपत्तिशङ्कारूपैव पर्यवस्यति। न च विषय एवानन्यलभ्यत्वाकारो विषयत्वरूप आरिप्सितशास्त्रेण शक्यप्रतिपादनत्वं सम्ब्रन्ध इत्यवान्तरभेदः कल्पनीयः, शक्यप्रतिपादनत्वविशिष्टस्यैवानन्यलभ्यत्वस्य विषयत्वरूपत्वात्। अत एव "यत्प्रसिद्धमनतिप्रसिद्धं च सन्देहयोग्यं तद्विषयः" इति प्रागुक्तम्। अत्र हि सामान्यतः प्रसिद्ध्या शक्यप्रतिपादनत्वं विशिष्याप्रसिद्ध्यानन्यलभ्यत्वं चोपनीयते। अत एव च 'अनन्यत्रभावो विषयशब्दार्थः' इति वदन्तः, 'यथा मत्स्यानामुदकं विषयः' इति च तत्रोदाहरन्तः शाब्दिका अपि "छन्दोब्राह्मणानि च तद्विषयाणि" (पा० ३.२.६६) इत्यादिसूत्रगतविषयशब्दस्य 'गुरौ वसति' इत्यादिविषयसप्तम्याश्च तमेवार्थं मन्यन्ते।

व्युपसर्गात् "षिञ् बन्धने"(१२४९ स्वा०) इति धातोः "एरच्" (पा० ३.३.५८) इत्यजन्तो विषयशब्दः। सामान्यतः प्रसिद्धोऽर्थो विशेषेणावसीयते प्रतिपाद्यतया बध्यत इति कर्मणि व्युत्पत्त्या यस्तत्र भवत्यन्यत्र न भवति तथाभूते शास्त्रप्रतिपाद्ये निविशते, उदकादिषु तु विशेषेणावसीयते स्वयमे-

इति श्रोतृजनमनशशङ्काशूकसमुन्मूलनाय सर्वज्ञशिखामणिना भगवता व्यासेन समवतारितमिदं सूत्रम्—

।। अथातो ब्रह्मजिज्ञासा ।। १ ।। इति ।

इदमेकमधिकरणम् । विषयसंशयपूर्वपक्षसिद्धान्तनिर्णयसङ्गती-

वान्येन वा बध्यते तस्मिन्नित्यधिकरणव्युत्पत्त्या यत्र किञ्चिद्भवत्यन्यत्र न भवति तथाभूतेऽधिकरणे निविशत इति विशेषः । सोपसर्गस्य धातोरनन्यत्रभावोऽर्थ इत्युभयत्रापि समानमेव । तथा च पूर्ववृत्तेन कारणेन सह शास्त्रसम्पादनीयस्य विचारस्य यः कार्यतया सम्बन्धः, स एवानुबन्धचतुष्टयान्तर्गतः संबन्धः । पूर्ववृत्तस्याधिकारिविशेषणत्वेऽपि यत्तदानीन्तनानुष्ठानसम्पाद्यमधिकारिविशेषणं तस्य गोबलीवर्दन्यायेन पृथक्करणं युक्तम् । यद्यपि तत्पूर्ववृत्तं सार्वत्रिकं न भवति, तथापि यत्रास्ति तत्रैव शास्त्रेऽनुबन्धचतुष्टयमन्यत्रानुबन्धत्रयमस्तु, किं हीयते । तर्हि पूर्ववृत्ताभावेन शास्त्रारम्भाक्षेपः कथमिति चेत्, इत्थम्—कर्मविचारं पूर्ववृत्तमपेक्ष्यास्य शास्त्रस्यारम्भ इति सिद्धान्तिनोऽभिमतम् । तन्नोपपद्यते, कर्मविचारस्यात्रोपयोगानिरूपणात् । न तावच्चित्तशुद्धावुपयोगः, जन्मान्तरानुष्ठितकर्मभिरपि तत्सम्भवेन तदर्थमैहिककर्मविचारानपेक्षणात् । नापि नित्यानित्यवस्तुविवेके, तन्नित्यत्वप्रतिपादकवाक्येभ्यस्तदनित्यत्वप्रतिपादकवाक्यानां बलवत्त्वनिर्णयोपयोगिन्यायस्य तत्रानिरूपणात् । अतः सिद्धान्त्यभिमतब्रह्मविषयत्वाद्याक्षेपवत्तदभिमतपूर्ववृत्तसम्बन्धाक्षेप इति न काचिदसङ्गतिः । एतच्छङ्काचतुष्टयपरिहारार्थमाद्यसूत्रं प्रवृत्तमित्यवतारयति—श्रोतृजनेत्यादिना । यद्यपि जैमिनीयेन धर्मविचारेण गतार्थशङ्काप्यव्यवहितविषयासम्भवशङ्कैव, तथापि सा सूत्रकृता न निराकर्तव्येति प्रागेव भाष्यकृता निराकृता ।

अथातो ब्रह्मजिज्ञासा ॥१॥

अत्रैकैकशङ्कावलम्बनपूर्वपक्षनिराकरणार्थं किमधिकरणचतुष्टयं विवक्षितमित्याकाङ्क्षायामाह—इदमेकमिति । इदं शास्त्रं नारम्भणीयमित्यनारम्भपूर्वपक्षस्यैकार्थावलम्बनत्वादनारम्भहेतूनां बाहुल्येऽप्यैकाधिकरण्यं युक्तम् । यथा शाखान्तराम्नातकर्मभेदपूर्वपक्षस्यैकार्थावलम्बनत्वात् पूर्वपक्षहेतूनां "नामरूपधर्मविशेषपुनरुक्तिनिन्दाऽशक्तिसमाप्तिवचनप्रायश्चित्तान्यार्थदर्शनात् शाखान्तरे कर्मभेदः स्यात्" (जै० २.४.८) इति

नामाधारत्वमिहाधिकरणत्वम् । अत्राथशब्दोऽयमानन्तर्यार्थः । न तु "अथ योगानुशासनम्" (यो. १.१) इत्यादाविवाधिकारार्थः ।

सूत्रदर्शितानां नामरूपादीनां भिन्नत्वेऽप्यैकाधिकरण्यमिति भावः । यद्यपि विषयप्रयोजनाभावहेतुभ्यामेवात्राधिकरणं भाष्ये प्रदर्शयिष्यते, तथाप्यथशब्दसूचितस्य पूर्ववृत्तविशेषस्यातःशब्दसूचितस्य नित्यानित्यविवेकादिसम्भवस्य च तदुभयव्याख्यानेनोपपादितत्वाद् ब्रह्मजिज्ञासेत्यत्र कर्मणि षष्ठ्या संगृहीतयोर्ब्रह्मणो विषयत्वप्रयोजनत्वयोर्बहूपपादनीयसद्भावाच्च तयोरेव हेत्वोस्तत्र पूर्वपक्षदशायामुपन्यासेऽपि सम्बन्धाधिकार्यसम्भवहेत्वोरपि पूर्वपक्षे निवेशनेन पूर्णमधिकरणशरीरमूहनीयम् ।

ननु—"आधारोऽधिकरणम्" (पा० १.४.४५) इति प्रसिद्धम् । इदं केषामाधार इत्यधिकरणशब्देनोच्यत इत्याकाङ्क्षायां तत्प्रवृत्तिनिमित्तोपन्यासेनाधिकरणापेक्षितानवयवान् दर्शयति—विषयेति । अनवधारणेनापि क्वचित् पूर्वपक्षः सम्भवति । सिद्धान्तस्तु निर्णयावसान एवेति विशेषमभिप्रेत्य सिद्धान्तनिर्णयेत्युक्तम् । केचित् प्रयोजनेन सहाधिकरणस्य पञ्चावयवान् वदन्ति । केचित् सङ्गत्या सह । तदुभयसंग्रहार्थं वा निर्णीयते नितरां प्राप्यत इति व्युत्पत्त्या निर्णयशब्देन प्रयोजनं विवक्षितम् । सङ्गतिः शास्त्रद्विकाध्यायपादपेटिकापूर्वाधिकरणरूपप्रतियोगिभेदात् षोढा भिद्यते । पूर्वाधिकरणसङ्गतिराक्षेपापवाददृष्टान्तप्रत्युदाहरणादिभेदेन बहुधा भिद्यते । सा तत्र तत्राधिकरणे स्फुटीभविष्यति । प्रथममिह सूत्रपदानि व्याख्यायन्ते ।

यद्यप्यथशब्दस्यानेकार्थस्याप्यानन्तर्यार्थत्वं प्रसिद्धतरम्, प्रसिद्धतरार्थग्रहणे च न व्याख्यानापेक्षा, नहि गोपदं किरणाद्यर्थग्रहण इव सास्नावदर्थग्रहणेऽपि व्याख्यानमपेक्षते, तथाप्यत्रानन्तर्यप्रतियोग्यलाभात्तदर्थत्वं न सम्भवतीति शङ्कामुद्भाव्य विवक्षितप्रतियोगिविशेषप्रदर्शनेन तन्निराकरणार्थम् । शङ्कावकाशप्रदानाय—"अथातो धर्मजिज्ञासा" (जै० १.१.१) इत्यादिसूत्रेषु 'अथातः' इति निपातसमुदायस्य आनन्तर्यार्थकत्वं भवदासादिभिरुक्तं पश्यतामत्रापि तथेति शङ्का स्यादिति तद्वारणाय चाथशब्दं व्याचष्टे—अत्रेति । प्रसिद्धतरार्थग्रहणे सम्भवत्यप्रसिद्धार्थग्रहणं न कार्यमिति न्यायतः सिद्धमर्थान्तरग्रहणायोगं तत्र तत्रानुपपत्त्युपन्यासेन दृढीकरोति—न त्वित्यादिना ।

अधिकारो हि प्रारम्भः। न खलु ब्रह्मज्ञानेच्छा कर्तव्यत्वेन प्रारम्भयोग्या भवति। सा किल विषयरामणीयकमात्र-सम्भाव्या। "ॐकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा। कण्ठं भित्त्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ॥" इति स्मृतेरयमथशब्दो मङ्गलार्थो न वर्णनीयः, जिज्ञासायां मङ्गलार्थस्यान्वयासम्भवात्।

ननु जिज्ञासाशब्दस्य—"धर्मं ज्ञातुमिच्छेत्", "तद्विजिज्ञासस्व" (तै. उ. ३.१), "सोऽन्वेष्टव्यः स विजिज्ञासितव्यः" (छान्दो० ८.७.१) इत्यादिलौकिकवैदिकप्रयोगप्राचुर्यात् शक्त्या निरूढलक्षणया वा विचारपरत्वं सम्भवतीति तस्यात्र विचारार्थस्य ग्रहणे विचारस्य प्रारम्भयोग्यतास्ति। शास्त्रे चोत्तरत्र स्वरूपप्रमाणसाधनफलान्यतममुखेन प्रत्यधिकरणं विचारः क्रियत इति—"योगानुशासनं शास्त्रमधिकृतम्" (यो० भा० १.१) इत्यादिव्याख्यानवद् ब्रह्मविचारात्मकं शास्त्रमधिकृतं वेदितव्यमिति व्याख्यायां नार्थबाधः। न च वाच्यम्, प्रारभ्यत इत्यनुक्त्वापि प्रारम्भादेवावगन्तुं शक्यं प्रारभ्यमाणत्वं न शब्देन प्रतिपादनीयम्। नह्युच्यमानं वचनं ब्रवीमीत्युक्तिमन्तरेणाप्युच्यत इत्यवगन्तुं शक्यं ब्रवीमीति शब्देनापि प्रतिपादयन्तीति। प्रतिपादयन्त्येव। "त्वामस्मि वच्मि विदुषां समवायोऽत्र तिष्ठति। आत्मीयां मतिमास्थाय स्थितिमत्र विधेहि तत्॥" इत्यादयो हि श्लोकाः पठ्यन्ते। तथा च तादृशेषु श्लोकेषु वच्मीत्येवमादिवाक्यमानर्थक्यपरिहारायोपदेशरूपतया परिणमदुच्यमानार्थ-स्यावश्यकर्तव्यत्वमभिव्यनक्तीत्यालङ्कारिकोक्तरीत्याऽत्र प्रारम्भप्रतिपादनं प्रारम्भोपयुक्ताधिकार्यादिसद्भावमभिव्यनक्तीति तदलाभप्रयुक्तानारम्भणी-यत्वशङ्कानिराकरणेनार्थवद्भवेदिति चेत्, सत्यम्। आनन्तर्याभिधानमुखेन विशिष्याधिकार्यादिलाभे सम्भवति सामान्यतः साधिकारत्वादिमात्रद्योतन-प्रयोजनमधिकारार्थत्वं नाङ्गीकर्तव्यमिति भावः।

अन्वयासम्भवादिति। जिज्ञासां प्रति मङ्गलस्य कर्तृकरणादिकारकभावे-नान्वयासम्भवात्। न्यायव्युत्पादनार्थं प्रवृत्ते सूत्रे ब्रह्मजिज्ञासा मङ्गलमिति स्तावकत्वेनाप्यन्वयासम्भवादिति भावः। स्यादेतत्। सूत्रकारेण शास्त्रारम्भे मङ्गलमाचरितमित्यवश्यं कल्पनीयम्। यद्यपि भगवान् सूत्रकारो वादरायण-

शास्त्रारम्भे शिष्टाचारपरिपालनार्थं मङ्गलाचरणं तु वर्णध्वनिमात्रेण कल्प्यते । न चायं पक्षान्तरपरिग्रहार्थः, पूर्वमेकस्यानुक्ततया तत्प्रसङ्गासम्भवात् । न च भोजनगमनादिवदनियतं यत्किञ्चित् पूर्ववृत्तमपेक्ष्यायमथशब्दप्रयोगः, नियतसामग्रीभूतस्य कस्यचिदत्र विवक्षितत्वात् । यस्य सम्पत्तिरिहाधिकारिविशेषणतया ब्रह्मविचारस्य साधनं तत् पूर्वभावीति

स्त्रैकालिकार्थतत्त्वदर्शित्वात् प्रारिप्सिते शास्त्रे नास्ति समाप्तिपरिपन्थी वर्तमानो भविष्यन् वा विघ्नः, प्रचयगमनं चास्यानुग्रहादेव भविष्यतीति निश्चिन्वन् निर्विघ्नपरिसमाप्तिप्रचयगमनार्थं मङ्गलमनपेक्ष्य शास्त्रारम्भे प्रवृत्त इत्यपि कल्पयितुं शक्यम् । तथाप्यनादिसम्प्रदायसिद्धाविगीतशिष्टाचारपरिपालनार्थं मङ्गलं चकारेत्येव कल्पनीयम् । अतस्तदनुसारेणाथशब्दस्य मङ्गलार्थत्वमभ्युपगन्तुं युक्तम् । जिज्ञासायां मङ्गलस्यान्वयो न सम्भवतीति चेन्मा भूत्, तदन्वयस्याविवक्षितत्वात्, शास्त्रारम्भसमयकर्तव्यमङ्गलाचरणार्थस्याथशब्दस्य ततः पार्थक्यस्यैवोचितत्वादित्याशङ्क्याह— शास्त्रारम्भ इति ।

अथशब्दो मङ्गलप्रयोजन इत्योङ्कारश्चेत्यादिश्लोकेनोच्यते । न तु मङ्गलाभिधायक इति । माङ्गलिकावित्यस्य "तदस्य प्रयोजनम्" (पा० ५.१.१०९) इति सूत्रविहितठक्प्रत्ययान्तत्वात् "मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथ"(अ०को० ३.३.२४७) इत्यभिधानकोशानुसारेणाथशब्दस्य मङ्गलाभिधायकत्वस्यापि सत्त्वेऽपि नात्र मङ्गलाभिधानेन समीहितसिद्धिः, किन्तु मङ्गलानुष्ठानेन । न खल्वारम्भे मङ्गलमभिधातव्यमिति शिष्टानां समयः, किन्तु मङ्गलं कर्तव्यमिति । अतः सूत्रकृदानन्तर्याभिधानमुखेन विवक्षितार्थसिद्ध्यौपयिकतया जिज्ञासासूत्रेणैकवाक्यतापन्नमेवाथशब्दमुच्चारयन् तदुच्चारणरूपं तदाकर्णनरूपं वा मङ्गलं कृतवानिति कल्पयितुं युक्तमिति भावः । अथैवं मन्यस इत्यादौ पक्षान्तरपरिग्रहोऽप्यथशब्दस्यार्थो दृष्टः । सोऽत्र न सम्भवति । पूर्वं कस्यचित् पक्षस्यानुपन्यस्तत्वादित्याह— न चेति । एवमथशब्दस्यानन्तर्यार्थे स्थिते तस्य स्वाभिमतं पूर्ववृत्तं प्रतियोगि निर्दिधारयिषुः पक्षान्तरं प्रतिक्षिपति–न चेति । यस्य सम्पत्तिरधिकारिविशेषणतया ब्रह्मविचारस्योपयोगिनी भवितुमर्हति, तदेव विचारे नियतसामग्रीभूतं किञ्चिदत्र

विज्ञायते । अथाष्टवर्षत्वादियुक्तब्राह्मणाद्युपयुक्तोपनयनसंस्कारपूर्वकस्य—"स्वाध्यायोऽध्येतव्यः" (श० ब्रा० ११.५.७.२) इति

पूर्ववृत्तं सूत्रकृता विवक्षितमिति वक्तव्यम् । न तु भोजनाद्यनियतं किञ्चित् । निष्प्रयोजनस्य तस्य प्रतिपादने सूत्रकारस्यानवधेयवचनत्वप्रसङ्गादिति भावः ।

अध्ययनं तर्हि पूर्ववृत्तमस्त्वित्याशङ्क्ते—अथेति । अध्यापनविधिरध्ययनस्यानुष्ठापकः, न स्वविधिः, निर्नियोज्यत्वादिति प्राभाकरा वदन्ति, तथाभ्युपगमेऽध्यापनविधिना लब्धानुष्ठानस्याध्ययनस्याधिकार्यपेक्षाभावात्, अर्थज्ञानकामोऽधिकारी न कल्पनीय इत्यर्थज्ञानस्याध्ययनविध्यङ्गीकृतफलत्वाभावेन विचारस्याध्ययनं प्रति फलोपकार्यङ्गत्वाभावात् । विचारे वेदाध्ययनस्य नियतसामग्रीत्वेन पूर्ववृत्तत्वं न सिद्ध्येदिति मत्वाऽध्ययनं स्वविधिप्रयुक्तमिति दर्शयितुं विशिनष्टि—अष्टवर्षत्वादीत्यादिना विशेषणचतुष्टयेन । एवमध्यापनविधिप्रयुक्तत्वमध्ययनस्य कल्पयन्ति । अध्ययनविधिर्न स्वविषयानुष्ठापकः, निर्नियोज्यत्वात् । न च विश्वजिन्न्यायेन नियोज्यः कल्पनीयः, स्वर्गकामादिनियोज्यैर्दर्शपूर्णमासादिभिः प्रयाजादीनामिवाचार्यककामनियोज्येनाध्यापनविधिनाध्ययनस्य प्रयुक्तिः सम्भवेत्, कल्पनानपेक्षणात् ।

तथा हि—उपनयनपूर्वकादध्यापनादाचार्यकं निष्पद्यते, "उपनीय तु यः शिष्यम्" (मनु० २.१४०) इत्यादिस्मरणात्, तदनुसारेणाष्टवर्षादिश्रुतावात्मनेपदबलादुपनयने प्रतीयमानस्याचार्यकहेतुत्वस्य तन्निर्वर्त्याध्यापनद्वारकत्वकल्पनौचित्यात् । तदाचार्यकं यद्यप्याधाननिष्पाद्यमाहवनीयत्वादिकमिवालौकिकातिशयरूपं न स्वतः पुरुषार्थः, तथापि "आचार्याय दक्षिणा देया" इत्यादिस्मरणाद् दक्षिणादानादिहेतुत्वेन गौणपुरुषार्थो भवतीत्यतस्तत्कामोऽध्यापनविधौ नियोज्य इति सनियोज्यकेन तेन विधिनाध्यापनं तावत् प्रयुज्यते । तद् यद्यपि लौकिकेनाप्यध्ययनेन निर्वहति, तथाप्युपनयनद्वारा विहितस्यैवाध्ययनस्य तेन प्रयुक्तिः । कथम्, उपनयनं तावदध्यापनाङ्गम्, "उपनीय तु यः शिष्यम्" (मनु० २.१४०) इति स्मृतावुपनयनाध्यापनयोः समानकर्तृकत्वप्रतिपादनात्, "अष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयीत" इति श्रुतौ तच्छब्दपरामृष्टोपनीतस्याध्यापनान्वयावगमात्, उपनयीतेत्यात्मनेपदश्रुत्याध्यापनफलस्याचार्यकस्योपनयनफलत्वप्रतिपादनाच्च । उपनयनस्य चोपनेयासक्तिः प्रयोजनं दृश्यत इति तद्द्वारेणैव तदङ्गम्, दृष्टद्वारे सम्भवत्यदृष्टद्वारकल्पनायोगात् । न चाध्यापनं प्रत्यनुपयोगिन उपनेयस्यासक्तिरध्यापनोपकारिणीत्युपनेयस्याध्या-

पनापेक्षितव्यापाराकाङ्क्षायामुपनयनं प्रक्रम्य विधीयमानमध्ययनं तद्व्यापारतया कल्प्यत इति तत्रोपनयनद्वारा विहिताध्ययनस्याध्यापनविधिना प्रयुक्तिरिति। एतद्विघटनायोपनयनमध्ययनस्याङ्गं नाध्यापनस्येति दर्शयितुमाद्यविशेषणम्। उपनयनमुपनेयब्राह्मणाद्यर्थम्, "वसन्ते ब्राह्मणमुपनयीत ग्रीष्मे राजन्यं शरदि वैश्यम्" (बौ० गृ० २.५.६) इति द्वितीयाश्रुतिभिस्तथावगमात्। तादर्थ्यं च तस्य तदीयकार्याध्ययनाङ्गत्वेन तदुपयुक्तत्वे निर्वहति, न त्वन्यदीयकार्याध्यापनाङ्गत्वेनान्योपयुक्तत्व इति। तत्र युक्तिं सूचयितुं ब्राह्मणाद्युपयुक्तेत्युपनयनविशेषणम्।

यद्यपि यागेन स्वर्गं भावयेदित्यादिद्वितीयाश्रुत्यवगतं निर्वर्त्यकर्मत्वं कार्यान्तराङ्गत्वं विनापि सम्भवति, तथापि संस्काररूपक्रियायाः कर्मार्थत्वं कार्यान्तराङ्गत्वेनैव निर्वाह्यम्, "भूतभाव्युपयोगं हि द्रव्यं संस्कारमर्हति" इति न्यायात्। ततश्च उपनयनसंस्कृतस्य भूतोपयोगाभावाद् भाव्युपयोगे वक्तव्ये तस्याध्यापनाङ्गत्ववादिनाप्यध्ययनं कुर्वन् माणवकस्तद्द्वारा तस्याङ्गं भवतीति वक्तव्यत्वाद् उपनयने पूर्ववृत्ते सति प्रथमोपनिपतितमुपनेयगतत्वेनान्तरङ्गं चाध्ययनं प्रत्येवाङ्गत्वं युक्तं न त्वध्यापनं प्रतीति शङ्कान्तरनिराकरणं तत्पूर्वकं युक्त्यन्तरं च सूचयितुमुपनयनाङ्गकस्येत्यनुक्त्वोपनयनसंस्कारपूर्वकस्येत्युक्तम्। अनेनोपनयनाध्ययनयोराम्नानपौर्वापर्यमप्यत्र विवक्षितम्, "स्वाध्यायोऽध्येतव्यः" (श० ब्रा० ११.५.७.२) इत्युत्तरवाक्यान्वयिनोऽध्ययनविधिग्रहणस्य काकाक्षिन्यायेन पूर्ववाक्येऽप्यन्वयात्। तथा चोपनयनस्य द्वितीयाश्रुत्योपनेयार्थत्वे प्रतीते किमर्थमहमुपनयनसंस्कारेणाचार्यसमीपं प्रापित इति कार्याकाङ्क्षयोपनयनविध्यनन्तरकर्तृकतया विहितस्याध्ययनस्य कर्त्राकाङ्क्षया चोपनयनाध्ययनयोरेकवाक्यता भवतीति वाक्यप्रमाणेनापि तस्याध्ययनाङ्गत्वमिति तेन सूच्यते।

ननु च उपनयीतेत्यात्मनेपदश्रुतिर्वाक्यप्रमाणाद् बलवतीति चेन्न, तस्या वाक्येन विरोधाभावात्। तथा हि—आचार्यकहेतुत्ववैशिष्ट्यं समीपप्रमाणरूपे धात्वर्थेन प्रत्याय्यते न त्वाहत्य धात्वर्थस्याध्यापनाङ्गत्वं बोध्यते, "संमाननोत्सञ्जनाचार्यकरणज्ञानभृतिविगणनव्ययेषु नियः" (पा० १.३.३६) इत्याचार्यकरणविशिष्टे धात्वर्थे नयतेरात्मनेपदविधानात्। तत्त्वाचार्यकहेतुत्वं साक्षादुपनयनस्य न सम्भवति, "उपनीय तु यः शिष्यं वेदमध्यापयेद् द्विजः। सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते॥" (मनु० २.१४०) इति तस्योपनयनपूर्वकाध्यापनफलकत्वस्मरणात्। किन्त्वध्यापननिर्वर्तनद्वारेत्यनया

प्रणाडिकया तयाध्यापनाङ्गत्वं प्रत्याय्यत इत्युपपादनीयम्। एवं च द्वारविचारे तस्याध्ययनाङ्गत्वमेव सिद्ध्यति। कथम्। उपनयनस्याध्यापननिर्वर्तकत्वमपि न साक्षात्। किन्तूपनयनेन विना नोपनेयस्याचार्यसमीपप्राप्तिः, तां विना नाध्ययनम्, अध्ययनं विना नाध्यापनमिति तदपि परम्परयोपपादनीयम्। एवं चास्यां परम्परायामध्ययनस्य प्रथमनिविष्टत्वाद् उपनेयगतत्वेनान्तरङ्गत्वादुपनेयसंस्कारत्वप्रतिपादकद्वितीयाश्रुत्यनुग्रहात्, "उपनयनं विद्यार्थस्य श्रुतितः संस्कारः" (आ० ध० १.१.१.९) इति स्मृत्यनुग्रहाच्च तस्याध्ययनाङ्गत्वमेव सिध्यति, अध्ययनाङ्गत्वेऽपि तस्याग्न्यङ्गत्वेऽप्याधानस्य क्रतुफलोपकारकत्ववदध्यापनफलोपकारकत्वस्योपपत्त्याऽऽत्मनेपदश्रुतेस्तदवलम्बनत्वोपपत्तेः।

किञ्चात्मनेपदश्रुत्यैवाध्ययनाङ्गत्वमुपनयनस्य सिध्यति, संमाननादि- (पा० १.३.३६) सूत्रेण आत्मनेपदविधानस्याकर्त्रभिप्रायार्थत्वात्, क्रियाफलस्य कर्तृगामितायां नयतेरात्मनेपदस्य "स्वरितञितः" (पा० १.३.७२) इत्यादिसूत्रेणैव सिद्धत्वात्। ननूपनयनं प्रत्यङ्गित्वेनोद्देश्यस्याध्यापनस्य तत्फलस्याचार्यकस्य च कर्तृगतत्वेऽपि तस्याध्यापनाङ्गतायां द्वारभूतोपनयनजन्यसंस्कारस्याकर्तृगतत्वादात्मनेपदमुपपद्यत इति चेन्न, यत्प्रधानं फलमुद्दिश्य क्रियारम्भस्तस्य कर्तृगतत्वाकर्तृगतत्वयोरेव पदव्यवस्थाप्रकरणविषयत्वात्। अत एव वृत्तिकारेण "स्वरितञितः" (पा० १.३.७२) इत्यादिसूत्रे यस्य कस्यचित्फलस्य कर्तृगामित्वमात्रेण आत्मनेपदविधाने 'यजन्ति याजकाः', 'पचन्ति पाचकाः' इत्यत्रात्मनेपदं स्यात्, तत्रापि दक्षिणादेः कर्तृगामित्वादित्याशङ्कानिराकरणायोक्तम्—"क्रियायाः फलं प्रधानभूतं यदर्थमसौ क्रिया आरभ्यते" (का० वृ० १.३.७२) इति। हरिणा चोक्तम्—"यस्यार्थस्य प्रसिद्ध्यर्थमारभ्यन्ते पचादयः। तत्प्रधानं फलं तेषां न लाभादि प्रयोजनम्॥" (वा० प० ३.१२.१८) इति।

अत एव च भट्टपादैः—"तथाकामोऽर्थसंयोगात्" (जै० ३.८.१३) इति तार्तीयाधिकरणे[१]—"यदि कामयेत वर्षुकः पर्जन्यः स्यादिति नीचैः सदो मिनुयात्" (तै० सं० ६.४.५.५) इत्युपन्यस्तम्। सदोमानगुणफलमध्वर्युगामि, सदोमानस्याध्वर्यवत्वात्। "यदि कामयेत, नीचैः सदो मिनुयात्" इति सामानाधिकरण्येन कामस्य सदोमानकर्तृगतत्वावगमादिति पूर्वपक्षं कृत्वा

१. तृतीयाध्यायसम्बन्धिन्यधिकरण इत्यर्थः।

क्रियाफलस्याध्वर्युगतत्वे "डुमिञ् प्रक्षेपणे" (१२५१ स्वा०) इति धातोर्ञित्त्वेनात्मनेपदं स्यादिति परस्मैपदश्रुत्याऽध्वर्युव्यापारस्य पारार्थ्यप्रतीतेर्यजमानगतमेव फलम्, श्रुतिबलाद्यदि कामयेत यजमान इत्यध्याहारेण वाक्य-[1]बाधोपपत्तेरिति सिद्धान्तितम्। यद्यत्रोद्देश्यफलस्य कर्तृगामित्वेऽपि द्वारभूतस्य संस्कारस्याकर्तृगामित्वमात्रेणात्मनेपदं समर्थ्येत, तदात्रापि वृष्टिफलस्याध्वर्युगामित्वेऽपि नीचैस्त्वस्य सदोगतत्वमात्रेण परस्मैपदश्रुतिः समर्थिता स्यादिति तथा वाक्यबाधो न स्यात्। तस्मात् संस्कारमात्रस्योद्देश्यफलत्वासम्भवात् किमर्थं वयमुपनयनेन संस्कृता इति संस्कारस्य कैमर्थक्याकाङ्क्षायामर्थज्ञानफलकमध्ययनमेव तस्योद्देश्यं फलमिति युक्तम्, न त्वाचार्यफलकमध्यापनम्, अकर्त्रभिप्रायार्थात्मनेपदश्रुतिविरोधात्।

एतेन "तमध्यापयीत" इत्यादितच्छब्दपरामृष्टस्योपनीतस्य—"तप्ते पयसि दध्यानयति वैश्वदेव्यामिक्षा" इत्यत्र तच्छब्दपरामृष्टस्य दध्यानयनसंस्कृतस्य पयसो दधिसंसर्गाद् घनीभावं प्राप्य आमिक्षापदवाच्यतामुपगतस्य वैश्वदेवयागेनेवाध्यापनेन सम्बन्धावगमादुपनयनस्य तदङ्गत्वमिति निरस्तम्, कुशलेन तक्ष्णा रथं निर्मापयतीत्यत्र तक्षकौशलस्य रथनिर्माण इवाध्ययने प्रयोज्यव्यापार एवोपनयनसंस्कारस्य विनियोग इत्युपपत्तेः। एतेन "उपनीय तु यः शिष्यम्" (मनु० २.१४०) इति स्मृतिगतक्त्वाश्रुत्योपनयनाध्यापनयोः समानर्तृकत्वमवगम्यते। तच्च नैकप्रयोगतां विनेति प्रयोगैक्येनोपनयनस्याध्यापनाङ्गत्वसिद्धिः। यद्यपि प्रयोगैक्यं तयोः समप्राधान्ये वैपरीत्येनाङ्गाङ्गिभावे च सम्भवति, तथाप्युपनयनमुपनेयासक्तिं सम्पाद्य तदीयेनाध्ययनेनाध्यापनं निर्वर्तयितुं क्षममिति दृष्टद्वारसत्त्वादुपनयनस्याध्यापनाङ्गत्वेनैव प्रयोगैक्यनिर्वाहो युक्त इत्यपि निरस्तम्। नहि श्रुत्यवगतमुपनयनस्याध्ययनाङ्गत्वं यच्छब्दयोगादनुवादसरूपया स्मृत्या बाधितुं शक्यते। अतः स्मृतिगतक्त्वाप्रत्ययः—"दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेत" इत्यत्र क्त्वाप्रत्यय इव पौर्वापर्यमात्रविषयतया नेतव्यः। तस्मात् स्थितमेतदुपनेयार्थत्वेन श्रुतमुपनयनमध्ययनाङ्गं नाध्यापनाङ्गमिति।

इतोऽप्युपनयनमध्ययनाङ्गमित्यभिप्रेत्य विशेषयति—अष्टवर्षत्वादियुक्तेति। अत्राष्टवर्षत्वादीत्यादिशब्देन काम्यकल्परूपाण्यष्टवर्षत्वादीनि गृह्यन्ते। काम्यकल्पा हि स्मर्यन्ते—"गर्भाष्टमेषु ब्राह्मणमुपनयीत गर्भैकाद-

---

१. श्रुतिलिङ्गेति सूत्रेण वाक्यप्रमाणबाधोपपत्तेरिति यावत्।

शेषु राजन्यं गर्भद्वादशेषु वैश्यम्" (आ० ध० १.१.१.१९) इति प्रकृत्य "अथ काम्यानि" (२० सू०), "सप्तमे ब्रह्मवर्चसकाममष्टम आयुष्कामं नवमे तेजस्कामं दशमेऽन्नाद्यकाममेकादशे इन्द्रियकामं द्वादशे पशुकामम्" (आ० ध० १.१.१.२१) इति। अत्रोपनयनाश्रिता ये वयोविशेषलक्षणा गुणास्तेषामुपनेयार्थत्वात् तदाश्रयप्रधानभूतोपनयनफलस्यापि फलत्वेन तादर्थ्यं वक्तव्यमित्युपनेयार्थस्याध्ययनस्यैवोपनयनमङ्गमिति सिद्ध्यति। "तथा-कामोऽर्थसंयोगात्" (जै० ३.८.१३) इत्यधिकरणे हि प्रधानगुणफलयोरेका-श्रयत्वनियममौत्सर्गिकमवलम्ब्य परैः सिद्धान्तितम्। उक्तं हि नयविवेके तदधिकरणसिद्धान्ते—"साङ्गकर्मण्यधिकृतस्य सर्वत्र प्राधान्यमुत्सर्ग इति गुणफलमपि तस्यैव" इति। तस्मात् काम्योपनयनकल्पपर्यालोचनयाप्युपनयन-मध्ययनाङ्गं सिद्ध्यतीति भावः।

किञ्चाष्टवर्षत्वादीत्यादिशब्देन त्रैवर्णिकानां नित्यकल्परूपाण्यष्टत्वैकादशव-र्षत्वद्वादशवर्षत्वानि गृह्यन्ते। तत्कीर्तनमुपनयनस्य नित्यत्वख्यापनेन तत्प्रधान-भूतस्याध्ययनस्य नित्यत्वप्रदर्शनाय, तत्प्रदर्शनं चाध्ययनस्याध्यापनविधि-प्रयुक्तत्वे नित्यानित्यसंयोगविरोधस्याग्रिमविशेषणेन स्फोरयिष्यमाणस्यो-पपादनाय। एवमुपनयनस्याध्ययनाङ्गत्वे सति विहिताध्ययनस्याध्यापन-विधिप्रयुक्तत्वासम्भवात् स्वविधिप्रयुक्तमेवाध्ययनमिति सिद्धम्। अपि चाध्य-यनस्य स्वविधिप्रयुक्तत्व एव नित्यवदनुष्ठानं सिद्ध्येत्, नाध्यापनविधिप्रयुक्तत्व इति दर्शयितुं स्वविधिप्रयुक्ततया नित्यप्राप्तस्येति विशेषणम्। अध्ययनं हि नित्यम्, तदङ्गस्योपनयनस्य नित्यत्वात्, "अत ऊर्ध्वं त्रयोऽप्येते यथाकाल-मसंस्कृताः। सावित्रीपतिता व्रात्या भवन्त्यार्यविगर्हिताः॥" (मनु. २.३९), "योऽनधीत्य द्विजो वेदानन्यत्र कुरुते श्रमम्। स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः॥" (मनु. २.१६८) इति तदभावे दोषवर्णनात्। अध्यापनविधिस्तु काम्य इत्यङ्गीक्रियते। एवं च यत्र ग्रामे जनपदे वा धनवत्त्वादिहेतुभिराचार्यककामो न स्यात्, सन् वा कश्चिदुपनीयाध्याप-यितुं प्रवृत्तः प्रव्रजनादिहेतुभिर्निवृत्ताध्यापनविधिसंबन्धः स्यात्, तदा तद्ग्रामजनपदवासिनामध्ययनस्य तेन तेनाचार्येणोपनीतानामेकदेशमध्या-पितानामेकदेशान्तराध्ययनस्य च कथं निर्वृत्तिः स्यात्। तस्मात् स्वविधि-प्रयुक्तत्वमेवाध्ययनस्याङ्गीकरणीयमिति भावः।

नन्वध्ययनविधेः सर्वशाखाविषयत्वे स्वविधिनाप्यध्ययनस्य प्रयुक्तिर्न संभवति, अशक्यानुष्ठानत्वादित्याशङ्क्य स्वशाखामात्रविषयोऽध्ययनविधिः,

स्वविधिप्रयुक्ततया नित्यप्राप्तस्य नियमोपासिताचार्यमुखलब्धाक्षरग्रहणरूपस्यार्थज्ञानफलस्य वेदाध्ययनस्य ब्रह्मविचारात्

न तु सर्वशाखाविषय इति दर्शयितुं स्वाध्यायोऽध्येतव्य इत्यध्ययनविधिरुदाहृतः। इतोऽपि तस्य स्वविधिप्रयुक्तत्वमङ्गीकरणीयमित्यभिप्रेत्य विशेषयति—नियमोपासितेति। अयमाशयः—अध्ययनं तावद्यावद्वेदसमाप्त्याचार्याधीनेन स्मृत्युक्तशुश्रूषादिनियमैस्तदुपासनापरेण च सता तथा तदुच्चारणं स्वरवर्णादिभ्रंशराहित्येन कर्तव्यमतिक्लेशसाध्यम्। अस्मिन् कथमन्यपुरुषगाम्याचार्यकसिद्ध्यर्थमन्यः प्रवर्तेत, कथं च तस्मै दक्षिणां दद्यात्। यद्युच्येत अध्यापयितैव स्वस्याचार्यकसिद्ध्यर्थमध्ययनेन माणवकस्यार्थज्ञानादिफलं प्रदर्श्य तं प्रवर्तयेदिति। तथा सति तस्य स्वाधिकार एव प्रवर्तकः स्यात्, नाध्यापनविधिः। न चाध्यापकेन स्वस्याध्यापनफलसिद्ध्यर्थं माणवकस्तदीयाधिकारप्रदर्शनेनाध्ययने प्रवर्त्यत इत्येतावता तस्याध्यापनविधिप्रयुक्तत्वसिद्धिः, द्रव्यार्जनप्रवृत्तैर्याजकैर्निषादः स्वाधिकारं प्रदर्श्य स्थपतीष्टौ प्रवर्त्यत इति स्थपतीष्टेरपि द्रव्यार्जनविधिप्रयुक्तत्वप्रसङ्गात्। तस्मात् स्थपतीष्टेरिवाध्ययनस्यापि स्वविधिप्रयुक्ततैवाङ्गीकरणीयेति।

ननु स्वमते फलरहितोऽध्ययनविधिर्न प्रवर्तक इत्याशङ्कानिवारणार्थमाह—अर्थज्ञानफलस्येति। अयमाशयः—दृश्यते तावदध्ययनानन्तरमक्षरग्रहणपदावधारणपदार्थज्ञानप्रणाडिकयोपजायमानं वाक्यार्थज्ञानं तदध्ययनस्य फलम्। तत्कामोऽधिकारी सोऽध्ययनविधौ न श्रूयत इति चेत्, किमध्यापनविधावाचार्यककामः श्रूयते। उपनयनस्यात्मनेपदबलादाचार्यकहेतुत्वं प्रतीयमानमध्यापनद्वारा वाच्यमिति तत्कामस्तत्राधिकारी कल्प्यत इत्येतादृशी कल्पनासरणिस्तु प्रकृते न दण्डवारिता।

ननु बालस्यार्थज्ञानकामना न संभवतीति चेन्मा भूत्। बालहितकारिषु पित्रादिषु सा सम्भवति। न चैवं सति बालस्य स्वाधिकारः प्रवर्तको न स्यादिति शङ्कनीयम्, आमयाविनं बालं भिषग्भिः पित्रादिभिस्तदपेक्षितफलान्तरप्रतिपादनेन सामदानाद्युपायेन वाऽनुष्ठाप्यमानायामौषधसेवायामिवाध्ययनेऽपि तथानुष्ठाप्यमाने बालस्यैव विध्युक्तं फलं भवत्विति पित्राद्यभिसन्धिसत्त्वेन तदधिकारस्यैव प्रवर्तकत्वसिद्धेः। अन्यथा पित्रादिभिरनुष्ठाप्यमाने सन्ध्यावन्दनादावपि बालस्याधिकारः प्रयोजको न स्यात्। यदि च प्रवर्तककामनयानुष्ठातृगतयैव भाव्यमिति नियमः, तदानीमाचार्यककाम-

नयाऽप्यध्यापकगतयाऽध्ययनानुष्ठानं सिद्ध्येत् । अपि चार्थज्ञाने पित्रादिभिरनुष्ठानद्वारा धनपशुपुत्रस्वर्गादिसाधनत्वेन बोध्यमाने बालस्यापि कामना सम्भवति ।

ननु कामनाविषयज्ञानावच्छेदकत्वेनार्थस्य ज्ञातताया वक्तव्यत्वात् पुनस्तज्ज्ञाने कामना न सम्भवतीति चेन्न, सामान्यज्ञाने सत्यपि विशेषज्ञाने कामनोदयसम्भवात्, सर्वत्र सामान्यज्ञानस्यैव विशेषजिज्ञासाहेतुत्वात्, अन्यथा शास्त्रार्थजिज्ञासया शास्त्रश्रवणादिप्रवृत्त्युच्छेदप्रसङ्गात् । सर्वथाऽर्थज्ञानेऽध्ययनप्रवृत्त्युपयोगिनि कामना सम्भवत्येव । प्रत्युताचार्यक एव कामना न सम्भवति, अलौकिकातिशयत्वेनाभ्युपगतस्य तस्य पुमर्थत्वानवगमात् । "ऋत्विक्श्वशुरपितृव्यमातुलानां तु यवीयसां प्रत्युत्थानम्" इत्यादावृत्विक्श्वशुरपितृव्यादिपदानां यथा [1]स्रौवयौनसम्बन्धमात्रं प्रवृत्तिनिमित्तं पूजाविशेषहेतुश्च, तथैवाचार्याय दक्षिणां दद्यादित्यादावाचार्यपदस्याप्युपनयनपूर्वकाध्यापनकर्तृत्वरूपमौखसम्बन्धमात्रं प्रवृत्तिनिमित्तम्, तदेव च तदर्थपूजाविशेषहेतुरित्युपपत्त्या तदन्यस्य कस्यचिदलौकिकातिशयस्य दक्षिणादानहेतुत्वकल्पनायां प्रमाणाभावात्, "उपनीय तु यः शिष्यम्"(मनु० २.१४०) इत्यादिस्मृतेरपि—"त्रिशुक्लः क्षीणवृत्तिश्च घृणालुः सकलेन्द्रियः । वियुक्तो यो निषेधेभ्यो ब्राह्मणः पात्रमुच्यते ॥" इत्यादिस्मृतेरिव शब्दप्रवृत्तिनिमित्तमात्रप्रदर्शनपरत्वात् ।

ननु तथाप्यध्ययनेऽर्थज्ञानहेतुत्वस्य प्राप्तत्वान्न विधिः सम्भवतीति चेन्न, अपूर्वविध्यसम्भवेऽपि नियमविधिसम्भवात्, पुस्तकनिरीक्षणादिनापि पदावधारणादिपूर्वकमर्थज्ञानसम्भवेनाध्ययनस्यावहननादिवत् पक्षे प्राप्तत्वात् । अवहननादिनियमवदध्ययननियमस्य क्रत्वर्थत्वं न सम्भवति, अध्ययनस्य क्रत्वङ्गत्वाभावादिति चेत्, मा भूत्, द्रव्यार्जननियमवत् पुरुषार्थोऽस्तु । "याजनाध्यापनप्रतिग्रहैर्ब्राह्मणो धनमार्जयेत्" इति द्रव्यार्जनोपायनियमो हि न क्रत्वर्थः, याजनादीनां क्रत्वङ्गत्वाभावात् । किन्तूपायान्तरेण धनमार्जयन् प्रत्यवैतीत्येवं पुरुषार्थः । एवं द्रव्यार्जनोपाय इव विद्यार्जनोपायेऽपि नियमः पुरुषार्थ इति युक्तम् ।

---

१. स्रौवः स्रुवासम्बन्धी । ऋत्विक्त्वकृतः सम्बन्ध इति यावत् । उक्तं हि महाभाष्ये षष्ठी स्थाने योगेति सूत्रे आर्षा यौना मौखा स्रौवाश्चेत्यादिना चातुर्विध्यं सम्बन्धस्य ।

ननु सर्वशाखाम्नाताङ्गोपसंहारापेक्षक्रत्वनुष्ठानोपयुक्तायां विद्याया-मध्ययनमेवोपाय इति नियन्तुं न शक्यते, सर्वशाखाध्ययनासम्भवात्, स्वाध्यायोऽध्येतव्य इति स्वशाखामात्र एवाध्ययनविधानाच्चेति चेत्, सत्यम् । स्वशाखार्थज्ञानरूपविद्यांश एवाध्ययननियमः । परशाखार्थज्ञानरूपविद्यांशस्तु कल्पसूत्रोपदृष्टवचनाद्युपायान्तरेण भवन्न निवार्यते । एवं तर्ह्यध्ययनरहितस्य शूद्रस्याप्युपायान्तरेण विद्यार्जनसम्भवात् क्रत्वधिकारः स्यात् । नित्यवदनुष्ठेयाध्ययनलब्धविद्येषु त्रैवर्णिकेषु चरितार्थाः क्रतुविधयो न शूद्रस्योपायान्तरेण विद्यामाक्षिपन्तीति हि मीमांसकप्रवादः । उक्तं चाधिकारलक्षणे सूत्रकृता—"अवैद्यत्वादभावः कर्मणि स्यात्" (जै० ६.१.३६) इति । यदि त्रैवर्णिकानां परशाखार्थज्ञानमुपायान्तरेणाभ्युपगम्यते, तदा शूद्रस्याप्यनिवार्यः क्रत्वधिकारः, शूद्रस्य सर्वापि शाखा परशाखेत्युपायान्तरेण तस्य तदर्थज्ञानोपपत्तेः । न च तस्य विद्यासम्भवेऽपि वसन्तादिवाक्यविहिताधानसाध्याग्न्यभावात् क्रत्वनधिकारः सिद्ध्येदिति वाच्यम्, तथापि रथकारस्य तदधिकारानिवारणात् । "वर्षासु रथकार आदधीत" इति तस्याधानविधानादिति चेन्मैवम्, "स्वाध्यायोऽध्येतव्यः"(श०ब्रा०११.५.७.२) इति विधेः स्वस्वशाखामात्राध्ययननियमविधिरूपत्वेऽप्यपशूद्राधिकरणे शूद्राणां क्रत्वनधिकारसिद्धेरुपपादयिष्यमाणत्वात् । तस्मादर्थज्ञानार्थत्वेऽप्यध्ययने विधिरुपपद्यत एव । प्रत्युताध्यापन एव पराभ्युपगतोऽपूर्वविधिर्नोपपद्यते, याजनप्रतिग्रहवत् तस्य वृत्त्यर्थत्वेन प्राप्तत्वात् । न चाचार्यकार्थत्वेन तद्विधिः, तस्याऽपुमर्थत्वस्याप्रामाणिकत्वस्य चोक्तत्वादिति ।

अध्ययनस्यार्थज्ञानफलकत्वे हेत्वन्तरगर्भविशेषणपूर्वकं विशेष्यं निर्दिशति—वेदाध्ययनस्येति । "अयस्मयादीनि छन्दसि" (पा० १.४.२०) इति व्याकरणसूत्रगतच्छन्दःशब्दवदत्रत्यवेदशब्दः साङ्गवेदपरः, अन्यथा वेदविशेषणवैयर्थ्यात्, "स्वाध्यायोऽध्येतव्यः" (श० ब्रा० ११.५.७.२) इति विधिविषयत्वोक्त्यैवाध्ययनस्य वेदविषयकत्वसिद्धेः । सविशेषणनिर्देशस्य चायमभिप्रायः—"षडङ्गो वेदोऽध्येयः" (म० भा० प०), "वेदाङ्गानि समस्तानि कृष्णपक्षेषु सम्पठेत्" इत्यादिस्मृतिभिः साङ्गवेदाध्ययनं विधीयत इति व्याकरणादिरूपाङ्गाध्ययनविधानान्यथानुपपत्त्या वेदाध्ययनस्यार्थज्ञानं फलमिति सिद्ध्यति, अकिञ्चित्करस्याङ्गत्वायोगात्, स्वरवर्णादिनिर्णायकशीक्षादिवत् प्रकृतिप्रत्ययविभागादिभिरर्थावधारणोपायभूतस्य व्याकरणादेर्वेदाध्ययनस्वरूपोपकारकत्वासम्भवेन फलोपकारकत्वस्य वक्तव्यत्वादर्थ-

पूर्वभावित्वं युक्तम्, धर्मवद् ब्रह्मणोऽपि वेदैकसिद्धत्वादनधीत-

---

ज्ञानादन्यत्र फले तस्य प्रकृतिप्रत्ययविभागादिदृष्टद्वारेणोपकारकत्वासम्भवात्, दृष्टस्य व्याकरणादिफलस्य द्वारत्वसम्भवेऽदृष्टद्वारकल्पनायोगाच्च। ननु "षडङ्गो वेदोऽध्येयः" (म० भा० प०) इत्यादिस्मृतिषु व्याकरणादेरध्ययनमात्रं विधीयते, न तु तदर्थावगमपर्यन्तमध्ययनम्। अतो न दृष्टद्वारलाभ इति चेन्न, प्रकृतिप्रत्ययविभागादिज्ञानफलकस्य व्याकरणादेरङ्गत्वान्यथानुपपत्त्यैव तदध्ययनस्यार्थज्ञानपर्यन्तत्वसिद्धेः, अन्यथा तस्यादृष्टार्थाङ्गत्वप्रसङ्गात्। एवं चाङ्गाध्ययनस्यार्थज्ञानपर्यन्तत्वात् तन्न्यायेनापि वेदाध्ययनस्यार्थज्ञानपर्यन्तत्वसिद्धिरिति।

एवमर्थज्ञानफलकतया स्वाधिकारेण स्वविधिनैवाध्ययनस्य प्रयुक्तिर्नाध्यापनविधिनेति तस्य पूर्ववृत्तत्वमुपपद्यत इत्याह—ब्रह्मविचारात् पूर्वभावित्वं युक्तमिति। कथमध्यापनविधिप्रयुक्तत्वे तस्य पूर्ववृत्तत्वानुपपत्तिरिति चेदुच्यते—अध्यापनविधिप्रयुक्तत्वेऽन्यतो लब्धानुष्ठाने तस्मिन्नर्थज्ञानकामोऽधिकारी न कल्पनीयः, विश्वजिदादिष्वनुष्ठानार्थमेवाधिकारिकल्पनात्, विधीनामधिकारिपर्यवसायित्वनियमस्याप्रामाणिकत्वात्, अन्यथा काम्यविधीनां फलपर्यन्तत्वदर्शनमात्रेण निषेधनैमित्तिकविध्योरपि तत्कल्पनाप्रसङ्गात्। एवं चाध्ययनविधेरर्थज्ञानपर्यन्तत्वाभावेन विचाराभावे वितुषीभावपर्यन्तस्यावहननविधेरावृत्त्यभाव इवानुपपत्त्यभावाद् विचारोऽपि न विध्याक्षिप्तः स्यात्। नन्वध्ययनविध्यनाक्षिप्तोऽपि विचारः क्रतुविधिभिरनुष्ठेयार्थज्ञानमपेक्षमाणैराक्षिप्तः स्यादिति चेन्मैवम्, तत्तत्क्रतुविधयो हि तत्तत्क्रत्वनुष्ठानकाले व्रीहियवपश्वाज्यादिकमिवानुष्ठेयार्थज्ञानमपि तत्तत्क्रतुमात्रोपयुक्तमपेक्षन्ते, न तु स्वाध्यायग्रहणानन्तरमेव कृत्स्नस्वाध्यायार्थज्ञानमपेक्षन्ते। तत्तत्क्रत्वनुष्ठानकाले तत्तन्मात्रोपयोग्यर्थज्ञानं तूपदेष्टृवचनादिभिरपि सम्भवतीति न नियमेन विचाराक्षेपः सिद्ध्येत्।

नन्वध्ययनविधेरर्थज्ञानपर्यन्तत्वाङ्गीकारेऽपि वेदव्याख्यानेन पित्रादिवचनेन वा न्यायविचारं विनाप्यस्य वाक्यस्यायमर्थ इति न्यायसिद्धार्थकथनरूपेण स्वाध्यायार्थज्ञानं सिद्ध्यतीति नियमेन विचाराक्षेपो न सिद्ध्यतीति तुल्यमिति चेन्न, शब्दानामानन्त्याद्व्याकरणं विना सिद्धरूपप्रदर्शनेन सकलसाधुशब्दज्ञानस्येव वेदवाक्यानामानन्त्येन न्यायविचारं विना प्रतिवाक्यमर्थप्रदर्शनेन सकलवेदार्थज्ञानस्य सम्पादयितुमशक्यत्वात्। तुल्य-

रूपेषु हि वाक्येषु न्यायसिद्धा परस्परभिन्नार्थव्यवस्था तुल्यरूपेषु शब्देषु षत्वणत्वतदभावादिव्यवस्था षत्वणत्वादिज्ञापकं विनेव न्यायविचारं विना समनःप्रत्ययं ग्रहीतुमसङ्करेण धारयितुं चाशक्या। तथाहि—कथमुद्भिदादिशब्दवैलक्षण्येनार्थान्तररूढत्वाविशेषेऽपि—"श्येनेनाभिचरन् यजेत" (षड्विं० ब्रा० ३.८), "पञ्चदशान्याज्यानि" (ता० ब्रा० २०.१.१) इत्यादिषु श्येनाज्यादिशब्दानां कर्मनामत्वम्, "दध्ना जुहोति", "पयसा जुहोति" इत्यादिषु दध्यादिशब्दानां न कर्मनामत्वम्। कथं च कर्मनामत्वेऽपि—"राजसूयेन स्वाराज्यकामो यजेत" (आप० श्रौ० १८. ८. १-४), "अग्निहोत्रं जुहुयात् स्वर्गकामः" इत्यादिषु राजसूयाग्निहोत्रादिशब्दानां सन्निहितसकलयागहोमनामत्वम्, "ज्योतिष्टोमेन स्वर्गकामो यजेत", "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत" इत्यादिश्रुतिषु ज्योतिष्टोमदर्शपूर्णमासादिशब्दानां सन्निहितयागेषु कतिपययागनामत्वम्। कथं च—"मासमग्निहोत्रं जुहोति", "वारुण्या निष्कासेन तुषैश्चावभृथं यन्ति" इत्यादिष्वग्निहोत्रावभृथादिशब्दानामन्यत्र किञ्चित्कर्मनामत्वेन सिद्धानां कुण्डपायिनामयनवरुणप्रघासादिप्रकरणान्तर्गतानां कर्मान्तरनामत्वम्, "आज्यभागौ यजति" (मै० सं० १.१०.१५), "यज्ञायैव स्रुवेणाघारमाघारयति" इत्यादिष्वाघाराज्यभागादिशब्दानामन्यत्र किञ्चित्कर्मनामत्वेन सिद्धानां गृहमेधीयोपसदादिप्रकरणान्तरगतत्वेऽपि प्रसिद्धकर्मपरामर्शित्वम्। कथं च कर्म(कर्तृ) बहुत्वश्रवणाविशेषेऽपि—"द्वादशाहमृद्धिकामा उपेयुः सत्रमासीरन्" इत्यादिषु विहितानां सत्राणामनेककर्तृकत्वम्, "सत्रादुदवसाय पृष्ठशमनीयेन सहस्रदक्षिणेन यजेरन्" इति विहितस्य पृष्ठशमनीयस्यैककर्तृकत्वम्। कथं च मन्त्रार्थवादयोः पारार्थ्याविशेषेऽपि मन्त्रोक्तं फलमङ्गेष्वन्वेति नार्थवादोक्तम्। कथं च मन्त्रोक्तत्वाविशेषेऽपि सूक्तवाकादिमन्त्रोक्तमायुरादिफलं विवक्षितम्, न त्विडोपाह्वानादिमन्त्रोक्तं यज्ञपतिवृद्ध्यादिकम्। कथं च "व्रीहीन् प्रोक्षति" (आप० श्रौ० १.१९.१), "व्रीहीनवहन्ति" (आप० श्रौ० १.१९.११) इत्यादिषु विहितानां व्रीहिधर्माणां पुरोडाशसाधनत्वाविशेषाद्यवसाधारण्यम्, "रथन्तरे प्रस्तूयमाने सम्मीलयेत्" इत्यादिषु विहितानां रथन्तरधर्माणां पृष्ठस्तोत्रसाधनत्वाविशेषेऽपि न बृहत्साधारण्यम्। कथं च—"तान् पर्यग्निकृतानुत्सृजति", "ब्रह्मसाम्न्याऽऽलभते" इत्यत्र वाजपेयगतप्राजापत्यपशूनाम् "ईशानाय परस्वत आलभते, तान् पर्यग्निकृतानुत्सृजति" इत्यत्रैव तदन्ताङ्गरीतिविधानं न भवति, किन्त्वालम्भोत्कर्षविधानार्थप्राप्ततात्कालिक-

पाशुकव्यापारोपरमानुवादमात्रमुत्सृजति, पञ्चशारदीये तु चतुर्षु संवत्सरेषु सप्तदशानामुक्ष्णामुत्सृजति तदन्ताङ्गिरीतिविधानमेव, न तु पञ्चमसंवत्सर-कर्तव्यालम्भोत्कर्षार्थप्राप्ततात्कालिकतद्व्यापारोपरम इति । कथं च–"विज्ञान-मानन्दं ब्रह्म" (बृ० उ० ३.९.३४) इत्यादिश्रुत्युक्ताभेदस्तात्त्विकस्वरूपा-भेदः, न तु—"सर्वं खल्विदं ब्रह्म" (छान्दो० १४.१) इत्यादिश्रुत्युक्त इत्यादि-सन्देहपरम्परामुत्तीर्य उपदेशमात्रलब्धमेतादृशमर्थं कः श्रद्दधीत, श्रद्दधानो वा हृद्यसंकरेण को धारयेत् ।

अपि च, केषाञ्चिद्वाक्यानां तात्पर्यविषय एवार्थः स्वारस्येन प्रतीयते । तात्पर्यविषयस्त्वर्थ उपदिष्टोऽपि न हृदयमधिरोहति । यथा–"यस्य हविर्निरुप्तं पुरस्ताच्चन्द्रमा अभ्युदेति त्रेधा तण्डुलान् विभजेद् ये मध्यमाः स्युस्तानग्नये दात्रे पुरोडाशमष्टाकपालं कुर्याद् ये स्थविष्ठास्तानिन्द्राय प्रदात्रे दधंश्चरुं येऽणिष्ठास्तान् विष्णवे शिपिविष्टाय श्रिते चरुम्" इत्यत्र त्रेधा तण्डुलान् विभजेदिति वाक्यस्य करिष्यमाणपुरोडाशचरुद्वयसौकर्याय दार्शिकाग्नेययागार्थतण्डुलानां मध्यमस्थविष्ठाणिष्ठभावेन त्रेधा विभागोऽर्थ इति स्वारस्येन प्रतीयते । मध्यमादिवाक्यानां च—"यः पशुकामः स्यात् सोऽमावास्यामिष्ट्वा वत्सानपाकुर्याद् ये मध्यमाः स्युस्तानग्नये दात्रे पुरोडा-शमष्टाकपालं कुर्याद् ये स्थविष्ठास्तानिन्द्राय प्रदात्रे दधंश्चरुं येऽणिष्ठास्तान् विष्णवे शिपिविष्टाय श्रिते चरुम्"इति काम्येष्टिविशेषविधानान्तर्गतवाक्याना-मिव तत्तद्द्रव्यदेवताविशेषविशिष्टयागविधिरर्थः प्रतीयते । त्रेधा तण्डुला-निति वाक्यस्य दार्शिकहविषां सर्वेषामग्न्यादिभ्यः पूर्वदेवताभ्योऽपनयोऽर्थः । अपनीतपूर्वदेवतानां तण्डुलदधिश्रितरूपाणां दार्शिकहविषां देवतान्तरसंयोज-नेन प्रक्रान्तस्य दर्शस्यैव कालापराधनिमित्तकप्रयोगान्तरविधिरर्थः, न तु तन्निमित्तकर्मान्तरविधिरर्थ इति न्यायसिद्धार्थस्तु शतवारमुपदिष्टोऽपि न्यायोपन्यासं विना न हृदयमधिरोहति । तथा "त्वाष्ट्रं पात्नीवतमालभेत" (तै० सं० ६.६.६.२)इति प्रकृत्य—"पर्यग्निकृतं पात्नीवतमुत्सृजत्याज्येन शेषं संस्थापयति" (तै० सं० ६.६.६.२) इति श्रवणस्य पशोः पर्यग्निकरणान्त-मङ्गकलापं कृत्वा पशुं विसृज्य पशुद्रव्यकतयोपक्रान्तस्य यागस्याज्येन समापनं कर्तव्यमित्यर्थः स्वारस्येन प्रतीयते । अमुमेवार्थमवलम्ब्य कल्पसूत्र-प्रवृत्तिरपि दृश्यते—"पर्यग्निकृतमुत्सृज्याज्येन शेषं संस्थापयति यावन्ति पशोरवदानानि स्युस्तावन्त्याज्यस्यावद्येत् पशुधर्माज्यं भवति" (तै० सं० ६.६.६.२) इति ।

वस्तुतस्तु कल्पसूत्रकारगृहीतोऽपि नायमस्य वाक्यस्यार्थः। यदि हि "पर्यग्निकृतं पात्नीवतमुत्सृजति" (तै०सं० ६.६.६.२) इत्यनेन पर्यग्निकरणानन्तरं पशोर्देवतोद्देशेन त्यागो विधीयते, तदा मुख्येन पशुनैव यागस्य निर्वृत्तत्वान्न तत्प्रतिनिधिनाज्येन शेषसमापनापेक्षा। यदि तु तेन पर्यग्निकरणानन्तरं पशोस्तूष्णीमेव विसर्जनं विधीयते, तदा पशोर्देवतासम्बन्धो न कृत इति–"त्वाष्ट्रं पात्नीवतमालभेत" (तै० सं० ६.६.६.२) इत्यत्राश्रुतस्य यागस्यानुमापकं द्रव्यदेवतासम्बन्धरूपं लिङ्गं प्रामाणिकमिति याग एव तेनानुमितः स्यात्, कस्य शेषसमापनापेक्षा। तस्मात् पर्यग्निकृतवाक्यस्य पर्यग्निकरणान्ताङ्गरीत्या पशुयागस्य समापनमर्थः। "आज्येन शेषं संस्थापयति" (तै० सं० ६.६.६.२) इति वाक्यस्याज्यद्रव्यकयागान्तरविधिरर्थः। पूर्ववाक्यस्थितपात्नीवतपदानुवृत्त्या तस्य तृतीयाविभक्तिपरिग्रहेण च देवतालाभः। पत्नीवद्देवत्यं पशुं प्रक्षेपेण विनोत्सृज्य तद्दैवत्याज्ययागस्तदनन्तरमेव प्रक्षेपपर्यन्तं क्रियमाणः प्रक्रान्तस्य पशुयागस्य शेषसमापनमिव भवतीति शेषसंस्थाशब्दौ गौणौ। एवमयमस्य न्यायसिद्धोऽर्थः—[1]"सुभ्रु त्वं कुपितेत्यपास्तमशनं त्यक्ता कथा योषितां दूरादेव विवर्जिताः सुरभयः स्रग्गन्धधूपादयः। कोपं रागिणि मुञ्च मय्यवनते दृष्टे प्रसीदाधुना सत्यं त्वद्विरहाद् भवन्ति दयिते सर्वा ममान्धा दिशः॥" इति श्लोकस्य सुभ्रूदयितापदप्रसिद्धस्वारस्यात् कोपप्रसादविरहपदमुख्यार्थलाभस्वारस्याच्च कामिकृतकामिनीप्रसादनव्यापारार्थतया प्रतीयमानस्य नयनरोगार्तकृतनयनोद्देश्यकाक्रोशार्थो वक्तृविवक्षाधिगमं विनेव न्यायानुसन्धानं विना न हृदयमधिरोहति, परब्रह्मपरवेदान्तभागार्थस्तु नानाविधार्थप्रतीतेस्तत्तदनुसारिवादिविप्रत्तिपत्तिबाहुल्याच्च न्यायविचारं विना कथमपि हृदयं नाधिरोहत्येव। एवमध्ययनविधेः स्वविषयानुष्ठापकत्वेनार्थज्ञानपर्यन्तत्वाङ्गीकारे तस्य विचाराक्षेपकत्वं सिद्धयतीति न तदसिद्धिशङ्कावकाशः।

नन्वध्ययनस्याध्यापनविधिप्रयुक्तत्वाङ्गीकारे तत्रार्थज्ञानकामस्याधिकारिणोऽकल्पनीयत्वेनाध्ययनानन्तरमेव कृत्स्नस्वाध्यायार्थज्ञानार्थं न्यायविचारप्राप्तावपि क्रत्वनुष्ठानप्रकाराणामुपदेष्टृवचनादिभिरवगमसम्भवेऽपि मन्त्रवत् स्वनुष्ठेयेषु मन्त्रैरेवानुष्ठेयार्थज्ञानस्यापेक्षितत्वात् तदर्थं मन्त्राणामर्थज्ञानाय विचारापेक्षा स्यात्, न्यायनिर्णेयार्थानां मन्त्राणां विचारं विनार्थनिर्णयासम्भवादिति चेदुच्यते–मान्त्रवर्णिकद्रव्यदेवताफलाद्यूहानूहनिर्णयादिभिरनुष्ठानप्रका-

१. विद्यापतेः श्लोकोऽयमिति सुभाषितरत्नभाण्डागारे।

वेदस्य तद्विचारानुपपत्तेः। ततः केवलाध्ययनानन्तरं ब्रह्मविचार

रावगत्यर्थं मन्त्रार्थनिर्णायकन्यायविचारापेक्षायामपि मन्त्रैरनुष्ठेयार्थस्मरणसिद्ध्यर्थं न तदपेक्षाऽस्ति। निरुक्तव्याकरणादिभिर्यथाश्रुतमन्त्रार्थावगमे सति यत्रानुष्ठेयप्रकाशकं पदमस्ति तत्र तेन तत्स्मरणं कार्यम्। तद्विशेषणानां "दर्भैस्तृणीत हरितैः" (का० सं० ३१.१४) इत्यादाविव समवेतार्थत्वे तद्विशिष्टस्मरणं दृष्टार्थम्। "अश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्" (तै० सं० १.१.१.१) इत्यादाविवासमवेतार्थत्वे तद्विशिष्टस्मरणमदृष्टार्थम्। यत्र त्वनुष्ठेयार्थवाचकं पदं नास्ति, तत्र श्रुतपदस्यैव वृत्त्यन्तरं कल्पनीयम्। यथा— "ऐन्द्र्या गार्हपत्यमुपतिष्ठते" (मै० सं० १.५.११) इति गार्हपत्योपस्थाने विनियुक्ते—"निवेशनः सङ्गमनो वसूनाम्" (तै० सं० ४.२.५.४) इति मन्त्रे श्रुतस्येन्द्रपदस्य गार्हपत्ये। यत्र त्वनुष्ठेयार्थे वृत्त्यन्तरस्यापि योग्यं पदं नास्ति, तत्र तद्वाचकस्य पदस्याध्याहारः। यथा "इषे त्वा"(तै० सं० १.१.१.१) इति मन्त्रे छिनद्मीति पदस्येत्याद्युपदेशृवचनेनैव मन्त्रैरनुष्ठेयार्थस्मरणसिद्धेस्तत्राऽनाश्वसनीयस्य विचारनिवर्तनीयशङ्कास्पदस्य कस्यचिदर्थस्याभावात्। तस्मादध्ययनस्याध्यापनविधिप्रयुक्तत्वे तस्य विचारात् पूर्ववृत्तत्वं नोपपद्यत इति तदुपपत्त्यर्थं तस्य स्वविधिप्रयुक्तत्वसमर्थनं युक्तमेव।

ननु कार्यलिङ्गानुमानेनाप्यवगन्तुं शक्यस्य ब्रह्मणो वेदैकगम्यत्वाभावात्तद्विचारे वेदाध्ययनं नियमेन पूर्ववृत्तं वक्तुमयुक्तमित्याशङ्क्याह—धर्मवदिति। कार्यलिङ्गेन कर्तृमात्रसिद्धिसम्भवेऽपि विवक्षितानन्तमङ्गल्यगुणशालिनो नीलकण्ठत्वादियुक्तविग्रहविशिष्टस्य ब्रह्मणः सिद्धिस्ततो न सम्भवतीति वेदैकगम्यमेव तथाभूतं ब्रह्म, यथा प्राणिनां भोगवैचित्र्येण विचित्रकारणानुमानसम्भवेऽपि यागदानादिरूपो धर्मो वेदैकगम्य इत्याशयः। ब्रह्मणो वेदैकगम्यत्वस्य शास्त्रयोनित्वाधिकरणे व्यवस्थापयिष्यमाणत्वेऽपि धर्मदृष्टान्तेनापि तद्व्यवस्थापनार्थमिहानुवादः।

ननु धर्मवद् ब्रह्म वेदैकगम्यमिति वदता धर्मस्यापि वेदैकगम्यत्वमभ्युपगतमिति धर्मब्रह्मविचारसाधारणकारणं वेदाध्ययनं न ब्रह्मविचारे नियमेन पूर्ववृत्तं भवेदित्याशङ्क्याह—अनधीतेति। अयमाशयः—बहुकालसाध्याध्ययनकाले निर्विचिकित्सं सन्ध्यावन्दनाद्यनुष्ठानसिद्धये प्रागेवाध्ययनाद् धर्मविचारः कर्तव्यः। अवश्यं ह्यध्ययनफलस्यार्थज्ञानस्य सिद्धयेऽध्ययनात् प्रागूर्ध्वं वा धर्मविचारः कर्तव्यः। अर्थज्ञानं चानुष्ठानौपयिकतयैव पुरुषार्थो न स्वतः।

इति चेत्, भवतु नाम तादृशमध्ययनम्। तदनन्तरं तु धर्मविचारः, तस्य तदसिद्धौ सिद्ध्यभावात्। तथा चाचार्यैः प्रतिपादितम्—

तच्चेदनुष्ठानमध्ययनकालेऽप्यस्ति, कुतस्तदुपयोग्यर्थज्ञानार्थं ततः प्रागेव विचारो न क्रियेत। यद्यप्यध्ययनेनैव वेदाक्षरराशिर्ग्राह्यः, तेनैव तदर्थज्ञानं भावनीयमित्यस्ति नियमः, तथापि सन्ध्यावन्दनाद्यपेक्षितमन्त्रग्रहणमिव तदनुष्ठानोपयुक्तविचारसाध्यमर्थज्ञानं विचारापेक्षितविषयवाक्यग्रहणं च विनाप्यध्ययनं भविष्यति। वेदपाठक्रमवताऽध्ययनेनैव वेदाक्षरराशिर्ग्राह्य इति नियमस्तूपनयनसन्ध्यावन्दनाद्युपयुक्तमन्त्रेभ्य इव विचारापेक्षितविषयवाक्येभ्योऽन्यत्र व्यवतिष्ठते। अध्ययनेनैवार्थज्ञानं भावनीयमिति नियमोऽपि न्यायविचारार्थमधिकरणेषु लिखितेभ्यो विषयवाक्येभ्यः सन्ध्यावन्दनाद्युपयुक्तवाक्येभ्यश्चान्यानि यानि तत्तदधिकरणव्युत्पादितन्यायसाम्येन ज्ञातव्यार्थानि क्रमाध्ययनेन ग्राह्याणि गृहस्थकर्तव्याग्निहोत्राद्युपयुक्तानि तदर्थज्ञानविषयतया व्यवतिष्ठते।

तदेवं धर्मविचारोऽध्ययनात् प्रागेव कर्तव्यः। ब्रह्मविचारस्त्वनधीतवेदेन न कर्तव्यः, तस्याध्ययनकालेऽवश्यकर्तव्येष्वनपेक्षितत्वेन नियमविध्युल्लङ्घने कारणाभावादिति। तस्मादध्ययनानन्तर्यं ब्रह्मविचारस्य युक्तमित्युपसंहरति—तत इति। कर्मावबोधशिरस्काध्ययनानन्तर्यं सिद्धान्तयिष्यत इति ततो वैलक्षण्याय केवलाध्ययनानन्तरमिति विशेषितम्। यदुक्तमध्ययनमुपनयनाङ्गकमर्थज्ञानफलकं स्वविधिप्रयुक्तमिति तत्तथैव। तदनन्तरं ब्रह्मविचार इति तु न सम्भवति, तदानीं धर्मविचारस्यैव प्राप्तेरिति परिहरति—भवतु नामेति।

नन्वध्ययनात् प्रागपि धर्मविचारः सम्भवतीत्याशङ्क्याह—तस्य तदसिद्धौ सिद्ध्यभावादिति। अत्रायमाशयः—विचारकाले सन्ध्यावन्दनाद्यनुष्ठानं हितैषिवचनादेवोपपादनीयमित्यध्ययनकालेऽपि तथैव तदनुष्ठानस्योपपादयितुं शक्यत्वान्न नियमविध्युल्लङ्घने कारणमस्ति। किञ्च, वसन्तोपनीतेन ब्राह्मणेन श्रावण्यां प्रोष्ठपद्यां वोपाकृत्याध्ययनं कर्तव्यम्। न चैतावन्मध्य एव विध्यन्तरसाध्यपदपदार्थावधारणवाक्ययोजनाभेदव्युत्पत्तिपूर्वकः कृत्स्नस्वाध्यायार्थनिर्णयोपयोगिन्यायविचारो धीशक्तियुक्तेनापि कर्तुं शक्यते। किञ्च, वैदिकपदपदार्थावधारणं व्याकरणादिनैव कर्तव्यम्, अन्यथा तस्य तदङ्गत्वानिर्वाहात्, दृष्टद्वारे सम्भवति द्वारान्तरकल्पनाऽयोगात्। तदध्ययनं तु वेदाध्ययनोपक्रमानन्तरं कृष्णपक्षेषु कर्तव्यमिति कथं ततः प्राग् वैदिकपदपदार्थाद्यवधारणाद्यपेक्षस्य न्यायविचारस्य सम्भवः। तस्मादुपनीतस्य धर्माधर्मौ महाफलौ

"अथातो धर्मजिज्ञासा" (जै० १.१.१) इति । प्रथमत उपाध्यायादध्ययनानन्तरं धर्मविचारप्राप्तिरिति । तर्हि

ज्ञातव्याविति हितैषितः श्रुत्वा तज्ज्ञानमिच्छतः स्वाध्यायविधिना तादर्थ्येन विहितमध्ययनं तेभ्य एवावगत्य वैधे साङ्गवेदाध्ययने प्रवृत्तस्य वेदाध्ययनेन तद्ग्रहणे तदङ्गाध्ययनेन पदपदार्थाद्यवधारणे च सति किमेवमस्य वाक्यस्यार्थः, किं वान्यथेति सम्भावितयोजनाविशेषेषु सन्दिहानस्य तत्तद्वाक्यार्थविशेषजिज्ञासयाऽध्ययनानन्तरमेव धर्मविचारेऽपि प्रवृत्तिरिति ।

अनेनैवाभिप्रायेण भगवता जैमिनिना सूत्रितमित्याह—तथा चेति । तत्राथशब्दस्य वेदाध्ययनानन्तर्यमर्थ इति वक्तुं न शक्यते, धर्मब्रह्मविचारसाधारणकारणस्य तस्य प्रथमं धर्मविचारप्रवर्तने विशेषपक्षपातप्रवृत्त्यभावात् । प्रयुक्तस्याथशब्दस्यार्थेन भाव्यमिति चेत्, शिष्यप्रश्नानन्तर्यमर्थोऽस्तु । "अथातो धर्मं व्याख्यास्यामः" (वैशे० १.१.१) इति कणादसूत्रगताथशब्दवत् । स हि तदर्थतयैव तद्भाष्यकारादिभिर्व्याख्यातः । इहापि मीमांसाशास्त्रे गुरुशिष्यपरम्परामविच्छेदेनानुवर्तमानामाहुः साम्प्रदायिकाः । महेश्वरः प्रजापतये मीमांसां प्रोवाच प्रजापतिरिन्द्रायेन्द्र आदित्यायेत्यादिनेत्याशङ्क्याथशब्दस्य सूत्रकृद्विवक्षितमर्थं प्रदर्शयन् ब्रह्मविचारप्राथम्यशङ्कां प्रतिक्षिपति—प्रथमत इति । अयमाशयः—सूत्रकारव्यवहारसामर्थ्याद्यत्तु पूर्ववृत्तमवगन्तुं शक्यम्, तदानन्तर्यमथशब्देन विवक्षितमिति व्याख्यातुमुचितम् । निर्युक्तिकोपदेशमात्रगम्यव्यापारानन्तर्यं विवक्षितमिति व्याख्यानं तु सूत्रकारस्यैव कौशलाविष्करणम् । न चात्र शिष्यप्रश्नः पूर्ववृत्तोऽस्तीत्यत्र ज्ञापकः कश्चिदुत्तरत्र सूत्रकारव्यवहारोऽस्ति । अस्ति तु वेदाध्ययनं पूर्ववृत्तमित्यत्र ज्ञापकस्तद्व्यवहारः । स हि धर्मविचारं प्रतिज्ञाय विचार्ये धर्मे वेदमेव प्रमाणमाह— "चोदनालक्षणोऽर्थो धर्मः"(जै० १.१.२) इति । अत्र प्रतिज्ञायमानो धर्मविचारो वेदार्थविचारात्मक इति स एव स्वकारणत्वेनाध्ययनस्य पूर्ववृत्तस्य ज्ञापकः । यद्यपि ब्रह्मविचारसाधारणमिदं कारणम्, तथापि विरक्ताविरक्तसाधारण्येन सर्वेषामप्यावश्यकं कर्मानुष्ठानमिति तदपेक्षितो धर्मविचार एव प्रथमं प्राप्नोति । नहि वेदाध्ययनात् पूर्वं धर्मविचारे नियमविध्युल्लङ्घनदोष इव तदनन्तरमपि धर्मविचारे कश्चित् प्रतिबन्धकोऽस्तीति ।

ननु ब्रह्मविचारे नियतसामग्रीरूपं किञ्चित्पूर्ववृत्तमपेक्ष्य तदानन्तर्यमथशब्दार्थतया परिग्राह्यमित्युक्तम् । अध्ययनं तावन्न तथाभूतं पूर्ववृत्तमित्युक्तम् ।

किमनन्तरमस्यारम्भः ? धर्मविचारानन्तरम् । कथम् ? न वयं धर्मब्रह्मविचाररूपयोः शास्त्रयोरत्यन्तभेदवादिनः, किन्त्वेकत्ववादिनः । धर्मब्रह्मणोराराधनाराध्यभूतयोः प्रतिपादकम्— "अथातो धर्मजिज्ञासा" इत्यारभ्य "अनावृत्तिः शब्दात्"(ब्र० ४.४.२२) इत्येतावत्पर्यन्तमेकमेव शास्त्रम् । तत्र "अथातः

किं तर्हि तद्यदनन्तरमस्यारम्भः । तन्नोच्यते चेत् प्रतिज्ञातं तदानन्तर्यार्थत्वमथशब्दस्य हीयते । अगत्या तस्य शिष्यप्रश्नानन्तर्यार्थत्वमधिकाराद्यर्थत्वं वा परिग्राह्यं स्यादिति पृच्छति—तर्हीति । उत्तरमाह—धर्मविचारानन्तरमिति । ननु धर्मविचारानन्तरं ब्रह्मविचार इत्ययुक्तम्, धर्मब्रह्मविचारयोः पौर्वापर्यहेतुसम्बन्धाभावादिति पृच्छति—कथमिति । धर्मब्रह्मविचारयोर्वेदरूपैकग्रन्थव्याख्यानत्वेनैकशास्त्रत्वाद् व्याख्येये वेदे धर्मब्रह्मभागयोः पौर्वापर्यमेव तत्पौर्वापर्यहेतुसम्बन्ध इत्यभिप्रेत्योत्तरमाह—न वयमिति । विचारशास्त्रयोर्धर्मविचारशास्त्रे पूर्वापरषट्कयोरिवावान्तरविषयभेदेन किञ्चिद्भेदानुमित्यर्थमत्यन्तग्रहणम् ।

नन्वर्थैक्येनैकशास्त्र्यं वक्तव्यम्, तदत्र न सम्भवति, धर्मब्रह्मणोर्भेदादित्याशङ्क्याह—धर्मब्रह्मणोरिति । धर्मप्रतिपादकस्यापि वेदभागस्य तत्समाराध्ये ब्रह्मण्येव महातात्पर्यम् । अत एव–"सर्वे वेदा यत्पदमामनन्ति"(कठो० २.१५) इति ब्रह्मणः सर्ववेदप्रतिपाद्यत्वं श्रूयते । ततश्च तद्व्याख्यानरूपयोर्विचारशास्त्रयोरपि व्याख्येयमहातात्पर्यविषयैकार्थपर्यवसायित्वाद् युक्तमैकशास्त्र्यम्, कर्तृभेदेऽपि वामनजयादित्यवृत्त्योस्तद्दर्शनात्, ब्रह्मविचारशास्त्रे "परं जैमिनिर्मुख्यत्वात्" (ब्र० ४.३.१२) इत्यादिषु जैमिनेः पूर्वपक्षित्वेऽपि तत्र पूर्वपक्षितार्थानां तत्प्रणीते धर्मविचारशास्त्रे निवेशनाभावेन तदेकग्रन्थतया ब्रह्मविचारशास्त्रविरचनोपपत्तेः । मतान्तरस्थकृतत्वेऽप्युपादानस्यापि वामनजयादित्यवृत्त्योरिव दर्शनादिति भावः ।

ननु धर्मब्रह्मविचारयोर्ब्रह्मैकपर्यवसायित्वेनैकशास्त्र्ये मध्ये कोऽयम् "अथातो ब्रह्मजिज्ञासा"(ब्र० १.१.१) इत्यारम्भः । न च वाच्यं विचारद्वयसाधारणीयं प्रतिज्ञा, धर्मविचारस्तु ब्रह्मज्ञानसाधनविशेषविषयतया ब्रह्मविचारमध्य एव साधनाध्याये कर्तव्योऽपि बहुवक्तव्यसद्भावात् पृथक्कृत्य प्रपञ्चित इति, तथा सत्यथशब्दस्य धर्मावबोधानन्तर्यार्थत्वानुपपत्तेः । नहि

शेषलक्षणम्''(जै० ३.१.१) इत्यादिवदवान्तरपरिच्छेदार्थोऽयम् ''अथातो ब्रह्मजिज्ञासा''(ब्र० १.१.१) इत्यारम्भः। अथवा धर्मस्य ब्रह्मबोधे हेतुत्वात् तद्विचारोपयुक्तानां श्रुतिलिङ्गादीनां

धर्मविचारेण धर्ममवबुध्य तदनन्तरं धर्मब्रह्मविचारानुगतो ब्रह्मविचारः कर्तव्य इति प्रतिज्ञा सङ्गच्छत इत्याशङ्क्याह—तत्राथात इति। यथा धर्मविचार-शास्त्र एव प्रथमाध्यायद्वयेन कृतं वेदप्रामाण्यकर्मभेदप्रामाण्यसाधनमुपजीव्य ''अथातः शेषलक्षणम्''(जै० ३.१.१) इति तृतीयाध्यायारम्भगतसूत्रेणावशिष्ट-दशाध्यायीकर्तव्यविचारारम्भप्रतिज्ञा क्रियते, ''द्विलक्षिण्याः परं शिष्टं यावत् किञ्चन लक्षणम्। तत्सर्वं वक्तुमारब्धमथातः शेषलक्षणम्॥'' इति वार्त्तिकोक्तेः, तथा पूर्वतन्त्रेण कृतं धर्मविचारमुपजीव्य ''अथातो ब्रह्मजिज्ञासा'' (ब्र० १.१.१)इति सूत्रेणोत्तरचतुरध्यायीकर्तव्यविचारप्रतिज्ञा क्रियत इत्यर्थः।

अत्रायमाशयः—ब्रह्मजिज्ञासासूत्रे धर्मब्रह्मविचारानुगतो ब्रह्मविचारो न प्रतिज्ञायते, किन्त्वविदितब्रह्मणामपि यदनुष्ठानाच्छास्त्रोक्तं किञ्चित्फलं सिद्ध्यति तद्धर्माख्यं विषयमग्निहोत्रादिकम्–''यो वा एतदक्षरं गार्ग्यविदित्वा अस्मिल्लोके जुहोति यजते तपस्तप्यते बहूनि वर्षसहस्राण्यन्तवदेवास्य तद्भवति''(बृह० ३.८.१०) इत्यन्तवत् स्वर्गादिफलसाधनत्वेन श्रुतं परित्यज्य ज्ञानवैराग्यादिसाधनेन मोक्षफलेन च सहितस्य ब्रह्मणो विचारः प्रतिज्ञायते। अतोऽल्पास्थिरफलाग्निहोत्रादिधर्मावबोधानन्तरं विवेकवैराग्यादिसम्पन्नेनानन्तस्थिरफलब्रह्मावबोधसिद्धये तद्विचारः कर्तव्य इति प्रतिज्ञा युज्यत एव। यद्यपि पूर्वतन्त्रारम्भे द्विलक्षणीदशलक्षणीसाधारणधर्मविचारप्रतिज्ञावद् धर्मब्रह्मविचारोभयानुगतब्रह्मविचारप्रतिज्ञा न दृश्यते, न च ''अथातो धर्मजिज्ञासा'' (जै० १.१.१) इत्यनेनैव सूत्रेण सापि प्रतिज्ञा लभ्यते, धर्म-शब्दस्यालौकिकश्रेयःसाधनसामान्यवाचिनः सिद्धसाध्यसाधारणस्य साध्य-रूपाग्निहोत्रादिपरत्ववत् सिद्धरूपब्रह्मपरत्वस्याप्युपपत्तेरिति वाच्यम्, साध्य-धर्मविचारमात्रे प्रवृत्तेन जैमिनिना प्रणीतस्य सूत्रस्य तथा व्याख्यानाऽयोगात्। नहि जैमिनेर्ब्रह्मविचारोऽपि कर्तव्य इत्यभिसन्धिरस्ति, तथात्वे ब्रह्मसूत्राणा-मपि तेनैव प्रणेतव्यत्वापत्तेः। यः खलु जैमिनिः साध्यधर्मविचारार्थं द्वादशाध्यायीं प्रणीय तत्राविचारितोऽपि कियानंशोऽस्तीत्यालोच्य तद्वि-चारार्थं पुनः सङ्कर्षणाख्यां चतुरध्यायीं प्रणिनाय, स कथं ब्रह्मविचारोऽपि कर्तव्य इत्यभिसन्धिसद्भावे तदर्थान्यपि सूत्राणि न प्रणयेत्। भगवान्

बादरायणस्तु जैमिनिना कृतं साध्यधर्ममात्रविचारात्मकं शास्त्रं दृष्ट्वा तद्ब्रह्मपर्यन्तं वक्तृतात्पर्याभावेऽपि वस्तुतः सर्वकर्माराध्ये तस्मिन्नविरोधात् पर्यवसातुमर्हतीत्यालोच्य तदैकशास्त्र्येण तत्संहितमेव "अथातो ब्रह्मजिज्ञासा" (ब्र० १.१.१) इत्यादिसूत्रसन्दर्भं प्रणिनायेति युज्यते। अतो जैमिनीयमाद्यसूत्रं विचारद्वयानुगतब्रह्मविचारप्रतिज्ञार्थं न भवत्येव, तथापि विचारद्वयासाधारणप्रतिज्ञाद्वये कृते तदुभयानुगतसाधारणार्थकप्रतिज्ञार्थाल्लभ्यत इति जैमिनिसूत्रारम्भे तदर्थस्य सूत्रस्याभावेन न किञ्चिद्वैकल्यम्।

ननु जैमिनिबादरायणप्रणीतयोर्धर्मब्रह्मविचारशास्त्रयोरैकशास्त्र्यं न संभवति, परस्परविरुद्धार्थत्वात्। तथा हि—जैमिनिना तावत् "आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते" (जै० १.२.१) इति सूत्रेणार्थवादादीनामक्रियार्थत्वेनानर्थक्यं पूर्वपक्षीकृत्य–"विधिना त्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युः" (जै० १.२.७) इति सूत्रेण विध्येकवाक्यतया क्रियार्थत्वोपपादनेनैव तेषामानर्थक्यं परिहृतम्। भगवता बादरायणेन तु "शास्त्रयोनित्वात्" (ब्र० १.१.३) इति सूत्रेण ब्रह्मणि वेदान्तानां प्रामाण्यं प्रतिज्ञाय, "तत्तु समन्वयात्" (ब्र० १.१.४) इति सूत्रेणाक्रियारूपे ब्रह्मणि कथं तेषां प्रामाण्यमित्याशङ्कायामाम्नायस्य क्रियार्थत्वनियमं तिरस्कृत्य सर्वत्र यत्किञ्चिदुपासनाविध्यन्वितानामपि ब्रह्मप्रतिपादकवेदान्तशब्दानां ब्रह्मणि प्रामाण्यं समर्थितम्। न च वाच्यं स्वयं पुरुषार्थविरहिणां सिद्धपरवाक्यानां क्रियाविशेषत्वाभिप्रायं विधिशेषतया प्रामाण्यसमर्थनम्, अतः स्वयं पुरुषार्थपर्यवसायिनां वेदान्तानां ब्रह्मणि स्वातन्त्र्येण प्रामाण्यसमर्थनेऽपि न तद्विरुध्यत इति "यन्न[1] दुःखेन संभिन्नम्" इत्यादीनामिव स्वयं पुरुषार्थरूपब्रह्मबोधकानामपि वेदान्तानां धनार्थिनं प्रति महामेरुगतयथेष्टग्रहणार्हजाम्बूनदोपदेशतुल्यन्यायतापत्त्या पुरुषार्थपर्यवसायकत्वासम्भवात्। तथा जैमिनिना—"देवता वा प्रयोजयेदतिथिवद् भोजनस्य तदर्थत्वात्" (जै० ९.१.६) इति सूत्रेण यथाऽतिथिपूजात्मकमातिथ्यमतिथिप्रीत्यर्थं सदतिथिप्रधानम्, एवं देवपूजात्मकं यजनमपि देवताप्रीत्यर्थं सद्देवताप्रधानं तेनैव च प्रीता देवता फलदात्रीति पूर्वपक्षं कृत्वा–"अपि वा शब्दपूर्वत्वाद् यज्ञकर्मप्रधानं स्याद् गुणत्वेन देवताश्रुतिः" (जै० ९.१.९) इति सूत्रेण न देवता

१. यन्न दुःखेन संभिन्नं न च ग्रस्तमनन्तरम्। अभिलाषोपनीतं च तत्सुखं स्वःपदास्पदम्॥ इति सम्पूर्णः श्लोकः सांख्यतत्त्वकौमुद्याम् (का० २)। तन्त्रवार्त्तिकेऽन्वेषणीयोऽयम्।

प्रधानं यजनं तदेवापूर्वद्वारा फलजनकं न तु हविषा प्रीता देवता, तस्यास्तु द्रव्योद्देश्यतया यागोपसर्जनत्वेनैव श्रुतिरिति सिद्धान्तमभिधाय–"अतिथौ तत्प्रधानत्वमभावः कर्मणि स्यात् तस्य प्रीतिविधानत्वात्"(जै० ९.१.१०)इति सूत्रेणातिथ्यवैषम्यं यजने दर्शितम्। आतिथ्यमतिथिप्रीतिविधानम्। यथाऽतिथिः प्रीयते तथा कर्तव्यतया विहितमिति तदतिथिप्रधानं युज्यते। कर्मणि तु नास्ति प्रीतिविधानम्, यथा देवता प्रीयते तथा कर्म कर्तव्यमिति। अतो न देवताप्रधानं यजनमिति। तथा—"विप्रतिपत्तौ हविषा नियम्येत कर्मणस्तदुपाख्यत्वात्" (जै० ८.१.३२) इति सूत्रेणेन्द्रपुरोडाशेषु पुरोडाशरूपहविःसामान्यादाग्नेययागविध्यन्तः, न त्विन्द्ररूपदेवतासामान्यात् सान्नाय्ययागविध्यन्तः, हविस्त्यागरूपस्य यागकर्मणो हविष्युपलभ्यमानत्वात्। हविर्हि त्यज्यमानं दृश्यते। देवता त्वप्रत्यक्षैव परं यागोद्देश्येति प्रतिपाद्ययागस्य देवतासाधनरूपत्वाद् देवतैव प्रसन्ना फलदात्री प्रधानभूतेति तत्सामान्यं हविःसामान्याद् बलीय इति शङ्कानिराकरणार्थं सूचितम्—"गुणत्वेन देवताश्रुतिः" (जै० ८.१.३४) इति।

बादरायणेन तु—"फलमत उपपत्तेः" (ब्र० ३.२.३८) इति सूत्रेण परमेश्वराराधनरूपतया सर्वं कर्म परमेश्वरप्रधानं तत्तत्कर्माराधितात् परमेश्वरादेव फलं नापूर्वव्यापारात् कर्मण इति स्वमतमुक्त्वा—"धर्मं जैमिनिरत एव" (ब्र० ३.२.४०) इति सूत्रेण कर्मैवापूर्वद्वारा फलदायकमिति जैमिनिमतं पूर्वपक्षं निर्दिश्य—"पूर्वं तु बादरायणो हेतुव्यपदेशात्" (ब्र० ३.२.४१) इति सूत्रेण परमेश्वर एव सर्वकर्मफलदाता, "स एवैनं भूतिं गमयति" (तै०सं० २.१.१.१)इत्यादिकर्मविधिवाक्यशेषेषु वाय्वादिरूपस्य परमेश्वरस्यैव फलहेतुत्वव्यपदेशात्, क्षणविनाशिनः कर्मणः फलजनने द्वाराकाङ्क्षायां वाक्यशेषार्पितां देवताप्रीतिमपहाय द्वारान्तरकल्पनायोगादिति जैमिनिमतप्रतिक्षेपकयुक्तिप्रदर्शनेन स्वमतं निर्धारितम्। एवं परस्परविरुद्धार्थयोः कथमैकशास्त्र्यमुपपद्यते।

उपपद्यतां वा कथञ्चिदैकशास्त्र्यम्, किमत्र तदुपपादनस्य फलम्? नहि तावता ब्रह्मविचारस्य धर्मविचारो नियतसामग्रीरूपतया पूर्ववृत्तो लभ्यते, किन्तु वेदे पूर्वापरभागव्याख्यानतया तयोः पौर्वापर्यनियममात्रं लभ्यते। तावत्यर्थज्ञानपर्यन्तेनाध्ययनविधिना कृत्स्नस्वाध्यायार्थज्ञानार्थतयाऽऽक्षिप्तयोस्तयोरवश्यकर्तव्यकर्मानुष्ठानोपयोगित्वेन प्रथमं धर्मविचारः, तदनन्तरं ब्रह्मविचार इत्येवमपि लभ्यते। वस्तुतस्तु व्याख्येयपौर्वापर्येण विचारशास्त्रयोः

पौर्वापर्यनियममात्रमपि न लभ्यते, लोके काव्यालङ्कारवैद्यकादिष्वैच्छिक-क्रमेण व्याख्यानतदर्थविचारदर्शनात्, आदौ मध्येऽवसाने वाऽभिमतप्रदेशमात्रे तददर्शनाच्च। नन्वध्ययनविध्याक्षिप्ततया वैधयोर्वेदार्थविचारयोः काव्याद्यर्थ-विचारेष्विव नैच्छिकः क्रमः प्रवर्तते, किन्तु पाञ्चमिकप्रमाणलभ्य एव प्रवर्तते। "समिधो यजति" (तै० सं० २.६.१.१), "तनूनपातं यजति" (तै० सं० २.६.१.१) इत्यादिषु हि पाठक्रमोऽनुष्ठानक्रमनियामकतया क्लृप्तः—"क्रमेण वा नियम्येत क्रत्वेकत्वे तद्गुणत्वात्"(जै० ५.१.४) इत्यधिकरणे। तत्र पाठक्रमो न केवलमनुष्ठानक्रममात्रनियामकत्वेनाभिसंहितः, किन्त्वाकाङ्क्षित-सर्वदृष्टप्रयोजनार्थत्वेन। अत एव पाठक्रम एवाध्ययनक्रमेऽपि नियामकतयाऽ-भ्युपगम्यते। एवं कर्मब्रह्मभागयोः पाठक्रम एवाध्ययनक्रमेऽपि नियामक इति पाठक्रमस्तावदनयोः क्रमयोर्लभ्यते। तथा मुख्यप्रवृत्तिक्रमतोऽपि यद्यध्ययने-नार्थज्ञानं भावयेदित्यध्ययनविधिवाक्यार्थमङ्गीकृत्याध्ययनं स्वाध्यायसंस्कार-द्वारा अर्थज्ञानकरणमिष्यते।

यदि वा—"धर्मे प्रमीयमाणे हि वेदेन करणात्मना। इतिकर्तव्यताभागं मीमांसा पूरयिष्यति॥" इति वार्त्तिकोक्तरीत्याऽध्ययनसंस्कृतेन स्वाध्याये-नार्थज्ञानं भावयेदिति तदर्थमङ्गीकृत्य स्वाध्यायस्तत्करणमिष्यते। उभयथापि यथा दर्शे पुरोडाशस्य दध्नश्च मुख्ययागक्रमेण प्रयाजशेषाभिघारणादिक्रमः, तथा क्रमकृताध्ययनरूपस्य क्रमपठितकर्मब्रह्मभागद्वयस्वाध्यायरूपस्य वा मुख्यस्य क्रमेण द्वितीयपक्षे यथा वाजपेये प्राजापत्यानां पशूनामुपाकरण-प्रवृत्तिक्रमेण नियोजनक्रमः, तथाध्ययनप्रवृत्तिक्रमेण च विचारद्वयस्यापि क्रम इति चेत्, स्यादेवम्, अध्ययनविधेरर्थज्ञानपर्यन्तत्वपक्षे विचारयोर्वैधत्वान्न्याय-लभ्यः क्रमादरः। भाष्यकृताग्रे दर्शयिष्यमाणे तस्याक्षरावाप्तिफलकत्वपक्षे रागप्राप्तयोस्तयोः काम्येष्टिपाठक्रमन्यायेन पाठक्रमादीनां क्रमप्रयोजकत्वा-भावादैच्छिक एव क्रमः प्राप्नोति, न त्वेकप्रयोगविधिपरिगृहीतप्रयाजादिन्याय-लभ्यः क्रमः। तस्माद्विचारयोः पौर्वापर्यनियममात्रमपि धर्मविचारस्यावश्यक-कर्मानुष्ठानौपाधिकत्वेनैव समर्थनीयमिति दूरे ततो धर्मविचारस्य ब्रह्मविचा-रापेक्षितत्वेन तन्नियतसामग्रीत्वसिद्धिः।

अथ तत्सिद्धावुपायान्तरमस्ति, तर्हि तदेव प्रदर्शनीयम्, किमैकशास्त्र्योप-पादनव्यसनेनेत्यरुचिं मनसि निधायाह—अथवेति। धर्मविचारस्य ब्रह्म-विचारापेक्षितत्वेऽर्थज्ञानानुष्ठानद्वाराविचारसाध्यस्य धर्मस्य ब्रह्मावबोधहेतुत्वं तावदेको हेतुः। धर्मविचारशास्त्रे धर्मनिर्णयोपयुक्ततया व्युत्पादितानां श्रुत्या-

दीनां तत्र कृतानां वेदप्रामाण्यादिप्रतिपादनानां च ब्रह्मविचारोपयुक्तत्वमपरो हेतुः। अत्र श्रुतिलिङ्गादीनामित्यादिशब्देन श्रुतिलिङ्गवाक्यप्रकरणस्थान-समाख्यानां शेषशेषिभावादिप्रमाणानां श्रुत्यर्थपठनस्थानमुख्यप्रवृत्तिक्रमाणां क्रमप्रमाणानां वचननामधेयचोदनालिङ्गानामतिदेशप्रमाणानामन्येषां चैवं-रूपाणामेषां बलाबलव्यवस्थायाश्च ग्रहणम्। स्मृत्यादीत्यादिशब्देनाचारात्म-तुष्टिप्रमाणयोः श्रुतिस्मृत्याचारतुष्टीनां बलाबलव्यवस्थायाश्च ग्रहणम्। प्रतिपादनादीनामित्यादिशब्देन द्वितीयगतकर्मभेदप्रतिपादनस्य तत्र प्रमाण-भूतानां शब्दान्तराभ्याससंख्यागुणप्रक्रियानामधेयानां व्युत्पादनस्य भेदापवाद-त्वेनाभेदप्रतिपादनस्य च ग्रहणम्। तत्र कर्मभेदप्रतिपादनादीनां गुणोपसंहारपादे विचारणीयेष्वर्थेषूपयोगः। वेदप्रामाण्यादिप्रतिपादनस्य सर्वस्मिन्नपि शास्त्रेऽतिदेशप्रमाणानां "तस्यैतस्य तदेव रूपं यदमुष्य रूपम्" इत्याद्यर्थविचारे-षूपयोगः। क्रमप्रमाणानां वियदादिसृष्टिक्रमविचारेऽर्चिरादिपर्वक्रमविचारे चोपयोगः। श्रुतिलिङ्गादीनां तु सर्वेषां वेदान्तानां ब्रह्मणि प्रामाण्यव्यवस्थापने प्रथमाध्यायकर्तव्येऽध्यायान्तरकर्तव्येष्वपि श्रुत्यर्थविचारेषु सर्वेषूपयोगः।

ननु समन्वयसूत्रे वेदान्तानामुपक्रमोपसंहारादितात्पर्यलिङ्गैर्ब्रह्मणि प्रामाण्यं प्रतिज्ञास्यते। ततश्च तदनन्तरोऽध्यायशेषः प्रपञ्चेन तत्प्रामाण्यं व्यवस्थापयन्नुपक्रमादिभिरेव तद् व्यवस्थापयतीति वक्तव्यम्, अन्यथोपक्रमा-दिभिः प्रामाण्यं प्रतिज्ञाय श्रुतिलिङ्गादिभिस्तत्प्रतिष्ठापने पूर्वापरविरोधा-पत्तेः। अतोऽस्मिन् शास्त्रे उपक्रमादीनि तात्पर्यलिङ्गान्येव ज्ञातव्यानि न श्रुतिलिङ्गानीति चेन्न, उपक्रमाद्युन्मेषार्थमेव श्रुतिलिङ्गाद्यपेक्षणात्। नहि ब्रह्माभिधानश्रुत्यादिकमनुपलभ्यायमुपक्रमो ब्रह्मविषय इत्याद्यवधारयितुं शक्यते। एवं तर्ह्यवश्यापेक्षितैः श्रुतिलिङ्गादिभिरेव वेदान्तानां ब्रह्मणि प्रामाण्यं प्रतिज्ञातव्यं स्यादिति चेन्न, श्रुत्यादिष्वपि प्रकरणस्योपक्रमादि-तात्पर्यलिङ्गाधीनात्मलाभत्वात्। साकाङ्क्षप्रधानवचनं हि प्रकरणम्। बहूनामेकसन्दर्भप्रतिपन्नानामर्थानां मध्ये कस्यचित् प्राधान्यमन्यस्याप्राधान्यं च तात्पर्यलिङ्गसदसद्भावादवसेयम्।

किञ्च, येषु वेदान्तवाक्येषु ब्रह्मतदन्यश्रुतिलिङ्गादिसमावेशः, तेषां खल्व-न्यपरत्वाशङ्कानिराकरणपूर्वकं ब्रह्मणि प्रामाण्यमुपपादनीयम्। तच्चान्य-विषयश्रुतिलिङ्गादिजाताद् ब्रह्मविषयश्रुतिलिङ्गादिकस्य बलवत्त्वेनोप-पादनीयम्। बलवत्त्वं च प्रायस्तात्पर्यलिङ्गैरेवोपपादयिष्यते। अत-स्तात्पर्यलिङ्गान्यत्रापेक्षितान्येव। न चैवमुपक्रमादीनां श्रुतिलिङ्गादीनां च

वेदचोदनार्थवादस्मृत्यादिप्रामाण्यप्रतिपादनादीनां च ब्रह्मविचारोपयुक्तत्वाच्च धर्मविचारानन्तरं ब्रह्मविचारः, साधनं विना साध्यानिष्पत्तेः। ब्रह्मबोधं प्रति धर्मस्य साधनत्वे—"तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन" (बृह० ४.४.२२) इति श्रुतिरेव भगवती

परस्परापेक्षणादन्योन्याश्रयः शङ्कनीयः, उपक्रमादीनां स्वरूपलाभार्थं श्रुतिलिङ्गाद्यपेक्षा श्रुतिलिङ्गादीनामन्यविषयश्रुतिलिङ्गादिभ्यो बलावधारणार्थमुपक्रमाद्यपेक्षेति विषयभेदेन परस्परापेक्षायां धूमवह्न्योरुत्पत्तिज्ञप्तिविषयपरस्परापेक्षायामिवान्योन्याश्रयाप्रसक्तेः, प्रकरणस्य स्वरूपलाभार्थमुपक्रमाद्यपेक्षायामप्युपक्रमादीनां स्वरूपलाभार्थं प्रकरणापेक्षत्वाभावेन तत्रापि परस्पराश्रयाप्रसक्तेश्च। यद्युपक्रमादयः श्रुतिलिङ्गादयश्च परस्परापेक्षा एव ब्रह्मणि वेदान्तानां प्रामाण्यप्रतिष्ठायां हेतवः, कथं तर्हि समन्वयसूत्रे तात्पर्यलिङ्गान्येव तद्धेतुत्वेन प्रदर्शयिष्यन्ते।

उच्यते—अधीतवेदानामधिगतधर्माणां ब्रह्ममीमांसायामधिकार इत्यथशब्देनात्र प्रदर्श्यते। ततश्चाध्ययनबलान्मनसि परिवर्तमानेषु वेदान्तेषु धर्ममीमांसाशास्त्रव्युत्पादितैः श्रुतिलिङ्गादिभिर्ब्रह्मपरत्वस्फुरणं स्वत एव भवतीति न तदर्थमत्र व्युत्पादनीयमस्ति, किन्तु ब्रह्मान्यविषयश्रुतिलिङ्गादिभिस्तत्परत्वस्फुरणमपि कोट्यन्तरत्वेन भवत् श्रुत्यादीनां परदौर्बल्यन्यायेनापि निवर्तयितुमशक्यम्। ब्रह्मविषयश्रुतिलिङ्गादीनामन्यविषयश्रुतिलिङ्गादिभ्यस्तात्पर्यलिङ्गवत्तया बलवत्त्वप्रदर्शनेन निवर्तनीयमिति तत्प्रदर्शनार्थमिदं शास्त्रं प्रवृत्तम्। न च तात्पर्यलिङ्गकृतं श्रुतिलिङ्गादीनां विपरीतं बलाबलं धर्ममीमांसाशास्त्रे चिन्तितम्, किन्तु श्रुतिलिङ्गादिभिस्तत्तदर्थनिर्णयानन्तरं तेषां विरोधे सति परदौर्बल्यं बलाबलाधिकरणे व्युत्पाद्य तदनन्तरं द्वादशोपसत्ताधिकरणमारभ्य तत्र तत्र विरोधसदसद्भावचिन्तामात्रं कृतम्। यथोक्तं द्वादशोपसत्ताधिकरणारम्भवार्त्तिके—"बलाबलविविक्तानां श्रुत्यादीनामतः परम्। विरोधः क्वास्ति नास्तीति विषयः परिशोध्यते॥" इति। तस्मात्तात्पर्यलिङ्गप्रदर्शनेन वेदान्तानां ब्रह्मणि प्रामाण्यप्रतिष्ठापनप्रधानमिदं शास्त्रमिति ज्ञापनायोपक्रमादिकमेव समन्वयसूत्रे संकीर्तितम्। यद्यप्युपक्रमादिस्वरूपं वेदोपक्रमाधिकरणादिषु श्रुत्यादिभ्यो लिङ्गादीनां विपरीतं बलाबल-

प्रमाणम् । न च कर्मणो ब्रह्मबोधसाधनत्वे तदेव विचार्यमनुष्ठेयं च, किमनेन वेदान्तवाक्यविचारप्रयासेनेति वाच्यम्, तस्य फलाभिसन्धिरहितस्य पापापनयनरूपचित्तशुद्धिसम्पादनद्वारा बोधहेतुत्वात् । तथा चाभियुक्तस्मृतिः—"यस्यैते चत्वारिंशत् संस्काराः" (गौ० स्मृ० ८.३) इत्यादिना "स ब्रह्मणः सायुज्यं सालोक्यं च गच्छति" (गौ० स्मृ० ८.४) इत्यन्तेन

मनन्यथासिद्धत्वादिकृतं स्रुवाधिकरणादिषु च किञ्चित्प्रदर्शितम्, तथापि तात्पर्यलिङ्गसद्भावव्यवस्थापनपूर्वकं तत्कृतं श्रुत्यादीनां विपरीतं बलाबलं धर्ममीमांसायां न चिन्तितम् । इह तु तदेव प्रायशश्चिन्त्यते, वेदान्तानां ब्रह्मपरत्वनिर्णये तदुपयोगात् । यथा चैतत् तथा तत्र तत्राधिकरणे स्फुटीकरिष्यामः ।

ननु धर्मस्य ब्रह्मबोधहेतुत्वोक्तिरयुक्ता । मेयसिद्धिर्हि मानाधीना, न तु यज्ञाद्यनुष्ठानाधीना । ततश्च यज्ञाद्यनुष्ठानं विनापि ब्रह्मबोधः प्रमाणप्रवृत्तौ सत्यां स्वयमेव निष्पद्येतेति न तदर्थं धर्मविचारापेक्षेत्याशङ्क्याह—साधनं विनेति । प्रमाणत्वाभिमतस्यापि प्रमेयसिद्धौ साधनत्वं साधनत्वग्राहकप्रमाणाधीनम् । तद्यज्ञाद्यनुष्ठानेऽप्यविशिष्टमिति ब्रह्मबोधे तस्यापि साधनत्वात् तद्विना ब्रह्मबोधस्य निष्पत्तिर्न सम्भवतीत्यर्थः । किं तद्धर्मस्य ब्रह्मबोधे साधनत्वग्राहकं प्रमाणमित्याकाङ्क्षायामाह—धर्मस्येति । तर्हि श्रुतिप्रामाण्यात् तपश्चर्ययेव यज्ञाद्यनुष्ठानेनैव परमेश्वरसन्निधानपूर्वकं तत्त्वदर्शनम्, तत एव मोक्षश्च भविष्यतीति मा भूद् वेदान्तविचार इत्याशङ्क्य निराकरोति—न चेति । तस्येति । स्यादेतदेवं यद्यैहिकामुष्मिकवरदानार्थशिवसन्निधानपूर्वके तद्दर्शने तपश्चर्याया इव मोक्षप्रदानार्थं शिवसन्निधानपूर्वके तद्दर्शने यज्ञाद्यनुष्ठानस्य कारणत्वमुदाहृतश्रुत्योच्येत । न त्वेवम्, किन्तु पापापनयनरूपचित्तशुद्धिद्वारा वेदान्तविचारादिप्रामाण्यसम्पादनेन तद्वेदनहेतुत्वमेव तयोच्यत इत्याशयः ।

उदाहृतश्रुतावप्रतीतद्वारविशेषावगतिः कुत इत्याकाङ्क्षायामाह—तथाभियुक्तेति । यस्यैत इत्यादिका गौतमस्मृतिः । [1]तत्र गर्भाधानपुंसवनसीमन्तोन्नयनजातकर्मनामकरणान्नप्राशनचौलोपनयनानि चत्वारि वेदव्रतानि

१. अष्टमेऽध्याये ।

गर्भाधानादिसकलकर्मणां पापमलापकर्षसंस्कारहेतुतां प्रकाशयति । अथ व्रीहिप्रोक्षणवत् सर्वकर्मणां संस्कारकत्वे—"सर्व एते पुण्यलोका भवन्ति" (छान्दो० २.२३.१) इति श्रुत्युक्ताश्रमफलस्वातन्त्र्यं न स्यादिति चेन्न, पुण्यलोकफलाभिसन्धिपूर्वककर्मणां स्वातन्त्र्येऽपि तदभिसन्धिरहितेन पुंसानुष्ठितकर्मणा चित्तशुद्ध्यादिसंस्कारजनकत्वोपपत्तेः । तथा च तस्य पुंसो

समावर्तनं विवाहः पञ्चमहायज्ञाख्या देवपितृमनुष्यभूतब्रह्मयज्ञाः, अष्टकापार्वणश्राद्धश्रावण्याग्रहायणीचैत्र्याश्वयुजीति सप्त पाकयज्ञाः, अग्न्याधेयमग्निहोत्रं दर्शपूर्णमासावाग्रयणं चातुर्मास्यानि निरूढपशुबन्धः सौत्रामणीति सप्त हविर्यज्ञाः, अग्निष्टोमोऽत्यग्निष्टोम उक्थ्यः षोडशी वाजपेयोऽतिरात्रोऽप्तोर्याम इति सप्त सोमसंस्था इत्येवं चत्वारिंशतं कर्माण्यनुक्रम्य तेषु संस्कारशब्दः प्रयुक्तः । तेनैतेषां कर्मणां व्रीहिप्रोक्षणादिवत् कार्यान्तरोपयुक्तकिञ्चिद्द्रव्यगतातिशयाधानार्थतावसीयते । तत्किमतिशयवद्द्रव्यसाध्यं कार्यम्, किञ्च तदतिशयवद्द्रव्यम्, कश्च तत्रातिशय इत्याकाङ्क्षायां "स ब्रह्मणः सायुज्यं सालोक्यं च गच्छति"(गौ० स्मृ० ८.४)इत्युपसंहारवाक्येन मोक्षः कार्यत्वेनावसीयते । तत एव शिवसाक्षात्कारैकसाध्येमोक्षे द्रव्यस्यसाक्षाज्जनकत्वाभावेन साक्षात्कारजनकं चित्तमेव साक्षात्कारद्वारा तदुपयोगि द्रव्यं तदैकाग्र्यप्रतिबन्धनिवृत्तेरपेक्षितत्वात् तद्गतपापापनयनमेव परिगणितकर्मजन्यो मलापकर्षरूपोऽतिशय इत्यवसीयते, "धर्मेण पापमपनुदति" (महाना० २२.१), "ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यते निष्कलं ध्यायमानः" (मुण्डको० ३.१.८) इत्यादिश्रुतिसंवादात् । ततश्चोदाहृतश्रुतौ स्मृत्यनुसारेण द्वारविशेषावगतिरित्याशयः ।

ननु यज्ञादीनां प्रोक्षणादिवद्गुणकर्मत्वेऽर्थकर्मत्वं न स्यात्, तथा च द्रव्योपसर्जनत्वं न स्यात्, तथा च द्रव्योपसर्जनत्वं विना स्वातन्त्र्येण पुण्यलोकप्राप्तिफलकत्वं श्रूयमाणं विरुध्येतेत्याशङ्कते—अथेति । दृष्टादृष्टोभयार्थाङ्गानां स्विष्टकृदादीनां त्यागांशेनार्थकर्मत्वमग्न्याद्युद्देशेन त्यक्तस्य पुरोडाशादिद्रव्यस्य प्रक्षेपांशेन प्रतिपत्तिरूपतया गुणकर्मत्वं च दृष्टम् । तथेह यज्ञादीनामभिसन्धिविशेषप्रवृत्तप्रयोगभेदेनार्थकर्मत्वगुणकर्मत्वयोर्नास्ति विरोध इत्याशयेन परिहरति—नेति । ननु—"विद्यां चाविद्यां च"(ई०उ० ११) इत्यादिश्रुतिदर्शनात्

यदेव ज्ञानफलं तदेव कर्मफलं च । यथा व्रीहिप्रोक्षणं दर्शपूर्णमासोत्पत्त्यपूर्वहेतुतया स्वर्गे समुच्चीयते, तथा कर्माणि ज्ञानप्रयोजकतया मोक्षे समुच्चीयन्ते । अतो गुणकर्मत्वादङ्गत्वमेतेषाम् । ननु नित्यविधिप्राप्तस्य ज्योतिष्टोमादेरितिकर्तव्यतात्वविरोधान्न संस्कारकतासिद्धिरिति चेन्न, कारणतया

कर्मणामपि ज्ञानवत् साक्षान्मोक्षफलत्वेनार्थकर्मत्वमेवाङ्गीकर्तुं युक्तमिति ज्ञानकर्मसमुच्चयवादिशङ्कां समुच्चयश्रुतीनां कर्मसमुच्चयरूपविषयप्रदर्शनेन निराकरोति—तथा चेति । ननु गुणकर्मत्वस्वीकारे यज्ञादीनामङ्गत्वं स्यात्, गुणकर्मणामङ्गत्वनियमात्, आधानादीनामप्यग्न्यादीन् प्रत्यङ्गत्वेन तदव्यभिचारादित्याशङ्क्य इष्टापत्त्या परिहरति—अत इति ।

ननु गुणकर्मत्वेनाङ्गत्वे पुण्यलोकसाधनत्वेन प्राधान्यं न सम्भवति, स्विष्टकृदादिष्वङ्गेषु गुणकर्मत्वार्थकर्मत्वयोरिवाङ्गत्वस्य फलसाधनत्वरूपप्रधानत्वस्य च क्वचिदप्येकस्मिन् कर्मणि समावेशादर्शनात्, स्वर्गसाधनतया प्रधानस्य कुण्डपायिनामयनमध्यगततया तदङ्गस्य चाग्निहोत्रस्य प्रकरणभेदेन भेदादित्याशयेन शङ्कते—नन्विति । फलसाधनत्वस्याङ्गत्वे न तावद्वस्तुविरोधः, फलसाधनत्वस्य फलाङ्गत्वरूपत्वात्, अन्याङ्गस्याप्यन्यशब्दोक्तफलसाधनरूपत्वात्, एकस्य कर्मणः प्रयोगभेदेनानेकफलसाधनत्वस्य योगसिद्ध्यधिकरणादिसिद्धत्वात् । नापि शब्दविरोधः, विनियोजकविधिभेदसत्त्वात् । अथाप्यन्यत्रादर्शनेन यदि विरोध आपाद्यते, तत्राह—कारणतयेति । "यथा यजेत् सौत्रामण्याऽपत्नीकोऽप्यसोमपः", "मातापितृभ्यामृणार्थाद् यजेत" इति वचनात् "ब्रह्मवर्चसकामो बृहस्पतिसवेन यजेत" इत्यादिभिः श्रुतिभिः स्वातन्त्र्येण फलकारणतया विहितस्यापि सौत्रामणिबृहस्पतिसवादेः—"अग्निं चित्वा सौत्रामण्या यजेत", "वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेत" (आप०श्रौ० १८.७.१७), "तेनेष्ट्वा राजा राजसूयेन यजेत" (आप० श्रौ० १८.८.१-४) इत्यादिवचनैरग्निचयनवाजपेयाङ्गत्वेनापि विधानं दृश्यत इत्यर्थः ।

ननु फलार्थात् सौत्रामणिबृहस्पतिसवादेरङ्गभूतं तत्सौत्रामणिबृहस्पतिसवाधिकं कौण्डपायिनामयनाग्निहोत्रं न्यायेन प्रकरणभेदाद् भिन्नमिति चेत्, उच्यते—"उपसद्भिश्चरित्वा मासमग्निहोत्रं जुहोति" (ता० ब्रा० २५.४.१) इति वाक्ये "अग्निहोत्रं जुहोति" इति वाक्यसन्निधिपठिते "दध्ना जुहोति" इति वाक्य इव न जुहोतिपदश्रवणमात्रेण नित्याग्निहोत्रप्रत्यभिज्ञा भवति,

स्वतन्त्रविध्यन्तरविहितस्य सौत्रामणिबृहस्पतिसवादेरग्निचयनवाजपेयाद्यङ्गत्ववदुभयविधिबलादुभयसिद्धेः। अतो यावदुत्पद्यते ज्ञानं तावदनुष्ठेयानि कर्माणि।

प्रकरणान्तरत्वात्। अग्निहोत्रनाम्ना तत्प्रत्यभिज्ञानेन तत्रैव जुहोतिपदस्य वर्तनमित्यपि न घटते, विहितस्य तस्य पुनर्विधानानपेक्षणात्। मासगुणविधानार्थं तदनुवाद इत्यपि न युज्यते, तस्मिन्नुपसदानन्तर्यगुणस्यापि विधेयत्वेनानेकगुणविधानरूपवाक्यभेदापत्तेः। तस्मान्नामप्रत्यभिज्ञापिते कर्मण्याख्यातं वर्तत इत्येवं न नामपरतन्त्रमाख्यातम्, किन्त्वाख्यातेन विधीयमाने नित्याग्निहोत्राद् भिन्ने कर्मणि नाम वर्तत इति नामैवाख्यातपरतन्त्रम्। अतस्तत्र नाम्ना प्रत्यभिज्ञानमकिञ्चित्करमिति युज्यते कर्मभेदः। सौत्रामण्यादिवाक्येषु तु यजतिपदेन प्रत्यभिज्ञाभावेऽपि सौत्रामण्यादिनामतः प्रत्यभिज्ञाने जाग्रति तदुपेक्षणे किं कारणम्? शक्यते ह्यत्र प्रसिद्धसौत्रामण्याद्यनुवादेनाग्निचयनादिकं प्रत्यङ्गत्वमात्रविधानम्।

नन्वत्राप्येकस्मिन्नेव वाक्ये नाम्ना दूरस्थस्य प्रत्यभिज्ञापनं तस्याङ्गत्वेन विधानं चेति व्यापारद्वयावेशाद् वाक्यभेदः स्यादिति चेन्न, प्रत्यभिज्ञापनस्य पदार्थस्मृतिवत् पदमात्रकृत्यतया तत्प्रसङ्गानवतारात्। अन्यथा गृहमेधीयप्रकरणवर्तिनि—"आज्यभागौ यजति" (मै. सं. १.१०.१५) इति वाक्येऽप्याज्यभागनाम्ना दार्शपूर्णमासिकावाज्यभागौ प्रत्यभिज्ञाप्य तयोर्गृहमेधीयाङ्गत्वेन विधाने वाक्यभेदः स्यादिति तत्रापि प्रसिद्धाज्यभागधर्मकर्मान्तरविध्यङ्गीकारप्रसङ्गात्। न च वाच्यं गृहमेधीये चोदकादाज्यभागयोर्विपरिवृत्तेस्तत्प्रत्यभिज्ञापनार्थं न वाक्यव्यापारापेक्षेति, तत्र चोदककल्पनात् प्रागेवोपदिष्टयोराज्यभागयोरन्वये सति क्लृप्तोपकारप्राकृताङ्गनिराकाङ्क्षस्य गृहमेधीयप्रयोगविधेश्चोदकेनाङ्गप्राप्त्यनपेक्षितया चोदकलोपादपूर्वो गृहमेधीयो न तु दर्शपूर्णमासप्रकृतिक इति गृहमेधीयाधिकरणे सिद्धान्तितत्वात्। तस्माद् युक्तं स्वतन्त्रस्यैव सौत्रामण्यादेर्विनियोगभेदेनाङ्गत्वमपीति भावः।

यत्तु पूर्वमीमांसकैः—"समवाये चोदनासंयोगस्यार्थवत्त्वात्" (जै० ४.३.२९) इति चतुर्थाध्यायाधिकरणे मासाग्निहोत्रवत् तस्य कर्मान्तरत्वमुक्तम्, तत्—"दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेत" इत्यत्र इष्टिसोमयोरिव "अग्निं चित्वा" इत्यादावपि स्वतन्त्रयोरेव कालार्थः संयोगः, न त्वङ्गाङ्गि-

ननु—"विविदिषन्ति" (बृह. ४.४.२२) इति श्रवणात् कर्मणां ज्ञानेच्छासमुदयपर्यन्तमनुष्ठानमिति चेत्, न सारमेतत्, इच्छाया अपुरुषार्थत्वात् ।

भाव इति पूर्वपक्ष्याशङ्काया निरवकाशीकरणार्थं प्रौढिवादमात्रम् । अत एव गुरुणा विवरणे स्वतन्त्रस्यैव सौत्रामण्यादेरग्निचयनादिकं प्रत्यङ्गत्वमुक्तमित्यलं विस्तरेण ।

एवं च संस्कारस्मृतिबलाच्चित्तसंस्कारत्वेनावगतानामपि कर्मणामाधानस्याग्निसंस्कार इव तावन्मात्रे विश्रान्त्यभावात् तद्द्वारा ज्ञानसाधनत्वस्य यज्ञादिश्रुत्याऽवगतेर्यावज्ज्ञानोदयमनुष्ठेयानि तदर्थानि कर्माणि, न तु विविदिषोदयरूपप्रत्ययप्रावण्येन चित्तशुद्ध्यवगमे सति त्यक्तव्यानीत्याशयेनाह—अत इति । यज्ञादिश्रुत्या ज्ञानफलसंयुक्तानां कर्मणां संस्कारस्मृतिस्तज्जन्यत्वेन क्लृप्तं चित्तगतपापमलापकर्षद्वारं दर्शयति, तस्यास्तावन्मात्रविषयत्वोपपत्तौ पृथक् चित्तशुद्ध्यर्थकर्मविधायकश्रुत्यन्तरानुमापकत्वकल्पनायोगात् । अतो यावज्ज्ञानमनुष्ठेयानि तानि कर्माणि । न च तथापि व्रीहिगततुषविमोकद्वारा क्रत्वपूर्वसंयुक्तस्याप्यवहननस्य यथा यावत्तुषविमोकमेवानुष्ठानम्, न तु यावत्क्रत्वपूर्वोदयम्, तथा कर्मणां द्वारभूतचित्तशुद्ध्युदयपर्यन्तमेवानुष्ठानं स्यादिति वाच्यम्, निर्मुक्ततुषेषु व्रीहिषु पुनस्तुषाणामिव चित्ते शुद्धे पुनर्ज्ञानोदयप्रतिबन्धकदुरितानां प्रसक्त्यभावेन शुद्धचित्तस्य ज्ञानार्थं श्रवणादिषु प्रयतमानस्यापि यावज्ज्ञानोदय सम्भावितततत्प्रतिबन्धकदुरितनिवृत्तेरपेक्षितत्वात् । एवं च संस्कारस्मृतिबलात् कर्मणां चित्तशुद्धिमात्रार्थत्वाभ्युपगमेऽपि यावज्ज्ञानोदयं तदपेक्षितचित्तशुद्ध्यनुवृत्तये तदर्थकर्मानुष्ठानापेक्षा भवत्येवेति भावः ।

ननु यज्ञादिश्रुतिः कर्मणां विविदिषार्थत्वमाह, अतस्तदनुवर्तनेऽपि विविदिषोदयपर्यन्तमेव कर्मानुष्ठानं स्यात् । संस्कारस्मृत्यवगतचित्तशुद्धिद्वारस्यापि विविदिषोत्पत्तिप्रतिबन्धकदुरितनिवृत्तिरूपत्वपर्यवसानादित्यभिप्रेत्य शङ्कते—नन्विति । अपुरुषार्थत्वादिति । पुरुषेणार्थनीयत्वासम्भवादित्यर्थः । स्वतः पुरुषार्थत्वरहिताया इच्छायास्तत्फलेच्छयार्थनीयत्वं वक्तव्यम् । न तु तत्सम्भवति, श्रवणादिप्रवृत्तिद्वारा विविदिषाफलभूतायां विद्यायामिच्छासत्त्वे विविदिषायाः सिद्धत्वात् । तदसत्त्वे फलेच्छाविरहादिति भावः । कथं तर्हि बुभुक्षाप्रतिबन्धकधातुवैषम्यतन्मूलदुरितनिवृत्तिद्वारा

अतः कर्मणां ब्रह्मबोधसाधनानां विचारस्यानन्तरं ब्रह्मबोध-

तत्सिद्ध्यर्थानि वैद्यककर्मविपाकशास्त्रोक्तान्यनुष्ठीयन्ते, न भोजनेच्छासिद्ध्यर्थानि तानि, तामन्तरेण भोजनसिद्ध्यर्थयत्नासम्भवात्। किन्तु भोजने सत्येव देहस्थितबलपुष्ट्यादिकं भवेदिति तदर्थतया सत्यामपि भोजनेच्छायां धातुवैषम्यकृतरोगविशेषेण भोजनप्रवृत्तिः प्रतिबध्येत इति प्रतिबन्धकनिवारणार्थानि। यथा यागे कृते स्वर्गो भवेदिति स्वर्गार्थतया यागेच्छायां सत्यामप्यायाससाध्यानुसन्धानप्रयुक्तेनालस्येन यागप्रवृत्तिः प्रतिबध्यत इति प्रतिबन्धकनिरासार्थान्यर्थवादश्रवणानि। कथमेवं सत्यौषधसेवादितः पूर्वं बुभुक्षैव नासीत्, इदानीं तु बुभुक्षा जायत इति व्यवहार उपपद्यते। पूर्वं भोजनाभावे देहस्थित्यादिकं न भवेदिति केवलं तदर्थतयैव भोजनेच्छा। औषधसेवाद्यनन्तरं रोगनिवृत्त्या जाठराग्निप्राबल्यादिसद्भावात् क्षुद्रूपं दुःखमसह्यं ज्ञायत इति तन्निवृत्त्यर्थतयापि भोजनेच्छेत्येतावता तथा व्यवहारः।

यद्वाऽपुरुषार्थत्वादित्यस्य विविदिषायाः पुरुषार्थत्वेन पुरुषेच्छाविषयत्वेन विविदिषन्तीति शब्दतः प्रतीत्यभावादित्यर्थः। यत्तु खल्विच्छाविषयत्वेन फलवाक्येषु निबद्धं तदेव कर्मणां फलत्वेनान्वेति, लिङादिभिर्विधिशब्दैः कर्मणामिष्टसाधनत्वे प्रतीते तत्कर्मसाध्यमिष्टं किमितीष्टविशेषाकाङ्क्षायां यदिच्छाविषयत्वेन निबद्धं विशिष्योपात्तं च तस्यैव तथात्वेनान्वेतुमुचितत्वात्। अत एव स्वर्गकामादिवाक्येषु स्वर्गादिकमेव फलम्। अत एव च "प्रतितिष्ठन्ति ह वा एते य एता रात्रीरुपयन्ति" इत्यार्थवादिकफलान्वयस्थले प्रतिष्ठादीनां फलत्वप्रतीतये सनर्थाध्याहारोऽभ्युपेयते। तत्र हि ये प्रतितिष्ठासन्ति त एता रात्रीरुपेयुरिति यत्तदोर्व्यत्यासेन सनर्थाध्याहारेण पूर्वमीमांसकैर्वाक्यार्थो दर्शितः। इह त्विच्छाविषयत्वेन प्रतीताया विद्यायाः फलत्वोपपत्तेर्यज्ञेन विविदिषन्तीत्येतत्समानाकारे—'अश्वेन जिगमिषति', 'असिना जिघांसति' इत्यादिलौकिकवाक्ये सन्प्रत्ययवाच्येच्छाविषयस्यैव फलत्वेनान्वयदृष्टेश्च नेच्छायाः फलत्वप्रतीत्यर्थं तद्विषयेच्छार्थोऽध्याहर्तव्य इत्याशयः। तस्मात् कर्मणां यावज्ज्ञानोदयमनुष्ठेयत्वात् प्रथमं धर्मविचारस्तदनन्तरं ब्रह्मविचार इति युक्तमित्याह—अत इति।

नन्वयमुक्तः क्रमनियमो नोपपद्यते। एककर्तृकाणां हि बहूनां कर्मणामेकेन कर्त्रा युगपदनुष्ठातुमशक्यानामनुष्ठानार्थं क्रमापेक्षायां सत्यां श्रुत्यर्थादिभिः

कशास्त्रारम्भः समुचितः । ननु कर्मब्रह्मविचारयोः क्रमनियमः कथमुपपद्यते ? कर्त्रैक्यादिति चेन्न, कर्त्रैक्यमिहाघारदर्शपूर्णमासवदङ्गाङ्गित्वेन वा पञ्चप्रयाजवदेकाङ्गिप्रयुक्तानेकाङ्गत्वेन

क्रमविशेषो नियम्येत । नात्र विचारयोः कर्त्रैक्यमस्ति, तत्प्रयोजकानामङ्गाङ्गिभावादीनामभावात् । किन्तु यागस्वर्गवत् कर्मज्ञानयोर्यज्ञादिश्रुत्यवगतं करणफलभावमात्रमस्ति चित्तशुद्धिद्वारकम् । ततश्च जन्मान्तरानुष्ठितकर्मभिः शुद्धचित्तस्य विरक्तस्य मुमुक्षोर्विचारे प्रवृत्तिः कर्मानुष्ठानापेक्षा न भवत्येव । नहि द्वारसिद्धौ सत्यामपि फलसंयुक्तं कर्म यावत्फलोदयमनुष्ठेयम्, क्रत्वपूर्वसंयुक्तस्याप्यवहननस्य यावत्तुषविमोकरूपद्वारसिद्धिपर्यन्तमेवानुष्ठानादित्याशयेनाक्षिपति—नन्विति । ननु फलकरणभावेऽपि कर्त्रैक्यमस्ति, येन चित्तशुद्ध्यर्थकर्मानुष्ठानार्थं धर्मविचारः कृतस्तेनैव पुरुषेणोपासनारूपज्ञानलाभार्थं ब्रह्मविचारस्यापि कर्तव्यत्वादिति शङ्कते—कर्त्रैक्यादिति । "उत्तरां देवयज्यामाशास्ते" इत्यादिमन्त्रवर्णावगतफलकरणकर्मयोरिव ज्ञानकर्मणोः कर्तृत्वाधिष्ठानपुरुषैक्यमात्रं न कर्तृकारकैक्यम्, तत्प्रयोजकरूपाभावात् । प्रयोगाङ्गकर्त्रैक्यं हि प्रयोगैक्ये सति तदन्तर्गतपदार्थानां भवति । एकप्रयोगान्तर्गतिश्चाङ्गप्रधानत्वेन वा एकप्रधानसिद्ध्यर्थानेकाङ्गत्वेन वा अधिकृताधिकारेण वा एकफलसाधनत्वेन वानुष्ठेयानां भवति । न चैषामन्यतममिह रूपं श्रुत्यादिप्रमाणैर्लभ्यते । अतो न युक्तोऽयं क्रमनियम इति परिहरति—न कर्त्रैक्यमिति ।

ननु क्रमाकाङ्क्षाजनककर्त्रैक्यप्रयोजकैकप्रयोगान्तर्गतिरङ्गाङ्गित्वादिनैवैकफलसाधनानेकप्रधानान्वय्यनेकाङ्गत्वेन प्रधानतदङ्गाङ्गत्वेन च भवति । अत एव "मुख्यक्रमेण वाङ्गानां तदर्थत्वात्" (जै० ५.१.१४.६) इत्यधिकरणे दार्शिकयोः पुरोडाशसान्नाय्ययोः प्रयाजशेषाभिघारणे क्रमश्चिन्तितः । "प्रकृत्या कृतकालानाम्" (जै० ५.१.२५) इत्यधिकरणे सोमाङ्गभूतसवनीयेष्ट्यङ्गानां प्रोक्षणादीनां साक्षात् सोमाङ्गानां प्रचरणीहोमादीनां च क्रमश्चिन्तितः । सत्यम् । तयोरत्युपलक्षणमङ्गाङ्गित्वाद्युपन्यासः । यद्वा एकाङ्गिप्रयुक्तानेकाङ्गत्वेन वेत्यनेनैव तयोरपि संग्रहः । तत्रैकशब्देनैकफलसाधनत्वं विवक्षितमित्याद्योदाहरणसंग्रहः । अङ्गाङ्गानामप्यङ्गिप्रयुक्तत्वमस्तीति द्वितीयोदाहरणसंग्रहः । अङ्गिप्रयुक्तत्वमिह साक्षात्परम्परया वा प्रधानभूतयागादिगतफलसाधनत्वरूपापादनात्मकं तदनुग्राहकत्वं विवक्षितम् । अतोऽपूर्वप्रयुक्ता धर्मा न यजिप्रयुक्ता इति सप्तमाद्ये व्यवस्थापितत्वा-

वा गोदोहनादिवदधिकारान्तरप्रयुक्त्युपजीवित्वेन वा षड्याग-

दसम्भवः । अङ्गिशब्देन प्रधानजन्यापूर्वविवक्षायामाग्नेयादियागाङ्गस्य व्रीह्यादेरङ्गमवहननादिकमाग्नेयाद्यपूर्वप्रयुक्तमिति तत्संग्रहेऽपि—"यावत्या वाचा कामयेत तावत्या दीक्षणीयायामनुब्रूयात्, मन्द्रं प्रायणीयायाम्, मन्द्रतरमातिथ्यायाम्" इत्यादिना विहितं दीक्षणीयावाङ्नियमादिकं दीक्षणीयाद्यवान्तरापूर्वप्रयुक्तं न सोमापूर्वप्रयुक्तमिति नवमे व्यवस्थापितत्वात् तदसंग्रह इति शङ्काया नावकाशः ।

नन्वङ्गाङ्गित्वं न प्रयोगैक्येन कर्त्रैक्ये प्रयोजकम्, वैमृधपौर्णमास्योरसत्यप्यङ्गाङ्गित्वे प्रयोगभेदेन कर्तृभेदात् । अत एव द्वितीयमपि न प्रयोजकम्, वैमृधस्य पौर्णमासिकप्रयाजानां च वैमृधस्य सान्नाय्ययागाङ्गानां च वैमृधस्य पौर्णमासिकप्रयाजाङ्गाङ्गिक्रमणादीनां च सत्यप्येकाङ्गिप्रयुक्तानेकाङ्गत्वे प्रयोगभेदेन कर्तृभेदात् । तृतीयमपि न प्रयोजकम्, इष्टिसोमयोः प्रयोगभेदेन कर्तृभेदात् । यथा हि दार्शपौर्णमासिकमपां प्रणयनमाश्रित्य "गोदोहनेन पशुकामस्य" (आप० श्रौ० १.१६.३) इति पशुफलाय विधीयमानं गोदोहनं जीवनस्वर्गकामनारूपाधिकारान्तरेण दर्शपूर्णमासप्रयुक्तिमुपजीवति, दर्शपूर्णमासानुष्ठानाभावे तदीयस्यापां प्रणयनस्याश्रयस्याभावेन प्रणीयमानानामपामाधारतया चमसस्थाने गोदोहननिवेशनासम्भवात् । तथा सोमोऽपि तत्प्रयुक्तिमुपजीवति, "दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेत" इति दर्शपूर्णमासानन्तरकर्तव्यता विहितस्य सोमयागस्य तदनुष्ठानाभावेऽनुष्ठानासम्भवात् । चतुर्थमपि न प्रयोजकम्, दर्शत्रिकपौर्णमासीत्रिकयोश्चातुर्मास्यपर्वणां राजसूयान्तर्गतेष्टिपशुसोमानां च सत्यप्येकफलसाधनत्वे प्रयोगभेदेन कर्तृभेदात्, इति चेदुच्यते—अङ्गाङ्गित्वाद्यन्यतमरूपसद्भाव एव कर्त्रैक्यं भवति नान्यथेत्येतावन्मङ्गाङ्गित्वादीनामिह कर्त्रैक्यप्रयोजकत्वं विवक्षितम्, अङ्गाङ्गित्वाद्यन्यतमरूपाभावेन विचारयोः कर्त्रैक्याभावोपपादने तस्यैवोपयोगात् । तादृशं तु प्रयोजकत्वमङ्गाङ्गित्वादावस्त्येव । यत्तु नास्त्यङ्गाङ्गित्वादावसति कर्त्रैक्यं भवत्येवेत्येवंरूपं प्रयोजकत्वं तदिह न विवक्षितम्, अनुपयोगात् । अतो नोक्तदोषावकाशः ।

नन्वङ्गाङ्गित्वाद्यन्यतमरूपसत्त्व एव कर्त्रैक्यं भवतीति । सत्यम् । इहापि तदन्यतमरूपमस्ति । उक्तं हि प्राक् कर्मज्ञानयोरङ्गाङ्गितया मोक्षोपयोगित्वं यथा व्रीहिप्रोक्षणमित्यादिभाष्येण । तथा च कर्मब्रह्म-

वत् फलैक्येन वा भवति । तथात्वे विचारयोः श्रुत्यादिप्रमाणं नोपलभ्यते । ततः कर्मब्रह्मविचारयोः क्रमनियमो न युक्त इति । यदि श्रुत्यादिप्रमाणं न सम्भवति, तदा खलु तथा स्यात् "विद्यां चाविद्यां च यस्तद्वेदोभयं सह" (ई०उ० ११), "तेनैति ब्रह्मवित्पुण्यकृच्च" (बृह० ४.४.९), "सत्येन लभ्यस्तपसा ह्येष आत्मा सम्यग्ज्ञानेन ब्रह्मचर्येण नित्यम्" (मुण्डको० ३.१.५) इत्यादिका ज्ञानकर्मसमुच्चयवादिनी श्रुतिरुपलभ्यते । ततः कर्मज्ञानयोर्मोक्षैकफलत्वात् तद्विचारयो-

---

ज्ञानसिद्ध्यर्थयोः कर्मब्रह्मविचारयोरपि प्रधानतदङ्गाङ्गित्वरूपमेकाङ्गि-प्रयुक्तानेकाङ्गत्वेन वेत्यनेन संगृहीतं कर्त्रैक्यप्रयोजकमस्तीत्याशङ्क्याह—तथात्व इति । कर्मज्ञानयोरङ्गाङ्गित्वेऽपि न विचारयोरङ्गाङ्गित्वाद्यन्यतम-रूपसत्त्वे प्रमाणमस्ति, अध्ययनविधेरर्थज्ञानफलकत्वपक्षे प्राग्दर्शिते विचा-रयोरध्ययनाङ्गत्वेन तस्याक्षरावाप्तिफलकत्वपक्षे प्रदर्शयिष्यमाणे तयोः स्वतन्त्रत्वेन च कर्मज्ञानाङ्गत्वाभावादिति भावः । आक्षेपमुपसंहरति—तत इति । समाधत्ते—यदीति ।

ननु विचारयोः क्रमाकाङ्क्षाजनककर्त्रैक्यप्रयोजके अङ्गाङ्गित्वादौ प्रमाणं नास्तीत्याक्षेपसमाधानार्थं तत्र प्रमाणास्तित्वं प्रतिज्ञाय ज्ञानकर्मणोः समुच्चये प्रमाणमुपन्यस्यते। कथमेतत् सङ्गच्छते, कथं च ज्ञानकर्मसमुच्चयोप-पादनं कृताक्षेपसमाधानाय कल्पते । प्रागपि व्रीहिप्रोक्षणदर्शपूर्णमासन्यायेन तयोः समुच्चयो दर्शितः । स तु जन्मान्तरानुष्ठितचित्तशुद्ध्यर्थकर्माश्रयतयापि सङ्गच्छत इति ज्ञानानुष्ठानात् पूर्वं ब्रह्मविचारवद्धर्मविचारस्य नियतकर्तव्य-त्वाभावात् तयोः क्रमनियमो न युक्त इत्याक्षिप्ते सति प्राक् समर्थित एव ज्ञानकर्मसमुच्चये पुनरपि प्रमाणोपन्यासेन किं लभ्यत इति शङ्कानिराकर-णार्थमाह—ततः कर्मज्ञानयोरिति ।

अयमाशयः—प्राग्विविदिषन्तिवाक्यलब्धो जन्मान्तरानुष्ठितकर्मसाधारणः चित्तशुद्धिविविदिषावेदान्तशुश्रूषासद्गुरुलाभः श्रवणमननसम्पादनद्वारोपा-सनारूपज्ञानानुष्ठाने प्रवर्तकस्तस्य क्रमसमुच्चयो दर्शितः । इह तु ज्ञानानुष्ठा-नकाल एवानुष्ठेयैः कर्मभिस्तस्य समुच्चये श्रुतिरुपन्यस्यते । विद्यां चेति मन्त्रे हि सहश्रुतिः कर्मज्ञानवेदनयोर्यौगपद्यं प्रतिपादयन्ती ज्ञानानुष्ठानकाले

कर्मानुष्ठानं बोधयति, "अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते" (ई० उ० ११) इति तदुत्तरार्धं च तदुपयोगं ब्रवीति। प्राचीनकर्मभिरुपासनानुष्ठानप्रवृत्तिप्रतिबन्धकदुरितनिवृत्तावपि तत्र प्रवृत्तस्याप्रायणमहरहरनुवर्तनीयायामुत्तरोत्तरं विशदीकरणीयायां च तस्यां तदनुवृत्तौ तद्विशदीकरणे च प्रतिबन्धकतया स्थितं तत्काल एव प्रामादिकतया जातं वा दुरितजातं सम्भवति। तत्सर्वमुपासनाकालानुष्ठितेन कर्मजातेन तीर्त्वा ततो निर्विघ्नमविच्छिन्नानुवृत्तया प्रतिदिनोपचीयमानया विद्यया मुक्तिं प्राप्नोतीति तस्यार्थः। समनन्तरोदाहृतमन्त्रयोरप्युक्तरूप एव ज्ञानकर्मसमुच्चये तात्पर्यम्। इदं विद्यानुष्ठानप्रवृत्तिप्रतिबन्धकतया समारब्धविद्यस्य विद्यानुष्ठानानुवृत्त्यादिप्रतिबन्धकदुरितनिवर्तकतया च विद्योपकारककर्मद्वैविध्यम्—"विहितत्वाच्चाश्रमकर्मापि" (ब्र० ३.४.३२) इति तृतीयाध्यायाधिकरणे भाष्य एव स्पष्टीभविष्यति। एवं चाद्यप्रकारकर्मणां जन्मान्तरीयसाधारणत्वेऽपि द्वितीयप्रकारकर्मणां विद्यानुष्ठानदिवसेष्वनुष्ठेयत्वात् तदर्थं धर्मब्रह्मविचारयोः कर्तव्ययोर्विद्यानुष्ठानारम्भात् प्रागपि श्रवणादिकालेष्ववश्यानुष्ठेयानां कर्मणामनुष्ठानसिद्धये धर्मविचारप्राथम्यमर्थादापततीति विचारयोः क्रमनियमसिद्ध्युपयोगित्वाद् विद्यानुष्ठानकालानुष्ठेयकर्मसमुच्चये प्रमाणप्रदर्शनं कृताक्षेपसमाधानाय कल्पत एवेति।

ननु न तेन विचारयोः कर्त्रैक्यसिद्धिरस्ति, ततः प्रयोगैक्यासिद्धिरिति चेन्मा भूत्। विनापि कर्त्रैक्यं क्रमनियमसिद्धौ किं तेन। ननु कर्त्रैक्यसिद्धावेवैकेन कर्त्रानेककर्मणां युगपदनुष्ठातुमशक्यत्वेन क्रमाकाङ्क्षायां क्रमविशेषनियामकानि प्रवर्तन्ते। नायं नियमः। प्रयोगभेदेन कर्तृत्वाकारभेदेऽपि कर्तृत्वाधिष्ठानपुरुषैक्ये सत्येकस्मिन् पुरुषे भिन्नप्रयोगतयापि युगपदुपनिपतितयोः कर्मणोः क्रमापेक्षा भवत्येव। कर्तृत्वाकारैक्येऽपि हि क्रमाकाङ्क्षायां तदधिष्ठानपुरुषैक्यमेव प्रयोजकम्। साङ्गप्रधानकर्तुर्यजमानस्यैकत्वेऽपि याजमानातिरिक्तेषु पदार्थेषु साक्षात्कर्तॄणामध्वर्य्वादीनां सत्त्वेन तत्रानेकपुरुषद्वारकानेकपदार्थकर्तृत्वस्य युगपद्दर्शनात्। पूर्वतन्त्रेऽपि—"सान्तपनीया तूत्कर्षेदग्निहोत्रं सवनवद् वैगुण्यात्" (जै० ५.१.३०) इत्यधिकरणे चातुर्मास्येषु साकमेधे पर्वणि—"मरुद्भ्यः सान्तपनेभ्यो मध्यन्दिने चरुम्" (मै०सं०१.१०.१) इति विहितायाः सान्तपनीयाया दैवमानुष्यप्रतिबन्धवशेन सायङ्कालेऽप्यनुवृत्तौ युगपदुपनिपतितयोरग्निहोत्रसान्तपनीयाशेषयोः प्रयोगभेदेन भिन्नकर्तृकयोरपि क्रमश्चिन्तितः। नन्वेवमुक्तरीत्या सहानुष्ठेयत्वेन ज्ञानकर्मसमुच्चये श्रुत्युपन्या-

५

सस्य विचारयोरर्थात् क्रमनियमसिद्धावुपयोगित्वेन कृताक्षेपसमाधानार्थतया सङ्गतत्वेऽपि तयोरङ्गाङ्गित्वाद्यन्यतमरूपवत्त्वे श्रुत्यादिसद्भावप्रतिज्ञा न सङ्गच्छत इति। स्यादयं दोषो यदि श्रुत्यादिप्रमाणमित्यादिवाक्यं तत्र श्रुतिलिङ्गादिप्रमाणप्रतिज्ञापरं स्यात्। न त्वेवम्। किन्तु विचारयोः क्रमनियमे श्रुत्यर्थादिप्रमाणप्रतिज्ञापरम्, तस्यैवात्र साक्षादुपपादनीयत्वात् तद्विषयतयैवाग्रिमग्रन्थप्रवृत्तेश्चेति सर्वं समञ्जसम्। स्यादेतत्। विचारयोः कर्तव्यत्वे सति क्रमनियमचिन्ताऽवकाशं लभते। तत्रैव प्रमाणं न पश्यामः। अर्थज्ञानफलकोऽध्ययनविधिर्विचारमन्तरेण स्वफलनिष्पत्त्यसम्भवात् काण्डद्वयस्यापि विचारमाक्षिपतीति चेत्, स्यादेतदेवं यद्यध्ययनविधिरर्थज्ञानफलकः स्यात्, स त्वक्षरावाप्तिफलकः, "स्वाध्यायोऽध्येतव्यः" (श० ब्रा० ११.५.७.२) इति तव्यप्रत्ययेन स्वाध्यायस्याध्ययनप्राप्यत्वप्रतीतेः।

नन्वक्षरावाप्तिर्न पुरुषार्थः। अतोऽध्ययनेन स्वाध्यायस्यावाप्तिरूपः संस्कारः, अवाप्तेन स्वाध्यायेनार्थावबोध इति प्रणाड्या भवदर्थज्ञानमध्ययनविधिः फलत्वेन गृह्णातीत्यभ्युपगन्तव्यमिति चेत्, किमर्थज्ञानं पुरुषार्थः। पशुपुत्रादिवत् पुरुषार्थोपयोगितया गौणपुरुषार्थत्वं त्वक्षरावाप्तेरपि तुल्यम्। अवश्यं चार्थज्ञानं फलमभ्युपगच्छतापि क्वचित् क्वचिदक्षरावाप्तिरपि फलत्वेनाभ्युपगन्तव्या। न खलु हुंफडादीनां स्तोभाक्षराणामर्थोऽस्ति। न वा निषेधवाक्यानामर्थवत्त्वेऽपि तदध्ययनस्यार्थज्ञानं फलमभ्युपगन्तुं शक्यम्, तत्रार्थज्ञाने दृष्टफले नियमविधेरवकाशाभावात्। यदि तावदध्ययनजन्यविधिवाक्यार्थज्ञानवतामेव विहितानुष्ठानमभ्युदयकरमितिवदध्ययनजन्यनिषेधवाक्यार्थज्ञानवतामेव निषिद्धानुष्ठानं प्रत्यवायकरमिति नियमफलमाश्रीयते, तदा तदध्ययनरहितानां तच्छाखिनां हिंसानृतादिभिः प्रत्यवायो न स्यात्। वेदाध्ययने सत्येतानि निषिद्धानि प्रत्यवायकराणीति विशिष्य तज्ज्ञानावश्यंभावात् तदनुष्ठाने प्रत्यवायो भवेदित्यनिष्टफलत्वप्रतिसन्धानेन तत्र प्रवृत्तिरपि न स्यात्।

अथोच्येत निषेधवाक्येषु प्रत्यवायफलकं निषिद्धानुष्ठानं न शास्त्रार्थः, किन्तु प्रत्यवायपरिहारफलकं तदनुष्ठानमिति तद्विषयो नियमः। अध्ययनपूर्वकनिषेधवाक्यार्थज्ञानवत एव निषिद्धाननुष्ठानं प्रत्यवायपरिहाराय भवतीति। तथा च निषिद्धानुष्ठानेन प्रत्यवायजनने निषेधवाक्यार्थज्ञानं नापेक्षितमिति तदध्ययनरहितानां तदनुष्ठाने प्रत्यवायाभावो न प्रसज्यते। प्रत्यवायपरिहारोपयोगिज्ञानफलकमध्ययनं नानिष्टफलकमिति तेषामध्ययने

प्रवृत्त्यभावोऽपि न प्रसज्यत इति। एवमप्यनधीतवेदानां निषिद्धाननुष्ठानेऽपि प्रत्यवायापरिहारादवश्यंभावी प्रत्यवायस्तदनुष्ठानेनैवास्त्विति प्रतिसन्धानेन तेषां निषिद्धानुष्ठानप्रसङ्गो दुर्वारः। अध्ययनं विनोपायान्तरेण निषेधवाक्यार्थजननात् प्रत्यवेयादिति नियमफलमाश्रीयत इति चेत्, एवं सत्यध्ययनरहितानां निषिद्धवर्जनार्थमुपायान्तरेण न तज्ज्ञाने तत्कृतः प्रत्यवायस्तदज्ञाने निषिद्धानुष्ठानकृत इत्युभयथाप्यवर्जनीयः प्रत्यवायो भवेत्। एवमध्ययनसन्ध्यावन्दनादिविध्यर्थानामध्ययनात् प्रागुपायान्तरेण ज्ञानेऽध्ययननियमविध्यतिक्रमेण तदज्ञानेऽध्ययनादिष्वप्रवृत्त्या च प्रत्यवायप्रसङ्गो द्रष्टव्यः। तस्मात् स्तोभाक्षरेष्वध्ययनात् प्रागप्यवश्यावगन्तव्यार्थेषु विधिनिषेधवाक्येषु चाक्षरावाप्तिरेवाध्ययनफलमित्यवश्याभ्युपगन्तव्यत्वादवैरूप्याय सर्वत्रापि सैव फलमित्यभ्युपगन्तुं युक्तम्। एवं सत्येवाध्ययनं प्रति स्वाध्यायस्य प्राधान्यसमर्पकस्तव्यप्रत्ययोऽर्थवान् भवति। अन्यथा स्वाध्यायाध्ययनेनार्थज्ञानं भावयेदिति विधिविपरिणामे स्वाध्यायस्योपादेयाध्ययनगुणत्वेन प्राधान्यभङ्गात् तव्यप्रत्ययः कर्मत्वाभिधाय्यनर्थकः स्यात्।

ननु तथाप्यर्थज्ञानमपि सम्भवस्थलेष्वध्ययनविधिफलत्वेनावश्यमभ्युपगन्तव्यम्, अन्यथा वेदवाक्यानां तत्र तत्रार्थे तात्पर्यासिद्ध्या तन्निर्वाहार्थलक्षणादिकल्पनोच्छेदप्रसङ्गात्। अर्थावबोधमुद्दिश्य शब्दोच्चारणेन हि लोके वाक्यानां तात्पर्यमवगम्य तन्निर्वाहार्थं मुख्यार्थासम्भवे लक्षणादिकं कल्प्यते, न तूच्चारणमात्रेण। अत एव 'गौरश्वः पुरुषो हस्ती' इत्युच्चारणमात्रेणाश्वादिपदानां गवि लक्षणा न कल्प्यते। यदा विशिष्टार्थबोधमुद्दिश्य तेषामुच्चारणमिति तात्पर्यमवगम्यते, तदैव तन्निर्वाहार्थम् 'अयं गौः पुङ्गवः', 'अश्वो वेगवान्', 'पुरुषो नियतचेष्टः', 'हस्ती महाबलः' इति तेषां तत्र लक्षणा कल्प्यते। एवं च वेदवाक्यानामर्थावबोधमुद्दिश्योच्चारणाभावे तात्पर्यासिद्ध्या तन्निर्वाहार्थलक्षणागौण्यनुवृत्त्यनुषङ्गाध्याहारव्यवधारणकल्पनोच्छेदप्रसङ्गादवश्यं वेदेऽप्यर्थावबोधमुद्दिश्योच्चारणं वक्तव्यम्। वेदे तु लोक इव तमुद्दिश्य रागप्रयुक्तमुच्चारणं न सम्भवतीति विधिप्रयुक्तमेव तदाश्रयणीयम्। विधिश्चाध्ययनविधेरन्यो न दृश्यत इति तेनैवार्थावबोधमुद्दिश्य गुरुमुखोच्चारणानूच्चारणरूपमध्ययनं विधीयत इत्यकामेनापि स्वीकर्तव्यम्। एवं च दृष्टफलेऽप्यर्थावबोधे विधिरन्यतोऽसिद्धयतस्तात्पर्यस्य सिद्ध्यर्थो न तु स्वाध्यायाध्ययनजन्यार्थज्ञानवत एव तत्तद्वाक्योक्तं फलं भवतीति नियमार्थो नाप्युपायान्तरेणार्थज्ञाने प्रत्यवायप्रदर्शनार्थ इति निषेधवाक्यादिषु न

प्रागुक्तो दोषः । स्तोभाक्षरेषु परमर्थशून्येष्वर्थावबोधफलासम्भवादक्षरावाप्तिमात्रं फलम् ।

न चैवं विधिवैरूप्यदोषः, यदेव किञ्चन विध्यन्तरोपयोगिस्वाध्यायसंस्काररूपेणाध्ययनेन शक्यं भावयितुं तत्सर्वमनेन भावयेदित्येकयैव वचनभङ्ग्योभयार्थत्वलाभात् । एवं च क्रमफलमपि संगृहीतं भवति । क्रमविशेषविशिष्टवर्णपदवाक्यसंगतो हि स्वाध्यायशब्दार्थः । अतोऽध्ययनविधिः क्रमविशेषविशिष्टतयैव स्वाध्यायस्याध्ययनं विधत्ते । क्रमविशेषस्य चैतत्प्रयोजनं यत्समिदादिविधिवाक्यपाठक्रमेण प्रयाजाद्यनुष्ठानोपयोग्याग्नेयाग्नीषोमीयादिमन्त्रपाठक्रमेण तदनुष्ठानोपयोगि च । स्मृतिक्रमः काम्येष्टिकाण्डसमाम्नातानामैन्द्राग्न्यादीनां याज्यानुवाक्याकाण्डसमाम्नातानाम्--"उभा वामिन्द्राग्नी आहुवध्या" (तै० सं० १.१४.१.१) इत्यादिमन्त्राणां च यथासंख्यं पाठक्रमेणाङ्गाङ्गिभावः । उच्चैष्ट्वादिस्वरविधिषु वेदोपक्रमणे ऋगादिपदानामृग्वेदादिषु लक्षणेत्यादि । यत्र तु नैतादृशं फलमस्ति, तत्र क्रमस्य जपयज्ञादिमात्रोपयोग इति । न चैवमध्ययनस्यार्थज्ञानादिफलान्वये तव्यप्रत्ययोक्तस्वाध्यायप्राधान्यभङ्गो दोषः । स्वाध्यायस्योपादेयाध्ययनगुणत्वेऽपि तस्यार्थसिद्धमध्ययनसंस्कार्यत्वमप्यस्ति, अध्ययनस्य तत्संस्कृतस्वाध्यायं द्वारमनपेक्ष्य तदर्थज्ञानादिनिष्पादकत्वासंभवादिति । तव्यप्रत्ययेन "चरुमुपदधाति" इत्यत्र द्वितीयया चरोरुपधानसंस्कार्यत्वस्येव तस्यानुवाद इत्युपपत्तेः, अग्निप्रकरणाम्नातेन "चरुमुपदधाति" इति विधिना चरूपधाने स्थलाङ्गतया विनियुज्यमाने तस्य साक्षात् स्थलनिर्वर्तकत्वायोगात्, उपहितेन चरुणा तन्निवृत्तिदर्शनाच्चोपधानस्य स्थलाङ्गत्वं चरुसंस्कारमित्यर्थसिद्धमेव हि चरोरुपधानसंस्कार्यत्वं द्वितीययानूद्यते । एवमिहाप्यध्ययनस्य तत्समाप्त्यनन्तरारम्भणीयमीमांसापरिचयोत्तरकालभाविन्यर्थज्ञाने साक्षात्कारणत्वायोगादध्ययनगृहीतस्वाध्यायेन कालान्तरे स्मृतिसमारूढेन द्वारेणार्थज्ञानदर्शनाच्चार्थसिद्धं स्वाध्यायस्याध्ययनसंस्कार्यत्वं तव्यप्रत्ययेनानूद्यत इत्युपपद्यते ।

यदि 'अधीतेन स्वाध्यायेनार्थज्ञानं भावयेत्' इति विधिविपरिणाम इष्यते, तदा स्वाध्यायस्योपादेयत्वेऽप्यध्ययनस्य तद्विशेषणत्वादध्ययनं प्रति स्वाध्यायस्य न प्राधान्यप्रतीतिभङ्गशङ्कावकाशः । एवं स्वाध्यायस्योपादेयत्वे सत्येव—"स्वाध्यायोऽध्येतव्यः" (श० ब्रा० ११.५.७.२) इति स्वशाखामात्राध्ययनविधिरिति सिद्धान्तमर्यादा सङ्गच्छते, अध्यायशब्दोक्तायां

शाखायामेकवचनोक्तस्यैकत्वस्य स्वशब्दोक्तस्य पितृपितामहादिपरम्परागतत्वरूपस्यात्मीयत्वस्य वा विवक्षितुं शक्यत्वात्। स्वाध्यायस्योद्देश्यत्वे तु तद्विशेषणविवक्षाया असम्भवात् सा न सङ्गच्छते। तस्मात् तात्पर्यसिद्ध्यर्थमर्थज्ञानमपि सम्भवस्थलेष्वध्ययनविधिफलत्वेनाभ्युपगन्तव्यम्, इति चेन्मैवम्, लोकव्युत्पत्तिसिद्धस्य शब्दानामर्थपरत्वस्यौत्सर्गिकस्य क्वचित् क्वचिल्लौकिकवाक्ये वक्तृदोषादपवादेऽप्यपौरुषेये वेदे तदभावान्निरपवादस्य स्वत एव सतस्तस्यार्थज्ञानोद्देश्यकशब्दोच्चारणविधिनिरपेक्षतया तत्सिद्ध्यर्थं तव्यप्रत्ययोपात्तत्वेन श्रुतमक्षरावाप्तिफलमुल्लङ्घ्य तत्फलभूतस्यार्थज्ञानस्यापि वैधफलत्वकल्पनायोगात्।

ननु शब्दानामर्थपरत्वमात्रं व्युत्पत्तिसिद्धं न त्वग्निहोत्रादिवाक्यं तत्तदर्थविशेषपरमित्यपि। तत्तु तत्तदर्थविशेषबोधमुद्दिश्योच्चारणमपेक्षत इति तदर्थमर्थज्ञानस्य वैधाध्ययनफलत्वं कल्पनीयमिति चेन्न, अध्ययनविधिनापि तदलाभात्। नह्यध्ययनविधिः प्रतिवाक्यं तत्तदर्थज्ञानमुद्दिश्य तत्तद्वाक्योच्चारणविधाने व्याप्रियते। स्वाध्यायाध्ययनेन यद्भावयितुं शक्यं तद्भावयेदिति विधाने सत्यग्निहोत्रादिवाक्याध्ययनेन न्यायलभ्यतत्तदर्थविशेषज्ञानमेव भावयितुं शक्यमिति तत्र तत्रार्थविशेषतात्पर्यमर्थतः सिद्ध्येदिति चेत्, तर्ह्यग्निहोत्रादिवाक्यानामौत्सर्गिकमर्थपरत्वमेव न्यायपर्यालोचनया तत्तदर्थविशेषतात्पर्यरूपतया पर्यवस्यतीत्येवास्तु, किमर्थावबोधमुद्दिश्योच्चारणविधिना। यदि च लोके दृष्टमित्येतावता वेदेऽप्यर्थावबोधमुद्दिश्योच्चारणमाद्रियेत, तदा स्वतन्त्रवक्तृविवक्षितेतरार्थावबोधमुद्दिश्य श्रोतृभिरुच्चारणे कृतेऽपि तस्य वाक्यस्य तत्र तात्पर्यं न दृष्टम्, किन्तु स्वतन्त्रवक्त्रा यस्यार्थस्यावबोधमुद्दिश्योच्चारणं कृतं तत्रैव तात्पर्यं दृष्टमिति वेदस्य तात्पर्यसिद्ध्यर्थं पौरुषेयत्वमपि कल्प्येत।

वस्तुतस्तु लोकेऽपि नोच्चारणाधीनं तात्पर्यम्, एकाकिना मौनिना लिखित्वा दत्ते परेणाप्येकेनैव लिखितं दृष्ट्वा मनसाऽनुसंहिते श्लोकादावुच्चारणाभावात्। किन्त्वस्मद्वाक्यादेतदर्थप्रतीतिर्भवत्विति वक्तृविवक्षाधीनं तत्। अतस्तात्पर्यसिद्ध्यर्थमध्ययनविधेरर्थावबोधफलकत्वकल्पनायाः कथञ्चिदपि नावकाशः। वक्तृविवक्षा त्वपौरुषेये वेदे न सम्भवतीति व्युत्पत्तिसिद्धमर्थपरत्वं लोके वक्तृविवक्षिते विशेषे पर्यवस्यति। वेदे न्यायलभ्ये विशेषे तदनुसारेण लक्षणादिकल्पनमित्येवाभ्युपगन्तुं युक्तम्। अत एव वाक्यानां तात्पर्यसिद्धिमेवाध्ययनविधेर्व्यवधारणकल्पकन्यायं मन्वानेन भवदेवेनापि स्वाभि-

मतन्यायबलेनैव स्वाध्यायावाप्तिमात्रस्य फलताप्रत्यायकं तव्यप्रत्ययस्वारस्यमुल्लङ्घ्य स्वाध्यायाध्ययनेनार्थावबोधं भावयेदिति व्यवधारणकल्पनाङ्गीकृता। नह्यध्ययनविधेरुक्तार्थतात्पर्यनिश्चयोऽयमर्थावबोधमुद्दिश्य तदुच्चारणविध्यधीनः, तथाश्रुतविध्यन्तराभावात्, अस्यैव विधेरपेक्षायामात्माश्रयापत्तेः। किन्तु केवलन्यायाधीन एव वक्तव्यः। अतस्तात्पर्यसिद्ध्यर्थमध्ययनविधेरर्थावबोधफलकत्वकल्पनमित्येतत् तावदयुक्तम्।

क्रमफलसंग्रहार्थं यदनेन शक्यं भावयितुं तद्भावयेदित्यध्ययनविध्यर्थपर्यवसानादध्ययनेन भावयितुं शक्यमर्थज्ञानमपि तद्भाव्यकोटावनुप्रविशेदित्येदप्ययुक्तम्, अनुष्ठानकालापेक्षितस्य समिद्यागादिस्मृतिक्रमस्याध्ययनगृहीतस्वाध्यायपाठक्रमेणाध्ययनविधिफलाक्षरावाप्त्यनुनिष्पादितया स्वत एव सम्भवतोऽध्ययनविधिफलत्वेन संग्राह्यत्वाभावात्, तत्संग्रहार्थं यदनेन भावयितुं शक्यं तत्सर्वमनेन भावयेदित्यध्ययनविध्यर्थाङ्गीकारेऽर्थज्ञानवत् ख्यातिलाभादीनां चार्वाकापादितफलानामपि तद्भाव्यकोट्यनुप्रवेशप्रसङ्गाच्च। तेषामपि लोकतः—"शोभतेऽस्य मुखं य एवं वेद आस्य प्रजायां वाजी जायते" इत्यादिश्रौतलिङ्गतश्चाध्ययनेन भावयितुं शक्यत्वावगमात्। "शोभतेऽस्य मुखं य एवं वेद" इति हि गर्भत्रिरात्रब्राह्मणज्ञस्य तज्ज्ञानफलानुवादः। शिष्यैरुद्वीक्ष्यमाणत्वात् तस्य मुखं शोभत इति तदुपपादनं कृतमर्थवादाधिकरणे। अनेन ख्यातेरध्ययनावाप्यत्वं लब्धम्। "आस्य प्रजायां वाजी जायते" इति वेदानुमन्त्रणमन्त्रस्य तज्ज्ञानफलानुवादः। कुले सन्तताध्ययनश्रवणात् तज्ज्ञस्य प्रजासु मेधावी वेदविज्जायते, स प्रतिग्रहादन्नमाप्नोतीति तदुपपादनं कृतम्। अनेन कैमुतिकन्यायेन साक्षादध्येतुर्धनलाभस्याध्ययनावाप्यत्वं लब्धं विध्यन्तरापेक्षितं यद्भावयितुं शक्यमिति विशेषितमिति चेत्, धनलाभोऽपि न त्वर्थज्ञानवत् क्रतुविधिभिरपेक्षित एव। ख्यातिरपि धनलम्भनद्वारा क्रतुषूपयुज्यते।

तस्मादध्ययनविधेस्तव्यप्रत्ययोपात्ताक्षरावाप्तिफलकत्वमेव युक्तम्। न चैवं सति स्वाध्यायस्योद्देश्यत्वात् स्वीयत्वविशेषणाविवक्षाप्रसङ्गात् सर्वशाखानामध्येतुमशक्यतया सङ्कोचापेक्षासत्त्वेन उद्देश्यस्यापि विशेषणसहिष्णुत्वात्—"यस्योभावग्नी अनुगतौ अभिनिम्रोचेदभ्युदियाद्वा पुनराधेयं तस्य प्रायश्चित्तिः" इत्यत्र निमित्तान्तर्गततयोद्देश्यविशेषभूतस्याप्यग्न्युभयत्वस्याधानेनाग्निद्वयोत्पादकस्वाभाव्येन एकस्याग्नेरुत्पादयितुमशक्यतया विवक्षितत्वस्य—"पुनराधेयमोदनवत्" (जै० ६.४.२६) इत्यधिकरणे निर्णी-

रपि क्रमनियमो युक्तः। यद्यप्यक्षरग्रहणमात्रपर्यवसायित्वमध्ययनविधेस्तथापि विचारयोर्न प्रवृत्त्यसम्भवः, साङ्गाध्ययनेनापाततः पदार्थमात्रप्रतीतेः। तदनु ब्रह्मस्थूलोपासनज्योतिष्टोमादिविधायकानां वाक्यानां सूक्ष्मोपासनभूतदहरादिविद्याविधायकानां च परस्परविरोधाभास पश्यंस्तद्विचारे

त्त्वात्। तस्माद् अध्ययनमात्रवत इति पुरुषार्थाधिकरण(ब्र० ३.४.१२)-सूत्रस्वारस्याच्च अक्षरावाप्तिफलोऽध्ययनविधिर्न त्वर्थज्ञानफलः। अर्थज्ञानफलत्वस्याभावे तदुपयोगिनां व्याकरणादीनामङ्गत्वं न स्यादिति चेन्न, वेदाङ्गत्वं हि तेषां स्मृतं नाध्ययनाङ्गत्वम्। वेदाङ्गत्वं तु तेषामध्ययनस्यार्थज्ञानफलत्वाभावेऽपि युज्यते। आधानसंस्कृतस्याग्नेः क्रतुष्विवाध्ययनसंस्कृतस्य वेदस्यार्थज्ञानादुपयोगादक्षरावाप्तिफलोऽध्ययनविधिर्नार्थज्ञानफलः। अतोऽध्ययनविधिना तावद्विचारः कर्तव्यतया नाक्षिप्यते, नापि क्रतुविधिभिः, तत्तदनुष्ठानकालापेक्षितस्य तत्तज्ज्ञानस्य कल्पसूत्रोपदृष्टवचनादिभिरपि सम्भवात्।

तस्माद्वेदार्थविचारकर्तव्यतायामेव न मानं दूरे कर्मब्रह्मविचारयोः क्रमनियम इत्याशङ्क्याह—यदीति। स्थूलोपासनानि बाह्यत्वान्मुक्तौ ज्ञानद्वारकत्वाच्च बहिरङ्गसाधनानि, सूक्ष्मोपासनान्यान्तरत्वान्मुक्तौ कर्मवद् व्यवहितसाधनत्वाभावाच्चान्तरङ्गसाधनानि। परस्परेति। "अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति"(श. ब्रा. २.५.४.१), "तद्यथेह कर्मचितो लोकः क्षीयते" (छान्दो. ८.१.६), "किं नु मलं किमजिनं किमु श्मश्रूणि किं तपः। पुत्रं ब्रह्माणमिच्छध्वं स वै लोको वदावदः॥"(ऐ. ब्रा. ७.१३.७), "किं प्रजया करिष्यामो येषां नोऽयमात्मा" (बृ. उ. ४.४.२२) इत्यादीनां कर्मब्रह्मकाण्डगतवाक्यानां वस्तुतो विरोधरहितानामप्यापाततः प्रतीयमानो विरोधः परस्परविरोधाभासः।

इदमुपलक्षणम्। एकैकस्मिन्नपि काण्डे उदितानुदितहोमादिवाक्यानामेकैकस्मिन्नपि वाक्ये तत्तदधिकरणप्रदर्शनीयपूर्वपक्षसिद्धान्तयुक्तिलेशावलम्बनेन प्रतीयमानानामर्थानां च विरोधाभासोऽपि द्रष्टव्यः। नन्वेवंभूतविरोधाभासनिरासार्थे विचारे कृते कः पुरुषार्थो लभ्यते? क्रतुविद्यानुष्ठानसिद्धिरिति चेन्न, सकलवेदार्थनिर्णायकन्यायाभिज्ञैर्महर्षिभिः प्रणीतानि

कल्पसूत्राणि विद्यानिर्णायकानि वासिष्ठादीनि कल्पानि चाधीतवतां विचारितसकलमीमांसाद्वयनिरूपितन्यायनिकुरुम्बैरुपद्रष्टृभिरधिष्ठितानां वा तदुक्तार्थेष्वाप्तोक्तत्वविश्वासादेव प्रतीयमानविरोधानां केचन परिहाराः सन्तीति निश्चयेन क्रतुषु विद्यासु च प्रवृत्त्यनुपपत्तेः, इति चेदुच्यते—अध्ययनसंस्कृतः स्वाध्यायो "भूतभाव्युपयोगं हि द्रव्यं संस्कारमर्हति" इति न्यायेनाधानसंस्कृताग्निरिव भूतोपयोगराहित्यात् क्वचिद्भाव्युपयोगमपेक्षमाणः फलान्तरोपयोगिनि भृतकाध्यापनादिवत् प्रतिषेधरहिते यत्र यत्र कार्ये समर्थत्वेनावधार्यते, तत्र सर्वत्रापि वस्तुसामर्थ्यलक्षणेन लिङ्गेन विनियुज्यते। नह्याधानसंस्कृतस्याग्नेर्यदाहवनीये जुहोतीत्यादिवाचनिकविनियोगवदस्य क्वचिद्वाचनिकविनियोगोऽस्ति, येन तन्निराकाङ्क्षीकृतः सन्नयं लिङ्गादन्यत्र न विनियुज्येत। तथा चाध्ययनसंस्कृते स्वाध्याये सत्यसम्भवदुपायान्तरे-"धन्यं यशस्यमायुष्यं पुण्यं स्वर्गापवर्गदम्। धारणं धर्मशास्त्रस्य वेदानां धारणं तथा॥", "त्रिभिरनश्नत्पारायणैः पूतो भवति" इत्यादिवचनावगतफलान्तरोपयोगे साधारणपारायणादिकार्य इव कर्मज्ञानानुष्ठानद्वाराभ्युदयनिश्रेयसोपयोगिन्यर्थज्ञाने सम्भवद् वेदार्थसंग्राहकपौरुषेयग्रन्थाद्युपायान्तरेऽप्ययं विनियुज्यत एव, सामर्थ्याविशेषात्। अत एव—"विहारो लौकिकानामर्थं साधयेत् प्रभुत्वात्" (जै० १२.२.१) इति द्वादशाध्यायाधिकरणे आधानसंस्कृतानामग्नीनां विनियोगापेक्षायां लौकिकाग्निसाध्यतया सम्भवदुपायान्तरेषु लौकिकेषु पचनदहनप्रकाशनादिष्वपि विनियोगः पूर्वपक्षितः।

तन्निरासार्थमेव हि तदधिकरणम्, न तु स्थालीपाकादिस्मार्तसाधारण्यशङ्कानिरासार्थम्, तेष्वौपासनाग्निकर्तव्यतयोत्पन्नेषु पदहोमादिष्विव विनियोगशङ्कानवकाशात्। आधानसंस्कृतस्याग्नेर्वाचनिकविनियोगैर्निराकाङ्क्षीकरणात् तत्र पूर्वपक्षन्यायनिरासेऽप्यत्र तदभावात् पूर्वपक्षन्याय एवावतिष्ठते। अपि च, पदतदर्थावधारणादिद्वाराऽर्थज्ञानैकोपायानां वेदाध्ययनकालेऽध्येतव्यानां व्याकरणादीनां वेदाङ्गत्वान्यथानुपपत्त्याप्यधीतस्वाध्यायस्याप्यर्थज्ञाने विनियोगः सिध्यति, अकिञ्चित्करस्याङ्गत्वायोगात्, नित्ये वेदस्वरूपेऽनुपकारकाणां तेषां फलोपकारकत्वस्यैव वक्तव्यत्वाच्च। एवं चाङ्गाध्ययनं स्वाध्यायादापाततो ज्ञानस्य तन्निर्णय एव पुरुषार्थावगतेश्चोत्पादनेन तन्निर्णिनीषामुत्पादयति। सा च न्यायविचारमन्तरेण वेदात् तदर्थनिर्णयासम्भवात् तन्निर्णयार्थं विचिचारयिषामुत्पाद्य विचारे प्रवर्तयतीत्यध्ययनविधेरक्षरग्रहणपर्यन्तत्वेऽपि नियमेन विचारे प्रवृत्तिः सिध्यति। एतत्सर्वं स्वाध्यायसंस्कारो-

ऽध्ययनमिति पक्षमनुवदतोऽङ्गाध्ययनादापातप्रतीत्यादिकं वदतश्च भाष्यकारस्य हृदयस्थितमुन्नीयते । एतेन व्याकरणादीनामङ्गत्वान्यथानुपपत्त्याध्ययनस्यार्थज्ञानफलकत्वमङ्गीकर्तव्यमिति शङ्कापि निरस्ता । वेदाङ्गत्वं हि तेषामुच्यते, न त्वध्ययनाङ्गत्वम् । वेदाङ्गत्वं तु तेषामध्ययनस्याक्षरग्रहणमात्रपर्यन्तत्वेऽप्यध्ययनसंस्कृतस्य वेदस्यार्थज्ञानोपयोगित्वाद् युज्यत एव ।

नन्वङ्गाध्ययनस्यार्थज्ञानपर्यन्तत्वमवश्यमङ्गीकरणीयम्, अन्यथाध्ययनसंस्कृतवेदजन्यार्थज्ञानोपयोगित्वासम्भवेन वेदाङ्गत्वानिर्वाहात् । ततश्चाङ्गाध्ययनवद्वेदाध्ययनमप्यर्थज्ञानपर्यन्तं स्यात् । "स्वाध्यायोऽध्येतव्यः" (श०ब्रा० ११.५.७.२) इत्यत्र तव्यप्रत्ययस्वारस्यातिलङ्घनमपि "वेदाङ्गानि समस्तानि कृष्णपक्षेषु सम्पठेत्" इत्यत्र द्वितीयाविभक्तिस्वारस्यातिलङ्घनवदेव स्यादिति चेन्न, "प्रयाजशेषेण हवींष्यभिघारयति" इत्यत्र प्रयाजशेषप्रातिपदिकानुसारेण तृतीयाविभक्त्यवगतगुणभावस्येव वेदाङ्गानीति स्मृतावङ्गप्रातिपदिकानुसारेण द्वितीयाविभक्त्यवगतप्राधान्यस्य त्यागेऽपि स्वाध्यायविधिवाक्यगततव्यप्रत्ययस्वारस्यत्यागे कारणाभावात्, नित्यस्याध्ययनस्यार्थज्ञानपर्यन्तत्वे नियतकर्तव्याग्निहोत्राद्यनुष्ठानोपयोगिकर्मभागज्ञानार्थस्य धर्मविचारस्येव ब्रह्मविचारस्यापि विरक्ताविरक्तसाधारण्येन सर्वैरपि कर्तव्यतापत्त्या—"परीक्ष्य लोकान्" (मुण्डको० १.२.१२) इत्यादिश्रुतिविरोधापत्तेश्च । न चाध्ययनसंस्कृतस्य वेदस्य लिङ्गादर्थज्ञाने विनियोगेऽप्येष दोषः, यथाऽऽधानविधिरग्निसंस्कारमात्रपर्यवसायीत्याधानेनार्जितस्याग्नेर्यदा यदग्निसाध्यं कर्म नित्यं काम्यं वा कर्तव्यतयोपस्थितं तदा तत्र विनियोगः, यथा वा धनार्जनविधिरर्थप्राप्तिपर्यवसायीति प्रतिग्रहादिनार्जितस्य धनस्य यदा यद्धनसाध्यं लौकिकं वैदिकं वा कर्म कर्तव्यतयोपस्थितं तदा तत्र विनियोगः, तथाध्ययनविधेरक्षरग्रहणपर्यवसायित्वे यदा स्वाध्यायसाध्यं जपपारायणार्थज्ञानादि कर्तव्यतयोपस्थितं तदा तत्र विनियोग इत्युपपत्तेः ।

नन्वध्ययनविधेरक्षरग्रहणमात्रपर्यवसायित्वेनार्थज्ञानपर्यन्तत्वाभावे—"अधीत्य स्नायात्" इति विधेरप्यक्षरग्रहणानन्तरमेव स्नानकर्तव्यताविधायितया स्नानात् पूर्वं कर्मविचारो न स्यात् । न च स्नानानन्तरमेव दारपरिग्रहं कृत्वाऽग्नीनाधायावश्यकर्तव्यानामग्निहोत्रादिकर्मणामनुष्ठानसिद्ध्यर्थमर्थज्ञानस्यापेक्षितत्वात् तदर्थं स ततः पूर्वं स्यादिति वाच्यम्, तथा सति "अधीत्य स्नायात्" इति श्रौतक्रमविरोधप्रसङ्गात्, अग्निहोत्रानुष्ठानाद्यपेक्षितज्ञानस्याध्ययनतदङ्गानुष्ठानाद्यपेक्षितज्ञानस्येव उपदेष्टृवचनादिभिरपि सम्भवात् ।

पुरुषार्थाकाङ्क्षी पुरुषः स्वयमेव प्रवर्तते । ततो नानिबन्धनो विचारः । ननु श्रोतव्य इति वाक्येन वेदान्तश्रवणं साक्षाद्विधीयत इति चेन्न, विधित्वप्रयोजकरूपसम्पत्त्यभावात् ।

न च वाच्यमध्ययनसंस्कृतस्य स्वाध्यायस्य विनियोगाकाङ्क्षायां लिङ्गादर्थज्ञाने विनियोगो वेदेनैव वेदार्थो ज्ञातव्य इत्युपायनियमपर्यवसायी, अतस्तस्य नियतोपायत्वाध्ययनाद्यनुष्ठानोपयोगिज्ञानात् पवमानेष्टेराहवनीयाग्निहोत्रहवणीवदसम्भवाद् व्यावृत्तावप्यग्निहोत्राद्युपयोगिनि ज्ञाने सम्भवतस्तस्य त्यागो न युक्त इति, अर्थज्ञानोपायनियमप्रापकाल्लिङ्गादधीत्य स्नायादिति क्त्वाश्रुतेः प्रबलत्वात् । न च स्मृतिगतक्त्वाश्रुतितः श्रुतितदर्थगतं लिङ्गं प्रबलम्, स्मृतेर्भ्रान्त्यादिमूलान्तरस्यापि सम्भवादिति वाच्यम्, आचार्यकुलाद् वेदमधीत्य यथाविधानं गुरोः कर्मातिशेषेणापि समावृत्येति श्रुतावप्यधीत्येति क्त्वाश्रुतेः श्रवणादिति चेन्मैवम्, नियतोपायरूपपदार्थविषयस्य लिङ्गस्य पदार्थधर्मरूपक्रमविषयक्त्वाश्रुतितः—"दुर्बलस्य प्रमाणस्य बलवानाश्रयो यदा । तदापि विपरीतत्वं शिष्टाकोपे यथोदितम् ॥" इति न्यायेन "क्षुत आचामेत्" इत्याचमनपदार्थविषयस्मृतेः "वेदं कृत्वा वेदिं करोति" (आप० श्रौ० १.८.१३) इति क्रमविषयश्रुतित इव प्रबलतया तद्बलेन स्नानात् पूर्वं कर्मविचारसिद्धेः । तदेतत् सर्वमभिप्रेत्य विचारे प्रवर्तकाभावशङ्कानिरासमुपसंहरति—तत इति । एवं स्वाभिमतविचारे प्रवर्तकमुपपाद्य श्रवणविधिस्तत्र प्रवर्तक इति मतं निरसितुमाशङ्कते—नन्विति । वेदान्तश्रवणमिति । यद्यपि श्रवणविधिवाक्ये वेदान्तग्रहणं नास्ति, तथाप्यात्मा श्रोतव्य इति विधीयमानं ब्रह्मणि तात्पर्यावधारणरूपं श्रवणं ब्रह्मणो वेदान्तैकप्रमाणकत्वात् तत्तात्पर्यावधारणरूपं पर्यवस्यतीति भावः । श्रवणे विधिरेव न सम्भवतीति कुतस्तस्य प्रवर्तकत्वमित्यभिप्रेत्य तत्र विध्यसम्भवे हेतुमाह—नेति ।

विधित्वेति । विधित्वे प्रयोजकानि रूपाणि त्रैकालिकाप्राप्तिपाक्षिकप्राप्तिसमुच्चितप्राप्तयः । यथा—"व्रीहीन् प्रोक्षति" (आप० श्रौ० १.१९.१) इत्यत्र दार्शपूर्णमासिकेषु व्रीहिषु विधेयस्य प्रोक्षणस्यैतद्विध्यभावे कालत्रयेऽप्यन्यतः प्राप्तिर्न सम्भवति, अतस्तत्र तत्प्राप्तिफलकोऽपूर्वविधिः । "व्रीहीनवहन्ति"(आप०श्रौ० १.१९.११) इत्यत्र पुरोडाशप्रकृतिभूतानामेव व्रीहीणां पुरोडाशनिर्वर्तनार्थमपेक्षिते तण्डुलीभावे लोकावगतसाधनत्वेनैतद्विध्य-

तथाहि वेदान्तश्रवणं नापूर्वविधिगोचरः, प्राप्तत्वात् । प्राप्तिश्च वेदान्तश्रवणं स्वविषयोपात्तावगतिसाधनम्, शास्त्र-

---

भावेऽप्यवहननस्याक्षेपतः प्राप्तिः सम्भवति, किन्तु तत्र लोकावगतसाधनत्वाविशेषात् कदाचिन्नखविदलनादिकमपि प्राप्नुयादिति पाक्षिक्यवहननस्य प्राप्तिः । अतोऽवहनने तदप्राप्तांशपरिपूरणफलो नियमविधिः । "इमामगृभ्णन् रशनामृतस्य" (तै० सं० ५.१.२१) इत्यग्निचयनप्रकरणाम्नातस्य मन्त्रस्य तत्रानुष्ठेयेऽश्वरशनाग्रहणे रशनाग्रहणप्रकाशनसामर्थ्यरूपलिङ्गात् प्राप्तिः–"इमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्ते"(तै०सं० ५.१.२.१) इति विध्यभावेऽपि सम्भवत्येव, किन्तु लिङ्गाविशेषात् तत्रत्ये गर्दभरशनाग्रहणेऽपि प्राप्तिः स्यादिति तन्निवृत्त्यर्थः परिसंख्याविधिः । यद्यपि नियमपरिसंख्योदाहरणयोः पाक्षिकी नियता च प्राप्तिर्वस्तुतो नास्त्येव । तुषविमोकेन कार्येणाक्षिप्ततया ह्यवघातस्य पाक्षिकी प्राप्तिर्वक्तव्या । आक्षेपात् प्रागेव "व्रीहीनवहन्ति" (आप० श्रौ० १.१९.११) इति प्रत्यक्षशास्त्रं झटिति प्रवर्तते । तदनन्तरं प्रत्यक्षशास्त्रसिद्धेनैकेनोपायेन नैराकाङ्क्ष्यादनियतोपायाक्षेप एव न प्रवर्तते । एवं प्रत्यक्षशास्त्रेणाश्वरशनाग्रहणे झटिति विनियुक्तस्य तेनैव नैराकाङ्क्ष्याद् रशनाद्वयसाधारण्येन लैङ्गिकविनियोगकल्पनं न प्रवर्तते । एवं च नियमपरिसंख्ययोरप्यपूर्वविधिवद् वस्तुतोऽत्यन्ताप्राप्त एव विषयः, तथापि नियमपरिसंख्याशास्त्रयोरप्रवृत्तावर्थाक्षेपेण नखविदलनस्यापि कदाचित् प्राप्त्याऽवघातस्य पाक्षिक्येव प्राप्तिः स्यात् । मन्त्रस्य च लिङ्गाविशेषेण गर्दभरशनाग्रहणेऽपि विनियोगः स्यात् । तयोः प्रवृत्तौ त्वाक्षेपमन्त्रलिङ्गावतारप्रतिबन्धादवघातस्य नियतता मन्त्रस्य गर्दभरशनातो निवृत्तिश्च लभ्यत इति नियमपरिसंख्याविध्योः प्रवृत्तावपूर्वविध्यविशेषेऽप्याक्षेपमन्त्रलिङ्गावतारप्रतिबन्धद्वाराऽवघातनियमेन गर्दभरशनायां मन्त्रवर्जनेन फलवत्त्वात् फलतो नियमपरिसंख्याव्यपदेश इत्यपूर्वविधितस्तयोर्भेदः । यद्यपि नियमे विदलनादिनिवृत्तिः परिसंख्यायां गर्दभरशनादिनिवृत्तिरितीतरनिवृत्तिलाभ उभयत्राप्यविशिष्टः, अवघातेनैव तुषविमोकः कार्यः, अश्वरशनायामेव मन्त्रः कार्य इत्येवकारेण फलविवरणमप्यविशिष्टम्, तथाप्यवघातशास्त्रेणावघातनियमस्याक्षेपतोऽवघातप्राप्यव्रीह्यंशेऽवघातप्रापणरूपस्याकरणे उपायान्तरेण साधारणेनाक्षेपेणापातत उपायान्तरस्य निराकर्तुमशक्यतया तन्निवृत्त्यसम्भवेन नियमस्य प्रथमोप-

स्थितत्वाद्, विधेयगतत्वेन प्रत्यासन्नत्वाच्चाप्राप्तांशपरिपूरणरूपो नियम एव फलम्। उपायान्तरनिवृत्तिश्चरमोपस्थितत्वादविधेयगतत्वेन विप्रकृष्टत्वाच्च तदनुनिष्पादिनी न फलम्। परिसंख्योदाहरणे तु द्वयोरपि नित्यप्राप्तिसम्भवेन स्वरूपप्राप्तेर्नियमस्य वा फलत्वायोगादितरनिवृत्तिरेव फलम्। एवं नियमपरिसंख्याविध्योः फलभेदे सत्येवकारेण फलविवरणमेकत्रायोगव्यवच्छेदार्थमन्यत्रान्ययोगव्यवच्छेदार्थमिति विशेषः। एवमपूर्वविधित्वादि प्रयोजकरूपाणां मध्येऽन्यतमस्य सम्पत्त्यभावादित्यर्थः।

ननु प्राप्तत्वादिति हेतुरसिद्धः, वेदान्तश्रवणकर्तव्यताबोधकप्रमाणानुपलम्भादित्यत आह—प्राप्तिश्चेति। वेदान्तश्रवणं तदर्थावगतिसाधनत्वेन विधीयत इति हि प्रतीयते। तन्न सम्भवति, सामान्यतः श्रवणमात्रं श्रवणविषयशब्दोपात्तार्थावगतिसाधनमिति नियमस्य वैद्यशास्त्रश्रवणादिषु दृष्टतया तद्वद् वेदान्तशास्त्रश्रवणेऽपि स्वविषयोपात्तावगतिसाधनत्वस्यानुमानेन प्राप्तेरित्यर्थः। स्यादेतत्, वेदान्तश्रवणस्यार्थावगतिसाधनत्वेन विधेः प्रतीतौ खलु तत्प्राप्तेः समर्थनेन तत्र विधिर्निरसनीयः। तत्प्रतीतिरेव कुतः? न खल्वात्मा श्रोतव्य इत्यत्रावगतिकामेनेति विशेषणमस्ति, प्रकरणाल्लभ्यत इति चेन्न, "येनाहं नामृता स्यां किमहं तेन कुर्याम्। यदेव भगवान् वेद तदेव मे ब्रूहि" (बृ० उ० २.४.३) इत्युपक्रमगतमैत्रेयीप्रश्नस्यामृतत्वसाधनविषयतया प्रकरणालोचनायाममृतत्वस्यैव फलत्वेनान्वयलाभात्, तत्फलकत्वे चापूर्वविधित्वस्य प्रत्याख्यातुमशक्यत्वात्। ननु श्रवणविधिसन्निधौ द्रष्टव्य इत्यनुवादस्तस्यैव फलसमर्पकः, अतस्तत्र दृशिधातुना ज्ञानमात्रं विवक्षितमिति वक्तव्यम्, साक्षात्कारस्य शब्दप्रमाणफलत्वायोगादिति चेन्न, साक्षात्कारस्य साक्षात् तत्फलत्वासम्भवेऽपि श्रवणजन्यवेदान्तार्थनिर्णयसापेक्षनिदिध्यासनसाध्यस्य तस्य तद्द्वारा परम्परया तत्फलत्वसम्भवात्।

ननु वेदान्तश्रवणजन्यार्थज्ञानस्य निदिध्यासनानुष्ठान एवोपक्षीणत्वात् कर्मानुष्ठानोपयोग्यर्थज्ञानस्य कर्मफले स्वर्गादाविव निदिध्यासनफले साक्षात्कारे कारणत्वं नास्तीति तस्यापि कारणभूतस्य वेदान्तश्रवणस्य सुतरां तत्र कारणत्वं न सम्भवतीति चेत्, दृष्टान्ते कारणताग्राहकप्रमाणाभावात् तथैव। इह तु—"द्रष्टव्यः श्रोतव्यः" (बृ०उ०२.४.५) इति तद्ग्राहकप्रमाणसत्त्वे कथं कारणत्वं न स्यात्? न चाकारणेनार्थनिर्णये न व्यवधानं बाधकम्, चाक्षुषसाक्षात्कारे चक्षुषः संयोगजनककर्मणोऽकारणत्वेऽपि सन्निकर्षद्वारा चक्षुषः कारणत्वदर्शनेनाकारणव्यवधानस्य तद्बाधकत्वाभावात्, तद्बाधकत्वे वा श्रुतश्रवण-

कारणत्वोपपत्त्यर्थं तज्जन्यस्यार्थज्ञानस्यापि निदिध्यासनद्वारा साक्षात्कारकारणत्वोपपत्तेश्च । ननु–"ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यते निष्कलं ध्यायमानः" (मुण्डको. ३.१.८) इति श्रुत्यन्तरे साक्षात्कारस्य निदिध्यासनफलत्वावगमादिह सन्निहितश्रवणफलसमर्पकस्य द्रष्टव्यपदस्य तदन्यज्ञानपरत्वं वक्तव्यमिति चेन्न, श्रवणनिर्वर्त्यनिदिध्यासनजन्ये साक्षात्कारे श्रवणस्यापि श्रुतिबलात् कारणत्वोपपत्तेः, पुरोडाशनिर्वर्त्ये यागे पुरोडाशनिर्वर्तकानां व्रीहीणामपि—"व्रीहिभिर्यजेत" (आप० श्रौ० ६.३१.१३) इति श्रुतिबलेनैव कारणत्वाभ्युपगमात्, सामशब्दोक्तगीत्यभिव्यक्त ऋक्साध्ये गुणाभिधानरूपे स्तोत्रे—"साम्ना स्तुवीत" इति श्रुतिबलात् साम्नोऽपि कारणत्वाभ्युपगमाच्च ।

ननु द्रष्टव्यपदेन श्रवणविधिवाक्यबहिर्भूतेन श्रवणस्यावगतिसाधनत्वेन विधिप्रतीतिर्मा भूत्, तदन्तर्भूतेन तव्यप्रत्ययेनैव सा लभ्यते, तेन हि वेदान्तश्रवणं प्रत्यप्यात्मनो विषयत्वरूपं कर्मत्वं प्रतीयते । न चात्मा वेदान्तशब्दश्रवणस्य साक्षाद्विषयो भवति । भवति तु 'प्रत्यक्षप्रमाणविषयो घटः', 'अनुमानप्रमाणविषयो वह्निः' इत्यत्र घटवह्निवत् तत्साध्यावगतिविषयतया व्यवहितविषयः । तथा च तथाभूतं व्यवहितविषयत्वमेवात्र तव्यप्रत्ययेन बोध्यत इत्युपपादनीयम् । एवं च तत्समानसंवित्संवेद्यतया आत्मविषयावगतिसाधनत्वमपि श्रवणस्य प्रतीयत इति तेन रूपेण श्रवणे विधिरुपपद्यत इति चेत्, स्यादेतदेवम्, यदि वेदान्तशब्दमात्रगोचरज्ञानमिह श्रवणं भवेत्, किन्तु वेदान्तानां ब्रह्मणि तात्पर्यावधारणमत्र श्रवणं विवक्षणीयम्, तथैव भाष्यकृता समन्वयसूत्रे–"श्रवणं नाम सर्वेषां वेदान्तानां परात्परे । उपक्रमादिभिर्लिङ्गैः शिवे तात्पर्यनिर्णयः ॥"इति वृद्धप्रसिद्धिमुदाहृत्य वक्ष्यमाणत्वेन तत्रैवावगतिसाधनत्वेन विधिशङ्कायाः प्राप्तिसमर्थनेन तन्निरासस्य च कर्तव्यत्वात् । न च तात्पर्यावधारणस्यात्मा विषयो न भवति, येन तत्साध्यावगतिविषयत्वलक्षणं व्यवहितविषयत्वं तव्यप्रत्ययार्थ इत्याश्रीयेत । अस्ति हि ब्रह्मणि तात्पर्यावधारणे ब्रह्मणोऽपि विषयत्वम् । अतो वेदान्ततात्पर्यावधारणस्यात्मा विषयीकर्तव्य इत्यर्थाश्रवणे नास्त्यनुपपत्तिरिति न व्यवहितविषयत्वार्थाश्रयणेनात्मावगतिसाधनत्वस्य प्रतीतिरुपपादयितुं शक्या ।

एवं तर्हि ग्रहणस्यावगतिसाधनत्वप्रतीतिरर्थस्वभावेनैवास्तु, "व्रीहीनवहन्ति"(आप०श्रौ० १.१९.११) इत्यत्रावहननस्य तुषविमोकसाधनत्वप्रतीतिरिवेति चेन्न, तथा सति लोकसिद्धकार्यकारणभावालोचनयैवार्थावगतेः

फलत्वेन प्राप्तिमभ्युपगम्य तत्फलकश्रवणविधिरिति शङ्कावतरणे प्राप्तविषये विधिरुन्मज्जन्नियमविधित्वादिरूपेणैवोन्मज्जतीति तत्रापूर्वविधित्वशङ्कावकाशाभावप्रसङ्गात्। तस्मादवगतिसाधनत्वेनापूर्वविधिरिति शङ्कानिराकरणार्थमनुमानेन प्राप्तिप्रदर्शनमिदमकाण्डताण्डवमिति चेदुच्यते, श्रोतव्य इत्यत्र श्रवणे विधिप्रतीत्या तस्य फलाकाङ्क्षायां सन्निहितं द्रष्टव्यपदं फलसमर्पकं युक्तम्। तत्र दृशिधात्वर्थः साक्षात्कारस्तस्य साक्षात्फलं भवितुं नार्हति, क्वचिदपि शब्दप्रमाणतः साक्षात्कारादर्शनेन शब्दप्रमाणमात्रस्य तं प्रत्ययोग्यत्वावधारणात्, तत्फलकस्य निदिध्यासनविधेः सत्त्वाच्च। निदिध्यासनद्वारा तस्य फलत्वसम्भवेऽपि तत्फलकत्वबोधकश्रवणविधेर्नास्ति प्रयोजनम्। तद्धि न तावन्निदिध्यासने प्रवृत्त्यर्थम्, निदिध्यासनेऽप्यत्र विधेः श्रूयमाणतया तस्य "ततस्तु तं पश्यते" (मुण्डको० ३.१.८) इत्यादिश्रुत्यन्तरानुसारात् साक्षात्कारफलत्वेन तदर्थिनस्तत्र स्वविधित एव प्रवृत्त्युपपत्तेः। नापि श्रवणे प्रवृत्त्यर्थम्, श्रवणस्य परम्परया निदिध्यासनसाध्यसाक्षात्कारजनकत्वज्ञानेऽपि परम्पराघटकार्थावगतिजनकत्वाज्ञानेन तदर्थितया तत्र प्रवृत्तेरनुपपत्तेः। अन्यतस्तज्जनकत्वज्ञाने तत एव तत्र प्रवृत्त्युपपत्तेर्व्रीहिसामादिन्यायेनैतद्विधिसामर्थ्यादेव श्रवणस्य पाष्ठिकान्वयकल्पनया श्रवणे प्रवृत्तिरुपपद्यत इति चेन्न, तत्कल्पनस्य वस्तुसामर्थ्यावगत्यधीनत्वात्, इह च बहुशः कृतश्रवणानामपि प्रायशस्तत्त्वनिर्णयादर्शनेनाकृतश्रवणस्यापि गर्भस्थस्य वामदेवस्य तद्दर्शनेन चोभयतस्तद्व्यभिचारेण वस्तुसामर्थ्यासिद्धेः।

ननु वामदेवस्य निदिध्यासनं विना साक्षात्कारो दृष्ट इति निदिध्यासनस्यैव व्यतिरेकव्यभिचारो न श्रवणस्येति चेन्न, गर्भे साक्षात्कारवतो वामदेवस्य गर्भ एव निदिध्यासनस्य तदनुष्ठानोपयोग्यर्थावगतेरपि कल्पयितुं शक्यत्वेन गुरुमुखाधीनन्यायविचारलब्धतात्पर्यनिर्णयात्मकेऽर्थावगतिकारणे श्रवण एव व्यभिचारपर्यवसानात्। तस्माद् द्रष्टव्य इत्यत्र दृशिधातोश्चाक्षुषसाक्षात्कारवाचकस्य मानससाक्षात्कारेऽपि लक्षणायाः कल्पनीयत्वात् तं विहाय स्वसन्निहितश्रवणविध्याकाङ्क्षानुसारेणावगतिसामान्ये लक्षणाकल्पनं युक्तम्। तथा चागममूलेऽर्थे पुत्रेष्टिकारीर्यादिन्यायेनोभयतो व्यभिचारदर्शनं न दोष इति व्यभिचारदर्शने सत्यप्यपूर्वविधिरभ्युपगन्तुं शक्य इति। एवमपूर्वविध्याशङ्कायां सत्यामनुमानेन प्राप्तिसमर्थनं संगच्छत एव।

नन्वस्त्वेतदेवं तथाप्यनुमानमनुपपन्नम्। तथाहि—अत्र वेदान्तशब्दमात्रगोचरज्ञानं पक्षः, उत तत्तात्पर्यावधारणम्? नाद्यः, तत्रार्थावगतिसाधनत्वस्या-

नुमानतः प्राप्तावपि श्रोतव्य इत्यत्र श्रवणशब्दार्थत्वेनाभिमते तात्पर्यावधारणे तदप्राप्त्या तद्विधिनिरासासिद्धिप्रसङ्गात् । न द्वितीयः, तात्पर्यज्ञानस्य वाक्यार्थावगतिकारणत्वे मानाभावेन दृष्टान्तस्य साध्यवैकल्यात् । ननु 'अहो विमलं जलं नद्याः कच्छे महिषश्चरति' इत्यत्र नद्याः कच्छेनान्वये तात्पर्यं जलेन वेति तात्पर्यसंशये जलेनान्वये तात्पर्यं नास्तीति तद्व्यतिरेकनिश्चये च जलनदीसंसर्गगोचरवाक्यार्थावगत्यभावाद् यत्संशयव्यतिरेकनिश्चयौ यत्प्रतिबन्धकौ तन्निश्चयस्तद्धेतुः, यथा व्याप्तिनिश्चयोऽनुमितिहेतुरिति नियमप्रसूतमनुमानं तत्र मानम् । न चाप्रयोज[कत्वात् ? त्वम्], तात्पर्यसंशयव्यतिरेकनिश्चययोर्वाक्यार्थज्ञानप्रतिबन्धकत्वनिर्वाहार्थं तदुभयाभावद्वयस्य तदुभयविरोधिनस्तात्पर्यनिश्चयस्य वाक्यार्थज्ञानकारणत्वेऽवश्याभ्युपगन्तव्ये लाघवात् तात्पर्यनिश्चय एव कारणत्वेनाभ्युपगन्तुं युक्त इति लाघवतर्कसत्त्वात् । न च वाच्यं तात्पर्यज्ञानं वाक्यार्थावगतौ कारणमङ्गीकुर्वतापि समभिव्याहृतपदानामेकप्रतीतिजनकत्वलक्षणैकप्रयोजनकत्वज्ञानमपि तत्र कारणमङ्गीकरणीयम्, अन्यथा 'रक्तः पटो भवति' इत्यत्र रक्तगुणस्य विषयाकाङ्क्षोत्थापनाभावप्रसङ्गात्, रक्तगुणस्य पटान्वये तात्पर्यावगतावपि रक्तपदस्य केनचित् पदेनान्विताभिधाननियमेऽपि 'अयं रक्तो भवति', 'पटो भवति' इत्यनुषङ्गाध्याहाराभ्यां तात्पर्यान्विताभिधानयोरुपपन्नत्वेन रक्ताकाङ्क्षोत्थापनस्य रक्तादिपदत्रयविषयैकप्रयोजनकत्वज्ञानेनैव निर्वाह्यत्वात् ।

तथा च नदीपदस्य जलपदेन सहैकप्रयोजनकत्वज्ञाने सति तात्पर्यसंशयादिना तदन्वयावगतिप्रतिबन्धो न सम्प्रतिपन्न इति । एकप्रयोजनकत्वाज्ञाने सत्यपि लोके 'हस्तेन दीर्घेण कुठारेण वृक्षं छिनत्ति' इत्यत्र दीर्घगुणस्य हस्तान्वये तात्पर्यं कुठारान्वये वेति सन्देहे कुठारान्वये न तात्पर्यमिति व्यतिरेकनिश्चये च दैर्घ्यकुठारसंसर्गावगत्यनुदयेन वेदेऽपि "उपसद्भिश्चरित्वा मासमग्निहोत्रं जुहोति" (तां० ब्रा० २५.४.१) इत्यत्र मासगुणस्योपसदन्वये तात्पर्यमग्निहोत्रान्वये वेति तात्पर्यसंशयेऽग्निहोत्रहोमान्वये न तात्पर्यमिति तद्व्यतिरेकनिश्चये च मासाग्निहोत्रहोमसंसर्गावगत्यनुदयेन च तात्पर्यसंशयव्यतिरेकनिश्चययोः प्रतिबन्धकत्वसिद्धेरिति चेन्मैवम्, अनुमानमूलतयोपन्यस्तस्य नियमस्यासिद्धेः । अत्र प्रतिबन्धकत्वं कारणीभूताभावप्रतियोगित्वमिति विवक्षायां व्याप्तिसंशये तद्व्यतिरेकनिश्चये चानुमित्यनुदयस्य व्याप्तिनिश्चयरूपहेतुत्वाभावप्रयुक्ततया तदभावयोरनुमितिहेतुत्वे प्रमाणाभावेन दृष्टान्ते साधनवैकल्यादन्यस्यापि व्याप्तिग्रह-

स्थानस्याभावात् कार्यानुत्पादनियतत्वं प्रतिबन्धकत्वमिति विवक्षायां व्याप्ति-निश्चये प्रामाण्यसंशयव्यतिरेकनिश्चययोरनुमितिप्रतिबन्धकत्वेऽपि तत्प्रामाण्य-निश्चयस्यानुमितिहेतुत्वाभावेन तत्र व्यभिचारात् प्रवर्तकज्ञानप्रामाण्यसंशय-व्यतिरेकनिश्चययोः प्रवृत्तिप्रतिबन्धकत्वेऽपि तत्प्रामाण्यनिश्चयस्य प्रवृत्तिहेतु-त्वाभावेन तत्रापि व्यभिचाराच्च।

न च वाच्यं यत्र कृष्यादिप्रवृत्तौ प्रामाण्यनिश्चयस्य हेतुता नास्ति तत्र तत्संशयस्य प्रतिबन्धकत्वमपि नास्ति, यत्र तदस्ति बहुवित्तव्ययायाससाध्य-प्रवृत्तौ तत्र प्रामाण्यनिश्चयस्य हेतुतेष्यत एव, अतो न क्वापि व्यभिचार इति, प्रामाण्यनिश्चयतत्प्रामाण्यनिश्चयादिपरम्परान्तर्गतयत्किञ्चिन्निश्चय-गोचरप्रामाण्यसंशये तद्व्यतिरेकनिश्चये वा सति तथाभूतप्रवृत्त्यनुदयेन तयोस्तत्प्रतिबन्धकत्वेऽपि तत्प्रामाण्यनिश्चयपरम्परायास्तद्धेतुत्वाभावेन व्यभिचारात्, तस्यास्तद्धेतुत्वेऽनवस्थानात्, उक्तनियममूलानुमानबलेन कर्मब्रह्मभागतात्पर्यनिश्चययोः स्वर्गमोक्षपर्यन्तहेतुत्वापत्तेश्च। अपि च, तात्पर्यसंशयस्य वाक्यार्थावगतिप्रतिबन्धकत्वमङ्गीकुर्वतापि तात्पर्यसंशयात् प्रागेव नद्यादिपदस्योभयतो योजनास्फुरणाद् उभयथापि वाक्यार्थावगति-र्निष्पन्नेत्यभ्युपगन्तव्यम्, अन्यथा कोटिद्वयोपस्थित्यभावेन किं नदीजल-संसर्गे तात्पर्यमुत नदीकच्छसंसर्ग इत्यादिसंशयायोगात्। न च जलनदी-कच्छेषु पदस्मारितेषु नद्याः कच्छजलसंसर्गावगमो मनसैव स्यादिति वाच्यम्, उभयथा वाक्यार्थः स्फुरति क्व तात्पर्यमिति न निश्चीयत इति सकललोक-सिद्धव्यवहारानुसारेण वाक्यजन्यसंसर्गावगमयोरेव संशये कोटिद्वयसमर्प-कत्वस्याङ्गीकर्तव्यत्वात्। अन्यथा 'विमलं नद्या जलं कच्छे महिषश्चरति' इत्यत्रापि नद्यादिपदार्थस्मृतिरूपकारणवशान्मानसं नदीजलयोरिव नदी-कच्छयोरपि संसर्गज्ञानं जायेत। न चात्र नदीपदस्य कच्छपदसन्निधाना-भावान्न नदीकच्छसंसर्गज्ञानं जायत इति वाच्यम्, आसत्तेर्वाक्यार्थज्ञान एवोपयुक्तत्वेन मानससंसर्गज्ञाने तदुपयोगाभावात्, पदजन्यपदार्थस्मृत्यनन्तर-भाविमानससंसर्गज्ञाने तदुपयोगकल्पने सर्वत्रापि तत्तत्सहकारिविशेषयुक्तेन तु मनसैव संसर्गज्ञानमिति वक्तुं शक्यत्वेन प्रमाणान्तरविलोपापत्तेः, वेद-वाक्यार्थानां प्रमाणान्तरतः प्राप्तिरहितत्वेनाभ्युपगतानां वेदवाक्येभ्य एव प्रथममुपस्थितेः सर्वत्र वक्तव्यत्वेन तेषु दृश्यमानस्य तात्पर्यसंशयस्य निर्वा-हार्थमपेक्षितयोः कल्पिताकल्पितवेदवाक्यार्थज्ञानयोः पूर्वपक्षसिद्धान्ताव-लम्बिन्यायोपष्टब्धवाक्यजन्यत्वस्यैवावश्यमङ्गीकर्तव्यत्वाच्च। तथा च

तात्पर्यसंशयकारणीभूतवाक्यार्थज्ञाने व्यभिचारेण तात्पर्यनिश्चयस्याकारणत्वनिश्चयाद् बाधितविषयमनुमानमिति न तेन तात्पर्यनिश्चयस्य वाक्यार्थज्ञानकारणत्वसिद्धिः। यथा व्याप्यकोट्यन्तर्गततात्पर्यसंशयकारणे वाक्यार्थज्ञाने व्यभिचारः, एवं पक्षीकर्तव्यतात्पर्यनिश्चयकारणेऽपि तस्मिन् व्यभिचारः। अस्मिन्नर्थे वाक्यस्य तात्पर्यमिति ज्ञानं हि वाक्यार्थावच्छिन्नतात्पर्यविषयं वाक्यार्थज्ञानमपेक्षते। तद् यद्यपि लोके क्वचित् क्वचिद् वाक्यादन्यतोऽपि सम्भवति, तथाप्यप्राप्तविषये वेदे वाक्यादेव तदेष्टव्यम्। सामान्यतो वाक्यार्थावच्छिन्नतात्पर्यज्ञानं कारणं न तु विशेषत इति चेत्तर्हि वाक्यार्थविशेषावच्छिन्नतात्पर्यसंशयव्यतिरेकनिश्चययोर्वाक्यार्थावगतौ प्रतिबन्धकत्वेऽपि तन्निश्चयस्य तत्र हेतुत्वं नास्तीति तत्रैवोपन्यस्तनियमस्य व्यभिचारः स्यात्। तस्मादुक्तनियममभ्युपगच्छता तद्व्यभिचारपरिहारार्थं वाक्यार्थविशेषावच्छिन्नतात्पर्यनिश्चय एव वाक्यार्थज्ञानकारणत्वेन समर्थनीय इति तत्कारणत्वपरिपन्थी सुस्थो व्यभिचारः। यथा तात्पर्यज्ञानकारणे वाक्यार्थज्ञाने व्यभिचारः, तथा तात्पर्यानुमापकोपक्रमादिलिङ्गज्ञानकारणेऽपि तस्मिन् व्यभिचारः। वेदेऽप्युपक्रमादिलिङ्गाधीनं तात्पर्यज्ञानमिष्यते। तानि च षडपि लिङ्गानि वाक्यार्थज्ञानाधीनोन्मेषाणि।

तथा हि—येनार्थेनोपक्रम्यते तेनैवोपसंहार उपक्रमोपसंहारैकरूप्यम्। उक्तस्यैवार्थस्य पुनः कथनमभ्यासः। उक्तार्थस्य मानान्तरेणाप्राप्तिरपूर्वता। उक्तार्थानुगुणतया वर्ण्यमानः पुरुषार्थः फलम्। उक्तार्थस्तुतिपर्यवसायी शब्दनिकरोऽर्थवादः। उक्तार्थोपपादकतया वेदेन निबध्यमाना न्यायविद्भिरूह्यमाना वा युक्तिरुपपत्तिः। सर्वाण्येतानि लिङ्गानि वाक्यार्थावगत्यधीनज्ञानानीति स्पष्टमेव। तत्रापि वाक्यार्थज्ञाने तात्पर्यज्ञानस्य कारणत्वाभ्युपगमे तदर्थमप्युपक्रमाद्यन्यतमलिङ्गान्वेषणावश्यंभावादनवस्था स्यात्। तस्मादनुमानमूलव्याप्त्यसिद्धेरनुमानस्य बाधितविषयत्वाच्च न तेन तात्पर्यनिर्णयस्य वाक्यार्थज्ञानकारणत्वसिद्धिः। अतो दृष्टान्तस्य साध्यवैकल्येन व्याप्त्यसिद्ध्या विषयबाधाच्च मूलानुमानमप्ययुक्तम्। हेतुविशेषणवैयर्थ्याच्च तात्पर्यावधारणमर्थावगतिसाधनमभ्युपगच्छतो लौकिकवाक्यार्थावगतावपि तत्साधनमेवेति किं शास्त्रविशेषणेनेति।

अत्रोच्यते—तात्पर्यज्ञानस्य वाक्यार्थज्ञाने कारणत्वाभावेऽप्ययमेव वाक्यार्थ इत्यवधारणे तात्पर्यसंशयानन्तरभाविनि कारणत्वमस्ति, अनेकविधयोजनास्फुरणादिनाऽनेकधा वाक्यार्थस्फुरणेनानेकधा वाक्यार्थज्ञानोदये

सति लोके वक्त्रभिप्रायान्वेषणेन वेदे न्यायान्वेषणेन च क्वचिदर्थे तात्पर्यनिर्णयानन्तरमयमेव वाक्यार्थ इत्यवधारणोत्पत्तेरनुभवसिद्धत्वात् । अत्र यद्यपि वाक्यार्थत्वं न वाक्यजन्यप्रतीतिविषयत्वम्, तात्पर्याविषयेऽपि प्रतीतिसत्त्वेनायमेव वाक्यजन्यप्रतीतिविषय इत्यवधारणायोगात् । नापि तज्जन्यप्रमितिविषयत्वम्, 'श्वेतो धावति' इति वाक्यात् समीपे धावति शुनके श्वा इतो धावतीति ज्ञानस्य तत्रैव धावति श्वेताश्वे 'श्वेतो धावति' इति ज्ञानस्य चोदये सत्युभयोरपि ज्ञानयोः प्रमात्वेन क्वचिदर्थे तात्पर्यनिर्णयेऽप्ययमेव वाक्यजन्यप्रमितिविषय इत्यवधारणायोगात् । किन्तु वाक्योद्देश्यप्रतीतिविषयत्वं तद् उद्देश्यत्वं तच्छेषित्वम् । अध्ययनसंस्कृतस्वाध्यायस्य क्वचन शेषिणि विनियोगाकाङ्क्षायां लिङ्गात् सामान्यतोऽर्थज्ञाने विनियोगावगमे सत्युपक्रमादिलिङ्गैर्विशिष्य यस्य वाक्यस्य यत्रार्थे तात्पर्यमवसितं तदर्थज्ञाने तस्य विनियोगो विशिष्यावगम्यते । लोकेऽपि वक्त्रभिप्रायतः क्वचिदर्थे वाक्यस्य तात्पर्यावगमे सति तज्ज्ञानमेव तस्योद्देश्यं शेषीत्यवसीयते । अर्थान्तरज्ञानं तेन जातमपि न तदुद्देश्यम् । यथा जामातृभोजनमुद्दिश्य कृतेन सूपेन कदाचित् सूपपाकाप्रयोजकस्यातिथेर्भोजनमपि निर्वर्तत इत्येतावता तद्भोजनं सूपपाकस्य नोद्देश्यम् । एवं च स्वविषयोपात्तावगतिसाधनमिति साध्यनिर्देशस्य श्रवणविषयेण शास्त्रेण यदुपात्तं प्रतिपादितम्, तज्जनितज्ञानविषयीकृतमिति यावत्, तद्विषया याऽवगतिः, अयमेव वाक्यार्थ इत्यवधारणरूपा तात्पर्यसंशये सति तन्निर्णयानन्तरभावि द्वितीयज्ञानं तत्साधनमित्यर्थः । अतो न दृष्टान्ते साध्यवैकल्यं नापि पक्षे साध्यस्य बाधः ।

आत्मावगतिसाधनत्वेन श्रवणे विधिमङ्गीकुर्वताऽपि वेदान्तवाक्यानामात्मैवार्थ इत्यवधारणरूपावगतिसाधनत्वेनैव तत्र विधिरङ्गीकर्तव्यः, तात्पर्यसंशयात् प्रागपि वेदान्तवाक्येभ्योऽङ्गाध्ययनबलादात्मावगतिसद्भावेन तन्मात्रे इच्छोदयासम्भवात् । ततश्च विधिविषयत्वाभिमतस्यैवानुमानतः प्राप्तेर्न तस्मिन्नपूर्वविधेरवकाश इति सङ्गच्छत एव । अत्र साध्ये श्रवणत्वादित्येतावान् हेतुर्न भवति, यल्लौकिकं वाक्यं केनचिदेव श्रुतं वक्तुरेवोपदेशेन तत्तात्पर्यनिश्चयोऽपि जातः, न तु तात्पर्यनिश्चयात् पूर्वं तत्संशयः, तदनन्तरं वाक्यार्थावधारणं वा, तत्र तात्पर्यनिश्चये व्यभिचारात् । न च तत्रापि स्वविषयोपात्तावगतिं प्रति साधनत्वयोग्यताऽस्तीति शङ्क्यम्, तत्र तात्पर्यनिश्चयविषयेण तेन वाक्येन प्रतिपादितेऽर्थे कस्यापि पुरुषस्यायमेवास्य वाक्यस्यार्थ इत्यवधारणानुदयेनात्यन्ताप्रसिद्धकार्यं प्रति योग्यत्वस्याप्य-

सम्भवात् । अतस्तत्र व्यभिचारवारणार्थं तात्पर्यसंशयतदनन्तरभाव्यर्थावधारणविषयवाक्यश्रवणत्वादिति हेतुर्विशेषणीयः । तथाभूतवाक्योपलक्षणतया भाष्ये शास्त्रग्रहणं कृतम् । प्रायेण गहनेषु शास्त्रेष्वेव तात्पर्यसंशयस्तन्निश्चायकप्रमाणान्वेषणेनायमेवास्य वाक्यस्यार्थ इत्यवधारणं च भवतीति । तस्माद्युक्तमिदमनुमानम् ।

स्यादेतत्—वेदान्तश्रवणे लोकावगतफलार्थिनः काव्यालोकनादिष्विव प्रवृत्तौ "आचान्तेन कर्तव्यं यज्ञोपवीतिना कर्तव्यम्" इति वैदिककर्माङ्गत्वेन विहितमाचमनादिकमङ्गं न प्राप्नुयात्, किन्तु विध्यवगतफलार्थिनः प्रवृत्तावेव प्राप्नुयात् । तथा च तत्प्राप्त्यर्थश्रवणविधिरपूर्वविधिः स्यात् । नहि विधिविषयप्राप्त्यर्थ एवापूर्वविधिः, किन्तु विधिविषयादन्यस्यापि विना तद्विधिमसम्भवत्प्राप्तिकस्य प्राप्त्यर्थोऽपि विधिरपूर्वविधिः । अत एव—"अथातोऽग्निमग्निष्टोमेनानुयजन्ति तमुक्थ्येन तमतिरात्रेण तं द्विरात्रेण तं त्रिरात्रेण" इत्यादिवाक्यगणे त्रिरात्रादिष्वग्निविधिरपूर्वविधिः । नहि तत्र द्विरात्रादिषु विधेयस्याग्नेः प्राप्त्यर्थो विधिः, "अग्निष्टोमेनानुयजन्ति" इति सर्वसोमयागप्रकृतिभूतेऽग्निष्टोमे विहितस्य तस्य तेष्वतिदेशतः प्राप्तिसम्भवात्, किन्त्वग्निप्रकरणे "श्येनचितं चिन्वीत स्वर्गकामः" (तै० सं० ५.४.११.१) इत्यादिवाक्यैः स्वर्गादिफलार्थतया विहितानामग्निशब्दोक्तस्थण्डिलविशेषाश्रितानां श्येनाकृत्यादिगुणानां प्राप्त्यर्थः । न खलु तेषामप्यतिदेशतः प्राप्तिः सम्भवति । विकृतीनामितिकर्तव्यतापेक्षानुरोधेन प्राकृतानामङ्गानामेवातिदेशः, न तु फलान्तरार्थानां तदाश्रितगुणानामित्यष्टमाध्याये—"गुणकामेष्वाश्रितत्वात् प्रवृत्तिः स्यात्" (जै० ८.१.२३), "निवृत्तिर्वा कर्मभेदात्" (जै० ८.१.२४) इति पूर्वोत्तरपक्षसूत्राभ्यां निर्णीतत्वात् । तस्मात् तत्तत्प्राप्तिरनुमानेनेत्येतदयुक्तम्, श्रवणविधिप्रापणीयस्य कृत्स्नस्याप्युक्तानुमानेन प्राप्त्यसम्भवादिति शङ्कानिराकरणार्थमित्यादिभिरित्युक्तम् श्रवणविधिरवगत्यर्थतया श्रवणे प्रवृत्त्यर्थश्चेत् सा प्रवृत्तिरुक्तानुमानबलात् सिध्यति । तदङ्गनियमप्रवृत्त्यर्थश्चेत्सापि श्रुत्यन्तरादिभिः सिध्यतीत्यादिग्रहणाभिप्रायः ।

तथा हि—यद्यपि लोकसिद्धफलार्थितया रागत एव वेदान्तश्रवणे प्रवृत्तिस्तथापि तदनुबन्धिनो नियमाः श्रूयन्ते, "परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन । तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम् ॥ तस्मै स विद्वानुपसन्नाय सम्यक् प्रशान्तचित्ताय शमान्विताय येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्म-

श्रवणत्वात्, वैद्यशास्त्रश्रवणवदित्यादिभिः । न चास्य नियम-

विद्याम् ॥" (मुण्डको० १.२.१२-१३) इति । अत्र हि कर्मसम्पाद्या लोकाः सर्वेऽप्यनित्या इति श्रुतिन्यायैर्निरूप्य, अकृतो नित्यः परमशिवलोकः कृतेन कर्मणा न लभ्यत इति च निश्चित्य, यस्तुच्छेषु कर्मफलेषु वैतृष्ण्यं प्राप्नुयात्तस्य परमशिवलोकप्राप्तिहेतुभूततदुपासनासिद्ध्यर्थमुपासनीयपरब्रह्मपरमशिवस्वरूपनिर्णयाय तदुपासनातदङ्गजातावधारणाय च वेदान्तानां तात्पर्यं निर्णिनीषोस्तन्निर्णयोपायो वेदान्तानामुपक्रमादिविचारः स्वबुद्ध्यैव न कर्तव्यः, किन्तु गुरुमुखादेव लब्धव्यः । गुरुरपि न यः कश्चन, किन्तु श्रुतनिखिलवेदान्तः परब्रह्मोपासनापरश्च । तस्य च स्वसमीपं प्रत्याकारणं न कार्यम्, किन्तु स्वयमेव तदुपसदनं कर्तव्यम् । तच्च समित्पाणित्वनियमयुक्तेन कर्तव्यम् । तेन नियमेनान्यैश्च श्रुत्यन्तरावगतैर्नियमैरुपसन्नं बाह्यान्तरेन्द्रियजययुक्तं शिष्यं परीक्ष्य स यया परमशिवसाक्षात्कारोपायभूतया निर्विचिकित्सं परं ब्रह्म वेद, तामुपक्रमादिलिङ्गावगमिततात्पर्यभरितां परमब्रह्मविषयिणीं वेदान्तविद्यां प्रब्रूयादित्युच्यते । स्मृतिपुराणेषु च वेदान्तश्रवणे गुरुशिष्यक्रमकथने बहवो नियमाः प्रतिपाद्यन्ते । वेदान्तार्थचिन्तनं च वेदान्तचिन्तनाधीनम् । वेदसामान्यचिन्तनमेव शुचित्वादिनियमयुक्तेन कर्तव्यम्, "नाधीयीत वायौ दिवा पांसुहरे कर्णश्राविणि नक्तम्" इत्यादिना वेदानध्ययननिमित्तजातमुपक्रम्य "मानसमप्यशुचिः" इति शुचित्वाभावे मनसाऽपि वेदचिन्तनं न कार्यमिति प्रतिषिद्धत्वात् । सामान्यतश्च सच्छास्त्रार्थचिन्तनं यथावदर्थस्फूर्तये शुचित्वादिनियमयुक्तेन कार्यम् । "पुण्ये हिमवतः पादे मध्ये गिरिगुहालये । संशोध्य देहं धर्मात्मा दर्भसंस्तरमाश्रितः ॥ शुचिः सन्नियमो व्यासः शान्तात्मा तपसि स्थितः । भारतस्येतिहासस्य धर्मेणान्वीक्ष्य तां गतिम् ॥ प्रविश्य योगं ध्यानेन सोऽपश्यत् सर्वमन्ततः ॥" (१.२२.१-५ प०) इति भारतलिङ्गात्, "प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुद्धेऽवकाशे प्राङ्मुख उपविश्य महता यत्नेन सूत्राणि प्रणयति स्म । तत्राशक्यं वर्णेनाप्यनर्थकेन भवितुं किं पुनरियता सूत्रेण" (पस्पशाह्निके) इति महाभाष्यलिङ्गाच्च । तस्माद् बहुभिः प्रकारैर्वेदान्तश्रवणे शुचित्वादिनियमानां प्राप्तिसत्त्वात् तत्प्राप्तमर्थमपि न तत्रापूर्वविधिरङ्गीकर्तव्यः ।

एवं तावदपूर्वविधिः श्रवणे न सम्भवतीत्युक्तम्, तथा नियमविधिरपि

विधिगोचरत्वम्, अवघातादिवत् कस्यचिद्दृष्टफलस्योपायान्तर-

तत्र न सम्भवतीत्याह—न चास्येति। नियमः क्वचिदुपायविषयो दृश्यते। यथा व्रीहीनवहन्तीति। अत्र पुरोडाशप्रकृतिभूतानां व्रीहीणामपेक्षिते तण्डुलभावे नखविदलनस्याप्युपायान्तरस्य पक्षे प्राप्तावपहननमेवोपाय इति नियम्यते। क्वचित् कार्यविषयो दृश्यते। यथा—"यद्योन्यां तदुत्तरयोर्गायति" इति क्रतुषु स्तोत्रसाधनानां साम्नां यथाध्ययनमेकस्यामृचि गानप्राप्तौ "एकं साम त्र्यृचे क्रियते स्तोत्रीयम्" इति वचनात् त्र्यृचे तानि गातव्यानि। ततश्च वामदेव्यादिसाम्नां क्रतुष्वन्ययोरपि संशरविलेशपरिहारार्थं योनिसमच्छन्दस्कयोरुत्तरयोस्तदन्ययोर्वा कयोश्चिदृचोः संकार्यत्वप्राप्तावुत्तरयोरेव संस्कार्यत्वमिति नियम्यते। क्वचिदुभयनियमः। यथा "यज्जुह्वां गृह्णाति प्रयाजेभ्यस्तत्" इति। अत्र "समिधो यजति" (तै० सं० २.६.१.१) इत्यादिवाक्यैर्द्रव्यविशेषासंयुक्तत्वेनोत्पन्नानां प्रयाजानां साधनत्वेनानियतानेकद्रव्यप्राप्तौ जौहवाज्येनैव प्रयाजाः कर्तव्या इत्युपायनियमः। "चतुर्जुह्वां गृह्णाति" इति कार्यविशेषासंयुक्ततयोत्पन्नस्य जौहवाज्यस्य कार्याकाङ्क्षायां पाक्षिकानेककार्यप्राप्तौ जौहवाज्येन प्रयाजा एव कर्तव्या इति कार्यनियमश्च। अत्र वेदान्तार्थावधारणस्य वेदान्ततात्पर्यनिर्णयस्य च कार्योपायभावबोधकविध्यङ्गीकारे न तावदुपायनियमः सम्भवेन्नापि कार्यनियमो न चोभयनियमः, तात्पर्यनिर्णयैकोपायत्वाद्वाक्यार्थावधारणस्य तात्पर्यनिर्णयस्य च वाक्यार्थावधारणैककार्यत्वादित्यभिप्रेत्याह—अवघातादिवदिति। उपायनियमव्युदासे दृष्टफलस्येति बहुव्रीहिः। कार्यनियमव्युदासे समानाधिकरणसमासः। समासद्वयमपेक्ष्योभयनियमव्युदासः।

नन्वस्य वाक्यस्यायमर्थ इति प्रतिवाक्यमाप्तोपदेशेनाप्यापाततोऽनेकधा वाक्यार्थप्रतीतिमतामयमेव वाक्यार्थ इत्यवधारणं लभ्यत इत्युपदेशरूपोपायान्तरस्य पक्षप्राप्तावुपायनियमः किं न स्यात्? न स्यात्। सर्वेषां वेदान्तवाक्यानां न्यायैस्तात्पर्यावधारणं हि श्रवणम्। तत्र विधिरभ्युपगम्यते चेत्, सर्वेषामपि वेदान्तवाक्यानां प्रतिवाक्यमयमेवास्य वाक्यस्यार्थ इत्यवधारणं फलं पर्यवस्यति, न चेत् फलमुपदेशेन लभ्यते, वाक्यानामानन्त्येन प्रतिवाक्यमुपदेशासम्भवात्, एकरूपवाक्येषु न्यायप्राप्तस्यार्थभेदस्य तदुपपादकन्यायानुसन्धानं विना मनस्यसंकरेण धारणासम्भवाच्च। यद्यपि प्रतिवाक्यं तात्पर्यावधारणमपि न सम्भवति, दूरे ततस्तदर्थावधारणम्, तथापि न्यायविचारतः सामर्थ्यरूपेण तदुभयावधारणसम्पादनं सम्भवति। न च

सर्ववेदान्ततात्पर्यनिर्णयानुकूलन्यायैतावत्वाज्ञानात् सामर्थ्यरूपेणापि तदुभयसम्पादनं न सम्भवतीति वाच्यम्, अस्मदादिभिः खलु तन्न ज्ञायते। भगवता सूत्रकारेण ज्ञायत एव, यस्तान् सर्वान् न्यायान् निबध्य तत्तन्न्यायविषयतया सूत्रगृहीतेभ्योऽन्येषामपि सर्वेषां वेदान्तवाक्यानां यथायथं तैरेवन्यायैस्तात्पर्यावधारणमित्यतिदिदेश—"एतेन सर्वे व्याख्याताः" (ब्र० १.४.२८) इति। तस्माद् गुरुमुखलब्धकृत्स्नन्यायविचाराधीनसर्ववेदान्ततात्पर्यावधारणसामर्थ्यसम्पादनेन तेषां परमात्मा शिव एवार्थ इत्यर्थावधारणसामर्थ्यं सम्पादयेदित्येवं पर्यवसिते विधौ नोपायान्तरप्रसक्तिरस्ति, स्वरूपतः कतिपयवाक्यार्थोपदेशस्य सर्ववेदान्तार्थावधारणसामर्थ्यसम्पादकत्वाभावात्।

ननु वेदान्तवाक्यार्थावधारणं नादृष्टार्थमिष्यते, किन्तु मोक्षसाधनसाक्षात्कारहेतुभूतविद्यानुष्ठानार्थम्। तत्तु वेदान्तसमानार्थस्मृतीतिहासपुराणपौरुषेयग्रन्थाद्यर्थावधारणेनापि सम्भवतीत्येवं विद्यानुष्ठानोपयोगिज्ञाने उपायान्तरप्राप्तौ वेदान्तोपायनियमः किं न स्यात्? धीमतः स्वमनीषिकया विचारेणापि तात्पर्यनिर्णयप्राप्तौ गुरुमुखोपायनियमो वा किं न स्यात्? न तावद्वेदान्तोपायनियमापेक्षास्ति, अध्ययनसंस्कृतानां वेदान्तानां विनियोगाकाङ्क्षया विद्यानुष्ठानोपयोगिविद्यातद्वेद्यतत्फलज्ञानस्य साधनापेक्षया चान्योन्यान्वये सति तत एव वेदान्तनियमसिद्धेः। नहि ब्राह्मणानां स्वकीयो धनार्जनोपाय इति याजनाकाङ्क्षया क्रतूनामृत्विगाकाङ्क्षया चान्योन्यान्वये सति ब्राह्मणानामेवार्त्विज्यमिति नियमो न सिद्ध्यति। एवं स्वस्वशाखान्तर्गतवेदान्तवाक्येष्वध्ययनसंस्कृतैस्तैरेव तदर्थावधारणं सम्पादनीयमिति नियमसिद्धौ तदर्थं तत्तात्पर्यनिर्णयाय वेदान्तमीमांसाश्रवणे क्रियमाणे विद्यातद्वेद्यादिनिर्णयोपयोगिशाखान्तरगतवेदान्तवाक्यार्थावधारणापेक्षिततत्तात्पर्यावधारणमपि ततः सिद्ध्यतीति न शाखान्तरगतवेदान्तवाक्यार्थावधारणेऽपि पुराणाद्युपायान्तरप्रसक्तिः। सोऽयं नियमानुनिष्पादिनियमः। यथा नाराशंसतनूनपान्मन्त्रयोर्द्वितीयप्रयाजस्थानपठितयोरव्यवस्थितविकल्पे प्राप्ते "राजन्यवसिष्ठादीनां नाराशंसो द्वितीयः प्रयाजस्तनूनपादन्येषाम्" इति विधिना तद्व्यवस्थारूपनियमसिद्धौ तदनुनिष्पादितुल्यकल्पा एव सत्रेष्वधिकारिण इति नियमः, नाराशंसकल्पानां तनूनपात्कल्पानां च सत्रे सम्भूय प्रवृत्तौ तदन्तर्गतप्रयाजेष्वन्यतरकल्पस्यैवाश्रयणीयतया केषाञ्चिद्यजमानानां क्रतुवैगुण्यप्रसङ्गात्। तस्मान्न वेदान्तोपायनियमापेक्षा। अन्यथा कर्मानुष्ठानोपयोगिनि कर्मकाण्डार्थनिर्णये तत्समानार्थस्य कल्पसूत्राद्युपायान्तरस्य पक्षे

प्राप्त्या तत्रापि कर्मकाण्डोपायनियमापेक्षायां कश्चिन्नियमविधिरन्वेषणीयः स्यात् ।

ननु तथापि गुरुमुखोपायनियमापेक्षाऽस्ति, कर्मकाण्डविचारे ह्यध्ययनार्थाद् गुरुकुलवासान्निवृत्तेः प्राग्भाविन्यनुवर्तमानं स्वप्रयत्नानपेक्षं गुरुमुखोपायं परित्यज्य न स्वमनीषिकामात्रव्यापारक्लेशे प्रवृत्तिः प्रसज्यते। इह तु मुमुक्षादिसाधनसम्पत्तिमपेक्ष्य पश्चादपि प्राप्तिमति वेदान्तविचारे यत्नान्तरसाध्यत्वाविशेषाद् गुर्वन्वेषणमिव कदाचित् स्वमनीषिकाव्यापारेऽपि प्रवृत्तिः स्यादिति । सत्यमस्ति गुरुमुखोपायनियमापेक्षा । तदर्थमपि न श्रवणविधिरङ्गीकार्यः, "तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्" (मुण्डको० १.२.१२) इति गुरूपसदनविधिनैव तत्सिद्धेः । विज्ञानार्थतया विधीयमानं गुरूपसदनं हि दृष्टद्वारसम्भवेऽदृष्टकल्पनायोगाद् गुरुमुखाधीनवेदान्तविचारद्वारैव विज्ञानार्थं पर्यवस्यति ।

ननु माभूदत्रोपायनियमः, उपेयनियमोऽस्तु, "दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः" (१.१.२) इति न्यायसूत्रोक्तरीत्या देहात्मभ्रमनिवर्तकं देहविविक्तजीवात्मज्ञानमेव मोक्षसाधनमिति भ्रमात् तदनुकूलवेदान्तयोजनापरशास्त्रान्तरश्रवणेऽपि प्रवृत्तिः स्यादित्यात्मैव श्रोतव्य इति नियम्यते । आत्मशब्दोऽत्र वाक्यान्वयाधिकरणोक्तरीत्या चेतनाचेतनात्मकसकलप्रपञ्चविशिष्टाद्वितीयपरमात्मपर इत्यभिमतनियमसिद्धिः । न च वाच्यं यथाऽवहनननियमे वस्तुतो लोके वैतुष्यसाधनस्य कोट्यन्तरस्य प्राप्तिः, नैवमिह वस्तुसत्कोट्यन्तरप्राप्तिरस्तीति तदभावेऽपि भ्रमोपनीतकोट्यन्तरस्य पक्षे प्राप्तिमात्रेण विधित्सितस्य पाक्षिक्यप्राप्तिरस्तीति तावता तदप्राप्तांशपरिपूरणार्थनियमविध्युपपत्तेः । नह्यवहनननियमविधौ यादृशी कोट्यन्तरस्य प्राप्तिस्तादृश्या सर्वत्र भाव्यमिति नियमः । "व्रीहिभिर्यजेत" (आप० श्रौ० ६.३१.१३) इति विधेः "यवैर्यजेत" (आप० श्रौ० ६.३१.१३) इति विध्यसिद्धिमपेक्ष्य व्रीहीणां नीवारादीनां च पक्षप्राप्त्या नीवारादिपक्षेऽपि व्रीहीणां संयोजनेन नियमविधेः समर्थनीयत्वात्, "व्रीहीनवहन्ति"(आप० श्रौ० १.१९.११) इत्यत्र कस्यचिद् विध्यन्तरस्यासिद्धवद्भावमनपेक्ष्यैव नियमसद्भावादिति चेन्मैवम्, ईश्वरानुग्रहलब्धतात्त्विकार्थश्रद्धारहितस्य श्रवणविधिवाक्येऽपि पराभिमतयोजनया जीवात्मविचारविधिपरत्वभ्रमसम्भवेन भ्रमप्रयुक्ताया अन्यत्र प्रवृत्तेर्विधिशतेनाप्यपरिहार्यतयोक्तरूपनियमविध्ययोगात् । तस्मान्नियमविधिपक्षोऽपि न सङ्गच्छते ।

स्याप्राप्तेः । न च परिसंख्याविधिविषयत्वम्, एवं हि वेदान्ताः श्रोतव्या एव नाध्येतव्या इति पर्यवस्येत् । तथा सत्यनधीतवेदान्तानां विचारायोगात् पुरुषार्थासम्भवः । यदि

तर्हि परिसङ्ख्याऽस्त्विति शङ्कां निराकरोति—न चेति। द्विविधा परिसङ्ख्या सम्भवति। एकस्मिन् शेषिणि शेषद्वयस्य समुच्चित्य प्राप्तौ तयोरेकस्य परिसङ्ख्यैका। यथा–"आज्यभागौ यजति यज्ञतायै" (मै० सं० १.१०.१५) इत्यत्रैकस्मिन् गृहमेधीये शेषिण्याज्यभागतदितराङ्गकलापरूपशेषद्वयप्राप्तौ तदितराङ्गकलापपरिसङ्ख्या। एकस्य शेषस्य समुच्चित्य शेषिद्वयप्राप्तौ तयोरेकस्य परिसङ्ख्या द्वितीया। यथा–"इमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्ते" (तै० सं० ५.१.२) इत्यत्राश्वरशनाग्रहणे गर्दभरशनाग्रहणे चैकस्य मन्त्रस्य इमामगृभ्णन्नित्यस्य रशनाग्रहणप्रकाशनसामर्थ्यरूपलिङ्गाविशेषात् प्राप्तौ गर्दभरशनाग्रहणपरिसङ्ख्या। तत्र "आत्मा श्रोतव्यः" (बृ० उ० २.४.५) इत्यस्य परमात्मा वेदान्तगोचरतात्पर्यावधारणरूपश्रवणविषयीकर्तव्य इत्यर्थपर्यवसाने सत्येकस्मिन् वेदान्तरूपे शेषिणि द्वयोः श्रवणाध्ययनरूपयोः शेषयोः प्राप्तावेकस्याध्ययनस्य परिसङ्ख्येति शेषपरिसङ्ख्या वा स्यात्, द्वयोर्वेदान्तकर्मकाण्डरूपयोः शेषिणोरेकस्य श्रवणरूपशेषस्य प्राप्तौ कर्मकाण्डपरिसङ्ख्येति शेषिपरिसङ्ख्या वा स्यात्, उभयथापि न सम्भवतीत्याह—एवं हीत्यादिना तस्मात् पूर्वोक्तमेव समीचीनमित्यतः प्राक्तनेन ग्रन्थेन।

अत्रेदं चिन्त्यते—उदाहृतशेषशेषिपरिसङ्ख्यान्यायेन वेदान्ताध्ययननिवृत्त्यर्थः परिसङ्ख्याविधिः कर्मकाण्डश्रवणनिवृत्त्यर्थो वेति विकल्प एव नोत्तिष्ठति, उभयत्रापि दोषत्रयापत्तेः। आद्यपक्षे श्रोतव्यवाक्यस्य वेदान्तश्रवणविधिरूपस्वार्थत्यागः, वेदान्ताध्ययननिषेधरूपपरार्थग्रहणम्, अध्ययनविधिप्राप्तस्य वेदान्तभागाध्ययनस्य बाध इति त्रैदोष्यं प्रादुःष्यात्। द्वितीयपक्षेऽपि पूर्ववत् स्वार्थत्यागः, कर्मकाण्डश्रवणनिषेधरूपपदार्थग्रहणम्, अध्ययनविधेरर्थज्ञानपर्यन्तत्वपक्षेऽध्ययनविधिप्राप्तस्याक्षरावाप्तिफलकत्वपक्षेऽध्ययनसंस्कृतस्वाध्यायविनियोगाकाङ्क्षाकल्पितलैङ्गिकविधिप्राप्तस्य च कर्मकाण्डश्रवणस्य बाध इति त्रैदोष्यं प्रादुःष्यात्। उदाहृतशेषशेषिपरिसङ्ख्ययोस्तु न तत्प्रसक्तिः। तथा हि—गृहमेधीयस्योपकारकाकाङ्क्षायां दार्शपूर्णमासिकाङ्गकलापजन्योपकारप्रापकं चोदकवाक्यं यावत् कल्प्यते, तावदेव

शीघ्रप्रवृत्तेन प्रत्यक्षविधिनाऽऽज्यभागान्वये कृते क्लृप्तोपकारप्रकृताङ्ग-सम्बन्धनिराकाङ्क्षो गृहमेधीयविधिश्चोदकवाक्यकल्पनं नापेक्षत इत्याज्य-भागविधिर्गृहमेधीयविधेरुपकाराकाङ्क्षाशान्तिसम्पादनद्वारा दार्शपूर्णमासिक-कृत्स्नाङ्गप्रापकचोदककल्पनाप्रतिबन्धमुखेनाज्यभागव्यतिरिक्तानां फलतो निवर्तको न शब्दवृत्त्या। तथा 'इमामगृभ्णन्' इति मन्त्रस्य विनियोगा-काङ्क्षायां यावदश्वगर्दभरशनाग्रहणयोर्लिङ्गेन विनियोगः कल्प्यते, तावदेव "इत्यश्वाभिधानीमादत्ते" इति विधिना मन्त्रस्याश्वरशनाग्रहणान्वये कृते तत्सम्बन्धनिराकाङ्क्षो मन्त्रो लैङ्गिकविनियोगकल्पनां नापेक्षत इत्युदाहृतो विधिर्मन्त्रस्य विनियोगाकाङ्क्षाशान्तिसम्पादनद्वारा लैङ्गिकविनियोग-कल्पनाप्रतिबन्धमुखेन मन्त्रस्य गर्दभरशनाग्रहणसम्बन्धनिवर्तको न शब्द-वृत्त्या। एवं चोभयत्रापि विधिरूपस्वार्थत्यागेन निषेधरूपार्थान्तरपरत्वा-नङ्गीकारान्नाद्यदोषद्वयप्रसक्तिः। प्रापकप्रमाणप्रवृत्तिप्रतिबन्धमुखेन फलतो निवर्तकत्वमिति प्राक् प्रवृत्तेन प्रमाणेन प्राप्तस्य कस्यचिन्निवृत्त्यनङ्गीकारान्न तृतीयदोषस्यापि प्रसक्तिः। इह तु वेदान्तश्रवणविधिना तदध्ययनप्रापकप्रमा-णस्य "स्वाध्यायोऽध्येतव्यः" (श० ब्रा० ११.५.७.२) इति प्रत्यक्षश्रुतिरूपस्य प्रवृत्तिः प्रतिबन्द्धुं न शक्यते। उपनयनसंस्कृतस्याध्ययनसंयोगहेतुभूतविनि-योगाकाङ्क्षाशान्तिश्चोपनयनप्रक्रमानधीतेन श्रवणविधिना कर्तुं न शक्यते। तथा वेदान्तश्रवणविधिना कर्मकाण्डश्रवणप्रापकप्रमाणप्रवृत्तिरपि प्रतिबन्द्धुं न शक्यते, तस्याध्ययनविध्याक्षेपरूपतयाऽध्ययनसंस्कृतस्वाध्यायविनियोगा-काङ्क्षाप्रसूतलैङ्गिककल्पनारूपतया वा प्रत्यक्षश्रुतित्वाभावेऽपि कर्मकाण्डार्थ-ज्ञानार्थ कर्मविचाराकाङ्क्षाया वेदान्तश्रवणविधिना शान्त्यसम्भवात्। तस्माद् वेदान्ताध्ययनस्य कर्मकाण्डश्रवणस्य वा साक्षान्निषेधमन्तरेण वेदान्त-श्रवणविधानतो निवर्तयितुमशक्यतया तन्निवृत्तिमिच्छता श्रोतव्य इत्यस्य स्वार्थं परित्यज्य निषेधरूपेऽर्थान्तरे वृत्तिरवश्यमभ्युपगन्तव्येति स्वार्थत्यागः पदार्थग्रहणं प्राप्तबाधश्चेति दोषत्रयं भवेदेव, प्राप्तिं विना शब्देन प्रतिषेधा-योगात्।

ननु त्रिदोषदुष्टाऽपि परिसङ्ख्या गत्यन्तराभावादङ्गीकर्तव्या, अन्यथा श्रोतव्यवाक्यस्यात्यन्तवैयर्थ्यप्रसङ्गादिति चेन्न, निदिध्यासनविधिसन्निधौ पठितस्य तस्य श्रवणादिपूर्वकत्वेन प्रशस्तमिदं निदिध्यासनमित्येवंरूपेण स्तावकत्वोपपत्तेः। वरं हि नातिप्रयोजनमपि स्तावकत्वं त्रिदोषदुष्टायाः परिसङ्ख्यायाः। अत एव बाधलक्षणे—"वैखानसं पूर्वेऽह्न् साम भवति

षोडश्युत्तरे" इत्यङ्गिरसां द्विरात्रस्योत्तरेऽहनि षोडशिग्रहकीर्तनस्य परिसङ्ख्यार्थत्वं परित्यज्य स्तावकत्वं समर्थितम् । तथा हि–तद्वाक्यं न षोडशिग्रहप्राप्त्यर्थम्, द्विरात्राणामुत्तरस्याह्नोऽतिरात्रसंस्थत्वेन प्रकृत्यतिरात्रतश्चोदकादेव तत्प्राप्तिसम्भवात् । न च प्रकृत्यतिरात्रे विकल्पितः षोडश्यत्रापि विकल्पेन प्राप्नुयादिति तन्नियमार्थम्, षोडशिनं प्रकृत्याम्नातेन–"उत्तरेऽहन् द्विरात्रस्य गृह्यते" इति वाक्येन सामान्यतः सर्वद्विरात्राणामुत्तरेऽहनि षोडशिग्रहनियमं बोधयता तस्यापि तत्र प्राप्तेः । अतो द्विरात्रान्तरेभ्यः परिसङ्ख्यार्थमिदं वचनमिति प्राप्ते सिद्धान्तितम्—सामान्यतः प्रत्यक्षवचनेन सर्वद्विरात्राणामुत्तरेऽहनि प्राप्तः षोडशिग्रहनियमः कस्यचिद्द्विरात्रस्योत्तरेऽहनि विशिष्य सम्बन्धबोधनमात्रेण द्विरात्रान्तरेभ्यो न निवर्तते । अतः 'षोडश्युत्तरे' इत्यनेन स्वार्थं त्यक्त्वा क्वचिद् द्विरात्रान्तरेषु षोडशिग्रहनियमप्रतिषेधरूपः परार्थो ग्राह्यः । तेषु प्रत्यक्षवचनप्राप्तः षोडशिग्रहनियमश्च बाधितव्य इति दोषत्रयमनिवार्यम् । अतः सन्निहितविधिशेषार्थवादोऽयं पूर्वस्याह्नो वैखानसरूपवैशेषिकगुणविधियुक्तः, यदुत्तरस्याप्यह्नः षोडशिग्रहनियमरूपो वैशेषिको गुणो वर्तत इत्यौचित्यमवलम्ब्य यथाकथञ्चन स्तावकत्वोपपत्तेरिति । तस्माद् द्विविधाप्यत्र परिसङ्ख्याशङ्का नोन्मिषति । अस्तु वा यथाकथञ्चिदगत्या त्रिदोषदुष्टापि परिसङ्ख्या परिगृह्यत इत्याशङ्का, तथापि सा प्रस्तुतार्थानुपयोगिनी प्रस्तुतार्थपरिपन्थिनी च । वेदान्तविचारे साक्षाद्विधिश्रवणात्तत्र स्वविधेरेव प्रवर्तकत्वोपपत्तौ किं प्रवर्तकान्तरान्वेषणेनेति हि शङ्का प्रस्तुता ।

तथाहि—तत्रापूर्वविध्याशङ्का तावदप्रवृत्तप्रवर्तकत्वोपपादने उपयुज्यते । नियमविध्याशङ्कापि पाक्षिक्यां प्रवृत्तौ प्रसक्तायां नियतप्रवर्तकत्वोपपादन उपयुज्यते । परिसङ्ख्याशङ्का तु न क्वाप्युपयुज्यते । प्रत्युत श्रोतव्यवाक्यस्य श्रवणविधायकत्वरूपस्वार्थपरित्यागाभ्युपगमात् स्वविधित एव श्रवणे प्रवृत्त्युपपत्तिरिति शङ्कायाः प्रस्तुतायाः परिपन्थिनी च भवति । अपि चाध्ययनपरिसङ्ख्याङ्गीकारे दोषान्तरमपि प्रसज्यते । कथम् । अध्ययनविध्याकाङ्क्षाया अध्ययनसंस्कृतस्वाध्यायविनियोगाकाङ्क्षाया वा अर्थज्ञानफलान्वये सति तत्सिद्ध्यर्थं कर्मविचाररूपवेदान्तश्रवणेऽप्याक्षेपतः प्राप्तिरस्तीति खलु वेदान्तश्रवणविधिं परित्यज्य तदध्ययनपरिसङ्ख्याविधिरङ्गीक्रियते । कथमिदमुपपद्यते । यतो वेदान्तानामध्ययनप्रतिषेधे द्विविधस्यापि वेदान्तश्रवणाक्षेपस्याध्ययनविधिमूलस्याप्रवृत्त्या वेदान्तश्रवणस्य कुतोऽपि प्राप्तिर्न

भवेदिति स्वोपजीव्यवेदान्तश्रवणप्राप्तिविघातकत्वमप्यपरो दोषः स्यात्। यदि स्वोपजीव्यविरोधित्वं विधीनां न दोषः, तदा परिसङ्ख्यामुपजीव्य लब्धोन्मेषया वेदान्तश्रवणाप्राप्त्या परिसङ्ख्यामुपमृद्य तत्रापूर्वविधिः पुनरुन्मज्जेत्। तस्मादुपजीव्यविरोधोऽप्यस्याम्त्रिदोषदुष्टायाश्चतुर्थो दोषः स्यादेव।

नन्वयमेव दोषः परिहारग्रन्थेनोच्यते, अनधीतस्वाध्यायानां विचारायोगादिति। नेति ब्रूमः। नहि तत्र परिसङ्ख्योपजीव्यविचारप्राप्तेस्तया विघातो दोषत्वेनोच्यते, किन्तु विचाराप्राप्तावर्थनिर्णयाभावेन विद्यानुष्ठानासम्भवात् पुरुषार्थालाभः। वस्तुतः सोऽपि न दोषः, विचारं विना पुरुषार्थलाभासंभवे तदाक्षिप्त एव विचारे प्रवृत्त्या तल्लाभोपपत्तेः। विचाराभावेऽपि परमेश्वरप्रसादलब्धसकलवेदान्तार्थज्ञानं हिरण्यगर्भादिप्रणीतविद्यातद्वेद्यपरब्रह्मरूपनिर्णायकग्रन्थोपदेशादिना विद्यानुष्ठानोपयोग्यर्थज्ञानमासाद्य विद्यानुष्ठानेन पुरुषार्थलाभोपपत्तेः। नह्येकेन मुमुक्षुणा सकलवेदान्तप्रतिपादिता सर्वापि विद्याऽनुष्ठेया, येन सकलवेदान्तार्थज्ञानं तेन लब्धुं न शक्यमिति विचारोऽन्विष्येत। एकेनैकैव परविद्याऽनुष्ठेया, "विकल्पोऽविशिष्टफलत्वात्" (ब्र० ३.३.५९) इत्यधिकरणन्यायात्। तदुपयोग्यर्थज्ञानं तूपदेशपरहैरण्यगर्भकल्पादिना सुलभमेव। "नावेदविन्मनुते तं बृहन्तम्" (इतिहा० २०) इति श्रुतिरवेदेन परमेश्वरज्ञानं न सम्भवतीत्येतत्परा न भवति, वेदानुसार्यागमादिनापि तज्ज्ञानदर्शनात्। किन्तु वेदोक्तप्रकारेणैव स ज्ञातुं शक्यः, न तु शुष्कयुक्तिसमर्थितप्रकारेणेत्येतत्परा, "नैषा तर्केण मतिरापनेया प्रोक्तान्येनैव सुज्ञानाय प्रेष्ठ" (कठो० २.९) इति श्रुत्यन्तरैकार्थ्यात्।

नन्वेवं तर्हि पुरुषार्थासम्भव इत्यस्य वेदान्ताध्ययनस्य प्रतिषिद्धत्वे तदर्थविचारे कस्यापि प्रवृत्त्यसम्भवाद् विचारशास्त्रारम्भो निष्फलः स्यादित्यत्र तात्पर्यमस्तु। स्यादेतत्। अध्ययननियमपरिसङ्ख्यया केषाञ्चिद्वेदान्ताध्ययनाभावेन तद्विचारे प्रवृत्त्यभावेऽप्यन्येषां प्रवृत्त्या विचारशास्त्रारम्भसाफल्यात्र तन्नैष्फल्यदोषप्रसक्तिः। अध्ययनपरिसङ्ख्येतिपक्षे ह्यध्ययननियमपरिसङ्ख्यैव भवति, नाध्ययनस्वरूपपरिसङ्ख्या। तथा हि—नियमविधितः प्राप्तस्य तर्कितस्य वा परिसङ्ख्या नियमपरिसङ्ख्या। अन्यतः प्राप्तस्य तर्कितस्य वा परिसङ्ख्या स्वरूपपरिसङ्ख्येति व्यवस्था। अत एव—"वैखानसं पूर्वेऽहन् साम भवति षोडश्युत्तरे" इत्यत्र परिसंख्येति पूर्वपक्षदशायाम् "उत्तरेऽहन् द्विरात्रस्य गृह्यते" इति द्विरात्रसामान्यस्योत्तरेऽहनि यः षोडशिग्रहनियमविधिश्चोदकाधीनपाक्षिकषोडशिग्रहप्राप्त्यपेक्षः, तल्लभ्यामाङ्गिरसां द्विरात्रस्य

द्विरात्रान्तराणां चोत्तरेऽहनि समुच्चित्य षोडशिग्रहनियमप्राप्तिमपेक्ष्येयं परिसंख्येति द्विरात्रान्तराणामुत्तरादह्नो नियमविध्यधीनः षोडशिग्रहनियम एव व्यावर्तते, न तु चोदकलभ्यः पाक्षिकः षोडशिग्रहोऽपीत्युपपादितं न्यायविद्भिः।

अत एव दर्शपूर्णमासप्रकरणाम्नातं "कपालेषु श्रपयति" (आप० श्रौ० १.२४.६) इति वाक्यमाग्नेयादिपुरोडाशयागोत्पत्तिवाक्यव्रीहिशास्त्रोभयसामर्थ्यलभ्यमपि प्रयोगमध्ये कपालेषु पुरोडाशश्रपणं विदधानं सत्प्रयोगमध्य एव प्रकृतिद्रव्योपादानेन पुरोडाशस्य स्वयंकर्तृकतां तद्द्वारा व्रीहिशास्त्रस्योपादेयतत्प्रकृतिद्रव्यगतजात्यवस्थानियममात्रपर्यवसायितां चापाद्य तद्वशात्— "दधि घृतं धाना उदकं तण्डुलास्तत्संसृष्टं प्राजापत्यम्" (मै० सं० २.३.६) इति चित्रायागद्रव्यत्वेन विहितेभ्यस्तण्डुलेभ्यः प्रयोजनाभावेन श्रपणनिवृत्त्या तन्मुखप्रवृत्तस्य व्रीहिशास्त्रस्यापि तेभ्यो निवृत्तिर्भवतीत्येवं प्रणाडिकया चित्रातण्डुलेषु व्रीहिनियमप्राप्तिमपेक्ष्य तत्परिसङ्ख्यार्थम्। "कपालेषु श्रपयति" इति वाक्याभावे व्रीहिशास्त्रमेव जात्यवस्थाविशेषविशिष्टप्रकृतिद्रव्योपादानपर्यन्तं व्याप्रियेतेति तण्डुलयागादर्थलोपेन श्रपणनिवृत्तावपि व्रीहिशास्त्रस्य श्रपणमुखप्रवृत्तिकत्वाभावेन निवृत्त्यभावाच्चोदकतोऽङ्गान्तरैः सह व्रीहीणां प्रकृतिद्रव्यतयोपादानमपि प्राप्नुयादित्यमुं न्यायम्— "तण्डुलेभ्योऽर्थलोपेन श्रपणं विनिवर्तते। श्रपणस्य निवृत्तस्य स्वयं कर्तृकता कथम्॥ तदधीनमुपादानं प्रकृते स्यात् कथन्तराम्। तद्वशाद् व्रीहिनियमस्तदभावे कथन्तमाम्॥" इति संगृह्य प्रदर्शयद्भिस्तैश्चित्रातण्डुलेभ्यो व्रीहिनियम एव व्यावर्तते, न तु व्रीहीणां लोकतः पाक्षिकी प्राप्तिरपीति चित्रायागे व्रैहा अव्रैहा वा यथा सिद्धास्तण्डुला ग्रहीतव्या इति निरूपितम्।

एवं चात्राध्ययनपरिसङ्ख्यापक्षेऽध्ययनविधितोऽध्ययननियमप्राप्तिमपेक्ष्य परिसङ्ख्येति वेदान्तेभ्योऽध्ययननियम एव व्यावर्तेत नाध्ययनस्वरूपमिति येषामनियमप्राप्ते वेदान्ताध्ययने प्रवृत्तिस्तदर्थतया विचारशास्त्रारम्भः साफल्यमश्नुवीतेति चेन्मैवम्, अध्ययननियमपरिसङ्ख्यायां "स्वाध्यायोऽध्येतव्यः" (श० ब्रा० ११.५.७.२) इति शास्त्रव्यावृत्तेर्लौकिकमेव वेदान्तानामध्ययनं पक्षे प्राप्नोति, यथा चित्रायागतण्डुलेषु व्रीहिनियमपरिसङ्ख्यायां लौकिका एव व्रैहास्तण्डुलाः पक्षे प्राप्नुवन्ति। न त्वङ्गिरसां द्विरात्रे षोडशिग्रहनियमव्यावृत्तौ वैधः षोडशिग्रह इव वैधमध्ययनं पक्षे प्राप्नोति, अनियते षोडशिग्रह इवानियतेऽध्ययने विध्यभावाल्लोकत एवास्य

प्राप्तेः। एवं च यथा "कपालेषु श्रपयति" (आप० श्रौ० १.२४.६) इति विधिसामर्थ्याच्चित्रातण्डुलेभ्यो वैधो व्रीहिनियम एव व्यावर्तते, न तु तत्प्रकृतितया नीवारादिवल्लोकतः पक्षे प्राप्तं व्रीहिस्वरूपमपीति केषाञ्चिद् व्रैहतण्डुलोपादानसम्भवेऽपि व्रीहिनिर्वापप्रोक्षणावहननादिनियमं विहाय बहिःप्रयोगसिद्धानां लौकिकानामेव व्रैहतण्डुलानामुपादानम्। तथा श्रोतव्य-वाक्यवशाद्वेदान्तेभ्योऽध्ययननियम एव व्यावर्तते, न वेदान्तग्रहणोपायतया लिखितपाठवल्लोकतः पक्षे प्राप्तं व्रतनियमादिरहितं लौकिकमध्ययनस्वरूप-मपीति केषाञ्चिद् वेदान्तजिघृक्षया लौकिकाध्ययनसम्भवेऽपि तावन्मात्रेणा-ध्ययनविध्युपज्ञस्य द्विविधस्यापि विचाराक्षेपस्यानुन्मेषात् तदधीना विचारे प्रवृत्तिर्न सम्भवत्येव।

अपि च, नियमविधिप्राप्तपरिसङ्ख्या सर्वापि नियमपरिसङ्ख्येति न नियमः, तथा नियमे सौर्यादीनामितिकर्तव्यताकाङ्क्षायामनियमेन यतः कुतश्चिदितिकर्तव्यताग्रहणप्रसक्तौ शब्दार्थगतसादृश्यलिङ्गकल्पितस्य कुतश्चि-देव तद्ग्रहणं नियच्छतश्चोदकस्यापि नियमविधिरूपत्वेन आज्यभागविधि-सामर्थ्याद् गृहमेधीये तर्कितचोदकाधीनप्राप्तिकाज्यभागव्यतिरिक्तैष्टिकाङ्ग-कलापपरिसङ्ख्यायाः नियमपरिसङ्ख्यात्वापत्त्या गृहमेधीयतद्व्यतिरिक्ता-ङ्गकलापस्यापि पक्षेऽनुष्ठानप्रसङ्गात्। किन्तु यत्र परिसङ्ख्याया नियम-शास्त्रनिवृत्तावपि नियमविध्यभावे प्रसक्तिमल्लौकिकं वैदिकं वा पक्षे प्रापकं प्रमाणमवश्यंभाविप्रवृत्तिकं तत्रैव नियममात्रपरिसङ्ख्या, अन्यत्र स्वरूपपरि-सङ्ख्येति नियमः। एवं च चित्रातण्डुलेभ्यो व्रीहिनियमव्यावृत्तावपि तण्डु-लानां प्रकृतिद्रव्याकाङ्क्षानपायाद् व्रीहिनीवाराद्यनियतप्रकृतिद्रव्यप्रापक-प्रमाणमवश्यम्भाविप्रवृत्तिकमिति तत्र नियममात्रपरिसङ्ख्या। द्विरात्रान्त-रेभ्यः षोडशिग्रहनियमव्यावृत्तौ विकल्पेन षोडशिग्रहप्रापकश्चोदकः स्वबा-धकस्य नियमशास्त्रस्य व्यावृत्तेरवश्यम्भाविप्रवृत्तिक इति तत्रापि नियम-मात्रपरिसङ्ख्या। गृहमेधीयादैष्टिकविध्यन्तनियमस्य चोदकसमर्पणीयस्य क्लृप्तोपकारप्राकृताज्यभागविधिना चोदककल्पनाप्रतिबन्धमुखेन निवर्तने सति नानियतविध्यन्तप्रापकं किञ्चित् प्रमाणं प्रवर्तते, उपकाराकाङ्क्षा-विरहात्, अनियतषोडशिग्रहप्रापकस्येव नियतविध्यन्तप्रापकस्य कस्यचि-च्छास्त्रस्याभावाच्चेति तत्राज्यभागव्यतिरिक्तैष्टिकाङ्गानां स्वरूपेणैव परि-सङ्ख्येति व्यवस्था सङ्गच्छते।

एवमुक्तनियमासिद्धावध्ययनपरिसङ्ख्याया नियमविधिप्राप्तपरिसङ्ख्या-

त्वेऽपि स्वरूपपरिसङ्ख्यात्वमेव पर्यवस्यति, पाक्षिकलौकिकाध्ययनप्रापक-प्रमाणानुत्थानात्, लौकिकाध्ययनगृहीतानामर्थज्ञानादिषु विनियोगासम्भवेन व्यर्थे तद्ग्रहणे पुंसामाकाङ्क्षानुदयात्। तस्मादध्ययनपरिसङ्ख्यायामनधीतस्वाध्यायानां विचारायोगाद् विचारशास्त्रारम्भो निष्फलः स्यादिति दूषणं युक्तमेवेति चेत्, नेदमपि दूषणं प्रसजति। इयं हि वेदान्ताध्ययनपरिसङ्ख्या न सर्वान् प्रति वक्तुं शक्यते, मुण्डकोपनिषदाद्यध्ययनाङ्गभूतशिरोव्रतादिविधानस्य निर्विषयत्वापत्तेः। किन्तु प्रकरणानुरोधाद् मुमुक्षून् प्रतीति वक्तव्यम्। तथैव च भाष्यकाराभिप्रायः। अत एव द्वितीयपरिसङ्ख्यादूषणे कर्मविचाराभावे कर्मानुष्ठानासम्भवाच्चित्तशुद्ध्यभावेन ज्ञानानुत्पत्तिरेव दोषत्वेनोक्ता। अन्यथा सर्वविषयपरिसंख्याशङ्कायां कर्मानुष्ठानासम्भवेन स्वार्गादिफलानुदयापत्तिरपि दोषत्वेनावक्ष्यत। तथा च ये मुमुक्षोदयात् पूर्वमेव कृतवेदान्ताध्ययनाः, तेषु नाध्ययनपरिसङ्ख्या प्रवर्तते, योऽपि भुङ्क्तवन्तं प्रब्रूयान्मा भुङ्क्था इति किं तेन कृतं स्यादिति न्यायात्। ततस्तेष्वध्ययनविध्युपज्ञविचाराक्षेपोपपत्तेस्तानधिकृत्य विचारशास्त्रारम्भः साफल्यं प्राप्नुयादेवेति। एवमत्र परिसंख्याशङ्कावत् प्रथमपरिसंख्यादूषणमप्ययुक्तम्, तथैव द्वितीयपरिसंख्यादूषणमपि, कर्मविचाराभावेऽपि चित्तशुद्ध्यर्थं यदा यत्कर्मानुष्ठेयं तदा तदभिज्ञोपद्रष्टृवचनादिना तदर्थज्ञानसम्पादनोपपत्तेः। तस्माच्छङ्कापरिहारमिदमसमञ्जसमिवाभातीति।

अत्रेत्थं शङ्काग्रन्थस्याभिप्रायः—यद्यपि त्रिदोषा परिसंख्या, तथापि "पञ्च पञ्चनखा भक्ष्याः"(वा० रा०, कि० १७.३९) इत्यत्रेवागत्या स्वीकरणीया। न च "षोडश्युत्तरे" इत्यत्रेव सन्निहितविध्यन्तरस्तावकत्वं गत्यन्तरमस्तीति वाच्यम्, तत्र विध्यर्थप्रत्ययपरक्रियाभेदश्रुत्यभावेन प्रतीतैकवाक्यतानुरोधाद् यथाकथञ्चित् स्तावकत्वाभ्युपगमेऽप्यत्र तव्यप्रत्ययपरक्रियाश्रुतिभेदेन स्पष्टे वाक्यभेदे प्रवृत्तिविशेषकरस्य यस्य कस्यचिद्विधेरेवाभ्युपगन्तव्यत्वेनाप्रतीतानर्थकप्रायस्तावकत्वाभ्युपगमस्यायुक्तत्वात्। न च प्रथमपरिसंख्यायामुपजीव्यविरोधो दोषः। नहि वेदान्तानामध्ययनं न कर्तव्यमित्येवमत्र परिसंख्या, किन्तु तेषां श्रवणादन्यन्न कर्तव्यमिति। एवमपि वेदान्तानां श्रवणवच्छेषतयानुष्ठेयमध्ययनमेव तत्सजातीयं विवर्तितं भवति। एवं च वेदान्तानां श्रवणादन्यन्न कर्तव्यमिति विशेषनिषेधसामर्थ्यादध्ययननिषेधस्तद्विध्युपज्ञप्राप्तिमत्तया निवर्तमानमपि श्रवणं प्रतिप्रसूतं भवति। अत एव प्रथमपरिसंख्याशङ्कायां

प्रस्तुतार्थानुपयोगित्वादिदोषस्यापि नावकाशः। कृष्णलश्रपणस्येव वेदान्तश्रवणस्य प्रतिप्रसवाधीनत्वाद् द्वितीयपरिसंख्यायामप्युक्तरीत्यैवास्य दोषस्य नावकाशः, वेदान्तादन्यन्न श्रोतव्यमिति विशेषनिषेधसामर्थ्याद् वेदान्ताः श्रोतव्या इत्यर्थतो लाभात्। यद्वा द्वितीयपरिसंख्याशङ्का श्रवणविधिनिराकरणप्रसङ्गादुत्थापिता सर्वात्मना श्रोतव्यवाक्ये विधिप्रत्याशां निराकर्तुमिति तत्र प्रस्तुतार्थानुपयोगित्वादिसम्भवेऽपि न दोष इति।

परिहारग्रन्थस्य त्वयमभिप्रायः—श्रवणादन्यन्न कर्तव्यमिति परिसंख्याध्ययनाभावाद् वेदान्तेभ्यो निवर्तमानस्य श्रवणस्य प्रयोजनाभावात् कृष्णलेभ्यो निवर्तमानस्य श्रपणस्य तद्विधानार्थमेव प्रवृत्तेन—"कृष्णलं श्रपयेत्"इति वाक्येनेव विधानं न लभ्यते, किन्त्वध्ययनस्यैव श्रवणस्य निषेधेन स्पर्शो नास्तीत्येतावल्लभ्यते। नहि—"शल्यकशशश्वाविट्कूर्मगोधाव्यतिरिक्तान् पञ्चनखान्न भक्षयेत्" इति निषेधेन शल्यकादिभक्षणे विधिर्लभ्यते, किन्तु पुरुषेच्छानुसारेण यथाप्राप्ति कदाचित् तद्भक्षणं भवति कदाचिन्न भवति। एवं शल्यकादिभक्षणवन्निषेधास्पृष्टं श्रवणमध्ययनविध्युपज्ञाक्षेपानुसारेणाध्ययनवतां भवति तद्रहितानां न भवतीत्येव स्यात्। न केवलमयं प्रकारो विशेषनिषेधे, किन्तु विशेषविधावप्यमेव प्रकारः। अत एव "अर्धमन्तर्वेदि मिनोत्यर्धं बहिर्वेदि" (मै० सं० ३.९.४) इति यूपमानादेशविधिवाक्ये प्रतीतैकवाक्यत्वभङ्गपरिहारार्थम् "अन्तर्वेदि", 'बहिर्वेदि' इति शब्दाभ्यामेकोऽन्तरालदेशो लभ्यत इति व्यवस्थापनार्थे "तथा यूपस्य वेदिः" (जै० ३.७.१३) इत्यधिकरणेऽर्धमन्तर्वेदीत्येव विधिरस्तु। तत्रार्धमिति विशेषणसामर्थ्यादर्धं बहिर्वेदीति लभ्यत इत्यर्थः। लब्धार्थानुवादो न तु तत्रापि विध्यन्तरमिति वाक्यभेदापत्तिरित्याशङ्क्य विधावर्धमिति विशेषणबलाद्विधानादेवार्धान्तरं व्यावर्तते। तदर्धान्तरमिच्छातो यत्र क्वचन भवेत् कदाचिदन्तर्वेद्यपि भवेदित्यर्धं बहिर्वेदीति नित्यवदनुवादो न घटत इत्युक्तम्। एवमत्रापि निषेधे श्रवणान्यत्वविशेषणबलान्निषेधादेव श्रवणं व्यावर्तते, न तु स्वयं तत्सामर्थ्यादेव नित्यवत् प्राप्नोति। एवं चाध्ययनविध्युपज्ञमेव श्रवणस्य प्राप्तिरिति यथाप्राप्ति मुमुक्षोदयात् पूर्वं याज्ञवल्क्यसंन्यासप्रसक्तिमन्मैत्रेयीब्राह्मणगतोपाख्यानानुसारेण मुमुक्षया संन्यासात् पूर्वं वाऽध्ययनवतामेव तत् स्यात्। मुमुक्षोदये ततः संन्सासे वा सत्यध्ययनप्रतिषेधेन तद्रहितानां न भवेदित्येतत् सर्वं हृदि निधायैव 'अनधीतवेदान्तानां विचारायोगात्'इत्युक्तम्। मुमुक्षोदयात् पूर्वमधीतवेदान्तानां विचारसम्भवेऽपि

वेदान्तश्रवणस्य परिसङ्ख्यापरत्वं कर्मकाण्डश्रवणनिषेधपरत्वरूपमिति विचारस्तदा विचाराभावात् कर्मानुष्ठानासम्भवः। तदभावे चित्तशुद्ध्यभावाद् ज्ञानानुत्पत्तिः स्यात्। तस्मात् पूर्वोक्तमेव समीचीनम्। ततः सकल-

---

तस्मिन् तत्पूर्वके संन्यासे वा वेदान्ताध्ययनात् प्रागेव सति तदनन्तरमध्ययनप्रतिषेधादनधीतवेदान्तानां विचारायोगादित्यर्थः।

एवं केषाञ्चिन्मुमुक्षूणां वेदान्तविचारायोगेऽपि परिसंख्याया नोपजीव्यविघातकत्वम्, मुमुक्षोदयात् संन्यासाद्वा प्रागेवाध्ययनेन तद्विचाराविघातात्। अतः केषाञ्चित्परिसंख्यया विचारान्निवृत्तावपि सर्वथोपजीव्यविघातो नास्तीति तद्दोषमुपेक्ष्य विद्यानुष्ठानासम्भवेन पुरुषार्थालाभो दोषत्वेनोक्तः। न चार्षग्रन्थादिना विद्यानुष्ठानोपयोग्यर्थज्ञानसम्पादनेन विद्यानुष्ठानं स्यादिति शङ्कनीयम्, अधीतस्वाध्यायस्यार्थज्ञानस्य चाकाङ्क्षालब्धेन परस्परान्वयेनाधीतस्वाध्यायजन्यमेव तदर्थज्ञानं फलोपयोगीति नियमस्य प्राक्समर्थितत्वात्। न च मुमुक्षोदयात् पूर्वमध्ययनवतां तथास्तु नाम नियमः, तद्रहितानामध्ययनस्य निषिद्धत्वात्तेषां पुरुषार्थलाभार्थमुपायान्तराक्षेपः स्यादिति वाच्यम्, तेष्वेव चरितार्थस्य मोक्षशास्त्रस्य तदाक्षेपकत्वायोगात्, अन्यथा वसन्तादिकालविहिताधानप्राप्ताग्निमत्स्वध्ययनप्राप्तविद्यावत्सु च त्रैवर्णिकेषु चरितार्थस्यापि ज्योतिष्टोमादिशास्त्रस्य शूद्राणामपि ज्योतिष्टोमाद्यनुष्ठानेन पुरुषार्थसिद्ध्यर्थमग्निविद्योपायान्तराक्षेपकत्वप्रसङ्गात्। एवं तर्हि केषाञ्चित् पुरुषार्थालाभो दोष एव न भवतीति कथमयं दोषत्वेनोक्तः। इत्थमध्ययनपरिसंख्याप्रयुक्तोऽयं केषाञ्चित्पुरुषार्थालाभः, तदा दोषो न स्यात्, यदीयं परिसंख्यावश्यमभ्युपगन्तव्या स्यात्। नेयमभ्युपगन्तव्या। न हि "त्रीणि ह वै यज्ञस्योदराणि गायत्री बृहत्यनुष्टुबत्र ह्येवावपद्यन्त एवोद्वपति" इति वाक्य इवाभिधावृत्तिप्राप्तेयं परिसंख्या, येनेयमप्रत्याख्येया स्यात्। किन्तु स्वार्थं परित्यज्य परार्थलक्षणयोपनेया। नैवं बलात् काञ्चन परिसंख्यां त्रिदोषदुष्टां परिगृह्य विशेषवचनप्राप्तस्य केषाञ्चित्पुरुषार्थलाभस्य बाधनमयुक्तम्। तस्मात्तव्यप्रत्यययुक्तमपि श्रोतव्यवाक्यम्—"विष्णुरुपांशु यष्टव्यः" इत्यादिवत् स्तुत्यर्थमनुवादरूपमित्येवाभ्युपगन्तव्यमित्यभिप्रेत्यायं दोषत्वेनोक्तः। एवमेव द्वितीयपरिसंख्यादूषणमपि सङ्घटनीयमिति सर्वं समञ्जसम्।

चिदचित्प्रपञ्चाकारपरमशक्तिविशिष्टाद्वितीयवैभवस्य सकलनिगमसारसामरस्यनिधानस्य भवशिवशर्वपशुपतिपरमेश्वर-

---

एवं श्रवणविधौ निराकृते सति तद्विचारे पुरुषार्थाकाङ्क्षी पुरुषः स्वयमेव प्रवर्तत इति प्रागुक्तसरणिरेवानुसरणीयेत्याह—तस्मादिति। इयता प्रबन्धेनोपपादितमथशब्दस्य धर्मविचारानन्तर्यार्थत्वमुपसंहरन् ब्रह्मजिज्ञासेति सूत्रशेषलब्धस्यार्थस्याथशब्दोपात्तधर्मविचारानन्तरं कर्तव्यतयान्वयं दर्शयति—तत इत्यादिना ,अथ शब्दस्यार्थो दर्शित इत्यन्तेन। ब्रह्मप्रतिपादकस्योपनिषच्छास्त्रस्य विचारः कर्तव्य इत्ययं ब्रह्मजिज्ञासेति सूत्रशेषलभ्योऽर्थः। तदेतदग्रे स्पष्टयिष्यते। तत्र विचारं प्रति व्यवहितविषयसमर्पकेण सौत्रेण ब्रह्मपदेन शिवोऽभिधीयत इत्येतदुपपादयितुं विशेषणचतुष्टयेन विशिनष्टि—सकलेत्यादिना। बृंहतेर्धातोर्मन्प्रत्ययान्तस्य ब्रह्मशब्दस्यात्र त्रिविधपरिच्छेदरहितं वस्त्वर्थ इत्यभ्युपगन्तव्यम्, धात्वर्थानुगमात् प्रकरणोपपदादिसङ्कोचकाभावाच्च। तद्देशकालपरिच्छेदरहितस्यापि शिवस्य न सम्भवति, तस्य चेतनाचेतनप्रपञ्चविलक्षणत्वाभ्युपगमेन वस्तुपरिच्छिन्नत्वादित्याशङ्कां निरसितुमाद्यविशेषणम्। सकलचेतनाचेतनप्रपञ्चाकारया तद्रूपपरिणामिन्या परमशक्त्या जडशक्तेर्मायाया नियामकत्वेन तत उत्कृष्टया चिच्छक्त्या विशिष्टस्य अत एवाद्वितीयवैभवस्य द्वितीयाश्रयरहितबृहत्त्वस्य चेति 'निम्नोन्नतं भूतलम्' इत्यादाविव विशेषणद्वयस्यापि विशेषणविशेष्यभावविवक्षया समासः। वृक्षे पत्रपुष्पाद्यान्तर्गणिकभेदसत्त्वेऽप्येक एवात्र वृक्ष इत्यत्र तत्समानजातीयवृक्षान्तराभाववच्चेतनाचेतनप्रपञ्चविशिष्टस्य शिवस्य तद्विशेषणयोश्चेतनाचेतनयोस्तस्य ताभ्यां चान्तर्गणिकभेदसत्त्वेऽप्युक्तरूपेण तत्समानजातीयवस्त्वन्तराभावोऽस्तीति स एव वस्तुपरिच्छेदराहित्यम्, न तु सर्वथा तद्व्यतिरिक्तवस्तुराहित्यमिति भावः।

ननु स्वरूपतो बृहत्त्वमात्रं न ब्रह्मशब्दप्रवृत्तिनिमित्तम्, किन्तु गुणतो बृहत्त्वमपि, सङ्कोचे कारणाभावात्, नैयायिकादिमते स्वरूपतो बृहत्त्वेनाभ्युपगतेष्वप्याकाशादिषु ब्रह्मशब्दस्याप्रयुज्यमानत्वाच्च। मा भूद्वा गुणतो बृहत्त्वं ब्रह्मशब्दप्रवृत्तिनिमित्तम्, तथापि प्रवृत्तिनिमित्तोपपादकत्वेन तदवश्यं ब्रह्मशब्दार्थे वक्तव्यम्। नहि तस्य बृहत्त्वमात्रं प्रवृत्तिनिमित्तम्, किन्तु बृंहणविशेषितं बृहत्त्वम्, "बृहत्त्वाद् बृंहणत्वाच्च तद्ब्रह्मेत्यभिधीयते" इति स्मृतेः। बृंहणत्वं च सर्गकालोन्मिषत्सकलप्रपञ्चविस्तारयितृत्वमुक्तिकालविकसन्मुच्य-

महादेवरुद्रशम्भुप्रभृतिपर्यायवाचकशब्दसारप्रकाशितपरममहि-मानजीवगतधर्मज्ञानविकासकत्वादिसर्वविधबृंहयितृत्वरूपं वाच्यम्, सङ्कोचकाभावात्। अपि च, यत्प्रपञ्चसृष्ट्यादिकारणं तद्ब्रह्मशब्दार्थ इत्यभ्युपगन्तव्यम्, "यतो वा इमानि भूतानि जायन्ते" (तै० उ० ३.१) इत्यादितल्लक्षणानुसारात्। जगत्कारणस्य वस्तुनः सर्वनियन्तृत्वमभ्युपगन्तव्यम्, "तत्सृष्ट्वा तदेवानुप्राविशत्" (तै० उ० २.६), "अन्तः प्रविष्टः शास्ता जनानाम्" (तै० आ० ३.११) इत्यादि श्रुत्यन्तरानुसारात्। तस्यानन्दात्मकत्वमभ्युपगन्तव्यम्, "आनन्दाद्ध्येव खल्विमानि" (तै० उ० ३.६) इति स्वरूपलक्षणवाक्यानुसारात्। तदानन्दस्य निरतिशयत्वमभ्युपगन्तव्यम्, "स एको ब्रह्मण आनन्दः" (तै० उ० २.८) इत्यादिश्रवणात्। तत्सर्वं शिवे न सम्भवति, येनायमत्र ब्रह्मशब्दाभिधेयः स्यात्, इत्याशङ्कानिराकरणाय तत्सर्वं सकललोकवेदप्रसिद्धतन्नामप्रवृत्तिनिमित्ततयैव तस्मिन् सम्भावयितुं भवशिवेत्यादिविशेषणम्। भवत्यस्माज्जगदिति भवः। शिवं जगतः क्षेमं करोतीति, शिवाः सर्वे कल्याणगुणा अस्य सन्तीति च शिवः। शृणाति हिनस्ति जगदिति शर्वः। पशून् जीवान् गवाश्वादिवत् पाशैर्बद्ध्वा स्वकार्यं कारयतीति पशुपतिः। सकलजगदीशनशील ईश्वरः। तत्र पूजार्थस्य परमपदस्य समासः। महति सर्ववैषयिकानन्दातिशायिनि स्वात्मानन्दे दीव्यति रमत इति महादेवः। भक्तानां संसाररुजं द्रावयतीति रुद्रः। शं सुखं भवतीति शम्भुः। अत्र शिवनाम्ना गुणतो बृहत्त्वम्, भवशिवशर्वपशुपतिरुद्रनामभिर्ब्रह्मणस्तटस्थलक्षणं पञ्चकृत्यकारणत्वम्, परमेश्वरनाम्ना तदाक्षेपकमन्तर्यामित्वम्, शम्भुनाम्ना तस्य स्वरूपलक्षणमानन्दात्मकत्वम्, महादेवनाम्ना तदानन्दस्य निरतिशयत्वं च प्रवृत्तिनिमित्ततयोपनीयते। इदं च तत्र तत्रोपपादितैरुपपादयिष्यमाणैश्च नामनिर्वचनैः स्पष्टम्।

ननु ब्रह्मणः प्रतिपादकमुपनिषच्छास्त्रं विचारणीयमिति प्रतिज्ञायां स एव ब्रह्मशब्दार्थः स्वीकरणीयः, यस्योपनिषच्छास्त्रं प्रतिपादकम्। न च शिवस्य तत् प्रतिपादकम्, "सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति। यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण ब्रवीमि॥" (कठो० २.१५) इत्युपक्रम्य प्रवृत्तया—"सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्" (कठो० ३.९) इति कठवल्लीश्रुत्या, "येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्याम्" (१.२.१३) इति मुण्डकश्रुत्या च विष्णुपुरुषादिशब्दाभिधेयस्य नारायणस्य तत्प्रतिपादकमित्यवगमात्, इत्याशङ्कां निरसितुं

सकलनिगमेति विशेषणम् । "विष्णोः परमं पदम्" इत्यत्र पदशब्दो न स्थानवाची, पूर्वम् "अव्यक्तात् पुरुषः परः" (कठो० ३.११) इति निर्दिष्टस्य पुरुषस्यैव स्थानप्रमाणतोऽत्र पदशब्दनिर्देश्यत्वावगमात् । तदेतदानुमानिकाधिकरणे व्यक्तीभविष्यति । एवं च पद्यते प्राप्यत इति व्युत्पत्त्या तत्र पदशब्दः प्राप्यपुरुषपर इति स्थिते प्राप्यपुरुषो न विष्णुः, विष्णोः परमं पदं प्राप्यमिति तत्प्राप्यत्वश्रवणात् । किन्तु शक्त्यवस्थाविशेषोन्मेषरूपस्य विष्णोः पुरुषावस्थाविलये साक्षात्प्राप्या स्वस्वरूपात्मिका शैवी शक्तिः, तद्द्वारा प्राप्यत्वपर्यवसानभूमिः शिव इति स एव विष्णोः परमं पदमिति युक्तम् । अतः "सर्वे वेदा यत्पदमामनन्ति" (कठो० २.१५) इत्युपक्रमोऽपि तद्विषय एव । यद्वा पदशब्द एव शिववाची, "शिवो रुद्रो महादेवः शङ्करो ब्रह्म सत्पदम् । एवमादीनि नामानि विशिष्टानि परस्य तु ॥" इति स्कान्दवचनात् । एवं च "तत्ते पदं संग्रहेण ब्रवीमि" (कठो० २.१५) इत्युपक्रमः पदश्रुत्यैव शिवविषयः । "तद्विष्णोः परमं पदम्" (कठो० ३.९) इत्यत्र विष्णोरिति पञ्चम्यन्तं पदं परमशब्दोक्तोत्कर्षप्रतियोगिसमर्पकम् । "येनाक्षरं पुरुषं वेद सत्यम्" (मुण्डको० १.२.१३) इत्यत्राक्षरपुरुषपदाभ्यां शिव एवोच्यते, न क्षरतीति योगेन चेतनमात्ररूढ्या च साधारणयोस्तयोः पूर्वं "यः सर्वज्ञः सर्ववित्" (मुण्डको० १.१.९) इति मन्त्रे सर्वज्ञपदेन रूढ्या समर्पिते तत्रैव पर्यवसानौचित्यात् । तस्मिन् मन्त्रे सर्वज्ञपदं प्राकरणिकानामक्षरादिपदानां देवताविशेषपर्यवसानाकाङ्क्षायां रूढ्याऽऽकृष्टतात्पर्यं यत्तत्रैवोपक्षीणं स्यादिति कृत्वा खलु तदीययौगिकार्थप्रत्यायनार्थं सर्वविदिति पदान्तरमुपात्तम् । यथा—"तव प्रसादात् कुसुमायुधोऽपि सहायमेकं मधुमेव लब्ध्वा । कुर्यां हरस्यापि पिनाकपाणेर्धैर्यच्युतिं के मम धन्विनोऽन्ये ॥" (कु० सं० ३.१०) इति श्लोकेऽपि पिनाकपाणिपदं सारतरायुधत्वद्योतनोपयोगितया यौगिकार्थवशीकृतं सत्तत्रैवोपक्षीणं स्यादिति कृत्वा तदीयरूढ्यर्थप्रत्यायनार्थं हरशब्दः प्रयुक्तः ।

तथापि सर्वमुपनिषच्छास्त्रं कथं शिवस्य प्रतिपादकम्, येन सकलवेदान्ततात्पर्यावधारणरूपं श्रवणं शिवविषयं भवेत् । "हिरण्यगर्भः समवर्तताग्रे" (तै० सं० ४.१.८.३), "एको ह वै नारायण आसीत्" (महो० १.१) इत्यादिना ह्यन्यपरत्वं प्रतीयत इत्याशङ्कानिराकरणार्थं सामरस्यनिधानस्येत्युक्तम् । यद्यपि तथाभूतानि वाक्यान्यापाततोऽन्यपराणि भान्ति, तथापि तान्यपि विचार्यमाणानि तात्पर्यरहस्यं शिव एव समर्पयन्ति । अत एव वेदेषु वेदान्तेषु पुराणादिषु चान्यविषयत्वेन प्रतीयमानमपि पञ्चकृत्यान्तर्गतचरितवर्णनमशेषं

मविलासस्य स्वशेषभूतनिखिलचेतनसमुपासनानुगुणसमुदित-

तत्तदन्तर्यामिणि शिवे पर्यवस्यतीति ज्ञापयितुमेव तलवकारिणामुपनिषदि "ब्रह्म ह देवेभ्यो विजिग्ये" (केनो० ३.१) इत्यारभ्य देवानामसुराणां च समरे देवानामन्तर्यामिबलेन जये सति तं जयं स्वकीयं मन्यमानानां देवानां दर्पमपनेतुं तेषां पुरतो यक्षरूपेण शिव एव प्रादुर्भूय स्वस्वरूपजिज्ञासया समीपमागतयोः सकलजगद्दहनोन्मूलनशक्तिमत्त्वसम्भावनया दृप्तयोरनलपवनयोस्तृणमात्रस्यापि दहनचलनयोरशक्ततापादनेन दर्पमपनीय शक्रे स्वसमीपमागते स्वयं तिरोदधे। तस्मिन्नेव काले सर्वान्तर्यामिशिवस्वरूपोपदिदिक्षया तत्राविर्भूताया परब्रह्मविद्याधिदेवताया भगवत्या हैमवत्या उमायाः प्रसादादिह यक्षरूपेण शिव एवाविर्भूतः, यस्यास्मदन्तर्यामिणो जय एवास्माकं जय इति भ्रान्तिरासीदिति देवा बुबुधिरे इत्युपाख्यानं निबद्धम्। अनेनैवाभिप्रायेण कृत्स्नस्यापि शब्दराशेर्वेदवेदान्तादिरूपस्य शिव एव तात्पर्यमित्यमुमर्थम्— "इमा रुद्राय स्थिरधन्वने गिरः" (तै० ब्रा० २.८.६.८) इति मन्त्रभागो दर्शयति। भगवान् पराशरोऽप्याह—"स्मृतयश्च पुराणानि भारतादीनि सत्तम। शिवमेव सदा साम्बं हृदि कृत्वा ब्रुवन्ति हि॥" इति। अयमर्थः स्कान्दे स्पष्टीकृतः—"कानिचिद् वेदवाक्यानि ब्राह्मणा वेदवित्तमाः। रुद्रमूर्तिं समाश्रित्य शिवे परमकारणे॥ पर्यवस्यन्ति विप्रेन्द्रास्तथा वाक्यानि कानिचित्। विष्णुमूर्तिं समाश्रित्य ब्रह्ममूर्तिं च कानिचित्॥ आग्नेयीं मूर्तिमाश्रित्य श्रुतिवाक्यानि कानिचित्। सूर्यमूर्तिं मुनिश्रेष्ठास्तथैवान्यानि कानिचित्॥ एकमूर्त्यभिधानेन द्वारेणैव मुनीश्वराः। प्रतिपाद्यो महादेवः स्थितः सर्वासु मूर्तिषु॥" इति। तस्मात् साधूक्तं सकलनिगमसारसामरस्यनिधानस्येति। सामरस्यं सर्वेषां वेदान्तानां तात्पर्येणैककण्ठ्यम्।

ननु तथापि शिवः सूत्रगतब्रह्मशब्दविषयो भवितुं नार्हति। स एव हि तद्विषयः स्यात् यः श्रवणमनननिदिध्यासनसाक्षात्कारैः प्रसन्नो मोक्षं दद्यात्, विचारारम्भस्य मोक्षफलत्वाभ्युपगमात्। न च शिवस्तथा, "मोक्षमिच्छेज्जनार्दनात्" इति स्मरणादित्याशङ्कां निराकर्तुं विशिनष्टि—स्वशेषभूतेति। यद्यपि मोक्षप्रदत्वमात्रं प्रकृते प्रदर्शनीयम्, तथापि विशेषे प्रस्तुते सामान्याभिधानरूपेणाप्रस्तुतप्रशंसालङ्कारेण तत्रैव विवक्षा। फलान्तरप्रदातृत्ववर्णनं तु तत्र दृष्टान्ततया पर्यवस्यति।

निजप्रसादसमर्पितपुरुषार्थसार्थस्य परब्रह्मणः प्रतिपादकमुपनिषच्छास्त्रं विचारणीयम् । तन्नियोगरूपचोदनालक्षणस्य

ननु प्रसादेन चेत् पुरुषार्थसिद्धिः, तर्हि सर्वेषामयत्नेन सर्वपुरुषार्थसिद्धिः स्यात्, निर्व्याजदयासमुद्रस्य सर्वानुग्राहकस्य शिवस्य चेतनमात्रे सर्वदा प्रसादसम्भवादित्याशङ्क्य समुपासनानुगुणसमुदितेति प्रसादो विशेषितः । सर्वानुग्राहकस्य शिवस्य सदा सर्वत्र सत्यपि दया तत्तदनाद्यपचारवशादनभिव्यक्तेति कर्मज्ञानरूपतत्तदाराधनानुगुण्येन तत्र तत्र दयाभिव्यक्तौ सत्यां तदनुगुणपुरुषार्थदित्सारूपः प्रसादः समुल्लसतीति भावः । यद्यपि तिर्यगादीनां न कर्मज्ञानाधिकारः, तथापि सर्वेषां चेतनानां पर्यायेण मनुष्यदेहादिग्रहणे सति तदधिकारोऽस्तीत्यभिप्रेत्य वा—"महादेवे महानन्दे महाकारुणिकोत्तमे । प्रसन्ने सति कीटो वा पतङ्गो वा विमुच्यते ॥" इत्यादिपौराणिकप्रवादमनुसृत्य वा निखिलविशेषणं कृतम् ।

ननु पत्रपुष्पादिसमर्पणरूपसमाराधनमयत्नसाध्यमल्पीयः, तावता प्रसन्नः कथं महतः पुरुषार्थान् दद्यादित्याशङ्क्य स्वशेषभूतेत्यपि चेतनविशेषणं कृतम् । पुत्रदारादीनामिव सर्वेषां चेतनानां शिवस्य चानादिसिद्धः शेषशेषिभावः । तेन सम्बन्धेन स्वल्पमपि भक्तिपूर्वकमाराधनं दृष्ट्वा तथा तथा प्रसीदतीति भावः । शिवस्य सामान्यतः सकलपुरुषार्थप्रदत्वं "फलमत उपपत्तेः" (ब्र० ३.२.३८) इत्यधिकरणे विशिष्य मोक्षप्रदत्वं "तन्निष्ठस्य मोक्षोपदेशात्" (ब्र० १.१.७), "नेतरोऽनुपपत्तेः" (ब्र० १.१.१६) इत्यादिसूत्रेषु च समर्थयिष्यत इति नात्र प्रस्तूयते । यद्यपि—"उषिकुषिगार्तिभ्यः स्थन्" (१६९ उ०) इति सूत्रात् स्थन्प्रत्ययानुवृत्तौ "सर्तेर्णिच्च" (१७० उ०) इति सूत्रेण "सृ गतौ" (९३५ भ्वा०) इति धातोः स्थन्प्रत्यये तस्य णिद्वद्भावे च सति निष्पन्नः सार्थशब्दो गच्छतां समूहमाचष्टे, तथाप्यत्र समूहमात्रपरो द्रष्टव्यः ।

ननु यदि विविधपरिच्छेदराहित्याद् गुणपौष्कल्याद् जगज्जन्मादिकारणत्वरूपब्रह्मलक्षणयोगाच्च शिव एव ब्रह्म, कथं तर्हि "तस्मादेतद् ब्रह्म नाम रूपमन्नं च जायते" (मुण्डको० १.१.९) इत्यादिष्वन्यत्रापि ब्रह्मशब्दप्रयोगः, इत्याशङ्कां निवर्तयितुं परब्रह्मण इति परत्वविशेषणम् । सत्यं कार्यभूतो हिरण्यगर्भोऽपि श्रुतिप्रयोगाद् ब्रह्म, स त्वपरं ब्रह्म, ब्रह्मशब्दप्रवृत्तिनिमित्तपौष्कल्याभावात् । शिवस्तु परं ब्रह्म, तत्पौष्कल्यस्य तत्रैव

विश्रान्तेः। अत एव श्रूयते—"ऋतं सत्यं परं ब्रह्म" (महाना० १२.१) इति। अथर्वशिरसि च श्रूयते—"अथ कस्मादुच्यते परं ब्रह्म। यस्मादुच्चार्यमाण एव बृहति बृंहयति तस्मादुच्यते परं ब्रह्म" (३.५) इति। न चैतन्नामनिर्वचनं प्रणवविषयमेव न तु शिवविषयमिति शङ्कनीयम्, "य ॐकारः स प्रणवो यः प्रणवः स सर्वव्यापी यः सर्वव्यापी सोऽनन्तो योऽनन्तस्तत्तारं यत्तारं तत्सूक्ष्मं यत्सूक्ष्मं तच्छुक्लं यच्छुक्लं तद्वैद्युतं यद्वैद्युतं तत्परं ब्रह्म स एकः स एको रुद्रः स ईशानः स भगवान् स महेश्वरः स महादेवः" (अ० शि० ३) इत्योङ्कारादिमहादेवान्तानि नामान्येकविषयत्वेन तत्रानुक्रम्य तेषां प्रत्येकमेकैकनिर्वचनस्य प्रदर्शनेन "शिवो वा प्रणवो ह्येष प्रणवो वा शिवस्तथा। वाच्यवाचकयोर्भेदो नात्यन्तं विद्यते क्वचित्॥" इति शिवपुराणोक्तरीत्या प्रणवनाम्नां निर्वचनस्यापि प्राक्प्रकृते शिव एव पर्यवसानात्। अत एवाथर्वशिखायामपि—"ॐकारः प्रलयः प्रणवः सर्वदेववेदयोनिः सर्ववाच्यं समुद्धर्ता तारो विष्णुर्ब्रह्म प्रकाशो विद्युद्व्यापी" (अ० शि० ४) इति नाम्नां महादेवो वाच्यत्वेन दर्शितः, "सकृदुच्चारितमात्र ऊर्ध्वमुन्नामयति तस्मादोङ्कारः" (अ० शि० १) इत्यादिना "व्यापनाद् व्यापी महादेवः" (अ० शि० २) इत्यन्तेन। यथा—"तदेव ब्रह्म परमं कवीनाम्" (महाना० १.६) इत्यन्तेन प्रजापतेः परब्रह्मभावः, यथा च "नारायणः परं ब्रह्म" (ना० पू० ता० १.४) इत्यन्तेन नारायणस्य, तथा हिरण्यगर्भशारिकाधिकरण.......स्थास्यति। एवं ब्रह्मप्रतिपादकस्य वेदान्तभागस्य यद्विचारणीयत्वं "ब्रह्मजिज्ञासा" इति सूत्रशेषलब्धं दर्शितम्, तद्गतं धर्मविचारानन्तर्यमथशब्दार्थं दर्शयन् धर्मं द्वादशलक्षणीप्रतिपाद्यैः प्रमेयविशेषैर्विशिनष्टि तन्नियोगरूपेत्यादिभिः सप्तभिर्विशेषणैः।

तथाहि कर्ममीमांसायाम् "अथातो धर्मजिज्ञासा" (जै. १.१.१) इति सूत्रेण प्रमाणस्वरूपसाधनफलैर्धर्मस्य विचारं प्रतिज्ञाय प्रथमाध्याये तस्मिन् प्रमाणं निरूपितम्। तत्र प्रथमपादे साक्षाद्धर्मे प्रमाणभूतायाश्चोदनायाः पौरुषेयत्वाद्यप्रामाण्यहेतुशङ्कानिराकरणपूर्वकं तत्र प्रामाण्यमुपपादितम्। द्वितीयपादे अर्थवादमन्त्रयोर्विध्यपेक्षितद्रव्यदेवतादिस्तुत्यनुष्ठेयार्थस्मृतिसमर्पकतया, तृतीयपादे मन्वाद्याप्तप्रणीतवेदाविरुद्धस्मृत्यादीनां मूलवेदानुमापकतया, चतुर्थपादे तु "अग्निहोत्रं जुहोति" (तै०सं० १.५.९.१), "श्येनेनाभिचरन् यजेत" (षड्विं० ब्रा० ३.८) इत्यादिविधिवाक्यगतानामग्निहोत्रादिपदानां नाम्ना कर्मभेदः, नाम्ना धर्मातिदेशः, नाम्ना दूरस्थस्यानुवाद इत्यादिप्रयोजनवत्या

कर्मनामतया च तत्र प्रामाण्यमुपपादितम्। एवं प्रमाणसिद्धस्य धर्मस्य परस्परभिन्नं स्वरूपं द्वितीयाध्याये निरूपितम्। तत्र 'यजति ददाति जुहोति' इति चोदनासु यज्यादिधातुभेदरूपेण शब्दान्तरेण यागदानहोमानां भेदः, "समिधो यजति" (तै० सं० २.६.१.१), "तनूनपातं यजति" (तै० सं० २.६.१.१) इत्यादिविधिषु यजतीति पञ्चकृत्वोऽभ्यासेनाविशेषपुनःश्रुतिरूपेण प्रयाजानां भेदः, "सप्तदश प्राजापत्यान् पशूनालभेत" इत्यत्र द्रव्यदेवता-सम्बन्धभेदिन्या सप्तदशसंख्यया तदनुमेययागानां भेदः, "अथैष ज्योतिः" (तां० ब्रा० १६.८.१) इत्यादिवाक्येषु ज्योतिरादिनामधेयैस्तन्नामकयागानां प्रकृतज्योतिष्टोमाद् भेदः, "तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनम्" इत्यत्र आमिक्षारूपगुणान्तरावरुद्धे यागे निवेशमलभ-मानेन वाजिनगुणेन वाजिनयागस्यामिक्षायागाद् भेदः, प्रकरणान्तरेण नित्याग्निहोत्रान्मासाग्निहोत्रस्य भेद इत्येवं द्वितीयाध्याये कर्मभेदः सापवादः प्रपञ्चितः। तृतीयाध्याये भिन्नानां कर्मणां श्रुतिलिङ्गादिभिः प्रमाणैः शेषशेषिभावो निरूपितः। तत्र निरपेक्षः शब्दः श्रुतिः। सा त्रिविधा विधात्री अभिधात्री विनियोक्त्रीति। लिङादिश्रुतिर्विधात्री। इन्द्रादिश्रुतिरभिधात्री। विनियोक्त्री त्वेकप्रत्ययरूपा एकपदरूपा विभक्तिरूपेति त्रिविधा। तत्राद्या "पशुना यजेत" इति तृतीया। सा हि स्वोक्तकरणकारकं प्रति स्वोक्तैकत्व-संख्यायाः शेषत्वमुपगमयति। द्वितीया यजेतेति पदम्। तेन प्रत्ययोक्त-भावनां प्रति प्रकृत्युक्तयागस्य शेषतोपनीयते। तृतीया शेषित्वबोधिका शेषत्वबोधिकेति द्विविधा। "व्रीहीन् प्रोक्षति" (आप० श्रौ० १.१९.१) इत्यादिषु द्वितीया व्रीह्यादीनां प्रोक्षणादिक्रियां प्रति ईप्सिततमत्वरूप-शेषित्वबोधिका। "क्रीते सोमे मैत्रावरुणाय दण्डं प्रयच्छति" (तै० सं० ६.१.४.२) इत्यत्र चतुर्थीश्रुतिर्मैत्रावरुणस्य प्रदानक्रियेप्सिततमेन कर्मणाऽ-भिप्रेयमाणत्वरूपशेषित्वबोधिका। "अरुणया क्रीणाति" (तै० सं० ६.१.६.७) इत्यत्र क्रयभावनां प्रत्यारुण्यस्य "चात्वालान्मृदमाहरति" इत्यत्र मृदाहरणक्रियां प्रति चात्वालस्य "वेद्यां हवींष्यासादयति" इत्यत्र हविरासादनक्रियां प्रति वेद्याश्च तृतीयापञ्चमीसप्तम्यः शेषत्वबोधिकाः। षष्ठी तु क्वचिद् "दध्नेन्द्रियकामस्य जुहुयात्" (तै० ब्रा० २.१.५.६) इत्यादौ शेषित्वबोधिका, "यजमानस्य याज्या" इत्यादौ शेषत्वबोधिका च, सम्बन्ध-मात्रेऽनुशिष्टायाः षष्ठ्या योग्यतानुसारेणोभयथापि पर्यवसानसम्भवात्।

वस्तुसामर्थ्यं लिङ्गम्। तद् द्विविधम्—शब्दसामर्थ्यमर्थसामर्थ्यं च। तत्र "बर्हिर्देवसदनं दामि" (मै० सं० १.१.२) इति मन्त्रस्य लवनप्रकाशनसामर्थ्य-

रूपाल्लिङ्गाल्लवनशेषता। "स्वधितिनावद्यति", स्रुवेणावद्यति", "हस्तेनावद्यति" इत्यवदानसामान्ये साधनत्वेन श्रुतानां स्वधित्यादीनां तत्तत्सामर्थ्यादिरूपल्लिङ्गाद् विशिष्य मांसद्रवद्रव्यपुरोडाशाद्यवदानेषु शेषता। शेषित्वस्य शेषत्वस्य वा बोधिकया श्रुत्या रहितः पदसमभिव्याहारो वाक्यम्। यथा "अग्निहोत्रं जुहुयात् स्वर्गकामः" इति। यथा वा "मैत्रावरुणः प्रैष्यति चान्वाह च" इति। नहि यागभावनां प्रति स्वर्गकामस्य भाव्यत्वेन शेषित्वबोधिका द्वितीयादिश्रुतिः प्रैषानुवचनं प्रति मैत्रावरुणस्य कर्तृत्वेन शेषित्वबोधिका तृतीया श्रुतिर्वास्ति, प्रथमा तु प्रातिपदिकार्थमात्रेऽनुशिष्टा। अतः पदसमभिव्याहाररूपेण वाक्येनात्र शेषशेषिभावबोधः। विधिवाक्यतः कर्तव्यत्वेनावगतस्य केन प्रकारेण कर्तव्यमिति विशिष्याज्ञायमानस्येतिकर्तव्यताकाङ्क्षा प्रकरणम्। तद् द्विविधम्—महाप्रकरणमवान्तरप्रकरणं चेति। तत्राद्येन दर्शपूर्णमासादिकं प्रति प्रयाजादीनाम्, द्वितीयेन प्रयाजादिकं प्रत्यभिक्रमणादीनां च तत्सन्निधिसमाम्नातानां शेषता। स्थानं द्विविधम्—यथासंख्यं सन्निधिश्च। तत्राद्येन "दब्धिरस्यदब्धो भूयासम्" (तै० सं० १.६.२.४) इति मन्त्रस्याग्नेयाग्नीषोमीयमन्त्रद्वयमध्याम्नातस्याग्नेयाग्नीषोमीययागद्वयमध्यानुष्ठेयोपांशुयागशेषता। सन्निधिस्त्वाम्नानसन्निधिरनुष्ठानसन्निधिरिति द्विविधः। आद्येन "शुन्धध्वं दैव्याय कर्मणे देवयज्यायै" (तै० सं० १.१.३.१) इति मन्त्रस्य महाप्रकरणावान्तरप्रकरणरहितसान्नाय्यपात्रप्रोक्षणशेषता। द्वितीयेन पशुधर्माणामग्नीषोमीयपशुशेषता। समाख्या यौगिकी संज्ञा। सा वैदिकी लौकिकीति द्विविधा। होतृचमस इति वैदिकसमाख्यया होतुश्चमसभक्षणं प्रति, 'आध्वर्यवम्' इति याज्ञिकप्रसिद्धलौकिकसमाख्ययाऽध्वर्योरवघातादिकं प्रति च कर्तृत्वेन शेषतेत्येवं शेषशेषिभावः सापवादस्तृतीयाध्याये प्रपञ्चितः।

एवं सिद्धशेषशेषिभावानां कर्मणामनुष्ठापनशक्तिरूपा प्रयुक्तिश्चतुर्थे निरूपिता। शेष्येव शेषं प्रयुङ्क्ते स्वविध्यर्थमनुष्ठापयति। न त्वनुनिष्पाद्यपि। नापि शेषः शेषिणं प्रयुङ्क्ते। अनेकशेषिसद्भावेऽपि यत्रान्यप्रयुक्तस्यैवान्यत्र विनियोगः, तत्र यत्प्रयुक्तस्यान्यत्र विनियोगः, स एव शेषं प्रयुङ्क्ते न तु शेष्यपि सन्नन्योऽपि। एवं च "तप्ते पयसि दध्यानयति" इत्यादिवाक्ये विधीयमानस्य दध्यानयनस्य द्विकर्मकस्य कर्मान्तराकाङ्क्षायां समभिव्याहृतं पयः कर्मान्तरत्वेनाविधीयमानं सप्तम्या अधिकरणत्वेन निर्देशात् प्रधानकर्मतया पर्यवस्यतीति प्रकृतप्रधानभूतपयःपरामर्शिना तत्पदेन सामानाधि-

करण्येन निर्दिष्टतया पयोरूपत्वेनावगतामिक्षैव शेषित्वात् स्वशेषभूतं दध्यानयनमनुष्ठापयति, न तु तदनुनिष्पादिवाजिनमपीत्यामिक्षापचार एव पयोऽन्तरे दध्यानयनस्य प्रयुक्तिः, न वाजिनाऽपचारे। "कृष्णविषाणया कण्डूयते", "चात्वाले कृष्णविषाणां प्रास्यति" इति कृष्णविषाणायाः कण्डूयनप्रासनरूपक्रियाद्वयान्वये सत्यपि कृष्णविषाणा तृतीयया कण्डूयनं प्रति शेषः, प्रासनं प्रति तु द्वितीयया शेषिणीति निवृत्तकण्डूयनप्रयोजनायास्तस्याः प्रासनात् पूर्वमपचारे प्रासनार्थं पुनः कृष्णविषाणान्तरोपादानप्रयुक्तिः। "पुरोडाशकपालेन तुषानुपवपति" (आप० श्रौ० १.२०.९) इत्यत्र पुरोडाशप्रयुक्तस्यैव कपालस्य तुषोपवापं प्रत्यपि शेषत्वेन विनियोगाद् यत्र पुरोडाशो नास्ति न तत्र तुषोपवापार्थं कपालप्रयुक्तिरित्येवं सापवादा प्रयुक्तिश्चतुर्थाध्याये प्रपञ्चिता।

एकप्रयोगान्तर्गतानामङ्गप्रधानानामनुष्ठानक्रमः पञ्चमाध्याये श्रुत्यादिभिर्निरूपितः। तत्र "अध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयति" (श० ब्रा० ११.१.१.१०) इत्यादिश्रुत्या गृहपत्यादीनामुन्नेत्रन्तानां सप्तदशानां सत्रयजमानानां दीक्षाक्रमः, "अग्निहोत्रं जुहोति" (तै० सं० १.५.९.१), "यवागूं पचति" इत्यत्र होमद्रव्यनिष्पत्त्यर्थयवागूपाकप्रयोजनरूपेणार्थेन पाकहोमयोः क्रमः, "समिधो यजति" (तै० सं० २.६.१.१) इत्यादिविधिविहितानां प्रयाजानां विधिवाक्यपाठक्रमेण क्रमः, वाजपेये प्राजापत्यानां पशूनां प्रति पश्चावर्तनीयेषूपाकरणनियोजनादिषूपाकरणे यतः कुतश्चित् पशोरारभ्य यत्र क्वचित् पशौ समापिते तेनैव प्रवृत्तिक्रमेण नियोजनादिक्रमः। "साद्यस्क्रे क्रतौ सह पशूनालभते" इति श्रुत्या सवनीयस्थान एवाग्नीषोमीयसवनीयानुबन्ध्यपशुत्रयस्यापि सहकर्तव्यतया प्राप्तौ सवनीयस्थानेन प्रथमं सवनीयपशोरुपाकरणमनन्तरमग्नीषोमीयानुबन्ध्ययोरिति क्रमः, दर्शे पुरोडाशसान्नाय्ययोर्मुख्यक्रमेण प्रयाजशेषाभिघारणक्रमः, इत्येवं श्रुत्यर्थादिभिः क्रमः सापवादः प्रपञ्चितः।

एवं द्वितीये उत्पत्तिविधिप्रमेयस्य कर्मभेदस्य, तृतीये विनियोगविधिप्रमेयस्य शेषशेषिभावस्य, चतुर्थपञ्चमयोः प्रयोगविधिप्रमेययोः प्रयुक्तिक्रमयोश्च निरूपणानन्तरं षष्ठेऽधिकारविधिप्रमेयः फलसम्बन्धो निरूपितः। तत्र स्वर्गकामादिपदं विधिप्रयोजनभूतपुरुषप्रवृत्त्यपेक्षितफलविशेषान्वयपरम्, न तु चन्दनादिरूपयागादिद्रव्यसमर्पकम्। तच्च फलं स्वर्गकाम इत्याद्युद्देश्यगतलिङ्गविशेषस्याविवक्षितत्वात् स्त्रीणामप्यविशिष्टम्। "वृद्धिकामाः सत्रमा-

सीरन्" इत्यादावेकैकस्य कृत्स्नं फलं न तु परिषद्गतं फलमित्येकैकस्य फलावयव इत्येवमादिरूपेणाधिकारः सापवादः षष्ठे प्रपञ्चितः ।

एवं विधिचतुष्टयप्रमेयात्मकोपदेशविचारे पूर्वषट्केन कृते ततः परमध्यायचतुष्टयेनातिदेशविचारः । इत्थं कर्तव्यमित्युपदेशः, तद्वत् कर्तव्यमित्यतिदेशः । तत्र सप्तमाष्टमयोर्वचननामधेयचोदकैरतिदेशो निरूपितः । इषुनामके क्रतौ कांश्चिद्वैशेषिकान् धर्मान् विधायाम्नातेन—"समानमितरच्छ्येनेन" इति प्रत्यक्षवचनेन श्येनवैशेषिकाङ्गानामिषावतिदेशः । "मासमग्निहोत्रं जुहोति" इत्यत्र नित्याग्निहोत्रेऽग्निदेवतासद्भावात् क्लृप्तशक्तिकेन तत्सादृश्यविधित्सया कौण्डपायिनामयने कर्मणि प्रयुक्तेनाग्निहोत्रनामधेयेन तस्मिन्नित्यग्निहोत्रधर्माणामतिदेशश्च सापवादः सप्तमे पादत्रयेण निरूपितः । चतुर्थपादेन "सौर्यं चरुं निर्वपेत्" (तै० सं० २.३.२.३) इत्यादिष्वनुपदिष्टधर्मेषु प्रत्यक्षवचनस्य नाम्नश्चातिदेशकस्याभावेऽपि कुतश्चिद्वैदिकात् कर्मणो धर्मप्रापकं वचनमस्तीत्यानुमानिकवचरूपेण चोदकेनातिदेशः सामान्यतो निरूपितः ।

अष्टमे तु कस्य कुतो धर्मप्राप्तिरित्याकाङ्क्षायां शब्दार्थगतसादृश्यविशेषलिङ्गादिष्टीनां दर्शपूर्णमासतो धर्मप्राप्तिः । अग्नीषोमीयपशुतः पशूनां सवनीयादैकादशिनीनां ज्योतिष्टोमात् सोमानां द्वादशाहादहर्गणानां गवामयनात् संवत्सरसत्राणामित्येवंरूपेण विशिष्य चोदकातिदेशः सापवादः प्रपञ्चितः ।

अतिदिष्टानां मन्त्रसामसंस्काराणां प्राकृतपदार्थकार्यापन्नवैकृतपदार्थान्तरसम्बन्धेनान्यथाभावरूप ऊहो नवमे चिन्तितः । प्राकृतपदार्थकार्यापत्तिः प्रत्यक्षेणानुमानेन प्रत्यक्षवचनावगतप्राकृतनिवृत्त्यनुमितशब्देन प्रत्यक्षवचनावगतलिङ्गोन्नीतनिवृत्त्यनुमितशब्देन वावसीयते । "नैवारश्चरुः" (श० ब्रा० ५.१.४.१४) इत्यत्र प्राकृतव्रीहिकार्यहविर्निष्पादकत्वं प्रत्यक्षेणावसीयते, न तु नैवार इति तद्धितेन, "तस्येदम्" (पा० ४.३.१२०) इति सम्बन्धसामान्ये अण्प्रत्ययविधानात्, तस्येह प्रकृतिविकृतिभावरूपसम्बन्धविशेषपर्यवसायित्वकल्पनायाः प्रत्यक्षाधीनत्वात् । "नैर्ऋतं चरुं परिवृत्त्यै गृहे कृष्णानां व्रीहीणां नखनिर्भिन्नम्", इत्यत्र श्रुतस्य नखस्य प्राकृतोलूखलमुसलकार्यापत्तिर्न प्रत्यक्षेणावसीयते, उलूखलमुसलाभ्यां व्रीहीणामवहननं निष्पद्यते नखेन तेषां निर्भेदनमिति प्रत्यक्षेण कार्यभेदस्यैव दर्शनात् । किन्त्ववहननेनेव निर्भेदनेनापि तुषविमोकात् तण्डुलनिष्पत्तिदर्शनेन प्राकृतावघात-

स्योलूखलमुसलकार्यतायां यद्रूपं विवक्षितं तण्डुलनिष्पत्तिद्वारेणापूर्वोपयोगिक्रियात्वं तन्निर्भेदनेऽपि समानमिति तेन रूपेणावहननिर्भेदनयोरैक्यस्योन्नेयत्वात् तत्कार्यापत्तिरनुमानेनावसीयते। "परिधौ पशुं नियुञ्जीत" इत्यत्र प्राकृतयूपकार्ये पशुनियोजने परिधेर्विनियोगः प्रत्यक्षवचनेनाभिधीयते। "न गिरा गिरेति ब्रूयादैरंकृत्वोद्गेयम्" इत्यत्र गिरागिरोक्तिप्रतिषेधावगतया गिरापदनिवृत्त्या तत्कार्यस्य साधनापेक्षत्वावगमात् तत्कार्यवाचिपदमनुमाय गिरापदकार्यार्थमैरं कृत्वोद्गेयमित्येवंरूपेण श्रुतानुमितैकदेशनिष्पादितेन वाक्येन गिरापदकार्यापत्तिरिरापदस्यावसीयते, "यस्योभयं हविरार्तिमार्च्छेदैन्द्रं पञ्चशरावमोदनं निर्वपेत्" (तै० ब्रा० ३.७.१.७) इत्यत्र पञ्चशरावद्रव्यकस्य यागस्य दर्शकार्यापत्तौ दर्शनिवृत्तिर्न प्रत्यक्षवचनादवगम्यते, किन्तु द्रव्यविनाशादवगम्यते। तन्निवृत्तौ तत्कार्यस्य साधनापेक्षायां तद्वाचिपदमनुमाय दर्शकार्यार्थम्—"ऐन्द्रं पञ्चशरावमोदनं निर्वपेत्" इति श्रुतानुमितैकदेशनिष्पाद्येन वाक्येन पञ्चशरावयागस्य दर्शकार्यापत्तिरवसीयते। "स प्रत्यामनेत् स्थानात्" (जै० ६.४.३०) इति षष्ठाध्यायाधिकरणपूर्वपक्षरीत्येदमुदाहरणम्। सिद्धान्ते तु द्रव्यापचारे द्रव्यान्तरानयनेन दर्शनिष्पत्तेर्न तन्निवृत्त्युन्नयनमस्तीत्युदाहरणान्तरमन्वेषणीयम्। एवं कार्यापत्त्या व्रीहिधर्माणामवघातादीनां नीवारेषूलूखलमुसलधर्माणां प्रोक्षणादीनां नखे यूपधर्माणां परिव्याणादीनां परिधौ चोहः संस्कारोहः। गिरापदगतगीतिक्रियाया इरापदे तूहः सामोहः। दर्शधर्माणां तु सिद्धान्ते नास्त्यूहः। पञ्चशरावयागे मन्त्रोहस्त्वष्टविधः। क्वचित् प्रकृतिमात्रमूह्यते, यथा "अग्नये जुष्टं निर्वपामि" (तै० सं० १.१.४.२) इत्यत्र अग्निपदस्थाने सौर्यचरौ सूर्यायेति। क्वचिल्लिङ्गमात्रमूह्यते, यथा "वस्व्यसि रुद्रासि" (तै० सं० १.२.५.१) इत्येकहायनीमन्त्रे विकृतिविशेषविहितं सोमक्रयणं वत्सतरं प्राप्ते "वसुरसि रुद्रोऽसि" (मै० सं० १.१.१३) इति। क्वचिद्वचनमात्रमूह्यते, यथा "छागस्य वपाया मेदसः" इति मन्त्रे प्राजापत्यपशून् प्राप्ते 'छागानाम्' इति। क्वचित् प्रकृतिर्लिङ्गं चोह्यते, यथा "अग्नये जुष्टम्" (तै० सं० १.१.४.२) इत्यादित्यचरुं प्राप्ते मन्त्रे "अदित्यै जुष्टम्" इति। क्वचित् प्रकृतिर्वचनं चोह्यते, यथा तस्मिन्नेव मन्त्रे वैश्वदेवचरुं प्राप्ते "विश्वेभ्यो देवेभ्यः" इति। क्वचिल्लिङ्गं वचनं चोह्यते, यथा "प्रास्मा अग्निं भरत" (मै०सं० ४.१३.४) इति मन्त्रे "मल्ला आलभेत" इति विहितान् पशून् प्राप्ते 'प्राभ्योऽग्निम्' इति। क्वचित् त्रीण्यप्यूह्यन्ते, यथा "आपो देवीः" (मै०सं०

१.२.१) इति मन्त्रे आज्यप्रोक्षणमिति सोमारौद्रचरौ विहितं घृतं प्राप्ते घृत देव इति। क्वचित् सकलस्य पदस्याभ्यासरूप ऊहः, यथा "एकथास्य त्वचमाच्छंतात्" (मै० सं० ४.१३.४) इति मन्त्रे पशुगणं प्राप्ते एकथैकथेति। एवमूहः सापवादो नवमे प्रपञ्चितः।

एवमातिदेशिकपदार्थगतरूपान्तरात्मकोहनिरूपणानन्तरं तन्निवृत्त्यात्मको बाधो दशमे निरूपितः। निवृत्तिश्च कस्यचित् क्वचिदतिदेशवाक्यप्रवृत्तिकाले प्रकृतावविज्ञातत्वेन तद्ग्राह्यत्वासम्भवात्, यथा दर्शपूर्णमासाङ्गभूतायामारम्भणीयायामारम्भणीयायाः। नह्यारम्भणीयाविधानसमये दर्शपूर्णमासयोरारम्भणीया अङ्गमिति विज्ञाता, येन सापि प्रयाजादिवदतिदेशवाक्येन गृह्येत। कस्यचिदतिदेशवाक्यप्रवृत्तिकाले प्रकृतौ विज्ञातस्याप्यसम्भवान्निवृत्तिः, यथा पवमानेष्टावग्निहोत्रहवण्याः। ययाग्निहोत्रं हुतं साग्निहोत्रहवणी प्रकृतौ "अग्निहोत्रहवण्या हवींषि निर्वपति" इति निर्वापकरणत्वेन ग्राह्येति स्थितम्। न च पवमानेष्टिसमये अग्निहोत्रं हुतम्। क्वचिद् द्वारलोपान्निवृत्तिः। तत्र द्वारलोपः क्वचिद् द्वारत्वाभिमतस्य स्वतःसिद्धतया, यथा कृष्णलेष्ववघातद्वारस्य वैतुष्यस्य स्वतःसिद्धतयाऽवघातस्य निवृत्तिः। क्वचित् पूर्वसिद्धतया, यथा "खलेवाली यूपो भवति" इत्यत्र खलेवाल्याः प्रागेव छित्वा तक्षणेन श्लक्ष्णीकृत्य निखातायाश्छेदनतक्षणोच्छ्रयणानां निवृत्तिः। क्वचिद् द्वारसम्पादनाशक्त्या, यथा प्राशित्रेडाभक्षणार्थेषु कृष्णलेष्वभिघारणजन्योपकारस्य स्वादिम्नः सम्पादयितुमशक्यत्वादभिघारणनिवृत्तिः। क्वचित् सिद्धशेषिविरोधान्निवृत्तिः, यथाग्रयणदक्षिणादिरूपे वत्सेऽन्वाहार्यधर्मस्य पाकस्य। पाके हि कृते वत्सो नश्येत्तन्मांसमेव दक्षिणा स्यात्। क्वचित् साध्यशेषिविरोधान्निवृत्तिः, यथा "बार्हस्पत्यो नैवारः सप्तदशशरावश्चरुर्भवति" इत्यत्र निर्वाप्येषु व्रीहिषु "चतुरो मुष्टीन्निर्वपति" (आप० श्रौ० १.१८.२) इत्यतिदेशप्राप्तस्य चतुर्मुष्टिपरिमाणस्य व्रीहिसाध्यस्य सप्तदशशरावपरिमाणचरुरूपसाध्यशेषिविरोधित्वात् संख्यामुष्ट्योरन्यतरस्य बाधावश्यम्भावे जघन्यत्वाद् मुष्टेर्निवृत्तिः। क्वचिद्विरोधाभावेऽपि प्रयोजनाभावान्निवृत्तिः, यथाग्रयणदक्षिणारूपे वाससि पाकस्य। प्रकृतौ ह्यन्वाहार्यरूपदक्षिणाद्रव्यनिष्पत्त्यर्थं "दक्षिणाग्नावपरिमितं महान्तमोदनं पचति" इति पाको विहितः। इह दक्षिणाद्रव्ये वाससि प्रागेव निष्पन्ने स्थिते तन्निष्पत्त्यनुपयोगिना किं पाकेन। द्वारलोपान्निवृत्तिरित्यत्र द्वारशब्देन यद्द्वारतया फलतया वा प्रयोजनं तत्सर्वं विवक्षितम्। तेन मृते यजमाने क्रियमाणाया-

(आप. श्रौ. १.१७.१०)

मिष्टौ "आयुराशास्ते" (तै० सं० २.६.९.९) इत्यादिमन्त्राणां विवक्षितफलानां मृतस्य यजमानस्यायुरादिफललोपान्निवृत्तिरप्युदाहरणमित्यादि द्रष्टव्यम् ।

क्वचित् प्रत्याम्नानात् प्राकृतपदार्थनिवृत्तिः । साप्यनेकविधा । क्वचिदुपदिष्टपदार्थविरोधात्तन्निवृत्तिः, यथा "औदुम्बरो यूपो भवति" (तै० सं० २.१.१.६) इति वैकृतपशावतिदेशप्राप्तयूपोद्देशेनौदुम्बररूपप्रकृतिद्रव्यविधानादुदुम्बरप्रकृतिके यूपे प्राकृतस्य बिल्वपलाशादेर्विरोधेन प्रकृतित्वासम्भवान्निवृत्तिः । क्वचिदुपदिष्टपदार्थगतश्रुतनैरपेक्ष्यश्रुतौ विरोधान्निवृत्तिः, यथा "नैवारश्चरुर्भवति" (श० ब्रा० ५.१.४.१४) इत्यत्र नीवारप्रकृतिके चरौ व्रैहतण्डुलानामपि मिश्रणेन प्रकृतित्वसम्भवेऽपि नीवारशब्दपरतद्धितोत्पत्त्यवगतनैरपेक्ष्यविरोधाद् व्रीहीणां निवृत्तिः । नैवाराणां व्रीहिसापेक्षाणां चरुप्रकृतित्वे हि "सापेक्षमसमर्थम्" इत्यसामर्थ्यात् तद्धितोत्पत्तिर्न स्यात् । क्वचिदविरोधेऽपि नैरपेक्ष्यान्निवृत्तिः, यथाग्रयणे "वासो दक्षिणा", "वत्सः प्रथमजो दक्षिणा" इति श्रुताभ्यां वासोवत्साभ्यामृत्विजामानतौ तयोरन्वाहार्यनिरपेक्षकारणत्वात् प्राकृतान्वाहार्यदक्षिणाया निवृत्तिः । क्वचिन्नैरपेक्ष्याभावेऽपि नियमवशान्निवृत्तिः, यथा ऋतपेये "औदुम्बरः सोमचमसो दक्षिणा सप्रियाय सगोत्राय ब्रह्मणे देया" इति श्रुतेन सोमचमसेन केवलं ब्रह्मणे दत्तेन लौकिकोपायान्तरमनपेक्ष्य ऋत्विजामानतेरसम्भवेऽपि श्रुतनियमविधिवशात् प्राकृत्या द्वादशशतदक्षिणाया निवृत्तिरित्याद्युदाहरणीयम् । क्वचित् प्रतिषेधात् प्राकृतपदार्थनिवृत्तिः । प्रतिषेधशब्देनात्र यः कश्चित् प्राकृतपदार्थनिवृत्तिफलको विधिः स सर्वोऽपि विवक्षितः । तेन महापितृयज्ञे "नार्षेयं वृणीते" (तै० ब्रा० १.६.९.१) इत्यनेन आर्षेयवरणवर्जं प्रकृतिवत् कुर्यादिति पर्युदासेन या तस्मिन्नार्षेयवरणनिवृत्तिः, या च "न तौ पशौ करोति" (शां० ब्रा० ३.५) इत्याज्यभागनिषेधाद्या पशावाज्यभागनिवृत्तिः "आज्यभागौ यजति" (मै० सं० १.१०.१५) इत्यपूर्वतापरविधिनाऽऽज्यभागव्यतिरिक्ताङ्गानां निवृत्तिः, सा सर्वाप्यत्रोदाहरणम् । एवं च दर्शपूर्णमासयोः "कपालेषु श्रपयति" (आप० श्रौ० १.२४.६) इति वाक्यस्य तण्डुलहविष्केषु चित्रादिषु व्रीह्युपादाननिवृत्तेरेव फलत्वात् साप्यत्रोदाहरणम् । यथा च "कपालेषु श्रपयति" (आ० श्रौ० १.२४.६) इति विधेस्तण्डुलहविष्कासु विकृतिषु प्रकृतिद्रव्योपादाननिवृत्तिरेव फलम्, तथा प्रपञ्चेन प्रसाधितमस्माभिर्विधिरसायने ।

एवमुपदेशविषयेऽतिदेशविषये च पृथङ्निरूपणीयेषु निरूपितेषु तदुभयसाधारणयोस्तन्त्रप्रसङ्गयोर्निरूपणीययोरेकादशे तन्त्रं निरूपितम्। तत् त्रिविधम्—फलतन्त्रं पदार्थतन्त्रमनुष्ठानतन्त्रमिति। तत्र "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत" इत्यत्र फलमुद्दिश्योपादीयमानानामाग्नेयादीनां षण्णां द्वन्द्वावगतं "राजसूयेन स्वाराज्यकामो यजेत" (आप० श्रौ० १८.८.१-४) इत्यत्र बहूनामिष्टिपशुसोमानामेकेन नाम्ना तन्त्राभिधानावगतं च साहित्यं विवक्षितमिति सहितानां फलान्वयादाग्नेयादीनां षण्णां फलं राजसूयनामगृहीतयागानां च फलं साधारणं तदेतत् फलतन्त्रम्। "समे दर्शपूर्णमासाभ्यां यजेत पौर्णमास्यां पौर्णमास्या यजेत दर्शपूर्णमासयोश्चत्वार ऋत्विजः" इति विहिता देशकालकर्तार एकफलसाधनानां कर्मणां यथायोगं साधारणा इत्येतत् पदार्थतन्त्रम्। एकफलानामेकदेशकालकर्तृकाणां यदङ्गभूतप्रयाजाद्यनुष्ठानं साधारणं तदनुष्ठानतन्त्रम्। यत्र तु फलैक्येऽपि देशकालकर्तॄणामन्यतमस्यापि भेदस्तत्र प्रतिप्रधानमङ्गानुष्ठानावृत्तिलक्षण आवापः। तत्र द्वादशाहे द्वादशानां सोमयागानां द्वादशस्वहस्सु कर्तव्यानां कालभेदात् सुत्याकालकर्तव्यसवनीयपशुप्रभृत्यङ्गानुष्ठानावृत्तिः। वरुणप्रघासेषु नवहविष्कायामिष्टौ विहारद्वयं विधाय "अष्टावध्वर्युर्विहारे हवींष्यासादयति मारुतीमेव प्रतिप्रस्थाता दक्षिणस्मिन्" इति देशभेदविधानात् तत्र तत्र देशेऽष्टानां हविषां मारुत्याश्चाङ्गानुष्ठानं भिद्यत इति देशभेदेन तदावृत्तिः। तत्रैव "गार्हपत्ये पत्नीसंयाजान् जुहोति" इति विहितानामापराग्निकहोमानां देशकालैक्येऽप्यध्वर्युप्रतिप्रस्थातृरूपकर्तृभेदाद् भेदः। यत्र कर्तृत्वाधिष्ठानाभेदेऽपि कर्तृकारकभेदस्तत्रापि प्रयोगभेदेनाङ्गानुष्ठानावृत्तिरेव, यथा "आग्नावैष्णवमेकादशकपालं निर्वपति वामनो दक्षिणा सोमापौष्णं चरुं निर्वपति श्यामो दक्षिणा" (तै० सं० २.२.९.१) इत्यादिवाक्यविहितेषु राजसूयान्तर्गतयागेषु देशकालफलभेदाप्रतीतावपि वामनानतैराग्नावैष्णवयागः कर्तव्यः, श्यामानतैः सोमापौष्णश्चरुः कर्तव्य इत्येवं दक्षिणाव्यवस्थया तद्भेदात् कर्तृरूपं भिद्यत इति ततः प्रतियागं प्रयोगभेदादङ्गानुष्ठानावृत्तिः। यानि कालभेदेन कर्तव्यानामपि प्रधानानामेककपालान्यङ्गानि तान्यगृह्यमाणविशेषत्वात् सर्वेषां तन्त्रं भवन्ति, यथा ज्योतिष्टोमेऽग्नीषोमीयसवनीयानुबन्ध्यपशूनां दीक्षासु—"यूपं छिनत्ति" इति दीक्षाकालकर्तव्यत्वेन विहितो यूपः, यथा वा द्वादशाहे द्वादशानां सोमयागानामहर्भेदेन कर्तव्यानां दीक्षोपसदादय इति। एवंरूपेण सापवादं तन्त्रमेकादशे निरूपितम्।

तदाराधनविशेषसाधनरूपस्य तत्तदर्थवादप्रकाशितप्राशस्त्यविलासस्य श्रुत्यादिसम्पादितसकलाङ्गपुङ्खितस्य स्वप्रमाणानुगुणस्मृतीतिहासपुराणाभियुक्तसूक्तिसन्दर्भकृतोपबृंहणस्य विधि-

---

द्वादशे प्रसङ्गो निरूपितः। अन्यार्थेनान्यस्य तत्प्रयुक्तिशक्तस्योपकारः प्रसङ्गः। यथा भोजनार्थं प्रथमागतस्याचार्यस्य कृते कृतेन सूपापूपादिना पश्चादागतस्य स्वयमाचार्यनैरपेक्ष्येणापि सूपापूपादिप्रयुक्तिशक्तस्य जामातुरुपकारः। यत्त्वन्यार्थेन स्वयं तत्प्रयुक्तिशक्तिरहितमुपक्रियते, तन्न प्रासङ्गिकम्, किन्त्वाचार्यार्थकृतसूपाद्युपक्रियमाणपरिचारकादिवत् तदुपजीव्यप्रयोजकम्। यथा दध्यानयनेनोपक्रियमाणं वाजिनं पुरोडाशकपालं प्रति तुषोपवापस्य शेषित्वे सत्यपि न तत्प्रयुक्तिशक्तिः, "पुरोडाशकपालेन" (आप० श्रौ० १.२०.९) इति सविशेषणोपादानेनान्यप्रयुक्त्युपजीव्यत्वाविष्करणात्। स च प्रसङ्गस्त्रिविधः—अनुष्ठानप्रसङ्गः, पदार्थप्रसङ्गः, शास्त्रप्रसङ्गश्चेति। तत्र पश्वर्थप्रयाजाद्यनुष्ठानेन पशुपुरोडाशाद्युपकारोऽनुष्ठानप्रसङ्गः। सोमित्या वेद्या सोमान्तर्गतेष्टिपशूनामुपकारः पदार्थप्रसङ्गः। "याजनादिभिर्ब्राह्मणो धनमार्जयेत्" इति द्रव्यार्जनशास्त्रेण ज्योतिष्टोमादिशास्त्रस्य ऋत्विगपेक्षस्याविशेषेण त्रैवर्णिकानामार्त्विज्यमाक्षेप्तुं प्रवृत्तस्योपकारः शास्त्रप्रसङ्गः। इत्येवमादिरूपेण द्वादशे सापवादः प्रसङ्गो निरूपितः।

तत्र द्वादशलक्षणीप्रतिपाद्यमध्ये धर्मे चोदनायाः प्रामाण्यं तन्नियोगरूपेत्यादिविशेषणेन, मन्त्रार्थवादयोस्तत्र प्रामाण्यं तत्तदर्थवादेत्यादिविशेषणेन, स्मृत्यादीनां तत्र प्रामाण्यं स्वप्रमाणानुगुणेत्यादिविशेषणेन च दर्शितम्। तदाराधनेत्यादिविशेषणेन द्वितीयाध्यायार्थः कर्मभेदो दर्शितः। ततो नामधेयस्य कर्मभेदकत्वेन धर्मप्रमोपयोगसिद्ध्या तत्र नामधेयपदार्थस्याप्यन्तर्भावः। वेदचोदनानां "श्रुतिस्मृती ममैवाज्ञे" (वाधूल० १८९) इति स्मृत्युक्तरीत्या परमेश्वराज्ञारूपत्वं "भोक्तारं सर्वयज्ञानाम्" (भ० गी० ५.२९) इत्याद्युक्तरीत्या सर्वकर्मणां परमेश्वराराधनरूपत्वं च प्रतिपाद्यम्। अनेन कृत एव धर्मविचारः कर्माण्यनुष्ठाप्य परमेश्वरप्रसादद्वारा चित्तशुद्धिसम्पादनेन ज्ञानहेतुरिति तथाभूतस्यैव धर्मविचारस्य ब्रह्मविचारापेक्षिततत्पूर्ववृत्तत्वं युक्तम्, न त्वर्वाचीनव्याख्यानादभिमतं निरीश्वरवादमवलम्ब्य कृतस्य धर्मविचारस्येत्यभिप्रेत्य तन्नियोगरूपेति, तदाराधनेति च विशेषितम्। सार्थशब्दः समूहवाची। अर्थवादशब्देन मन्त्रस्यापि ग्रहणम्, तत्रापि देवतादिगुणकीर्तनसत्त्वेन

निषेधविकल्पसमुच्चयोत्सर्गापवादबाधाभ्युच्चयादिमतो निखिलपुरुषार्थरत्नाकरस्य परमप्रबोधसाधनस्य भगवतो धर्मस्य विचारानन्तरमित्यथशब्दार्थो निर्णीतः ।

अतःशब्दोऽयं वृत्तस्य हेतुभावे वर्तते । यतोऽधीतवेदेन धर्मो विचारितोऽतस्तदनुष्ठानसम्पन्नचित्तशुद्धिना तत्काल-

---

स्तावकत्वसद्भावात् । इतिहासा उपाख्यानप्रधाना महाभारतादयः । अभियुक्तसूक्तयो हैरण्यगर्भाद्यागमाः । श्रुत्यादीति विशेषणेन तृतीयपञ्चमसप्तमाष्टमनवमाध्यायप्रमेयजातं दर्शितम् । तत्रादिशब्देन श्रुतिलिङ्गादीनां वचननामधेयादीनां प्रत्यक्षादिकार्यापत्तिप्रमाणानां च संग्रहः । विधिनिषेधेत्यादिविशेषणेन दशमाद्यवशिष्टाध्यायचतुष्टयप्रमेयजातं दर्शितम् । दर्शपूर्णमासयोरार्षेयवरणस्य होतृवरणस्य च विधिः । तत्प्रकृतिके महापितृयज्ञे तयोर्निषेधः । बृहद्रथन्तरपृष्ठयोर्ज्योतिष्टोमे विकल्पः । तद्विकृतिविशेषेषु "संसव उभे कुर्याद् गोसव उभे कुर्यात्" इति विधिभिः समुच्चयः । विकृतीष्टिविशेषेषु—"शरमयं बर्हिः" (तै० सं० २.१.७.७) इत्युपदेशतः प्रत्यामनद्भिः शरैः प्राकृतानां कुशानां बाधः । सांग्रहिण्यामिष्टौ "आमनस्यामनस्य देवा इति तिस्र आहुतीर्जुहोति" (तै० सं० २.३.९.३) इत्युपदिष्टैरामनहोमैः प्राकृतानां तत्समसंख्यानामनूयाजानां बाधेन समुच्चयरूपोऽभ्युच्चयः । सर्वमिदं दशमाध्यायप्रमेयजातं बाधस्यैव प्रपञ्चेन प्रदर्शनार्थमुपन्यस्तम् ।

आदिशब्देन प्रयोजकाप्रयोजकतन्त्रावापप्रसङ्गाप्रसङ्गग्रहणम् । निखिलपुरुषार्थरत्नाकरस्येत्यनेन षष्ठाध्यायप्रमेयं दर्शितम् । एवमनुष्ठानोपयोगिना सर्वेणापि रूपेण द्वादशलक्षण्या विचारितस्य धर्मस्यानुष्ठानद्वारा ज्ञानसाधनत्वं युक्तमिति प्रकृतोपयोगमाह—परमेति । यदि धर्मानुष्ठानं द्वादशलक्षण्या कृतं धर्मविचारमिव शास्त्रान्तरविचारमप्यपेक्षेत, तदा धर्मविचारः करिष्यमाणे ब्रह्मविचारे निरपेक्षं पुष्कलं कारणं न स्यात्, न त्वेतदस्तीति दर्शयितुमेतावन्ति विशेषणानि । भवगत इति । ज्ञानोपदेष्टृत्ववज्ज्ञानप्रदत्वकृतमौपचारिकं विशेषणम् ।

सौत्रमतःशब्दं व्याचष्टे—अतःशब्द इति । ननु पूर्ववृत्तस्य धर्मविचारस्य हेतुत्वमथशब्देनैव द्योतितम्, तस्य नियतसामग्रीरूपत्वाभावे पूर्ववृत्तत्वेन

ग्रहणानुपपत्तेः। अतोऽयमतःशब्दो निरर्थक इत्याशङ्कान्तरनिराकरणार्थत्वेन तत्साफल्यमभिप्रेत्य व्याचष्टे—यत इति। अयमाशयः—धर्मविचारस्य ब्रह्मविचारं प्रति पूर्ववृत्तत्वेन ग्रहणमयुक्तम्, तस्य तद्धेतुत्वासम्भवात्। तद्धेतुत्वं हि नादृष्टद्वारा, तथा विधानाभावात्। नापि दृष्टद्वारा, तदनुपलम्भात्। न च ब्रह्मविचारापेक्षितानां वेदचोदनार्थवादमन्त्रस्मृत्यादीनां प्रामाण्यसिद्धिर्द्वारमिति वाच्यम्, इहापि शास्त्रे देवताधिकरणसूत्रैस्तत्सिद्धेः। तत्र—"अत एव च नित्यत्वम्" (ब्र० १.३.२) इति सूत्रेण वेदचोदनाप्रामाण्यस्य—"तदुपर्यपि बादरायणः सम्भवात्" (ब्र० १.३.२६) इति सूत्रेण मन्त्रार्थवादे देवतानां विग्रहवत्त्वसिद्ध्या विद्याधिकारहेतुसामर्थ्यसम्भवसाधनत्वेन मन्त्रार्थवादप्रामाण्यस्य "शब्द इति चेन्नातः प्रभवात्प्रत्यक्षानुमानाभ्याम्"(ब्र० १.३.२८) इति सूत्रेण स्मृत्यादिषु श्रुत्यनुमापकत्वप्रवृत्तिनिमित्तकानुमानशब्दप्रयोगवता स्मृत्यादिप्रामाण्यस्य च सिद्धेस्तत्र पूर्वपक्षसिद्धान्ताभ्यां स्फुटं वेदादिप्रामाण्यसाधनमस्तीति चेत्, किं ततः, तदपि सूत्रकृतं व्याख्यानसापेक्षम्। व्याख्यानतोऽपेक्षितयावद्विशेषप्रतिपत्तिरिहापि सुलभा। एतेन ब्रह्मविचारापेक्षितश्रुत्यादिस्वरूपबलाबलनिर्णयस्तत्र द्वारमित्यपि निरस्तम्। इहापि "द्युभ्वाद्यायतनं स्वशब्दात्" (ब्र० १.३.१), "आकाशस्तल्लिङ्गात्" (ब्र० १.१.२२), "तथा चैकवाक्यतोपबन्धात्" (ब्र० ३.४.२४), "प्रकरणात्" (ब्र० १.३.६) इत्यादिसूत्रैः श्रुत्यादिस्वरूपावगमस्य, "श्रुत्यादिबलीयस्त्वाच्च न बाधः" (ब्र० ३.३.४७) इत्यादिसूत्रैः श्रुत्यादीनां पूर्वपूर्वबलीयस्त्वावगमस्य च सम्भवात्, लक्षणमुखेन परस्परासङ्कीर्णश्रुत्यादिस्वरूपनिर्णयस्य तत्राप्यसम्भवात्। नहि तत्र श्रुत्यादीनां लक्षणमस्ति। क्वचिद् वाक्यैक्यमात्रस्य लक्षणमुक्तम्, "अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यात्" (जै० २.१.४६) इति। यानि तु व्याख्यातृभिरुक्तानि लक्षणानि तान्युपयुज्यन्ते। तथा हि—"निरपेक्षः शब्दः श्रुतिः" इति श्रुतिलक्षणमुक्तम्। तत्सर्वत्राप्यसिद्धम्। शक्तिस्मरणादिसापेक्षत्वात् पदान्तरसमभिव्याहारनिरपेक्षत्वं विवक्षितमिति चेन्न, धूमवति पर्वते प्रकृते प्रयुक्तस्य स इति शब्दस्य वह्निज्ञापनेऽनुमानव्यवधानसापेक्षत्वेऽपि पदान्तरसमभिव्याहारनिरपेक्षत्वेन लिङ्गसमर्पकशब्दस्यापि लिङ्गिनि श्रुतित्वप्रसङ्गात्, "शब्दादेव प्रमितः" (ब्र० १.३.२४) इत्यधिकरणविषयवाक्ये—"अङ्गुष्ठमात्रः पुरुषः" (कठो० ४.१३) इत्यत्रेशानश्रुतेरङ्गुष्ठप्रमितः परमेश्वर इति बोधनेऽङ्गुष्ठमात्रपदसमभिव्याहारसापेक्षत्वेन श्रुतित्वाभावप्रसङ्गाच्च।

ननु परमेश्वरवाचिन ईशानशब्दस्याङ्गुष्ठमात्रपदसामानाधिकरण्याद् वस्तुतोऽङ्गुष्ठप्रमितत्वेन पर्यवसास्यतो धर्मिमात्रस्य ज्ञापने नैरपेक्ष्यमस्ति, "व्रीहीन् प्रोक्षति" (आप० श्रौ० १.१९.१) इत्यत्र क्रियेप्सिततमत्ववाचिन्या द्वितीयाविभक्तेः प्रोक्षतिपदसामानाधिकरण्यात् प्रोक्षणत्वेन पर्यवसास्यतः क्रियामात्रस्य ज्ञापन इवेति चेत्, तर्हि "आकाशस्तल्लिङ्गात्" (ब्र० १.१.२२) इत्यधिकरणविषयवाक्ये—"आकाशो ह्येवैभ्यो ज्यायान्" (छान्दो० १.९.१) इत्यत्र ज्यायःशब्दस्याकाशपदसमभिव्याहाराद् वस्तुत आकाशत्वेन पर्यवसास्यद्धर्मिमात्रज्ञापने नैरपेक्ष्यमस्तीति तस्याप्याकाशस्य परमेश्वरत्वे विशिष्टसाध्ये श्रुतित्वप्रसङ्गात् ।

ननु धर्ममात्रस्यापि प्रकृतविवक्षितसाध्यविशेषविशिष्टस्य ज्ञापने नैरपेक्ष्यमपेक्ष्यते, न च ज्यायःशब्दस्य तत्र विवक्षितसाध्येन परमेश्वरत्वेन विशिष्टस्य धर्मिणो ज्ञापने नैरपेक्ष्यमस्तीति चेन्न, ज्यायस्त्वलिङ्गसमर्पकस्य तस्य परमेश्वरस्य लिङ्गत्वज्ञापने पदान्तरसमभिव्याहारनैरपेक्ष्यस्याविकलत्वात् । नैरपेक्ष्यशब्देन प्रकृतसाध्यविशेषविशिष्टधर्मिणि शक्तिर्विवक्षितेति चेन्न, "द्युभ्वाद्यायतनं स्वशब्दात्"(ब्र० १.३.१) इत्यधिकरणविषयवाक्ये "तमेवैकं जानथ आत्मानम्" (मुण्डको० २.२.५) इत्यत्रात्मशब्दस्य द्युभ्वाद्यायतनं परमेश्वर इति प्रतिज्ञायां विवक्षितसाध्येन परमेश्वरत्वेन विशिष्टधर्मिणि शक्त्यभावेन श्रुतित्वाभावप्रसङ्गात् । तत्र हि सूत्रे स्वशब्दादित्यनेनात्मशब्दस्य श्रुतित्वमेव विवक्षितम् । यथा "स्वशब्दोन्मानाभ्याम्" (ब्र० २.३.२३) इति सूत्रे स्वशब्देन जीवोऽणुरिति प्रतिज्ञायाम् "एषोऽणुरात्मा चेतसा वेदितव्यः" (मुण्डको० ३.१.९) इति श्रुतिगतस्याणुशब्दस्य श्रुतित्वसंचितं सच्छब्दोक्तं जगत्कारणं प्रधानं न भवतीति प्रतिज्ञायाम्, "गौणश्चेन्नात्मशब्दात्" (ब्र०१.१.६) इति सूत्रोपात्तस्यात्मशब्दस्य श्रुतित्वाभावप्रसङ्गाच्च । नैरपेक्ष्यशब्देन पूर्वपक्ष्यभिमतसाध्यविरोधिधर्मावच्छिन्ने धर्मिणि शक्तिर्विवक्षितेति चेन्न, तथा सति पूर्वोदाहृतस्य ज्यायानिति लिङ्गसमर्पकशब्दस्य श्रुतित्वप्रसङ्गतादवस्थ्यात् । लिङ्गलक्षणमपि नोपयुज्यते, "आनन्दमयोऽभ्यासात्"(ब्र० १.१.१३) इत्यादिसूत्रमारभ्य वर्ण्यमानानां निरतिशयानन्दादिब्रह्मसाधारणधर्मरूपलिङ्गानाम्—"लिङ्गभूयस्त्वात् तद्धि बलीयस्तदपि" (ब्र० ३.३.४३), "आतिवाहिकास्तल्लिङ्गात्" (ब्र० ४.३.४) इत्याद्यधिकरणार्थनिर्णयोपयुक्तलिङ्गानां चासंग्रहात् । नहि पूर्वतन्त्रे वस्तुसामर्थ्यमेव प्रमाणभूतं लिङ्गम्,अन्यत्तु "चतुर्दश पौर्णमास्यामाहुतयो हूयन्ते" इत्यादिभि-

रर्थवादादिभिरवगतं लिङ्गं केवलं प्रमाणानामनुग्राहकं स्वयं न प्रमाणम् । अत एव शाबरभाष्यादिषु तत्र तत्रान्यार्थदर्शनरूपलिङ्गोपन्यासेऽपि लिङ्गमात्रमसाधकमिति तदनुग्राह्यप्रमाणान्वेषणं दृश्यते । अतः प्रमाणभूतलिङ्गलक्षणेनान्यलिङ्गानामसंग्रहो न दोषायेतिवर्दास्मिन् शास्त्रे वक्तुं न शक्यते, ब्रह्मासाधारणधर्मादिरूपलिङ्गानाम् "आदरादलोपः" (ब्र० ३.३.३९) इत्यादिसूत्रार्थपर्यालोचनया वेदान्तेष्वर्थवादादिगतानामपि लिङ्गानां विवक्षिततत्वेन प्रामाण्यावसायात्, तथाभूतलिङ्गानामेव वाक्यप्रकरणादिभ्यो बलवत्त्वेन तत्तदर्थनिर्णायकतया परिग्रहाच्च । "अर्थवादाद्यवगतं लिङ्गमसाधकम्" इत्यभिमन्यमानाः पूर्वमीमांसका अव्यक्ताधिकरणाश्वप्रतिग्रहेष्ट्यधिकरणादिषु "घृते प्ररोचनां दृष्ट्वा विधिस्तत्रानुमीयते", "प्रजापतिर्वरुणायाश्वमनयत्" (तै० सं० २.३.१२.१) इत्यादिवाक्यसन्दर्भस्योपक्रमेऽश्वदातुः प्रजापतेर्वरुणग्रहनिर्मोचनहेतुत्वेनेष्टेः प्रशंसावशादश्वदातुरियमिष्टिर्विधास्यत इत्यवगम्यत इत्यर्थवादे विधिशक्त्यभावात्तावन्मात्रं ततोऽनवगतं विध्युद्देशाद् ग्राह्यम्, विधिविषयांशस्त्वर्थवादावगत एवेति प्रतिगृह्णातिर्दान एव योजनीय इत्यादि वदन्तः क्वचित् क्वचित् तदपि साधकमाद्रियन्ते ।

"इतिकर्तव्यताकाङ्क्षा प्रकरणम्" इति पूर्वतन्त्रोक्तं प्रकरणं न ब्रह्मविचारोपयोगि, सिद्धरूपस्य ब्रह्मण इतिकर्तव्यताकाङ्क्षाविरहादिति स्पष्टमेव । स्थानस्य तु सन्निधियथासंख्यलक्षणस्य संग्राहकमनुगतं लक्षणं पूर्वतन्त्रोक्तं न दृश्यते । "समाख्या यौगिकी संज्ञा" इत्येतदपि न युक्तम्, पूर्वतन्त्रे होतृचमसादिसंज्ञाया इह शास्त्रे "स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठाम्" (मुण्डको० १.१.१) इत्यादिषु श्रुताया ब्रह्मविद्यादिसंज्ञायाश्च समाख्यात्वसम्भवेऽप्याध्वर्यवौद्गात्रादिसंज्ञायाः प्रकृतिप्रत्ययसमभिव्याहाररूपत्वेन तदभिमतैकपदश्रुतिरूपतया समाख्यात्वासम्भवात् ।

तस्मादनुष्ठितैर्धर्मैः सम्पाद्या चित्तशुद्धिर्द्वारमित्येतावदवशिष्यते । तदपि नोपपद्यते । नहि विचारितधर्माणः सर्वे चित्तशुद्ध्यर्थं धर्माननुतिष्ठन्ति, अनुष्ठितधर्माणो वा न नियमेन ब्रह्मविचारोपयोगिनीं चित्तशुद्धिं लभन्ते । न चैतावता ब्रह्मविचारस्य धर्मविचारानन्तर्यनियमभङ्गेऽपि धर्मविचारस्य ब्रह्मविचारपूर्वभावित्वनियमस्य न क्षतिरिति शङ्कनीयम्, यदनन्तरं नियमेन ब्रह्मविचारो भवति तथाभूतस्य तत्पुष्कलकारणस्यैवाथशब्देन पूर्ववृत्ततया

ग्राह्यत्वात्। अन्यथा किमपराद्धमुपनयादेः पूर्ववृत्तत्वग्रहणेन। तस्माद्धर्मविचारस्य पूर्ववृत्तत्वेन ग्रहणमयुक्तमित्याशङ्कानिवर्तनार्थोऽयमतःशब्दः। तन्निवृत्तिस्तु सत्यं धर्मानुष्ठानचित्तशुद्धिद्वारैव। धर्मविचारस्य ब्रह्मविचारोपयोगस्तदर्थं धर्मविचारे क्रियमाणे वेदचोदनादिप्रामाण्यं श्रुत्यादिस्वरूपबलाबलं च पूर्वतन्त्रोक्तमर्यादया परिज्ञातमेतच्छास्त्राभ्यासम्पादनीयतत्परिज्ञानद्रढिमन्युपयुज्यत इति तदप्यानुषङ्गिकं प्रयोजनमित्यभिप्रेत्य धर्मविचारापेक्षायां तस्यापि प्रयोजनत्वोक्तिः, न तु ब्रह्मविचारप्रयोजकतया। अत एव प्रागथवेत्यादिभाष्ये धर्मविचारापेक्षायां धर्मस्य ब्रह्मबोधहेतुत्वमेव मुख्यहेतुत्वेनोपन्यस्य तत्र श्रुतिलिङ्गादिनिरूपणमन्वाचययुक्तित्वेनैवोपन्यस्तम्। तदनन्तरं च साधनं विना साध्यानिष्पत्तेरित्यारभ्यैतावत्पर्यन्तं धर्मस्य ब्रह्मबोधहेतुत्वमेव तत्र हेतुतया प्रपञ्चितम्। अन्यन्न स्पृष्टम्। एवं च धर्मविचारस्य तन्निर्णयप्रभवधर्मानुष्ठानचित्तशुद्ध्यादिकं द्वारमिति स्थिते सर्वैरपि कृतस्य धर्मविचारस्य तद्द्वारा ब्रह्मविचारनिष्पादकत्वादर्शनेन तस्य पुष्कलकारणत्वाभावाद् अथशब्देन पूर्ववृत्ततया ग्रहणमनुपपन्नमित्याशङ्कावारणायैव सूत्रकृता तत्प्रभवानां धर्मानुष्ठानादीनां ब्रह्मविचारं प्रति हेतुत्वमतःशब्देन कीर्त्यते। तेन द्वारभूतेषु सर्वेषु कारणेषु सत्स्वयं धर्मविचारः पुष्कलकारणं भवति, न तु तेषां मध्ये प्रतिबन्धकदुरितादिबलात् कस्यचिदनुत्पत्तावपीत्येतल्लभ्यते।

न चाथशब्देन यत्पूर्ववृत्ततया गृहीतं तेनानपेक्ष्यैवान्यद्विचारपुष्कलकारणेन भाव्यमिति नियमः, अध्ययनानन्तरं माणवकबुद्धिभेदतन्मान्द्यादिना गुरोर्माणवकस्य वा विघ्नेन वा धर्मविचारानिष्पत्तिदर्शनेन—"अथातो धर्मजिज्ञासा" (जै० १.१.१) इत्यत्राध्ययनस्यापि पूर्ववृत्तत्वाभावप्रसङ्गात्। न च वाच्यमध्ययनानन्तरं पुरुषेणानुष्ठेयं किमपि पूर्ववृत्तं नापेक्ष्यत इति, तत्राथशब्दस्याध्ययनानन्तर्यार्थत्वेऽप्यत्र धर्मविचारानन्तरमनुष्ठेयस्य चित्तशुद्ध्यर्थकर्मणः सत्त्वात् तदानन्तर्यमथशब्दार्थ इति युक्तम्, अन्यथा किमपराद्धमध्ययनानन्तर्येणेति श्रवणमननोपासनाकालेष्वपि तत्कालसम्भावितचित्तमालिन्यपरिहारार्थं चित्तशुद्ध्यर्थकर्मणामनुवर्तनीयतया ब्रह्मविचारे ब्रह्मजिज्ञासायां वा तदानन्तर्योक्त्ययोगात्। तस्माद्धर्मविचारस्यैवात्र पूर्ववृत्तत्वं युक्तमिति।

विवेको मोक्षफलं नित्यम्, अभ्युदयफलमनित्यमिति नित्यानित्यवस्तुविवेकः। स यद्यपि साङ्गसशिरस्कवेदाध्ययनमात्रान्न सम्भवति, "तद्यथेह

कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते" (छान्दो० ८.१.६) इत्यादीनां कर्मफलानित्यत्वप्रतिपादकवाक्यानामिव "अपाम सोमममृता अभूम", "अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति" (श० ब्रा० २.५.४.१) इत्यादीनां तन्नित्यत्वप्रतिपादकवाक्यानामपि सत्त्वात्। नापि पूर्ववृत्ताद् धर्मविचारात् तत्सम्भवति, तत्राहत्य कर्मज्ञानफलनित्यत्वानित्यत्वविचाराभावात्। न च तस्यावृत्तिविधानेन कर्मणामल्पास्थिरफलत्वावगमहेतुत्वं सम्भवतीति वाच्यम्, "आवृत्तिरसकृदुपदेशात्" (ब्र० ४.१.१) इत्यधिकरणे, "आप्रायणात् तत्रापि हि दृष्टम्" (ब्र० ४.१.१२) इत्यधिकरणे च ज्ञानस्याप्यावृत्तिप्रतिपादनेन तत्फलस्य मोक्षस्याप्यनित्यत्वप्रसङ्गात्। यद्याप्रायणमहरहरावृत्तिविशिष्टस्यैव ज्ञानस्य मोक्षः फलं तदात्रापि तथास्तु। यद्यत्रावृत्तिविधानं प्रतिवसन्तं सोमयागस्य पञ्चाब्दपर्यन्तं प्रत्यब्दं चातुर्मास्यानामिति तथाभूतावृत्तिवैशिष्ट्येन फलजनकत्वाभ्युपगमेन तत्तदावृत्तितारतम्यात् फलतारतम्यं स्यादित्युच्येत, तदा ज्ञानावृत्तेरप्याप्रायणमनुवर्तनीयायाः प्रायणकालस्याप्यव्यवस्थितत्वात् तत्तारतम्येन फलतारतम्यं स्यादिति तुल्यम्। यत्तु "कर्मण्यारम्भभाव्यत्वात् कृषिवत् प्रत्यारम्भं फलानि स्युः" (जै० ११.१.२०) इत्येकादशाध्यायाधिकरणे कर्मणां कृषिन्यायेन प्रत्यारम्भं फलभेदव्युत्पादनम्, तदावृत्तिवैशिष्ट्येन येषां कर्मणां फलजनकत्वं तदतिरिक्तविषयं स्यात्। अवश्यं च तथाभ्युपगन्तव्यं दाक्षायणयज्ञादिसंग्रहार्थम्। न च—"फलस्य कर्मनिष्पत्तेस्तेषां लोकवत् परिमाणतः फलविशेषः स्यात्" (जै० १.२.१७) इत्यर्थवादाधिकरणसूत्रे बह्वल्पाङ्गकर्मगुरुलघुभावानुसारेण फलतारतम्यस्योक्तत्वात् "हिरण्यदा अमृतत्वं भजन्ते" (ऋ० १०.१०७.२) इत्यत्रामृतत्वसाधनतयोक्तस्य हिरण्यदानस्य सोमयागस्य चातुर्मास्यानां च ततस्तुल्यफलत्वाभावावगत्याऽल्पास्थिरफलत्वं सिद्ध्येदिति शङ्कनीयम्, "विकल्पोऽविशिष्टफलत्वात्" (ब्र० ३.३.५७) इत्यधिकरणे बह्वल्पगुणकविद्यानां गुरुलघुभावे सत्यप्येकरूपमुक्तिफलकताया वक्ष्यमाणत्वात्। यद्यप्युपासनानामाप्रायणमावृत्तिविशिष्टतया फलसाधनत्वं बह्वल्पगुणकोपासनानां मुक्तौ विकल्पेन साधनत्वं चास्मिन् शास्त्रे वक्ष्यमाणं धर्मविचारपूर्वकं ब्रह्मविचारारम्भदशायां न ज्ञायते, तथापि वक्ष्यमाणयुक्तिविरोधादावृत्तिविधानादिकमल्पास्थिरफलवत्त्वे वस्तुतो न साधकमिति तत्कालाल्पास्थिरफलत्वबुद्धिराभासीभवेत्। न चाग्रे वक्ष्यमाणार्थानामारम्भदशायामज्ञाननियमः, श्रुतशास्त्रेभ्यस्तज्ज्ञानसम्भवात्। अवहननवद् विचा-

रस्य दृष्टफलत्वेन यावदर्थनिर्णयरूपफलोदयमावर्तनीयतया पुनर्विचारारम्भदशायां तदज्ञानासम्भवाच्च ।

एतेन—"ज्योतिष्टोमेन स्वर्गकामो यजेत" इति स्वर्गार्थत्वेन विहितस्य सोमयागस्योत्तरवेद्या विकल्पितमग्न्याधारस्थण्डिलरूपमग्निमाश्रित्य "श्येनचितं चिन्वीत स्वर्गकामः" (तै० सं० ५.४.११) इति स्वर्गार्थश्येनाकृतिरूपगुणविधानसामर्थ्येन तद्गुणफलसहितसोमयागजन्यस्वर्गात् केवलतज्जन्यस्वर्गस्य न्यूनतावश्यम्भावादल्पास्थिरफलत्वान्यतरभावापत्तिः सिद्ध्यतीत्यपि शङ्का निरस्ता, "एकस्मै वा अन्ये यज्ञक्रतवः कामायाह्रियन्ते सर्वेभ्यो ज्योतिष्टोमः" इति सर्वफलार्थतया विहितस्य सोमयागस्य फलान्तरार्थप्रयोगे नित्यप्रयोगे वा श्येनाकृतिगुणविधानस्य चारितार्थ्योपपत्तेः, "यो वृष्टिकामो योऽन्नाद्यकामो यः स्वर्गकामः स सौभरेण स्तुवीत" (तां० ब्रा० ८.८.१८) इति फलत्रयसाधनतया विहितस्य सौभरस्य तत्तत्फलविशेषार्थप्रयोगे—"हीषिति वृष्टिकामाय निधनं कुर्यादूर्गित्यन्नाद्यकामाय ऊ इति स्वर्गकामाय" (तां० ब्रा० ८.८.१९) इति निधनविशेषव्यवस्थावत् स्वर्गार्थसोमयागप्रयोगे गुणविशेषव्यवस्थेत्युपपत्तेश्च । न च मन्त्रार्थवादवर्णितानां फलत्वाभावनियमः, सूक्तवाकमन्त्राम्नातानामायुरादीनां रात्रिसत्रार्थवादाम्नातायाः प्रतिष्ठायाश्च फलत्वदर्शनात् । न च सोमयागस्य विध्युद्देशे फलश्रवणान्मन्त्रोक्तं फलं न ग्राह्यमिति वाच्यम्, विध्युद्देशश्रुत एव स्वर्गे नित्यत्वरूपविशेषस्य—"सप्तऋषीणां सुकृतां यत्र लोकस्तत्रेमं यज्ञं यजमानं च धेहि" इति मन्त्रेण लोकविशेषभोग्यत्वरूपस्यैव समर्पणोपपत्तेः । न च—"इन्द्रस्य सख्यममृतत्वमश्याम्"(तै० ब्रा० ३.७.६.१४) इत्यैष्टिकमन्त्रेण कर्मप्राप्यममृतत्वं क्षुद्रमवगतमिति शङ्कनीयम्, कुबेरकुचेलादिपदवदिन्द्रपदस्य क्षुद्रत्वेऽपि शिववैकुण्ठपदवन्मुक्तपदस्याक्षुद्रत्वोपपत्तेः, "दिवि ज्योतिरजरमारभेताम्" (तै० ब्रा० ३.७.५.११) इत्यैष्टिकमन्त्रान्तरे पत्नीयजमानाभ्यां प्राप्यस्य फलस्य नित्यत्वोक्तेश्च, "फलवत्तां च दर्शयति" (जै० ६.१.२१) इति पत्न्यधिकरणसूत्रेण विशिष्यास्य मन्त्रस्य फलसमर्पकतया प्रदर्शितत्वाच्च । अतः पूर्ववृत्ताद् धर्मविचारतोऽपि नित्यानित्यविवेको न सम्भवतीति, तथापि धर्मविचारानन्तरं परमेश्वराराधनायानुष्ठितैः कर्मभिश्चित्तशुद्धिः सम्भवतीत्यभिप्रेत्य तत्कालसम्पन्नेति विशेषणं कृतम् ।

अयमाशयः—जन्मप्रभृति "हिंस्राहिंस्रे मृदुक्रूरे धर्माधर्मावृतानृते । तद्भाविताः प्रपद्यन्ते तस्मात् तत्तस्य रोचते ॥" (कू० पु० १.७.६२) इति

सम्पन्नविवेकादिगुणसहकृतपरमभक्तिसंभावितेनानेन ब्रह्मापि

स्मृत्युक्तरीत्या पूर्वजन्मवासनानुवृत्त्या ये सहजशिवभक्तिभावितास्त एवास्मिन् शास्त्रे वस्तुतोऽधिकारिणः। ते च धर्मविचारेण धर्मनिर्णयानन्तरं शिवाराधनधियैव कर्माण्यनुतिष्ठन्तश्चित्तशुद्धिं लभन्ते। शुद्धचित्ताश्च परब्रह्मणः शिवस्य स्वरूपप्रमाणादिनिर्णयार्थं प्रवृत्तस्यास्य शास्त्रस्य विषयप्रयोजनसम्बन्धाधिकारिणां न्यायतो निर्णयार्थस्यास्याद्यसूत्रस्यार्थपरिज्ञाने प्रवृत्ताः सन्तोऽनेनैवातःशब्देन विवक्षितं कर्मफलानित्यत्वनिर्णयोपपादकन्यायमित्थं परामृशन्ति। "परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायात्" (मुण्डको० १.२.१२) इति श्रुतौ कर्मफलेभ्यो वैराग्यार्थं तेषामनित्यत्वं श्रुत्यर्थानुग्राहकयुक्तिपरामर्शरूपया परीक्षयाऽवगन्तव्यमिति प्रतिपाद्यते। सा च युक्तिः—"तद्यथेह कर्मचितः" (छान्दो० ८.१.६) इत्यादिवाक्येनोपन्यस्यते। सा तु राजसेवादिन्यायेनामुष्मिककर्मणोऽपि फलं क्षीयत इत्युपपादयन्ती यद्यत् कर्मफलं तत्सर्वमनित्यमिति व्याप्तिमूलतया कस्यापि कर्मणः फलस्य नित्यत्वं न सहते। एवमुपपत्तिरूपतात्पर्यलिङ्गोपबृंहितया— "प्राप्यान्तं कर्मणस्तस्य यत्किञ्चेह करोत्ययम्। तस्माल्लोकात् पुनरैत्यस्मै लोकाय कर्मणे॥" (बृह० ४.४.६) इत्यादिसमानार्थकश्रुत्यन्तरसहकृतया देवताधिकरणे वक्ष्यमाणन्यायेन विवक्षितार्थैः सर्गप्रलयाद्यर्थवादैः सहितया तया कर्मफलनित्यत्ववर्णका मन्त्रार्थवादा बाधिताः सन्तः प्रशंसामात्रपराः पर्यवस्यन्तीति।

नन्वाद्यसूत्रार्थपरिज्ञानाल्लभ्ये विषयप्रयोजनाधिकारिनिर्णये चित्तशुद्धिः क्वोपयुज्यते? नहि "अथातो धर्मजिज्ञासा" इति सूत्रार्थपरिज्ञानसाध्ये धर्मविचारशास्त्रस्य विषयादिनिर्णये साऽपेक्ष्यते। उच्यते। अध्ययनेनाक्षरावाप्त्यनन्तरं परस्परविरुद्धं द्वयं युगपदुपतिष्ठते—"आचार्यकुलाद् वेदमधीत्याभिसमावृत्य कुटुम्बे शुचौ देशे स्वाध्यायमधीयानो धार्मिकान् विदधत्" (छान्दो० ८.१५.१) इत्यादिश्रुत्या समावर्तनम्, तदनन्तरमेव दारपरिग्रहं कृत्वा समारब्धव्यानामग्निहोत्रादीनामनुष्ठानार्थं वेदार्थनिर्णयाय धर्मविचारश्च। अनयोः क्व प्रवर्तितव्यमिति डोलायमानास्तन्निर्णयार्थं प्रवृत्तमिदं सूत्रमित्युपश्रुत्य धर्मजिज्ञासासूत्रार्थपरिज्ञाने स्वयमेव प्रवर्तन्त इति न तत्र चित्तशुद्ध्यपेक्षास्ति। इह तु चित्तशुद्धिरहिताः प्रथमं धर्मविचारशास्त्राभ्यासादक्षय्यादिवाक्यमपि रात्रिसत्रादिन्यायैः फलपरं मन्यमानास्तद्विरोधिन्यायं

निरतिशयनिःश्रेयसकरं विचारणीयमिति। ब्रह्मणो जिज्ञासा ब्रह्मजिज्ञासेति कर्मणि षष्ठी। "परीक्ष्य लोकान् कर्मचितान्

च तत्राव्युत्पादितं परामर्ष्टुमक्षमाः सन्तः—"अविद्यायां बहुधा वर्तमाना वयं कृतार्था इत्यभिमन्यन्ते बालाः। यत्कर्मिणो न प्रवेदयन्ति रागात् तेनातुराः क्षीणलोकाश्च्यवन्ते॥ इष्टापूर्तं मन्यमाना वरिष्ठं नान्यच्छ्रेयो वेदयन्ते प्रमूढाः। नाकस्य पृष्ठे ते सुकृतेऽनुभूत्वा इमं लोकं हीनतरं वा विशन्ति॥" (मुण्डको० १.२.९-१०) इति मन्त्रविषयतामनतिवर्तमानाः स्वयमेव ब्रह्मजिज्ञासासूत्रार्थे न प्रवर्तन्ते। ये तु प्राग्जन्मानुष्ठितैरेव तथाभूतैः कर्मभिः सम्पन्नचित्तशुद्धयस्तत एवैतत्सूत्रपरिज्ञाने प्रवर्तन्ते, तेषां विद्यासाधनस्य विद्यासहकारिणश्च कर्मणोऽनुष्ठानार्थं धर्मविचारापेक्षेति सर्वथा धर्मानुष्ठानानन्तरं शुद्धचित्ता एवैतत्सूत्रपाठेन नित्यानित्यविवेकं लब्ध्वा तन्मूलमादिशब्दगृहीतमैहिकामुष्मिकफलेभ्यो वैराग्यं शमदमादिसाधनं मुमुक्षुत्वं च प्राप्य सहजसिद्धायाः शिवभक्तेरतिशयं च प्राप्य जन्मादिसूत्रमारभ्य प्रवर्तिष्यमाणे ब्रह्मविचारे प्रवर्तन्त इति युक्तमुक्तं तत्कालसम्पन्नविवेकादिगुणसहकृतपरमभक्तिसम्भावितेनेति। परमां भक्तिं सम्यग् दार्ढ्येन भावितः प्राप्तः परमभक्तिसम्भावितः। "भू प्राप्तावात्मनेपदी" (१८४५ चु०) इति चौरादिकधातोः "आ धृषाद्वा" (ग० सू०) इति विकल्पितण्यन्तात् कर्तरि क्तप्रत्ययः।

सौत्रं ब्रह्मजिज्ञासापदं विगृह्य षष्ठ्यर्थमाह—ब्रह्मण इति। ब्रह्मजिज्ञासापदयोरसमासेऽन्वयासम्भवात् समासे वक्तव्ये ब्रह्मणो जिज्ञासां प्रति परम्परया प्रयोजनत्वमस्तीति तादर्थ्यचतुर्थीपरिग्रहे प्रकृतिविकारभावाभावेन कुण्डलहिरण्यादिवत् समासासम्भवात्, विषयत्वमस्तीति सप्तमीपरिग्रहेऽधिकरणसामान्यवाचिन्याः सप्तम्या विषयरूपाधिकरणे विशिष्य शक्त्यभावात्, सप्तम्यभिहिताधिकरणसामान्यमुखेनाभिमतविशेषपरिग्रहे प्रतिपत्तिगौरवात्, अत एव शेषषष्ठीपरिग्रहस्याप्यनुपपत्तेः, तृतीयादिपरिग्रहे प्रथमाधिकरणेन समर्थयिष्यमाणयोर्ब्रह्मणो विषयत्वप्रयोजनत्वयोरन्यतरस्याप्यलाभात्, कर्मणि षष्ठीपरिग्रहे तदुभयलाभात् कर्मणि षष्ठ्याः समासोऽयमिति भावः। तत्र समासप्रतिषेधशङ्का 'विदुषां ब्रह्मदर्शने' इत्यत्र समाससमर्थनेनैव परिहृता। विशिष्यात्र जिज्ञासापदम्—"अ प्रत्ययात्" (पा० ३.३.१०२) इति सूत्रविहिताकाररूपकृदन्तमित्यतोऽपि नात्र समास-

प्रतिषेधशङ्कावकाशः। एवं सूत्रं व्याख्यायाधिकरणशरीरप्रदर्शनार्थं विषयवाक्यमुदाहरति—परीक्ष्येति। आदिशब्देन—"तस्मै स विद्वानुपसन्नाय सम्यक्प्रशान्तचित्ताय शमान्विताय। येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्याम् ॥" (मुण्डको० १.२.१३) इति तदनन्तरमन्त्रो गृह्यते।

ननु विचारकर्तव्यतापर्यन्तः सूत्रार्थः प्राग् दर्शितः। न चास्मिन् वाक्ये सोऽर्थो निबध्यते। अतो नेदं सूत्रानुगुणं विषयवाक्यमिति चेदुच्यते, धर्मविचारानन्तरं तदाराधनरूपधर्मानुष्ठानविशुद्धचित्तस्य विवेकादिसम्पत्त्या ब्रह्मज्ञानेच्छा भवतीत्येतावान् सूत्रवाक्यस्य शब्दार्थः। तदिष्यमाणं ब्रह्मज्ञानं विचारमन्तरेण न भवतीति तत्स्वरूपप्रमाणादिविचारस्तदाक्षिप्तोऽर्थः। स एव प्रागुपन्यस्तः। अत एव प्रागथशब्दव्याख्यानावसाने 'परब्रह्मणः प्रतिपादकमुपनिषच्छास्त्रं विचारणीयम्' इति ब्रह्मप्रमाणविचारकर्तव्यतोपन्यस्ता। अतःशब्दव्याख्यानावसाने तु 'ब्रह्मापि निरतिशयनिःश्रेयसकरं विचारणीयम्' इति ब्रह्मविचारकर्तव्यतोपन्यस्ता। नह्युभयं सूत्रवाक्यस्य शब्दार्थो भवितुमर्हति। अत एव च ब्रह्मजिज्ञासापदव्याख्यानसमये विगृह्य षष्ठ्यर्थप्रदर्शनमात्रं कृतम्। न तु विचारलक्षणोक्ता, कर्तव्यपदं वाध्याहृतम्। सौत्रः शब्दार्थस्तु सर्वोऽपि विषयवाक्येऽस्मिन् निबद्ध एव।

तथा हि परीक्ष्येत्यादेरयमर्थः—यो ब्राह्मणो वेदाध्ययनधर्मविचारपूर्वकं धर्मानुष्ठानेन विशुद्धचित्तः कर्मफलभूतान् लोकान् परीक्ष्य धर्मविचारशास्त्राभ्यासतो रात्रिसत्रादिन्यायतः प्रसक्तमक्षय्यादिवाक्यानां फलसमर्पकत्वं क्षिपन्त्या तद्यथेहेत्यादिश्रुतिप्रदर्शितयुक्त्या क्षयिष्णून् निर्धार्य अकृतो नित्यो लोकः कृतेन कर्मणा नास्तीति निर्वेदं कर्मफलेभ्यो वैराग्यं प्राप्नुयात्, स समित्पाणित्वनियमयुक्तः सन् तद्विज्ञानार्थं तस्य प्रकृतस्य ब्रह्मणो विज्ञानं मे स्यादिति ब्रह्मज्ञानेच्छया श्रोत्रियत्वादिगुणयुक्तं गुरुमभिगच्छेदेव न तु स्वसमीपं तमानयेत्। एवं विधिवदुपसन्नाय प्रशान्तचित्ताय शमान्विताय अतिसूक्ष्मब्रह्मविचारापेक्षितमनःसमाधानहेत्वान्तरबाह्येन्द्रियनियमनवते तस्मै स गुरुर्येन प्रकारेण अक्षरम् "अथ परा यया तदक्षरमधिगम्यते" (मुण्डको० १.५) इत्यारभ्य प्रकृतमक्षरशब्दितम्, सत्यं पुरुषम् "ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम्" (महाना० १२.१) इत्यादिश्रुतिप्रसिद्धं परमेश्वरम्, वेद उपसन्नः सम्यग् जानाति, तेन प्रकारेण तां "स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठामथर्वाय ज्येष्ठपुत्राय प्राह" (मुण्डको० १.१) इति प्रागुपक्षिप्ताम्, ब्रह्मविद्यां प्रोवाच ब्रूयादिति।

ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन। तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम् ॥" (मुण्डको० १.२.१२) इत्यादिवाक्यं विषयः।

ब्रह्म विचारार्हं भवति न वेति सन्देहः। पूर्वपक्षस्तु—

अत्र ब्राह्मणशब्दप्रदर्शितचित्तशुद्धिहेतुधर्मानुष्ठानार्थं परीक्ष्यशब्दोक्तकर्मफलनित्यत्वानित्यत्वप्रापकद्विविधवाक्यबलाबलविचारपूर्वकतदनित्यत्वनिर्णयप्रतिक्षेप्यपूर्वपक्षप्रसञ्जकरात्रिसत्रादिन्यायपरिज्ञानार्थं चापेक्षितस्य धर्मविचारस्य पूर्वप्रवृत्ततयाऽऽक्षेपादथशब्दार्थो लब्धः। परीक्ष्येत्यनेनैव नित्यानित्यवस्तुविवेकोऽपि लब्धः। निर्वेदमायादित्यनेन विरागः। निर्विण्णस्याग्रे प्रशान्तचित्ताय शमान्वितायेत्यनुवादतः शमदमसम्पत्तिर्लब्धा। नास्त्यकृतः कृतेनेति विशेषणाद् अकृतलोकप्रेप्सारूपं मुमुक्षुत्वं लब्धम्। एतावता अतःशब्दार्थो लब्धः। तद्विज्ञानार्थमित्यनेन तु ब्रह्मजिज्ञासाशब्दार्थः। तत्रार्थशब्दः स्यादर्थे वर्तते। "तद्धितार्थोत्तरपदसमाहारे च" (पा० २.१.५०) इति व्याकरणसूत्रेऽर्थशब्दं स्यादर्थं व्याकुर्वता भगवता पतञ्जलिना 'दाराः स्युरस्माकमिति भिक्षामहे' इत्यर्थे 'दारार्थं[1] भिक्षामहे' इति प्रयोगमुदाहृत्य स्यादर्थेऽप्यर्थशब्दोऽस्तीति समर्थितम्। स्यादर्थश्च तत्रेच्छैव, इच्छायामपि लिङ्विधानात्। एवं च तत्र विषयवाक्ये गुरूपसदनमात्रेणेष्यमाणब्रह्मज्ञानालाभाद् द्वारतया विचार आक्षेप्यः। तथा सूत्रे विचार आक्षेप्य इति सूत्रानुगुण्यादिदमेव विषयवाक्यमिति युक्तम्। अतःशब्दव्याख्यानभाष्ये परमभक्तिसम्भावितेनेति विशेषणं तु "यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ। तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥"(६.२३) इति श्वेताश्वतरोपनिषत्प्रसिद्धाधिकारिविशेषणान्तरपरिग्रहार्थं कृतम्। सापि श्रुतिः'इत्यादिवाक्यं विषयः'इति भाष्यगतेनादिशब्देन ग्राह्येतिसर्वमनवद्यम्।

विचाराङ्गसंशयं दर्शयति—ब्रह्मेति। अयमिह संशयक्रमः—मुमुक्षूणां ब्रह्म विचारोपयोगीति सूत्रकृता समारभ्यमाणमिदं शास्त्रं प्रेक्षावत्कर्तृकारम्भविषयत्वयोग्यं न वेति प्रथमं संशयः। तदर्थमियं चिन्ता—कृतधर्मविचारस्य धर्मानुष्ठानविशुद्धचित्तस्य धर्मविचाराधिगतमक्षय्यादिवाक्यानां यथाश्रुतफलसमर्पकत्वं प्रबलन्यायान्तरेण प्रतिक्षिप्य ततो विरक्तस्य शमादिसम्पन्नस्य नित्यफलप्रेप्सया तत्साधनं ब्रह्मज्ञानमिच्छतोऽधिकारिणो ब्रह्मविचारेण

---

१. 'दारार्थं घटामहे धनार्थं भिक्षामहे' इति महाभाष्यपाठो विद्यते।

ब्रह्म विचारयोग्यं न भवति, तत्र सन्देहाभावात्। कथं सन्देहाभावः ? "अयमात्मा ब्रह्म" (बृ० उ० २.५.१९) इति श्रुतिरयमिति प्रत्ययेन प्रत्यक्षसिद्धमेवात्मानं ब्रह्मेत्युपदिशति।

तज्ज्ञानसिद्ध्यर्थं विचाराङ्गं गुरूपसदनं परीक्ष्य लोकानित्यादिवाक्यं विधातुं शक्नोति न वेति। तदर्थमियं भाष्यदर्शिता चिन्ता—ब्रह्म विचारार्हं न वेति। तदर्थमियं चिन्ता—ब्रह्म विषयत्वयोग्यं सप्रयोजनज्ञानं च न वेति। तदर्थमियं चिन्ता—अहमित्यनुभूयमानो जीव एव ब्रह्म, उत तस्यैव संसारदशायामप्रकाशमानं कर्तृत्वभोक्तृत्वादिप्रपञ्चरहितं निर्विशेषं रूपान्तरम्, अथवा ततोऽन्यदिति। यदि जीवादन्यत् तदापि ब्रह्म परिच्छेद्यं न वेति। यदा जीव एव ब्रह्म, तदा तस्याहमनुभवसिद्धत्वान्न विषयत्वयोग्यता। यदि तस्य निर्विशेषं रूपान्तरं ब्रह्म यदि वा जीवादन्यदप्यपरिच्छेद्यं तदा तस्याशक्यप्रतिपादनत्वान्न विषयत्वयोग्यता। पक्षत्रयेऽपि न तस्य सप्रयोजनज्ञानता। अहमनुभवे शब्दात् कथञ्चिन्निर्विशेषगोचरज्ञाने जीवान्यब्रह्मगोचरज्ञाने च सत्यपि संसारनिर्वृत्तिपूर्वकनित्यफलप्राप्तेरदर्शनात्, अनादिसंसारस्य दुरपह्नवत्वाच्च यदा ब्रह्मणो न विषयतार्हत्वसप्रयोजनज्ञानत्वे, तदा न तस्य विचारार्हता, यदा न तस्य विचारार्हता तदोदाहृतं वाक्यमुक्तमर्थं विधातुं न शक्नोति, यदा न शक्नोति तदा विचारस्याकर्तव्यत्वात् तदर्थमिदं शास्त्रं नारम्भणीयमिति पूर्वपक्षे फलफलिभावः। यदा जीवादन्यद् ब्रह्म परिच्छेद्यं च सप्रयोजनज्ञानं च तदा विषयप्रयोजनवत्त्वेन ब्रह्मविचारस्य कर्तव्यत्वात् तदर्थमिदं शास्त्रमारम्भणीयमिति सिद्धान्ते फलफलिभावः। एवं संशयपरम्परोपलक्षणत्वेन मध्यगतः संशयो भाष्ये दर्शितः। अत एव सिद्धान्तोपक्रमभाष्ये सर्वथा समारम्भणीयमिदं शास्त्रमिति प्राथमिकसंशयैककोटिविषया सिद्धान्तप्रतिज्ञा दर्शयिष्यते। सकलशास्त्रोपोद्घातत्वादस्याधिकरणस्य शास्त्रद्विकाध्यायपादसङ्गतयः।

ननूदाहृतविषयवाक्यसामर्थ्याद् ब्रह्मणो विचारार्हत्वमेव सिद्ध्यति, कथं पूर्वपक्ष इत्याशङ्क्याह—पूर्वपक्षस्त्विति। सन्देहाभावादिति। "अयमात्मा ब्रह्म" (बृ० उ० २.५.१९) इति श्रुत्या जीव एव ब्रह्मेत्यवगमात्, तस्य चाहमनुभवसिद्धत्वादिति भावः। ननु सा श्रुतिर्जीवस्याहमनुभवसिद्धेन कर्तृत्वभोक्तृत्वाद्यनेकानर्थव्रातकलुषितेन रूपेण ब्रह्मभावं न प्रतिपादयति, नित्यशुद्धत्वादिरूपब्रह्मशब्दार्थानुगमविरोधात्। किन्तु कर्तृत्वादिकल्पिताकार-

ततः कुतोऽत्र सन्देहकलङ्कप्रसङ्गः। किञ्च, विचारस्य फलं हि तद्विषयज्ञानम्। ज्ञानं च ज्ञेयपरिच्छेदः। वेदान्तविचार-जन्यं ज्ञानं ब्रह्म परिच्छिनत्ति न वा? यदि परिच्छिनत्ति, तदा तस्य परिच्छेदातीतत्वभङ्गप्रसङ्गः। यदि न परिच्छिनत्ति, ब्रह्म तदा यथावन्न प्रकाशेत। अयमिति हि परिच्छिन्नो

रहितेन निर्विशेषचैतन्यरूपेण। तत्तु संसारदशायामावृतं न प्रकाशत इति तत्र सन्देहो घटत इत्याशयेन पृच्छति—कथमिति। उत्तरमाह–अयमात्मेति।

अयमाशयः—"अयमात्मा ब्रह्म" (बृ० उ० २.५.१९) इति श्रुति-र्जीवस्य यावद्रूपमहमनुभवे प्रकाशते तावद्युक्तमेव तमिदंशब्देन परिगृह्य ब्रह्मेत्युपदिशति। तस्मिन् ब्रह्मशब्दस्यार्थः साकल्येन न सम्भवति चेति यावान् सम्भवति तावन्तमेव देहे ब्राह्मणत्वादिरूपमर्थमभिदधत् तत्र वर्तिष्यते, परमैश्वर्यवाचीन्द्रशब्द इव संकुचितमैश्वर्यमभिदधदाखण्डले। न च ब्रह्म-शब्दस्वारस्यानुरोधादिदंशब्दस्य प्रसिद्धार्थपरत्वं हातव्यम्, प्रथमचरम-श्रुतयोः प्रथमश्रुतस्यैवानुरोध्यत्वात्। अत एव—"मुष्टिलोपात्तु संख्यालोप-स्तदगुणत्वात् स्यात्" (जै० १०.२.६३) इति दाशमिकाधिकरणे "बार्ह-स्पत्यो नैवारः सप्तदशशरावश्चरुः" इति विहितायामिष्टौ "चतुरो मुष्टीन्निर्व-पति" (आप० श्रौ० १.१८.२) इति प्रकृतौ निर्वापाङ्गत्वेन विहितयोश्चतुः-संख्यामुष्टिद्रव्ययोरतिदेशप्राप्तयोश्चतुर्मुष्टिभिः सप्तदशशरावपरिमाणस्य चरोः सम्पादयितुमशक्यत्वेनावश्यमन्यतरस्मिन् बाधितव्ये प्रथमश्रुतसंख्यानुग्रहाय मुष्टिबाधोऽङ्गीकृतः। न च "ध्यायतीव लेलायतीव" (बृ० उ० ४.३.७) इत्यादिश्रुतिभिर्जीवे कर्तृत्वादेरपारमार्थिकत्वप्रतिपादनाद् वस्तुतो निर्विशेष-मेव जीवस्वरूपं तदेव च ब्रह्म प्रतिपाद्यत इति वाच्यम्, 'करोमि, भुञ्जे' इत्यादिप्रत्यक्षविरुद्धानां तासां श्रुतीनां जीवस्य कर्माद्यधीनकर्तृत्वादिमत्तया तत्पारतन्त्र्यमात्रपरत्वादिति।

निर्विशेषं ब्रह्म स्वरूपं जीव इति पक्षमभ्युपेत्यापि तस्य विषयत्वा-सम्भवमाह—किञ्चेति। परिच्छिनत्ति न वेति। इदमित्थमिति प्रकार-विशेषविशिष्टतया विषयीकरोति न वेत्यर्थः। परिच्छेदेति। परिच्छिद्यतेऽने-नेति परिच्छेदो विशेषणरूपो विशेषः। तथा च निर्विशेषत्वभङ्गप्रसङ्ग इत्यर्थः। यथावदिति। "आकाशस्तल्लिङ्गात्" (ब्र० १.१.२२) इत्याद्य-

घटोऽवगम्यते । ततो ब्रह्मविषयं ज्ञानमपि न सम्भवति ।

धिकरणेष्वाकाशो ब्रह्म जगत्कारणत्वादित्याद्यनुमानप्रभवनिर्णये ब्रह्मण आकाशादिपदोक्तस्य ब्रह्मत्वरूपसाध्यविशिष्टतया जगत्कारणत्वादिरूपहेतुविशिष्टतया च विषयता न स्यादित्यर्थः । किं बहुना, शब्देनापि ब्रह्मविषयं ज्ञानं न स्यात्, घटादिज्ञानस्य सप्रकारकत्वनियमदर्शनादित्याह—अयमिति हीति । त्वत्पक्षेऽपि तस्य विषयत्वासम्भवपरोऽयं किञ्चेत्यादि । तस्माज्जीवस्य निर्विशेषत्वे तस्य शब्देनापि प्रतिपादनासम्भवात् "अयमात्मा ब्रह्म" (बृ० उ० २.५.१९) इति श्रुत्या सविशेषमेव जीवस्वरूपं ब्रह्मतया प्रतिपाद्यत इति तस्याहमनुभवसिद्धस्य न विचारशास्त्रविषयतेति प्रागुक्तमेव स्थितम् ।

न चैवमपि "अन्नं ब्रह्म" (तै० उ० ३.२) इत्यादेरपि श्रवणात् किमन्नादिकं मुमुक्षुवेद्यत्वाभिमतं ब्रह्म जीवो वेति सन्देह एव स्यान्न निश्चयः । "तपसा चीयते ब्रह्म ततोऽन्नमभिजायते" (मुण्डको० १.१.८) इत्यादिश्रुतिषु ब्रह्मणोऽन्नादिभ्यो भेदश्रवणादन्नादिकं ब्रह्म न भवतीति चेत्, "य आत्मनि तिष्ठन्" (श० ब्रा० १४.५.३०) इत्यादिश्रुतिषु तस्य जीवादपि भेदश्रवणात् सोऽपि ब्रह्म न स्यादिति वाच्यम्, प्रतिवेदान्तं "तत्त्वमसि" (छा० उ० ६.८.७), "अहं ब्रह्मास्मि" (बृ० उ० १.४.१०), "अयमात्मा ब्रह्म" (माण्डू० उ० २), "प्रज्ञानं ब्रह्म" (ऐ० उ० ५.३) इत्यादिजीवब्रह्माभेदवाक्यानां षड्विधतात्पर्यलिङ्गोपेततया अन्नादिश्रुतिभ्यो जीवब्रह्मभेदश्रुतिभ्यश्च बलवत्त्वावधारणेन जीव एव ब्रह्मेति ततो निश्चयसम्भवादिति भावः । भेदश्रवणाविशेषादन्नादिभ्य इव जीवादपि भिन्नं ब्रह्माभ्युपगम्यते चेत्तस्य विषयत्वासम्भवोऽपि किञ्चेत्यादिग्रन्थेन दर्शनीयः । तस्मिन्पक्षे त्वित्थमर्थः—

यदि भेदश्रवणाद् ब्रह्म जीववर्गादन्यत् तत्कारणत्वतन्नियन्तृत्वादिगुणकमभ्युपगन्तव्यम्, तदा तदपरिच्छेद्यमित्यप्यभ्युपगन्तव्यम् । "को अद्धा वेद क इह प्रवोचत् कुत आजाता कुत इयं विसृष्टिः" (ऋ० १०.१२९.६) इत्युपक्रम्य "अस्याध्यक्षः परमे व्योमन् सो अङ्ग वेद यदि वा न वेद" (ऋ० १०.१२९.७) इति श्रवणात्, "यतो वाचो निवर्तन्ते अप्राप्य मनसा सह" (तै० उ० २.४), "यद्वाचाऽनभ्युदितं येन वागभ्युद्यते ... यन्मनसा न मनुते येनाहुर्मनो मतम् । तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥" (केनो० १.४-५) इत्यादिश्रवणाच्च । एवं च विचारजन्यं ज्ञानं ब्रह्म यथावत्परिच्छिद्य गृह्णाति चेत्तस्यापरिच्छेद्यत्वभङ्गप्रसङ्गः । न चेदयमिति गृह्यमाणः स्वत आलोक-

तथापि प्रयोजनं च न किञ्चित् पश्यामः । न मुक्तिः प्रयोजनम्, अनादिसिद्धसंसारस्य दुरपह्नुत्वादित्येवं प्राप्ते ब्रूमः—सर्वथा

मध्यवर्तिघटवद्यथावन्न प्रकाशेतेति मोक्षजनकत्वाभिमतं ब्रह्मज्ञानं न समर्थितं स्यात्, "भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः । ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम् ॥" (भ० गी० १८.५५) इति यावद् ब्रह्मज्ञानस्यैव मोक्षजनकत्वाभ्युपगमादिति ।

एवं निर्विशेषजीवब्रह्मपक्षे जीवान्यब्रह्मपक्षे च तज्ज्ञानासम्भवो दोष उक्तः, तत्सम्भवमभ्युपेत्यापि पक्षत्रयेऽपि प्रयोजनासम्भवमाह—तथापीति । यदि ब्रह्मज्ञानात् किञ्चित् प्रयोजनमभविष्यत्, तदाहमनुभवरूपाद् वेदान्तजन्याद्वा तज्ज्ञानाज्जायमानं तद् द्रक्ष्यामः, न तदिदानीं पश्यामः, अतो ज्ञायते न प्रसिद्धजीवरूपस्य निर्विशेषजीवरूपस्य वा तदन्यस्य वा ब्रह्मणः परिज्ञानात् किञ्चित् प्रयोजनमस्तीति । तदेतदापस्तम्बेनाप्युक्तम्—"बुद्धे चेत् क्षेमप्रापणमिहैव न दुःखमुपलभेत" (आप० २.२१.१६) इति ।

इदानीन्तनब्रह्मज्ञानमात्रान्न प्रयोजनम्, किन्तु श्रवणमननानन्तरमुपासनाजन्यतत्साक्षात्कारादित्यभ्युपगमेऽपि प्रयोजनासम्भवमाह—अनादिसिद्धेति । संसारनिवृत्तिश्च सकलानर्थव्रातमूलसर्वजीवावरकैकद्रव्यरूपमलाख्यानादिसिद्धपाशनिवृत्तिरित्यभ्युपगम्यते । न चानादेर्निवृत्तिर्द्रव्यस्य ज्ञानमात्रान्निवृत्तिः सर्वजीवगतानर्थनिदानस्यैकपुरुषमोक्षकारणान्निवृत्तिश्च सम्भवतीति भावः । दुरपह्नवत्वादिति । दुश्शीलादिवद्बहुव्रीहिः । तत्र दुष्टवाचिना दुरुपसर्गेणाशक्यत्वमपह्नवशब्देन निवर्तनं च लक्ष्यत इत्यशक्यनिवर्तनत्वादित्यर्थः । अपह्नवशब्दस्यापलापार्थत्वे तु संसारस्यानादिसिद्धत्वं प्रामाणिकमपलपितुं न शक्यमित्यतस्तन्निवर्तनस्याशक्यत्वमर्थतः सिद्ध्यति, निर्विशेषचिद्रूपापत्तेः प्रयोजनत्वनिराकरणार्थत्वे त्वनादिकालप्रवृत्तप्रमाणप्रवाहसिद्धस्य संसाररूपस्य प्रपञ्चस्याकालिकप्रतीतिकशुक्तिरजतादिवदपलपितुमशक्यत्वादिति वाक्यार्थः । तस्माद्विषयप्रयोजनासम्भवादिदं शास्त्रं नारम्भणीयम् । परीक्ष्य लोकानित्यादिवाक्यं तु कर्मफलभूतान् पुत्रदारादीन् तत्तत्कालपरिपक्वकर्मानुसारेण कदाचित् प्रियान् कदाचिदप्रियांश्च हेयानवधार्य तेभ्यो विरक्तस्य सर्वदा परमप्रेमास्पदे स्वात्मन्येवाभिरतेरनुवादकम् । गुरूपसदनश्रुतिर्गुरूपसदनेनापि तज्ज्ञानं सम्पादयेदित्येवमादरातिशयप्रकटनार्थो विधिसरूपार्थवादः । "अटेत पृथिवीं कृत्स्नां सशैलवनकाननाम् । यदि लभ्येत पित्र्येषु साम्नामक्षरचिन्तकः ॥" इतिवत् । स हि—"यद्येकं भोजयेच्छ्राद्धे छन्दोगं तत्र भोजयेत् । ऋचो यजूंषि

समारम्भणीयं शास्त्रम्, ब्रह्मणः सन्दिग्धतया विषयत्वसम्भवात्, तन्निर्णयस्य सप्रयोजनत्वाच्च । यत् "अयमात्मा ब्रह्म" (बृ० उ० २.५.१९) इत्यादिश्रुतिरमुमेवाहङ्कारबद्धं संसारिणं ब्रह्मेत्यभिधत्ते तत एव सन्देहः । निरस्तसमस्तोपप्लवकलङ्कनिरतिशयज्ञानानन्दादिशक्तिमहिमातिशयवत्त्वं हि ब्रह्मत्वम् । अनाद्यज्ञानवासनावष्टम्भविजृम्भितविचित्रकर्मफलभोगानुगुणबहुशरीरप्रवेशनिर्गमव्यापारपरवशनिस्सीमतापसहिष्णुत्वं तु

सामानि त्रितयं तत्र विद्यते ॥" इति विधिपरिगृहीतच्छन्दोगप्रशंसार्थो विधिसरूपोऽर्थवादः, न तु गुरूपसदनश्रुतिर्विधिः, अयत्नलभ्ये तदनुभवे साधनविधानानपेक्षणात् ।

न च ब्रह्मानुभवार्थं साधनविधानान्यथानुपपत्त्यैव ब्रह्म जीवान्यदिति कल्पनीयम्, अवान्तरवाक्यार्थस्वारस्यानुरोधेन महातात्पर्यविषयार्थभङ्गायोगात्, अन्यथा "को हि तद्वेद यद्यमुष्मिँल्लोकेऽस्ति वा न वा" इति वाक्यार्थस्वारस्यानुरोधेन "ज्योतिष्टोमेन स्वर्गकामो यजेत" इति प्रधानवाक्यार्थपरित्यागप्रसङ्गात्, इत्याशयेन पूर्वपक्षमुपसंहृत्य सिद्धान्तं वक्तुं प्रतिजानीते—इति प्राप्त इति । यदि जीव एव ब्रह्म यदि वा ततोऽन्यत् सर्वथापि शास्त्रारम्भे न काचिदनुपपत्तिः, ब्रह्मणः सन्दिग्धत्वेन सप्रयोजनज्ञानत्वेन च विचारार्हत्वादित्याह–सर्वथेति । सन्दिग्धत्वं तावदुपपादयति–यदयमिति । असन्देहापादिन्याः श्रुतेः कथं सन्देहहेतुत्वमिति चेत्तत्राह—निरस्तेति । निर्दोषमङ्गल्यगुणगणाकरत्वसर्वज्ञत्वसर्वशक्तिमत्त्वादिरूपमहिमातिशयवद् ब्रह्मेति ब्रह्मशब्दस्य तत्पर्यायाणां शिवादिशब्दानां चार्थानुगमेन, "निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्" (श्वे० उ० ६.१९), "ज्ञः कालकालो गुणी सर्वविद्यः" (श्वे० उ० ६.२) इत्यादिश्रुतिभिश्चावगतम् । अनादिकालप्रवृत्तदेहात्मभ्रमादिवासनामूलनानाविधकर्मफलभोगानुगुणमनुष्यपशुपक्षिसरीसृपतरुगुल्मलतादिशरीरप्रवेशनिर्गमव्यापारपरवशः तत्प्रयुक्तनिरवधिदुःखभोक्ता च जीव इति वैराग्यपादोदाहरिष्यमाणश्रुतिप्रत्यक्षानुभवैश्चावगतम् । अतो विरुद्धधर्माधिकरणत्वाद् भाव्यं ब्रह्मणा जीवादन्येन । ततश्च केनाभिप्रायेण जीवब्रह्मणोः सामानाधिकरण्यनिर्देश इति तद्गतिर्वक्तव्या, अन्यथा

जीवत्वम् । कथमेतयोः परस्परविलक्षणयोरेकभावमाहुः श्रुतय इति संशयः किं न स्यात् । अपि चैवमपि सन्दिह्यते—"अन्नं ब्रह्म" (तै० उ० ३.२), "प्राणो ब्रह्म" (तै०उ० ३.३),

---

गत्यन्तराभावे विरुद्धधर्माधिकरणत्वेऽपि श्रुतिबलाद् ब्रह्मणः प्रसिद्धजीवरूपतैव सिद्ध्येत् । असङ्गत्वादिश्रुतिसिद्धं जीवस्य शुद्धं रूपमस्ति, तदेव तात्त्विकमिति तद्रूपता वा सिद्ध्येदिति तद्गतिविचारप्रयोजकं सन्देहमेव—"अयमात्मा ब्रह्म" (बृ० उ० २.५.१९) इत्यादिश्रुतयः प्रयोजयन्ति, न तु जीव एव ब्रह्मेति निश्चयं जनयन्तीत्यर्थः । एतयोरित्यस्य ब्रह्मत्वजीवत्वपरत्वे एकभावः, एकत्र धर्मिणि सद्भावः, जीवब्रह्मपरत्वे त्वैक्यम् ।

ननु पूर्ववृत्तधर्ममीमांसाशास्त्रविचारलब्धसंख्यामुष्ट्यधिकरणादिन्यायानुसन्धानवतश्चरमश्रुतब्रह्मशब्दार्थापरिग्रहेण जीवे ब्रह्मशब्दस्य मरुत्वतीन्द्रशब्दस्येव सङ्कुचितवृत्त्या जीव एव वेदान्तेषु मुमुक्षुवेद्यत्वाभिमतस्य ब्रह्मशब्दस्यार्थ इति निश्चेतुं शक्यमित्याशङ्क्य विनिगमनाविरहेण तथानिश्चयासम्भवार्थं विधान्तरेणापि संशयप्रयोजकानि वाक्यान्युदाहरति—अपि चेति ।

ननु षड्विधतात्पर्यलिङ्गोपेतत्वात्—"तत्त्वमसि" (छा० उ० ६.८.७), "अहं ब्रह्मास्मि" (बृ० उ० १.४.१०), "अयमात्मा ब्रह्म" (माण्डू० उ० २), "प्रज्ञानं ब्रह्म" (ऐ० उ० ५.३) इत्यादिश्रुतय एव तात्त्विकाभेदपराः, न त्वन्नादिश्रुतयो न वा जीवब्रह्मभेदश्रुतय इति चेत्, तर्हि प्रतिवेदान्तमुपक्रमोपसंहारादिभिस्तात्पर्यनिर्णयो महता विचारेण साध्य इति तदर्थं विचारशास्त्रमारम्भणीयमेव स्यात् । यदि षड्विधतात्पर्यलिङ्गोपेतानि तत्त्वमस्यादिवाक्यानि जीवब्रह्मणोः स्वरूपाभेदपराणीति सिद्धान्ती मन्येत, तदा तं प्रति प्रत्यक्षसिद्धो जीव एव ब्रह्मेति तव मतं चेत्, प्रत्यक्षसिद्धस्य तस्य न शास्त्रविषयता जीवस्य । शुद्धं निर्विशेषमप्रसिद्धं रूपान्तरं ब्रह्मेति तव मतं चेत्, तस्यात्यन्ताप्रसिद्धस्य बुद्ध्यारोहानर्हस्य न शास्त्रविषयतेति पूर्वपक्षिणा ब्रह्मणो विषयत्वासम्भवे समर्थ्यमाने सिद्धान्तिनः कुतो हेतोर्जीव एव ब्रह्म, येन तस्य विषयत्वं न सम्भवेदिति हेत्वाकाङ्क्षा न भवति, सिद्धान्तिनोच्यमानस्यैव जीवो ब्रह्मेत्यर्थस्य पूर्वपक्षिणाऽनूदितत्वादिति तत्र पूर्वपक्षिणा स्वानूदितार्थोपपादनार्थं तदनुकूलन्यायविचाराय शास्त्रारम्भो नापेक्ष्येत । न त्विह सिद्धान्ती तथा मन्यते । अतः पूर्वपक्षिणा तत्त्वमस्यादिवाक्यानां बलप्रदर्शनेन

"मनो ब्रह्म" (तै० उ० ३.४), "विज्ञानं ब्रह्म" (तै० उ० ३.५), "आदित्यो ब्रह्म" (छा० उ० ३.१९.१), "नारायणः पर ब्रह्म" (महाना० ११.४) इत्यादयोऽन्यमन्यमर्थं ब्रह्मेत्याहुः ।

जीव एव ब्रह्मेत्यस्मिन्नर्थे तात्पर्योपपादनपूर्वकं ब्रह्मविषयकशास्त्रारम्भं चिकीर्षतः सिद्धान्तिनो मते जीवविषयशास्त्रारम्भ एव चिकीर्षितः स्यादिति सिद्धान्त्यनभिमतमेव जीवस्य विषयत्वमापाद्य तदसम्भवः समर्थनीय इति जीवब्रह्माभेदपरवाक्यानां बलवत्त्वनिर्णयार्थं तदुपयोगिन्यायविचारशास्त्रारम्भोऽपेक्षणीय एव । अयमर्थोऽस्माभिर्मध्वविध्वंसने—"सिद्धेऽसिद्धे च सिद्धान्त्यभिमतविषये दूषणं चेत्क्रियेत न्यायापेक्षा न तस्योन्मिषति निजमतप्रक्रियार्थानुवादे । सिद्धान्त्यस्वीकृतेऽर्थे यदि तु विषयतापादनं पूर्वपक्षे कर्तव्यं तर्ह्युपायः कथमिह सुधिया तत्र नापेक्षणीयः ॥" इति संग्रहश्लोकेन तद्व्याख्यानेन च प्रपञ्चितः ।

ननु सिद्धान्त्यनभिमतमर्थं पुरस्कृत्य शास्त्रानारम्भपूर्वपक्षे तदुपपादनायैव शास्त्रारम्भोऽपेक्षित इत्यापादने पूर्वमीमांसाद्याधिकरणपूर्वपक्षेऽप्येवमापादनं भवेत् । स खल्वेवं प्रवृत्तोऽध्ययनविधिना विश्वजिन्न्यायाद् वेदाध्ययनस्य स्वर्गार्थताबोधकेनार्थज्ञानेतरफलार्थनियमानां वेदानां विषनिर्हरणादिमन्त्राणामिवार्थविवक्षाग्राहकं प्रमाणं नास्तीति वेदवाक्यान्यापाततोऽपरिपूर्णानुपपन्नार्थानि लक्षणानुषङ्गाध्याहारव्यवधारणकल्पनार्थिकार्थकल्पनादिभिरवश्यमुपपादनीयानीत्यत्र नियामकाभावादनुपपत्तिशङ्काकलुषितवेदार्थविचारात्मकं शास्त्रं नारम्भणीयमिति तत्रापि स्वाध्यायाध्ययनस्य स्वर्गार्थत्वं सिद्धान्त्यनभिमतमेव पूर्वपक्षिणोपपाद्यमिति तदुपपादकविश्वजिन्न्यायादिप्रतिपादकशास्त्रारम्भापेक्षा स्यादिति चेन्मैवम्, धर्मजिज्ञासासूत्रे ह्यध्ययनवाक्यमेकमेव विचार्यम् । तस्य सिद्धान्त्यभिमतदृष्टफलरूपार्थज्ञानार्थत्वे वैयर्थ्यप्रसङ्गात् सर्वापेक्षितस्वर्गार्थत्वं वाच्यमिति शक्यं पूर्वपक्ष एव किञ्चिन्न्यायोपपादनम्, अतस्तदर्थं न शास्त्रारम्भापेक्षा । अध्ययनविधिद्वारा तदुपात्तानां सर्वेषामपि वेदवाक्यानां विचार्यत्वेऽपि तेषामविवक्षितार्थत्वे पूर्वपक्षिणोपपादनीये विषनिर्हरणादिमन्त्रवदन्यार्थं नीयमानत्वमेक एव न्यायः । सोऽपि पूर्वपक्ष एव व्युत्पादयितुं शक्य इति तदर्थमपि न शास्त्रारम्भापेक्षा । नहि कियन्तमपि न्यायमप्रदर्श्य पूर्वपक्षः क्रियते । इह तु नैकमेव वेदान्तवाक्यमुदाहृत्य जीवस्य प्रसिद्धमप्रसिद्धं वा रूपं ब्रह्मेति पूर्वपक्षिणा शास्त्रविषयत्व-

तत्र किं वा ब्रह्मेति बहुधा सन्दिग्धं ब्रह्म विचारार्हं भवति । तत्र श्रवणमननादिनिश्चितस्य भक्तिज्ञानविशेषाभिमुखस्य

मापादयितुं शक्यम्, तस्यैकस्य केनचिन्न्यायेन पूर्वपक्षव्युत्पादितेन जीवब्रह्माभेदपरत्वसिद्धावपि वाक्यान्तराणां तत्परिपन्थिजीवब्रह्मभेदादिपरत्वप्रतीत्यनिवारणात् । अतस्तद्विचारार्थं शास्त्रारम्भापेक्षा स्यादेव ।

न च सर्वेषां वेदान्तानां जीवब्रह्माभेदपरत्वे सार्वत्रिक एकोऽस्ति न्यायः, उपक्रमादीनां श्रुतिलिङ्गादीनां च परःशतबाध्यबाधकभावप्रकारशालिनां तत्र तत्र व्यवस्थितत्वात् । न च तेषां सर्वेषामेकस्मिन्नेवात्र पूर्वपक्षे व्युत्पादनं युक्तम्, तथा सति सर्वस्यापि शास्त्रस्यैकाधिकरण्यकल्पनाप्रसङ्गात् । तस्मात् तावतां न्यायानां व्युत्पादकमेकं शास्त्रमिहापेक्षितमित्यस्मिन्नेव शास्त्रे पूर्वपक्षिणो व्याघातदोष आपतितः, धर्ममीमांसारम्भपूर्वपक्षिणोऽपि । अयमप्यर्थोऽस्माभिर्मध्वविध्वंसन एव—"एकं वाक्यं विचार्यं यदि भवति नयो वाऽपि सर्वत्र तुल्यस्तत्किञ्चिन्न्यायक्लृप्त्यानभिमतरचना युज्यते पूर्वपक्षे । सर्वेषामेव नानाविधनयनिकरानेयतात्पर्यसीम्नां वेदान्तानां विमर्शाद् विषयविरचना त्वेकमीहेत शास्त्रम् ॥" इति संग्रहश्लोकतद्व्याख्यानाभ्यां प्रपञ्चितः । तस्मादिह पूर्वपक्षिणा केवलमयमात्मा ब्रह्मेत्यादिश्रवणमात्रमवलम्ब्य जीवस्य शास्त्रविषयत्वापादनेन तदनारम्भः शङ्कनीयः । तत्रेदमुक्तं भाष्ये—"नैवं शङ्कावकाशं लभते, जीवब्रह्मभेदश्रुतीनामन्नं ब्रह्मेत्यादिश्रुतीनां च सत्त्वेन तद्बलाबलविचारमनपेक्ष्य श्रुतिमात्रावलम्बने ब्रह्म किमन्नादीनामन्यतममन्यद्वेति विचारोपयुक्तस्य सन्देहस्यैव प्राप्तेः" इति ।

एवं विषयमुपपाद्य प्रयोजनमुपपादयति—तत्रेति । विषये सिद्धे सतीत्यर्थः । अयमिह क्रमः–विशिष्टाधिकारी मुमुक्षुणा ज्ञातव्यं ब्रह्म किमिति बहुविधवाक्यश्रवणवशात् सन्देहे सति तज्जिज्ञासया तन्निर्णायकस्यास्य शास्त्रस्य श्रवणे प्रवृत्तः, तेन तदनुकूलयुक्त्यनुसन्धानात्मकेन मननेन च तन्निश्चित्य स्वरूपप्रमाणसाधनफलैस्तन्निश्चयतो लब्धेन भक्त्यतिशयेन चिरनिरन्तरासेवितेन तदुपासनेन तज्जन्यसाक्षात्कारेण चागाधिततया स्वमुमुक्षोन्मुखस्य नित्यसिद्धापारकरुणासागरतया सर्वानुग्रहैकरसिकस्य अत एव ब्रह्मविद्योपदेष्टृस्वमहादेशिकरूपेण स्वस्य श्रवणमननादिकं सम्पादितवतस्तस्यैव परब्रह्मणः प्रसादातिशयेन पाशपटलप्रध्वंसपूर्विकां निरतिशयप्रकाशमाना-

परमकारुणिकस्य महादेशिकस्य सर्वानुग्राहकस्य शिवस्य परब्रह्मणः प्रसादातिशयेनास्याधिकारिणः प्रध्वस्तपाशपटला प्रत्यक्षीभूतनिरतिशयज्ञानानन्दरूपा तत्समानगुणसारा कैवल्य-

---

नन्दरूपां तदत्यन्तसादृश्यात्मिकां मोक्षलक्ष्मीं प्रतिपद्यत इति। अतः शाब्दज्ञानमात्रेण परमप्रयोजनस्यानभ्युपगमात् 'प्रयोजनं च न किञ्चित् पश्यामः' इति दूषणस्य नावकाशः। पाशनिवृत्तौ "प्रधानक्षेत्रज्ञपतिर्गुणेशः संसारमोक्षस्थितिबन्धहेतुः" (श्वे० उ० ६.१६) इति प्रमाणसिद्धस्य हेतोरुपन्यासादनादिर्न निवर्तत इति दूषणस्य नावकाशः। निवृत्तौ प्रमाणसद्भावो हि निवृत्त्यभ्युपगमे तन्त्रम्, न तु सादित्वमनादित्वं वा, इदानीमुत्पन्नव्यक्तिविशेषानुभवेन तदज्ञानस्यानादेरपि निवृत्त्यभ्युपगमात्। नहि तदज्ञानं सादीति वक्तुं शक्यम्, इदानीन्तनव्यक्तिविशेषस्य पूर्वं कदाचिदपि दर्शनाभावेन तदनादित्वावश्यंभावात्। अज्ञानं ज्ञानप्रागभावरूपमित्यभावत्वात् तस्य निवृत्तिरभ्युपगम्यत इति चेत्, किमत्यन्ताभावस्य तथाभूतस्यापि निवृत्तिरभ्युपगम्यते। निवृत्तौ प्रमाणाभावात्तस्य सा नाभ्युपगम्यत इति चेत्, तर्ह्यावश्यकत्वात् प्रमासद्भाव एव तदभ्युपगमे तन्त्रमिति किमजागलस्तनायमानेन मानाभावत्वेन। किञ्च, संसारिणां सर्वविषयत्वयोग्यचिच्छक्तिरूपनित्यसिद्धज्ञानावरणभूता मलद्रव्यशक्तिविशेषा एव तत्तद्विषयाज्ञानानीत्यज्ञानानामभावत्वकथापि वृथैव। तेषामभावत्वेऽपि भूतले घटाभाववत् समयविशेषसंसर्गात्यन्ताभावतोपपत्तावप्रामाणिकप्रागभावत्वकल्पना न युक्ता। गौतमसूत्रेऽप्यनादेः संसारस्य निवृत्तौ "प्रागुत्पत्तेरभावान्नित्यत्ववत्" (न्या० ४.१.६७) इति प्रागभावनिवृत्तिं दृष्टान्तीकृत्य प्रागभावासम्प्रतिपत्तावनादिभावनिवृत्तौ दृष्टान्तेन भाव्यमित्यनुशये च—"अणुश्यामता नित्यत्ववद्वा" (न्या० ४.१.६८) इति परमाणुश्यामतानिवृत्तिदृष्टान्तेनानादिभावनिवृत्तिरभ्युपगता।

एतेन द्रव्यस्य ज्ञानमात्रान्निवृत्तिः, सर्वजीवगतानर्थनिदानस्यैकपुरुषमोक्षकारणान्निवृत्तिश्च न सम्भवतीति दूषणान्तरमप्यनवकाशीकृतम्, तत्तन्मुच्यमानजीवावरणभूतानां मलशक्तीनामेव निवृत्त्यभ्युपगमात्, श्रवणमननध्यानसाक्षात्कारैरुपचीयमानभक्त्युपबृंहितैः प्रसन्नस्य शिवस्यैव मोचकत्वाभ्युपगमेन तस्य द्रव्यनिवर्तकत्वसम्भवाच्च। तदभ्युपगमप्रदर्शनायैव सर्वानुग्राहकस्येति विशेषणम्। प्रसादातिशयस्तु तद्व्यापारत्वेनोपन्यस्तः, न तु प्रसादातिशयो मुक्तिसाधनं न परमेश्वर इत्यभिप्रायेण, "फलमत उप-

लक्ष्मीः प्रयोजनं च भवति । ततः सविषयं सप्रयोजनं वेदान्त-

पत्तेः" (ब्र० ३.२.३८) इत्यधिकरणे परमेश्वरस्य फलसाधनत्वेन व्यवस्थापयिष्यमाणत्वात् । प्रसादेन परमेश्वरस्य सव्यापारीकरणे श्रवणमननादिपुरुषप्रयत्नस्योपयोगः । लोके हि साधनं द्विविधं सिद्धमसिद्धं च । तत्रासिद्धं कृष्यादि फलकामेनोत्पादनीयम् । सिद्धं कुठारादि सव्यापारीकरणीयम् । परमेश्वरश्च मोक्षे सिद्धरूपं साधनमिति मोक्षार्थिना निगलमोचनार्थिना राजेव स प्रसादेन सव्यापारीकरणीय इति । एवं शिवस्य मोचकत्वं दृढीकर्तुमेव ब्रह्मविद्योपदेष्टृगुरुमूर्तिमधिष्ठाय स एव श्रवणादीनामपि सम्पादक इति प्रदर्शनाय महादेशिकस्येति विशेषणम् । साक्षात्परम्परया च मोक्षप्रदानरसिकतायां हेतुगर्भं विशेषणं परमकारुणिकस्येति । पारम्यं करुणाया नित्यसिद्धत्वेन निरतिशयत्वेन च विवक्षितम् ।

एवं परमकारुणिकः सर्वज्ञः सर्वशक्तिकश्च सर्वानपि युगपत् किमिति न मोचयतीत्याशङ्कापरिहाराय प्रध्वस्तपाशपटलेत्यत्र पाशः पटलमिवेत्युपमितसमासेन मलाख्यस्य प्राथमिकसंसारपाशस्य नयनपटलसादृश्यं दर्शितम् । यथा नयनानां पटलावरणमतिकारुणिकेनापि भिषजा पक्वभावं प्रतीक्ष्यैवापास्यते, एवं परमेश्वरेणापि पुंसां मलावरणमिति भावः । मलमायाकर्मरूपपाशसमूहार्थो वा पटलशब्दः । पाशपटलप्रध्वंसमात्रं नैयायिकमुक्तिवन्न स्वतः प्रयोजनमिति प्रयोजनरूपताप्रदर्शनाय प्रत्यक्षीभूतेत्यादि विशेषणम् । मुक्तौ ब्रह्मानन्दानुभवरूपपरमपुरुषार्थसद्भावप्रदर्शनार्थं सत्यसङ्कल्पत्वाद्युत्कृष्टब्रह्मगुणाविर्भावसद्भावप्रदर्शनार्थं तत्समानगुणसारेति विशेषणम् ।

ननु श्रवणादिप्रणाडिकयेदं प्रयोजनं सिद्ध्यतु नाम । इदं प्रयोजनमित्थं सिद्ध्यतीति ज्ञानं प्रथमसूत्रार्थविचारमात्रेण कथं भविष्यति । अनेन हि सूत्रेण ब्रह्मणः शास्त्रविषयत्वसिद्ध्यर्थं जीवादीनामन्यतममन्यद्वेति सन्दिग्धत्वमेव तस्य जिज्ञासाकर्मत्वनिर्देशेन दर्शितम् । तथैव 'बहुधा सन्दिग्धं ब्रह्म विचारार्हं भवति' इति भाष्येणाप्युपपादितम् । विचाराधिकारिजीवादन्यदिति ब्रह्मणो निश्चयभावे च श्रवणाद्याराधितस्य तस्य प्रसादात् पाशप्रध्वंसपूर्विका तत्समानसार्वज्ञादिमती मोक्षलक्ष्मीः प्रादुर्भवतीति निश्चेतुमशक्यम् । न च वाच्यं प्रथमसूत्रार्थविचारमात्रेण तन्निश्चयासम्भवेऽपि स्वरूपप्रमाणसाधनफलैर्ब्रह्मनिर्णायकस्य जन्मादिसूत्रप्रभृतेरस्य शास्त्रस्य श्रवणेन तदर्थमननेन च तन्निश्चयः सम्भवति । कृत्स्नशास्त्रश्रवणतदर्थ-

मननानन्तरमेव तन्निश्चयः। तत्र 'श्रवणमननाभ्यां निश्चितस्य' इति भाष्येऽपि दर्शित इति। तथा सति प्रेक्षावत्प्रवृत्त्युपयोगिशास्त्रविषयप्रयोजन-निर्णायकत्वाभिमतस्य प्रथमसूत्रस्य प्रयोजननिर्णायकत्वाभावप्रसङ्गात्, शास्त्रस्य सविषयत्वनिर्णयेऽपि सप्रयोजनत्वनिर्णयाभावे प्रेक्षावत्प्रवृत्त्य-सम्भवेन प्रथमसूत्रवैयर्थ्यप्रसङ्गाच्च। न च वाच्यं यथा धर्ममीमांसा-शास्त्रारम्भे धर्मस्य जिज्ञासाकर्मत्वेन सन्दिग्धत्वप्रदर्शनेऽपि शास्त्रस्य सप्रयोजनत्वनिर्णयः, तथाऽत्रापि स्यादिति। यदि बौद्धादियोगि-प्रत्यक्षप्रमाणकतया चैत्यवन्दनादिलक्षणो धर्मः, यदि वा चोदना-प्रमाणकतया यागादिलक्षणः, उभयथापि धर्माभ्युदयोऽस्तीति निश्चयस्य यदि श्येनादिद्रव्यको यागः, यदि वा श्येनादिनामकः, उभयथापि यागाभ्यु-दयोऽस्तीति निश्चयस्य च तत्राविरोधात्, इहाहमनुभवसिद्धो जीव एव ब्रह्म तदन्यद्वेति सन्देहे जीवाराधितब्रह्मप्रसादात् पाशनिवृत्तिपूर्विका तत्स-मानगुणसारा मोक्षलक्ष्मीर्भवतीति निश्चयासम्भवात्। तस्मादिह ब्रह्मणो जीवादीनामन्यतममन्यद्वेति सन्दिग्धत्वेन विषयत्वोपपादनेनोक्तप्रयोजन-वत्त्वोपपादनं ब्रह्म जीवादिभ्योऽन्यः शिव एवेति निर्णयेन तत्प्रसादलभ्यतत्स-मानगुणप्रयोजनवत्त्वोपपादने च नोक्तरीत्या सविषयत्वोपपादनमित्युभयतः-पाशा रज्जुरिति चेत्, अत्र ब्रूमः—

ब्रह्मणो विचारविषयत्वं तत्प्रयोजनत्वं च सूत्रकृता तस्य जिज्ञासाकर्मत्व-निर्देशेन सूचितम्। तस्मिन् ब्रह्मशब्दनिर्देशेन तदुभयोपपादनं कृतम्। तन्निर्देशेन हि किं तद् ब्रह्म यत्सामान्यतोऽवगतं विशेषतोऽनवगतं जिज्ञास्य-मित्याकाङ्क्षायामधीतसाङ्गसशिरस्कवेदस्य—"अयमात्मा ब्रह्म" (बृ० उ० २.५.१९), "अन्नं ब्रह्म" (तै० उ० ३.२), "मनो ब्रह्म" (तै० उ० ३.४), "आदित्यो ब्रह्म" (छा० उ० ३.१९.१), "तपसा चीयते ब्रह्म" (मुण्डको० १.१.८), "तद्विजिज्ञासस्व तद्ब्रह्म" (तै० उ० ३.१), "नारायणः परं ब्रह्म" (महाना० ११.४), "ऋतं सत्यं परं ब्रह्म" (महाना० १२.१) इत्यादीनि सर्वाणि ब्रह्मनिर्देशवन्ति वाक्यान्युपतिष्ठन्ते, न तु "अयमात्मा ब्रह्म" इत्येक-मेव वाक्यम्, विनिगमनाविरहात्। न च तेषु किञ्चिद् वाक्यं तात्त्विकब्रह्म-भावबोधकं नान्यदित्यत्र प्रथमसूत्रार्थविचारात् प्राङ्न्यायानुसन्धानमस्तीत्येवं ब्रह्मशब्दनिर्देशेन न्यायानुसन्धानरहितबहुविधवाक्यस्मारकेण सन्दिग्धत्व-सूचनया विषयत्वमुपपादितं भवति। तस्य ब्रह्मशब्दस्यावयवशक्तिपर्या-लोचनया श्रुतिप्रदर्शितनिरुक्त्यनुसन्धानेन तदर्थे निर्दोषत्वादिप्रतिपादका-नेकवाक्यदर्शनेन च लभ्यस्य भाष्योक्ततत्प्रवृत्तिनिमित्तस्य प्रदर्शकेन

तेनैव ब्रह्मशब्दनिर्देशेन ब्रह्मणो जीवान्यत्वसूचनया तत्प्रसादलभ्यपाशनिवृत्तिपूर्वकमनुभाव्यस्य तस्य प्रयोजनत्वमप्युपपादितं भवति। भाष्यप्रदर्शितायां हि ब्रह्मशब्दप्रवृत्तिनिमित्तभूतब्रह्मत्वनिरुक्तौ निर्दोषमङ्गल्यगुणवत्त्वमज्ञानाननुविद्धनिरतिशयज्ञानदुःखाननुविद्धनिरतिशयसुखादिमत्त्वं च। न च सर्वदा तापत्रयातुरस्य जीवस्य तत्सम्भवति, नापि सर्वशक्तिमत्तया सकलतापप्रतिक्षेपसमर्थस्य ब्रह्मणस्तापलेशसहिष्णुत्वमपि। एवं यस्य निरतिशयज्ञानानन्दादिगुणकस्य जीवरूपत्वमपि न सम्भवति दूरे तस्याचेतनान्नादिरूपत्वम्। न चेन्द्रशब्दस्य शक्र इव ब्रह्मशब्दस्य जीवादिषु क्वचिदर्थे व्यवस्थितिर्दृष्टा, येन तत्र सम्भावितगुणपरतया तद्वत् सङ्कोचं नीयेत। न चानेकप्रमाणावगतमिदं ब्रह्मशब्दप्रवृत्तिनिमित्तमवयवशक्तिपर्यालोचनामात्रलभ्येन्द्रशब्दप्रवृत्तिनिमित्तवत् सङ्कोचयितुमपि शक्यम्।

एवं निर्दोषनिरतिशयज्ञानानन्दादिमति ब्रह्मणि जीवादन्नाद्यचेतनाच्चान्यत्वेन प्रथमसूत्रगतब्रह्मशब्ददर्शितन्यायतः सिद्धे जीवादीनामन्यतममन्यद्वेति सन्देहनिवृत्तावपि "नारायणः परं ब्रह्म" (महाना० ११.४) इत्यादिश्रुतिविप्रतिपत्तितस्तद्ब्रह्म नारायणः शिवो वेत्यादिसन्देहस्य, "अयमात्मा ब्रह्म" (बृ० उ० २.५.१९) इत्यादिवाक्यानां का गतिरिति सन्देहस्य चानुवृत्तेरेवंभूतसन्देहसन्दोहप्रतिक्षेपाय जन्मादिसूत्रप्रभृति शास्त्रं प्रवर्तते। धर्ममीमांसाशास्त्रेऽपि धर्मः किं योगिप्रत्यक्षलक्षणो वेदलक्षणो वेति संशये वेदाध्ययनानन्तर्यं धर्मविचारे प्रदर्शयता प्रथमसूत्रेण निरस्ते किं वेदार्थः सर्वोऽपि धर्मः, उत तन्मध्ये चोदनालक्षणः, अथवा तत्राप्यर्थरूप इत्यादिसंशयान्तरनिरासाय चोदनासूत्रप्रभृति शास्त्रं प्रवृत्तम्। अन्यथा प्रथमसूत्रेण तत्रापि संशयस्यानिरासे धर्मस्य श्रेयःसाधनत्वसम्प्रतिपत्तावपि वेदार्थविचारात्मकस्यारिप्सितशास्त्रस्य सप्रयोजनत्वासिद्धेः। तस्मात् प्रथमसूत्रं ब्रह्मणो जीवादिरूपतया सन्दिग्धत्वप्रदर्शनेन विषयत्वोपपादकं चेत्, न प्रथमसूत्रतः प्रयोजनवत्त्वसिद्धिः, तस्य जीवादन्यत्वव्यवस्थापनेन तत्प्रसादलभ्यप्रयोजनोपपादकं चेत्, ततो न विषयसिद्धिरिति दूषणस्य नावकाशः। भाष्यमप्यनेनैव प्रकारेण विषयप्रयोजनयोरुपपादकम्। तत्र हि विषयभाष्ये सूत्रगतजिज्ञास्यविषयब्रह्मशब्दप्रयोगस्मारितब्रह्मपदघटितनानाविधवाक्यप्रयोज्यसन्देहसन्दोहेन ब्रह्मणो विषयत्वोपपादनपूर्वकं तत्प्रयोगसूचिततदवयवशक्तिपर्यालोचनादिलभ्यतत्प्रवृत्तिनिमित्तभूतब्रह्मत्वनिर्वचनलब्धेन ब्रह्मणो जीवाद्यन्यत्वनिर्णयेन प्रयोजनोपपादनमप्याकूतितम्। प्रथमसूत्रेण ब्रह्मणो

जीवाद्यन्यत्वनिश्चयेऽपि जन्मादिसूत्रप्रभृतिशास्त्रारम्भप्रयोजकसंशयः—"नारायणः परं ब्रह्म" (महाना० ११. ४) इति वाक्योदाहरणेन जीवब्रह्मैक्यनिर्देशकवाक्यजातगत्याकाङ्क्षाप्रदर्शनवाक्येन च दर्शितः।

ननु 'कथमेकभावमाहुः श्रुतय इति सन्देहः किं न स्यात्' इति वाक्यस्योत्तरत्र "अयमात्मा ब्रह्म" (बृ० उ० २.५.१९) इत्यादिवाक्यानां विशिष्टशिवाद्वैतपरत्वव्युत्पादननिवर्तनीयसंशयप्रदर्शकत्वे तस्य प्रथमसूत्रनिवर्तनीयसंशयप्रदर्शकेन 'अपि चैवमपि सन्दिह्यते' इत्यादिसमनन्तरग्रन्थेन कथं सङ्गतिरिति चेत्, ब्रह्मणो जीवान्यत्वनिर्णायकेन प्रथमसूत्रेण यः संशयो निर्वतितः स एव "अयमात्मा ब्रह्म" (बृ० उ० २.५.१९) इत्यादिश्रुतीनां गत्यन्तरसत्त्वासत्त्वसंशयेनाग्रे पुनरुत्थितो निवर्तयिष्यत इति, वस्तुत उभयत्रापि संशयाभेदात्। अथवा 'अपि च' इत्यादिग्रन्थोऽपि न प्रथमसूत्रनिवर्तनीयसन्देहमात्रप्रदर्शकः, शारीराधिकरणनिवर्तनीयसन्देहप्रयोजकस्य "नारायणः परं ब्रह्म" (महाना० ११.४) इति वाक्यस्यादिशब्दगृहीतस्य हिरण्यगर्भाधिकरणनिवर्तनीयसन्देहप्रयोजकस्य "तदेव ब्रह्म परमं कवीनाम्" (महाना० १.६) इति वाक्यस्य च तत्रानुक्रमणात्। तस्माद् विषयभाष्यं ब्रह्मणो विषयत्वव्यवस्थापनमात्रपरमिति। तेन संशयेषु तत्तत्सूत्रनिवर्तनीयत्वानादरेण ब्रह्मणि संशयसद्भावमात्रं प्रदर्शितम्। तावताऽपि प्रयोजनभाष्ये जीवाद्यन्यस्य ब्रह्मणः सिद्धवदनुवादाद् विषयभाष्ये ब्रह्मत्वजीवत्वयोर्निर्वचनमुखेन प्रथमसूत्रगतब्रह्मपदसूचितस्य तयोर्विरोधस्याविष्करणाच्च जीवान्नादिरूपत्वसन्देहः प्रथमसूत्रनिवर्तनीय इति, शारीराधिकरणे नारायणस्य हिरण्यगर्भाधिकरणे हिरण्यगर्भस्य च स्वतन्त्रपरब्रह्मभावनिरसनदर्शनाद् ब्रह्मणि नारायणत्वादिसन्देहस्तदधिकरणद्वयनिवर्तनीय इति चावगन्तुं शक्यमिति स विशेषोऽत्र भाष्ये न स्पष्टीकृतः। यद्वा 'अपि च' इत्यादिग्रन्थोऽप्युत्तरत्र निवर्तनीयस्यैव "अन्नं ब्रह्म" (तै० उ० ३.२) इत्यादिवाक्यानां का गतिरिति सन्देहजातस्य फलसन्देहद्वारा प्रदर्शक इति न किञ्चिदसामञ्जस्यम्।

ननु यदि नारायणहिरण्यगर्भयोः परब्रह्मभावसंशयोऽग्रे निरसनीयः, कथं तर्ह्यत्र प्रयोजनभाष्ये 'परब्रह्मणः शिवस्य प्रसादातिशयेन' इति वाक्येन 'परं ब्रह्म शिवः' इति सिद्धवदनूदितम्। उच्यते—मन्त्रार्थवादादिप्रसिद्धेषु देवताविशेषेष्वयमयं वा ब्रह्मेति संशयो नानाकारणकः। एकस्तावन्मन्त्रार्थवादगतोत्कर्षप्रतिपादनदर्शनमात्रसम्भवः शक्रसूर्याग्न्यादिसाधारणः। "नकि-

श्रवणम् । यदुक्तम्–'ज्ञेयपरिच्छेदरूपत्वाज्ज्ञानस्य तदपरिच्छि-

---

रिन्द्र त्वदुत्तरः" (ऋ० ४. ३०.१), "विश्वस्मादिन्द्र उत्तरः" (ऋ० १०.८६.१), "इन्द्रो यातोऽवसितस्य राजा"(ऋ० १.३२.१५), "सूर्य आत्मा जगतस्तस्थुषश्च"(ऋ० १.११५.१), "अग्निरग्रे प्रथमो देवतानाम्" (तै० ब्रा० २.४.३.३), "अग्निर्मुखं प्रथमो देवतानाम्"(का० सं० ४.१६), "राजानौ वा एतौ देवतानां यदग्नीषोमौ" इत्यादिमन्त्रार्थवादेषूत्कर्षवर्णनं हि शक्रादीनामपि दृश्यते । अयं प्रथमसूत्रगतब्रह्मशब्दस्मारितस्य तत्प्रवृत्ति-निमित्तस्य शिवे पौष्कल्यादथशब्दव्याख्यानोपसंहारभाष्यप्रपञ्चिततात् स एव परं ब्रह्मेति निर्णयेन निवर्तनीयः । सज्ज्ञानानन्दनारायणादिषु बहुषु जगत्कारणत्वरूपब्रह्मलक्षणश्रवणकृतोऽन्यः स जगत्कारणत्वोपयोगिगुणषट्-कादेः शिवे प्रसिद्धतरत्वेन तत्र कारणवाक्यानां पर्यवसानात् स एव जगत्कारणं ब्रह्मेति निर्णयेन जन्माद्यधिकरणे प्रदर्शयिष्यमाणेन निवर्त-नीयः । अनेकत्र ब्रह्मशब्दादिश्रवणकृतोऽपरः स शारीराद्यधिकरणे निवर्त-नीयः । तत्र प्रथमसूत्रे द्वितीयादिसंशयानिवर्तनेऽपि प्रथमसंशयनिवर्तनादेव-मेव संशयान्तरनिवर्तनमपि भविष्यतीति श्रोतॄणां विस्रम्भोत्पादनेन शिव एव ब्रह्मेति सिद्धवदनुवादः । यथा पूर्वतन्त्रे प्रथमाध्याये केषाञ्चिदप्रामाण्य-हेतूनां निवर्तनमात्रेण विश्वजिदधिकरणादिनिवर्तनीयतत्संशयानुवृत्तावपि वृत्तं प्रमाणलक्षणमिति कात्स्न्येंन वेदप्रामाण्यस्य सिद्धवदनुवाद इति न काचिदनुपपत्तिः ।

नन्वेवं ब्रह्मणो जीवान्यत्वनिश्चयेन प्रयोजनोपपादने तस्यापरिच्छेद्यत्व-मापतति । सोऽयं मयूरनृत्तन्यायः । यथा मयूरस्य नृत्यत एक एव पादो भूमौ प्रतिष्ठितो भवति, एवमिहापि यदि जीव एव ब्रह्माभ्युपगम्येत शक्य-स्तस्य परिच्छेदः, तदपरिच्छेद्यत्वश्रुतीनामर्थवादमात्रत्वप्राप्तेः । प्रयोजनं तु नोपपद्यते । यदि ब्रह्म जीवादन्यद् अनन्तमङ्गल्यगुणशक्तियुक्तमिह प्रसाध्येत,तदा प्रयोजनमुपपद्यते । अपरिच्छेद्यं तु ब्रह्म स्यात् । तदपरिच्छेद्य-त्वश्रुतीनां तस्मिन्नर्थे बाधाभावादित्यमुं दोषं परिहर्तुं पूर्वपक्षदर्शिता-मपरिच्छेद्यत्वशङ्कामनुवदति–यदुक्तमिति । द्विविधः परिच्छेदः–करतलामल-कवदीदृगिदमिति परिच्छेद एकः, तदभावेऽपि लक्षणमुखेनेतरव्यावृत्तता-मात्रेण परिच्छेदो द्वितीयः । तत्राद्यस्य ब्रह्मण्यसम्भवेऽपि द्वितीयः सम्भवति । यथा हि महासेनामध्ये रथगजतुरगभटवरविभूषणादियुक्तेषु बहुषु प्रभुषु

ब्रह्मविषयं न सम्भवति' इति, तदज्ञानविलसितम्, ईदृगिदमिति ब्रह्मणः परिच्छेदासम्भवेऽपि लक्षणमुखेनेतरव्यावृत्ततामात्रेण परिच्छेदसम्भवात्। लक्षणेन परिच्छेदो हि सर्वत्र लक्ष्यविषयमितरव्यावृत्ततया ज्ञानम्। उद्दिष्टस्य ब्रह्मणो लक्षणे वेदान्तवाक्यैर्निरूपिते परीक्षिते च तल्लक्षणशून्येभ्यः सजातीयविजातीयेभ्यस्तदितरसकलपदार्थेभ्यो व्यावृत्तरूपं यत् तद् ब्रह्मेति विज्ञायते। अतः समीचीनोऽयं ब्रह्मविषयः शास्त्रारम्भः।

दृश्यमानेषु सर्वत्रानिर्धारणेन राजबुद्धिप्रसक्तौ 'श्वेतच्छत्रं राजलक्षणम्' इत्युपदिष्टे यस्य श्वेतच्छत्रं पश्यति तदाकारविशेषादीनां दूरत्वादिदोषादनिश्चयेऽप्ययं राजेति विशिष्य निर्धारयति, एवं वेदराशिमध्ये तत्तन्मन्त्रार्थवादादिप्रसिद्धमहिमातिशयेषु बहुषु विबुधेषु श्रूयमाणेषु सर्वत्रानिर्धारणेन परब्रह्मबुद्धिप्रसक्तौ यज्जगत्कारणं तद् ब्रह्मेत्युपदिष्टे यत्र जगत्कारणत्वं शृणोति स एव ब्रह्मेति निर्धारयति। अतो नापरिच्छेद्यत्वेनाविषयत्वप्रसङ्गः। लक्षणकृत्यानभिज्ञस्य त्वियं शङ्केति समाधत्ते—तदज्ञानविलसितमिति।

ननु ब्रह्मणः सर्वात्मना परिच्छेद्यत्वाभावे "वेदान्तविज्ञानसुनिश्चितार्थाः" (मुण्डको० ३.२.६), "भक्त्या मामभिजानाति" (भ० गी० १८.५५) इति श्रुतिस्मृतिभ्यां सर्वात्मना परिच्छेदरूपेण ज्ञानेन प्राप्यतया वर्णितं प्रयोजनं न सिद्ध्येदिति स दोषस्तदवस्थ इति चेन्न, इतरव्यावृत्तत्वपरिच्छेदमात्रावलम्बनेन श्रवणमननयोरेकैकविद्योपसंहार्यगुणमात्रावगत्या निदिध्यासनस्य च निवृत्तौ साक्षात्कारकाले सर्वात्मना परिच्छेदसम्भवात्। न च तथा सत्यपरिच्छेद्यत्वभङ्गप्रसङ्गो दोषः, अपरिच्छेद्यत्वश्रुतीनां "यतो वाचो निवर्तन्ते" (तै० उ० २.४) इत्यादिश्रुत्यन्तरानुसारेण मनोवागतीतत्वविषयत्वात्। नहि साक्षात्कारकाले ब्रह्म मनसा तद्गुणयत्तादिप्रतिपादकशब्देन वा परिच्छिद्यते, किन्तु निवृत्तावरणेन सर्वतः प्रसृतेन स्वाभाविकज्ञानेनैव। यदाहुः—"शिवार्कशक्तिदीधित्या समर्थीकृतचिद्दृशा। शिवं शक्त्यादिभिः सार्धं पश्यत्यात्मा गतावृतिः॥" (मो० का० १११) इति।

तस्माद्विषयप्रयोजनयोरविरोधेन सिद्धेरुपपन्नः शास्त्रारम्भ इत्यभिप्रेत्योपसंहरति—अत इति। एवमिह सूत्रगतब्रह्मशब्दशक्तिपर्यालोचनालभ्येन ब्रह्मणो जीवान्यत्वनिश्चयेन शास्त्रस्य प्रयोजनवत्ताया विधान्तरेण ब्रह्मणः

सन्दिग्धतया तेन सविषयतायाश्चोपपादने सिद्धान्तभाष्यस्य तात्पर्यं दर्शितम्। ब्रह्मणो जीवतदन्यत्वसन्देहेनैव शास्त्रस्य विषयप्रयोजनवत्त्वोपपादने वाक्यस्य तात्पर्यं द्रष्टव्यम्। तथा हि—यद्यपि ब्रह्मणश्चेतनत्वादिप्रतिपादकवेदान्तवाक्यबाहुल्यात् "अन्नं ब्रह्म" (तै० उ० ३.२) इत्यादिवाक्यान्युपासनार्थानीति निश्चयेनान्नादिरूपतया तत्सन्देहो निवर्तते, तस्य विशुद्धत्वप्रतिपादकवाक्यबाहुल्याद् अविशुद्धसंसारिजीवरूपत्वसंदेहोऽपि निवर्तते, तथापि संसारदशानभिव्यक्तविशुद्धजीवरूपत्वसन्देहो न निवर्तते, श्रुतिस्मृतीतिहासपुराणागमेषु जीवान्यत्वप्रतिपादकवाक्यानां तदनन्यत्वप्रतिपादकवाक्यानां च बाहुल्याविशेषात्, विविधवाक्यबलाबलानवधारणेन ब्रह्मशब्दप्रवृत्तिनिमित्ते वस्त्वपरिच्छेदे सजातीयविजातीयसकलवस्तुराहित्यरूपत्वसजातीयवस्तुमात्रराहित्यरूपत्वसन्देहसत्त्वाच्च। ततश्च ब्रह्मणो नारायणादिरूपत्वसन्देहादिवज्जीवत्वसन्देहादपि विषयत्वमुपपद्यते। तस्य निर्विशेषजीवरूपत्वेऽपि संसारदशायामावृतस्य निरतिशयानन्दरूपत्वस्य मुक्तावभिव्यक्त्या शास्त्रस्य प्रयोजनवत्त्वमप्युपपद्यते।

अस्मिन् पक्षे 'कथमेकभावमाहुः श्रुतयः' इति भाष्यवाक्यं किं विरुद्धधर्मवत्त्वप्रतीतावपि विरुद्धांशप्रहाण्या शुद्धस्वरूपाभेदाभिप्रायेण श्रुतिषु जीवब्रह्मणोः सामानाधिकरण्यनिर्देश उपपादनीयः, उत तदप्रहाण्यैव अपृथक्सिद्धप्रकारप्रकारिभावाद्यभिप्रायेणेति ब्रह्मणि जीवतदन्यत्वसन्देहापादितश्रुतिगतिविचारपरत्वेन योजनीयम्। 'अपि चैवमपि सन्दिह्यते' इत्यादिभाष्यं क्वचित् क्वचिद्वाक्ये श्रुतमन्नादिरूपत्वमपि सन्दिह्येत, किमुत बहुश्रुतिस्मृतिपुराणादिवाक्यजातप्रतीतं जीवरूपत्वमिति कैमुतिकन्यायपरत्वेन योजनीयम्। तत्र नारायणत्वादिसन्देहोपन्यासो दृष्टान्तार्थतया समर्थनीयः। तस्मात् 'बहुधा सन्दिग्धम्' इति भाष्यं तु श्रुतिस्मृतिपुराणादिषु बहुभिर्जीवब्रह्माभेदसिद्ध्यनुकूलप्रकारैर्जीवतदन्यरूपतया संदिग्धमित्यर्थतया योजनीयम्। प्रयोजनभाष्यं प्रथमकोटौ प्रयोजनवत्त्वस्याद्वैतव्यवस्थापके तन्त्रान्तरे प्रसिद्धत्वात् तामपहाय सिद्धान्तकोटिमात्रे प्रयोजनवत्त्वस्य पूर्वपक्षेऽनुपपन्नतया शङ्कितस्योपपादनार्थतया योजनीयम्। 'यदुक्तम्' इत्यादिभाष्यं कोटिद्वयेऽपि परिच्छेदातीतस्य परिच्छेदासम्भवशङ्कानिराकरणार्थतया योजनीयम्। तत्र प्रथमकोटौ लक्षणं व्यावहारिकधर्मरूपं विवक्षितमिति तेनाग्रिमाधिकरणजातसाध्यनिर्णयोपयोगिहेतुजालस्यापि व्यावहारिकतयोपपत्तिः सिद्ध्यति। यद्वा प्रथमकोटौ लक्षणादिसकलविचाराणां व्यावहारिकधर्माव-

यदसन्दिग्धमप्रयोजनं च तत् खलु न प्रेक्षावतां विचारकक्ष्यामारोहति। अस्य तु वेदान्तशास्त्रविचारस्य प्रमाणयुक्त्याभासप्रतिभासवशात् सन्देहास्पदं ब्रह्म विषयो भवति। "ब्रह्मविदाप्नोति परम्" (तै० उ० २.१), "ज्ञात्वा शिवं शान्तिमत्यन्तमेति" (श्वे० उ० ४.१४), "ईशं तं ज्ञात्वा अमृता भवन्ति" (श्वे० उ० ३.७), "तमक्रतुं पश्यति

लम्बनत्वस्य तन्त्रान्तरे प्रसिद्धत्वात् सिद्धान्तकोटावेवोक्तशङ्कानिराकरणार्थतया पूर्ववदेव योजनीयमिति सर्वमनवद्यम्।

श्रोतृबुद्धिसौकर्यार्थमधिकरणार्थं सङ्कलय्य दर्शयति—यदसन्दिग्धमित्यादिना। प्रमाणयुक्त्याभासप्रतिभासवशादिति। प्रमाणाभासा नैयायिकाद्युन्नीतान्यष्टगुणत्वादिनेश्वरादिसाधकान्यनुमानादीनि। युक्त्याभासास्तत्तदनुग्राहकलाघवतर्कादयः। पूर्वं श्रुतिविप्रतिपत्त्या ब्रह्मणि सन्देहो दर्शितः, इदानीं वादिविप्रतिपत्त्येति विशेषः। प्रयोजनस्यार्थप्राप्त्यनर्थनिवृत्तिरूपतया द्वैविध्यस्य प्रयोजनोपयुक्तानां ध्यानसाक्षात्कारपरमेश्वरप्रसादानां द्वारद्वारिभावस्य च प्रापकाणि श्रुतिवाक्यान्युदाहरति—ब्रह्मविदित्यादिना। ब्रह्मविद् हृदयगुहायां ब्रह्मोपासकः, परं निरतिशयब्रह्मानन्दरूपं प्रयोजनं प्राप्नोतीत्यर्थः, "तदेषाऽभ्युक्ता"(तै०उ० २.१) इत्युदाहृतया ऋचा तथा विवृतत्वात्। अनेनार्थप्राप्तिरूपं प्रयोजनमुक्तम्। "ज्ञात्वा शिवम्"(श्वे०उ० ४.१४) इत्यनेनात्यन्तं शान्तिमात्यन्तिकीं दुःखनिवृत्तिं प्राप्नोतीत्यनर्थनिवृत्तिरूपं प्रयोजनमुक्तम्। "ईशं तं ज्ञात्वा" इत्यनेन अमृता अमरणधर्माण इति पुनरावृत्तिराहित्योक्त्या ब्रह्मानन्दानुभवरूपस्य प्रयोजनस्य स्थायित्वमुक्तम्। 'तमक्रतुं पश्यति' इत्यनेन "अणोरणीयान् महतो महीयान्"(कठो० २.२०) इत्यल्पाधिकशरीरतत्तत्प्राणिहृदयगुहोपाध्यनुसारेणाणुमहत्तयाऽप्राकृतमहिमवन्तमीशं धातुर्जगद्धारकस्य तस्यैव प्रसादाद् वीतशोकः सन् पश्यतीति ब्रह्मलोकप्राप्त्यनन्तरभाविनि "स एतस्माज्जीवघनात् परात्परं पुरिशयं पुरुषमीक्षते" (प्रश्नो० ५.५) इति श्रुत्यन्तरप्रसिद्धे निरतिशयानन्दात्मकब्रह्मदर्शनरूपे सकलदुःखनिवृत्तिपूर्वके परमप्रयोजने साक्षात्कारणं तस्यैव परब्रह्मणः प्रसाद इति दर्शितम्। "आत्मानमरणिं कृत्वा" (कै० उ० ११) इत्यनेन पण्डितः श्रवणमननसञ्जातपरमात्मनिश्चयः परमात्मानं हृदयगुहायामधरारणिस्थाने

वीतशोको धातुः प्रसादान्महिमानमीशम्" (महाना० ८.३), "आत्मानमरणिं कृत्वा प्रणवं चोत्तरारणिम् । ध्याननिर्मथनादेव पाशं दहति पण्डितः ।।" (कै० उ० ११), "ज्ञात्वा देवं मुच्यते सर्वपाशैः' (श्वे० उ० ४.१६) इत्यादिश्रुत्यनुसारेण तदुपासनयाऽस्याधिकारिणः पाशविच्छेदलक्षणा मुक्तिः प्रयोजनं चास्तीति प्रथमाधिकरणेऽत्र प्रतिपादितम् ।

इति जिज्ञासाधिकरणम् ।। १ ।।

निधाय तस्य वाचकतया तदुपरि निधेयत्वेन यावदुपासनमावर्तनीयत्वेन चोत्तरारणिस्थाने प्रणवं निवेश्य ध्यानरूपनिर्मथनाद्धेतोः पाशं मलमायाकर्मरूपं दहतीति "ब्रह्मविदाप्नोति" (तै० उ० २.१.१) इत्यादिश्रुत्यन्तरोक्तस्य वेदनस्य ध्यानरूपत्वं निर्मथनत्वेनाध्यवसितस्य ध्यानस्य दग्धृत्वे वह्निस्थानीयसाक्षात्काररूपद्वारसापेक्षत्वं च दर्शितम् । "ज्ञात्वा देवम्" इत्यनेन मलमायाकर्मरूपतया पाशबहुत्वं दर्शितम् । आदिशब्देन "भिद्यते हृदयग्रन्थिः" (मुण्डको० २.२.८) इत्यादीनि श्रुत्यन्तराणि संगृहीतानि । "परीक्ष्य लोकान्" (मुण्डको० १.२.१२) इत्यादेः पूर्वपक्ष्युत्प्रेक्षितार्थपरत्वकल्पनमप्ययुक्तम्, ततः "तद्यथेह कर्मचितो लोकः क्षीयते" (छा० उ० ८.१.६) इत्यादिश्रुतिप्रदर्शितकर्मप्राप्यस्वर्गादिसकललोकानित्यत्वप्रतिपादनपरताया एव तदर्थप्रत्यभिज्ञयाऽवधार्यमाणत्वादिति द्रष्टव्यम् । अत्रायमधिकरणार्थसंग्रहः—

"आत्मा ब्रह्मेत्यधोतः स्फुरति स तु सदा निर्विशेषः स चेत् स्यात् तस्यातीतस्य बुद्धेः सरणिमिह नयैः का परिच्छेदवार्ता । तज्ज्ञानात् सर्वजीवावरणनिरवधिद्रव्यपाशानिवृत्तेः को वा मुक्तेः प्रसङ्गस्तदविषयफलं ग्राह्यमेतन्न शास्त्रम् ॥ ब्रह्म ह्यर्थानुगत्या निरतिशयगुणं तत्कथं जीव एवेत्युक्तं श्रुत्या तदन्नं मन इति च कथं चोक्तमित्यादि चिन्त्यम् । ध्यातस्यास्य प्रसादात् प्रतिपशुनियतानन्तशक्तेर्मलस्य क्षीयेतैकैकशक्तिस्तदिह न विषये नैव साध्येऽप्ययुक्तिः ॥" एवमुत्तराधिकरणेष्वपि पूर्वोत्तरपक्षसंग्रहश्लोकाश्चतुर्मतसारेऽस्माभिर्निबद्धा द्रष्टव्याः ॥

इति जिज्ञासाधिकरणम् ॥ १ ॥

अथ जन्माद्यधिकरणम् ।।२।।

इहोद्दिष्टस्य ब्रह्मणो यन्निश्चायकं तल्लक्षणं किमित्या-

सङ्गतिं प्रदर्शयन्नुत्तराधिकरणमवतारयति—इहेति। पूर्वाधिकरणे ब्रह्मणः सर्वात्मना परिच्छेद्यत्वासम्भवेऽपि लक्षणमुखेनेतरव्यावृत्ततया परिच्छेद्यत्वं सम्भवतीत्युक्तवतः सिद्धान्तिनस्तत्परिच्छेदकत्वेनाभिमतं यल्लक्षणं तन्न सम्भवतीत्यर्थकेन 'ब्रह्मणो यन्निश्चायकं तल्लक्षणं किम्' इत्यनेनाक्षेपिकी पूर्वाधिकरणसङ्गतिर्दर्शिता। उद्दिष्टस्येति ब्रह्मविशेषणेनोद्देशानन्तरं लक्षणकथनस्यावसर इत्यवसररूपा तत्सङ्गतिर्दर्शिता।

ननु उद्देशो नाममात्रेण वस्तुसङ्कीर्तनमिति नैयायिकाः। न चात्र प्रथमसूत्रे ब्रह्मणो नाममात्रेण सङ्कीर्तनम्, किन्तु तस्य विषयत्वप्रयोजनत्वज्ञापनोपयोगिजिज्ञासाकर्मत्वं प्रतिपादयन्त्या षष्ठ्यापि परामर्शोऽस्ति। अतो न ब्रह्मण उद्दिष्टत्वोक्तिर्युक्तेति चेन्न, लुप्तषष्ठ्यर्थस्यापि नाम्नैव लक्षणीयतया नामातिरिक्तेनात्र ब्रह्मसङ्कीर्तनाभावेन "नाममात्रेण सङ्कीर्तनम्" (न्या० भा० १.१.३) इत्युद्देशलक्षणस्याक्षतेः। नैयायिकानामेव तु "प्रमाणप्रमेय०" (न्या० १.१.१) इत्यादिसूत्रे प्रमाणादीनामुद्दिष्टत्वव्यवहारो न सङ्गच्छते, तेषां निःश्रेयसहेतुज्ञानकर्मत्वेन श्रूयमाणषष्ठ्या प्रतिपादनात्। यदि तु नाममात्रेणेति मात्रपदेन नञिवयुक्तन्यायसाम्यान्नामसदृशेन प्रातिपदिकान्तरेण सङ्कीर्तनं व्यवच्छिद्यते, तावतापि "प्रमाकरणं प्रमाणम्" इत्यादिलक्षणवाक्यान्तर्गतप्रमाणादिनाम्ना सङ्कीर्तने उद्देशलक्षणातिव्याप्तिनिवर्तनस्य फलस्य सिद्धेरित्युच्येत, तदा ब्रह्मजिज्ञासेत्यत्र लुप्तषष्ठ्येव स्मृता स्वार्थं प्रतिपादयतीति पक्षावलम्बनेऽपि ब्रह्मणो नोद्दिष्टत्वहानिः।

अथ मात्रपदेन न नामातिरिक्तस्य शब्दमात्रस्य नापि प्रातिपदिकरूपस्य व्यवच्छेदो विवक्षितः, किन्त्वर्थगत्या ज्ञानविषयत्वातिरिक्तधर्मवैशिष्ट्यसमर्पकशब्दस्येति प्रमाणादीनामेवोद्दिष्टत्वं सिद्ध्यति न ब्रह्मण इति चेन्न, विनिगमनाविरहेणेच्छाविषयत्वातिरिक्तधर्मवैशिष्ट्यसमर्पकशब्दव्यवच्छेदस्तेन विवक्षित इति ब्रह्मण एवोद्दिष्टत्वं लभ्यते न प्रमाणादीनामिति वैपरीत्यस्यापि वक्तुं शक्यत्वात्। लाघवानुसरणे तु ज्ञानेच्छासाधारण्येन विषयत्वा-

तिरिक्तेत्येव निवेशयितुं युक्तम् । ब्रह्मजिज्ञासेत्यत्रेष्यमाणज्ञानविषयत्वस्यैव ब्रह्मण्यन्वय इत्यङ्गीकारे तु ज्ञानविषयत्वनिवेशेऽपि ब्रह्मण उद्दिष्टत्वलाभस्य न क्षतिः । वस्तुतो विषयत्वस्य ज्ञानविषयत्वस्य वा निवेशने "यमर्थमधिकृत्य प्रवर्तते तत्प्रयोजनम्" (न्या० १.१.२४), "लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्तः" (न्या० १.१.२५), "यत्सिद्धावन्यप्रकरणसिद्धिः सोऽधिकरणसिद्धान्तः" (न्या० १.१.३०) इत्यादिलक्षणसूत्रगतस्य नाम्ना लक्ष्यनिर्देशस्योद्देशत्वापत्तेस्तदुभयमपि न निवेशयितुं युक्तम् । अथैवं कल्प्यते नाममात्रेणेत्यत्र न करणे तृतीया किन्त्वित्थंभावे । तथा च नाम्नैव प्रकारेण यद्वस्तुनः सङ्कीर्तनं न तु नामसमर्पितप्रवृत्तिनिमित्तेन प्रकारेण तदुद्देश इति लक्षणार्थः । प्रवृत्तिनिमित्तमपहाय नाममात्रविशेषितवस्तुप्रतिपत्त्यर्थस्योद्देशस्य प्रयोजनाकाङ्क्षायां तदर्थविशेषानभिज्ञतया तद्व्यवहाररहितस्य श्रोतुस्तद्व्यवहारसिद्ध्यर्थं लक्षणाभिधित्सया तज्जिज्ञासोत्पादनस्य प्रयोजनत्वावगत्या लक्षणजिज्ञासाजननोद्देश्यकं नामविशेषितपदार्थाभिधानमुद्देश इति लक्षणार्थः पर्यवस्यति । एवं च गौतमीयेषु—"सर्वतन्त्रप्रतितन्त्राधिकरणाभ्युपगमसंस्थित्यर्थान्तरभावात्" (न्या० १.१.२७), "सव्यभिचारविरुद्धप्रकरणसमसाध्यसमातीतकाला हेत्वाभासाः" (न्या० १.२.४) इत्यादिषूद्देशसूत्रेषु सर्वतन्त्रादिनामभिस्तत्तन्नामकाः केचित् सिद्धान्तविशेषादय इत्येव श्रोतुः प्रतिपत्तिः । "सर्वतन्त्राविरुद्धः स्वतन्त्राधिकृतोऽर्थः सर्वतन्त्रसिद्धान्तः" (न्या० १.१.२८), "समानतन्त्रसिद्धः प्रतितन्त्रासिद्धः प्रतितन्त्रसिद्धान्तः" (न्या० १.१.२९) इत्यादिलक्षणसूत्रश्रवणानन्तरमेवायमेवंलक्षणलक्षितः सिद्धान्तविशेषः सर्वतन्त्रसिद्धान्त इत्यादिव्युत्पत्तिग्रहपूर्वकं तेन तेन शब्देन व्यवहारः प्रवर्तते । प्रमाणप्रमेयेत्यादिसूत्रेऽपि प्रमाणादिशब्दैर्न प्रसिद्धार्थस्य ग्रहणमस्ति, प्रमाणशब्दे ल्युट्प्रत्ययस्य करणाधिकरणाद्यनेकार्थसाधारण्येन प्रसिद्धार्थस्यैवाव्यवस्थितत्वात्, करणार्थेऽप्यालोकादिसाधारण्येन चक्षुरादीनामेव प्रमाणतया ग्रहणालाभात्, प्रमेयादिशब्दानामपि प्रमाविषयाद्यर्थकानामात्मशरीरादिषु द्वादशसु व्यवस्थित्यभावाच्च । अतो गौतमीयेषूद्देशेषु नामविशेषितैव सर्वत्र वस्तुनः प्रतिपत्तिरित्यस्ति लक्षणानुगतिः ।

ब्रह्मजिज्ञासेत्यत्र तु ब्रह्मणो न नामविशेषिततया प्रतिपत्तिः, किन्तु स्वरूपतो गुणतश्च बृहत्त्वेन प्रवृत्तिनिमित्तेन, अन्यथा प्रथमसूत्रेण ब्रह्मणो जीवान्यत्वासिद्ध्या तदधीननिर्णयस्य प्रयोजनस्य ततो निर्णयालाभात् । न च ब्रह्मलक्षणवर्णनात् प्रागेव ब्रह्मशब्दार्थावधारणे व्यवहारस्तल्लक्षणस्य प्रयोजनं

न स्यादिति वाच्यम्, स्वरूपतो गुणतश्च बृहत्त्वस्य ब्रह्मशब्दप्रवृत्तिनिमित्तस्य जगत्कारणत्वस्य ब्रह्मलक्षणस्य च मन्त्रार्थवादादिभिः प्रशस्यमानेषु बहुषु देवताविशेषेषु शङ्कितत्या तेषां मध्ये किं ब्रह्मेत्यनवधारणप्राप्तौ लक्षणसूत्रस्य देवतान्तरेभ्यो लक्षणव्यावर्तनेनेतरव्यावृत्तशिवैकान्तिकब्रह्मत्वव्यवस्थापनार्थत्वात्, तदुपजीवनेन "ब्रह्मविदाप्नोति परम्" (तै० उ० २.१.१) इत्यादिषु ब्रह्मशब्देन शिव एव ग्राह्य इत्येवंप्रकारेण व्यवहारार्थत्वाच्च। अत एव चात्र व्यावृत्तिपूर्वकमेव व्यवहारप्रयोजनसिद्धिरित्यनुनिष्पादितया व्यवहारो न प्रयोजनमित्यभिप्रेत्य प्रथमसूत्रभाष्ये ब्रह्मलक्षणेनेतरव्यावृत्तिसिद्धिर्दर्शिता।

न च वाच्यमुद्देशलक्षणे मा भून्नामविशेषितत्वविशेषणमिति, तदभावे "त्रिविधास्य शास्त्रस्य प्रवृत्तिः उद्देशो लक्षणं परीक्षा च" (न्या० भा० १.१.३) इति शास्त्रप्रवृत्तेस्त्रैविध्यसङ्कीर्तनस्याप्युद्देशत्वापत्तेः, तज्जन्यायां विधात्रयजिज्ञासायां वस्तुतस्तदन्तर्गतलक्षणविषयत्वस्यापि सत्त्वात्। न च लक्षणमात्रविषयेति विशेषणीयम्, एवमपि ब्रह्मजिज्ञासेत्यत्र ब्रह्मसङ्कीर्तने उद्देशत्वासिद्धेः, तत्र तृतीयाधिकरणप्रभृतिनिरूपयिष्यमाणप्रमाणजिज्ञासाजननार्थत्वस्यापि सत्त्वात्। अत एव—"अथातो धर्मजिज्ञासा" (जै० १.१.१) इत्यत्र धर्मसङ्कीर्तने स्वरूपप्रमाणोभयजिज्ञासाजननार्थत्वमस्तीति को धर्मः कथंलक्षणक इति जिज्ञासाद्वयमपि दर्शितम्। न च लक्षणत्वप्रकारकत्वं जिज्ञासायां विशेषणमुपादेयम्, असाधारणधर्मत्वप्रकारकत्वापेक्षया नामप्रकारकत्वस्य लघुत्वात्, विशेषणयोर्घटितघटकभावाभावेन भिन्नविशेष्यविशेषणत्वेन चोपस्थितिलाघवाभावेऽपि वस्तुलाघवसत्त्वात्, उद्देशपदप्रवृत्तिनिमित्तरूपलक्षणविचारे वस्तुलाघवस्याप्यादरणीयत्वात्। न चैवमतिलाघवान्नाम्ना वस्तुप्रतिपत्तिमुद्दिश्योच्चारणमुद्देश इत्येतावदेव लक्षणं स्यादिति वाच्यम्, विदितचैत्रपुत्रलक्षणं तन्नाममात्रजिज्ञासुं प्रति मैत्रनामा चैत्रपुत्र इति वाक्यस्याप्युद्देशत्वापत्तेः। न च नाममात्रेण न तु तदतिरिक्तप्रकारेणापीति विशेषणीयम्, पदार्थमात्रोद्देशके प्रमाणादिसूत्रे तेषां तत्त्वज्ञानविषयत्वेनापि विशेषणात्। विदितसामान्यलक्षणं प्रति विशेषोद्देशकेषु "प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि" (न्या० १.१.३) इत्यादिसूत्रेषु प्रमितिजनकत्वादिनापि विशेषणाच्चोद्देशमात्रे लक्षणस्यासम्भवापत्तेरित्येतदपि न युक्तम्, संशयप्रयोजनाद्युद्देशेष्वव्याप्तेः, प्रमाणादिसूत्रेऽपि संशयादिशब्दानां लोकप्रसिद्धार्थपरत्वेन तेषां प्रवृत्तिनिमित्तसमर्पकत्वसम्भवात्।

न चाप्रसिद्धानामुद्देशे नामविशेषितप्रतिपत्तिरिति तत्सहपाठमात्रात् प्रसिद्धानामपि तथा नियमः, अविदितविष्णुमित्रं प्रति देवदत्तयज्ञदत्तविष्णुमित्रा भोज्यन्तामिति प्रयोगे व्यभिचारात्। न च तत्र देवदत्तयज्ञदत्तवदत्रापि संशयादिषु लक्षणाकाङ्क्षाकथने न स्यातामिति वाच्यम्, परीक्षितव्यविशेषसद्भावेन परीक्षार्धमितया लक्षणानुवादोपपत्तेः, लक्षणविप्रतिपत्तिनिरासार्थत्वोपपत्तेश्च। तस्मान्नामविशेषितत्वमपहाय लक्षणत्वप्रकारत्वं जिज्ञासायां विशेषणं कार्यमिति न ब्रह्मण उद्दिष्टत्वनिर्देशे काचिदनुपपत्तिः।

अथापि स्याल्लक्षणत्वप्रकारकजिज्ञासाजननोद्देश्यकवस्तुसङ्कीर्तनमुद्देश इति वक्तव्यम्, न तु लक्षणत्वप्रकारकजिज्ञासाजनकवस्तुसङ्कीर्तनमात्रमुद्देश इति, "प्रमाकरणं प्रमाणम्", "इन्द्रियजन्यं ज्ञानं प्रत्यक्षम्" इत्यादिवाक्येषु प्रमाणादिलिलक्षयिषयोच्चरितेषु प्रमेन्द्रियादिसङ्कीर्तनस्याविदितप्रमादितत्त्वं प्रति तज्जिज्ञासाजनकत्वेन तदुद्देशत्वापत्तेः। न च ब्रह्मजिज्ञासासूत्रे ब्रह्मसंकीर्तनं लक्षणजिज्ञासाजननार्थं किं तर्हि विषयप्रयोजनप्रतिपादनार्थमित्येतदपि प्रमाणाद्युद्देशप्रतिबन्द्यैव निरस्तम्। तदपि हि विषयप्रयोजनप्रतिपादनार्थमेव। तद्यदि लक्षणजिज्ञासाजननार्थमपि, इदमपि तथास्तु। अपि चात्र ब्रह्मसङ्कीर्तनस्य लक्षणानुसारेणानुद्देशरूपत्वेऽपि किं तद्ब्रह्म यज्जिज्ञास्यमित्युद्देशकार्यलक्षणजिज्ञासाजनकत्वं तावदस्ति, इष्ट्यनङ्गस्यापि गोदोहनस्येव तदङ्गचमसकार्यजनकत्वम्। तथा च गुरुमतानुसारेण गोदोहनप्रयोगयुक्ताया इष्टेः किञ्चिदङ्गवैकल्येऽपि तत्कार्योपकारशालित्वात् समग्राङ्गत्वव्यवहारवदनुद्देशेऽपि ब्रह्मण उद्देशकार्यलक्षणाकाङ्क्षाशालित्वादुद्दिष्टत्वनिर्देशस्तदाकाङ्क्षानुसारेणावसरसङ्गतिश्चोपपद्यत इत्यास्तां विस्तरः।

नन्वेवमप्यवसरसंगतिरित्येतन्नोपपद्यते, जन्मादिसूत्रस्य लक्षणधर्मिकतत्सम्भवासम्भवपरीक्षार्थत्वेन लक्षणप्रदर्शनार्थत्वाभावात्। अत एव लक्षणाभिधाय्यधिकरणमिति पूर्वपक्षसिद्धान्तशाल्यधिकरणरूपत्वं भाष्ये प्रदर्शितम्, तदनुसारेण च किंशब्दः प्रागाक्षेपार्थतया व्याख्यातः। यदि च तस्याक्षेपार्थत्वं न स्यात्तदानीमवसरसङ्गतिरेव स्यान्नाक्षेपसङ्गतिरिति। उच्यते—जन्मादिसूत्रं श्रुतिसिद्धं लक्षणं प्रदर्श्य तत्सम्भवासम्भवपरीक्षासूचनार्थं न तु तदप्रदर्श्य केवलं परीक्षार्थम्, तत्र कण्ठतो लक्षणस्यैव प्रदर्शनान्न्यायशास्त्रे द्वितीयाध्यायगतप्रमाणादिपरीक्षासूत्रजातव्यतिरेकेण प्रथमाध्यायगततल्लक्षणसूत्रजातवदिह ब्रह्मलक्षणप्रदर्शनार्थस्यान्यस्य सूत्रस्याभावाच्च। तथा च लक्षणप्रदर्शनांशेनावसरसङ्गतिः, तदाक्षेपांशेनाक्षेपसङ्गतिश्चेत्युभयमुपपद्यते। न च

काङ्क्षायां तल्लक्षणाभिधायकं द्वितीयाधिकरणमवतारयति भगवान् सूत्रकारः—

।। जन्माद्यस्य यतः ।। २ ।।

ज्ञाते लक्ष्ये लक्षणवैयर्थ्यादज्ञाते तदाकाङ्क्षानुपपत्तेः कथमत्र ब्रह्मणो लक्षणकथनप्रसङ्ग इति न शङ्कनीयम्, अध्ययनादापाततो ज्ञाते ब्रह्मणि तद्योगात् ।

वाच्यं लक्षणप्रदर्शनमात्रपरमिदं सूत्रं न तु तत्सम्भवासम्भवविचारपरमपि, जैमिनिना प्रत्यक्षसूत्रादिभिरिव बादरायणेनापि—"न विलक्षणत्व०" (ब्र० २.१.४)सूत्रादिभिर्लक्षणपरीक्षायाः प्रवर्तयिष्यमाणत्वात् । तथा चावसरसङ्गतिरेवोपपद्यते नाक्षेपसङ्गतिरिति, श्रुत्यप्रदर्शितधर्मलक्षणप्रदर्शनमात्रे चोदनासूत्रस्य पर्यवसानासम्भवेऽपि यतो वेत्यादिश्रुतिप्रदर्शितब्रह्मलक्षणानुवादमात्रे जन्मादिसूत्रस्य पर्यवसानासम्भवेन लक्षणोपपादकन्यायसूचनार्थत्वस्यावश्यवक्तव्यत्वात् । भाष्यकृताप्यधिकरणमवतारयतीति वाक्येनाधिकरणं प्रवर्तयतीत्यर्थकेन लक्षणसम्भवासम्भवविचारस्य सूत्रार्थत्वेनावतारितत्वाच्च । "न विलक्षणत्वा०" (ब्र० २.१.४) इत्यादिसूत्रैस्तु विधान्तरेण परीक्षा करिष्यते । अतो युक्तं पूर्वाधिकरणेन सङ्गतिद्वयम् । वेदान्तार्थविचाररूपतया शास्त्रसङ्गतिः, कारणवस्तुविषयतया द्विकसङ्गतिः, कारणवस्तुविषयवाक्यसमन्वयार्थतयाऽध्यायसङ्गतिः, स्पष्टब्रह्मलिङ्गवाक्यविषयतया पादसङ्गतिश्च स्फुटत्वाद् भाष्ये न प्रदर्शिता ।

जन्माद्यस्य यतः ॥ २ ॥

द्विविधो लक्षणदोषः—लक्षणसामान्यदोषः, तत्तल्लक्षणविशेषदोषश्च । तत्र लक्षणसामान्ये तद्दोषनिराकरणेन लब्धोन्मेषे विशिष्य ब्रह्मलक्षणमुदाहृत्य तस्य दुष्टत्वादुष्टत्वचिन्तनमवकाशं लभत इत्यभिप्रेत्य लक्षणसामान्यदोषं तावन्निराकर्तुमुद्भावयति—ज्ञात इत्यादिना । ननु लक्ष्यज्ञानार्थो न लक्षणप्रश्नः, येन ज्ञाते लक्ष्ये लक्षणवैयर्थ्यमज्ञाते प्रश्नमूलतद्बुभुत्सानुपपत्तिः स्यात्, किन्तु लक्षणज्ञानार्थः । नहि व्याप्त्याकाङ्क्षादिलक्षणप्रश्नस्तत्स्वरूपज्ञानार्थ इति वक्तुं शक्यम्, ततः प्राग्व्याप्त्याकाङ्क्षादिपरिज्ञानाभावे बालाङ्गनादिसाधारणस्य धूमाद् वह्न्यनुमानस्य

शब्दादर्थप्रत्ययस्य चासम्भवप्रसङ्गात्। तस्माल्लोके कश्चन्द्र इत्यादिप्रश्नः किंलक्षणश्चन्द्र इत्येवमादिरूपेण लक्षणविषयः। प्रकृष्टप्रकाशश्चन्द्र इत्याद्युत्तरमपि लक्षणज्ञापनार्थं न तु लक्षणमुखेन लक्ष्यज्ञापनार्थमित्याशङ्कायामप्युक्तमेवापगमे दूषणमावर्तनीयम्, ज्ञाते लक्षणे लक्षणोक्तिवैयर्थ्यात्, अज्ञाते तदाकाङ्क्षानुपपत्तेरिति।

कथमत्रेति। लक्षणसामान्ये लब्धोन्मेषे हि विशिष्य कस्यचिल्लक्षणप्रस्तावो युज्यते नान्यथेति भावः। आपाततो ज्ञातस्य लक्ष्यस्य निश्चयो लक्षणस्य प्रयोजनमिति न तद्वैयर्थ्यम्, नापि लक्ष्यबुभुत्सानुपपत्तिरिति शङ्कितस्य लक्षणसामान्यदोषस्य परिहारं सूचयन् प्रकृतलक्ष्ये ब्रह्मण्यापातज्ञानमुपपादयति—अध्ययनादिति। अयमाशयः—लक्षणेन लक्ष्यज्ञानमेव सर्वत्र लक्षणकथनस्य मुख्यं प्रयोजनम्। लक्षणज्ञानं तु तदुपयोगितया लक्ष्यते ज्ञाप्यतेऽनेनेति करणार्थल्युडन्तस्य लक्षणशब्दस्य ज्ञापकमेव, प्रसिद्धिप्राचुर्यात्, ज्ञाप्ये तथा प्रसिद्ध्यभावात्। "अनुर्लक्षणे" (पा० १.४.८४), "लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनवः" (पा० १.४.९०), "इत्थंभूतलक्षणे" (पा० २.३.२१) इत्याद्यभियुक्तव्यवहारेषु हि ज्ञापक एव लक्षणशब्दः प्रसिद्धतरः।

नन्वापातज्ञानस्यापि धर्मिणि निश्चयरूपत्वान्न तत्र स्वरूपेण निश्चयो लक्षणेन कर्तव्यः, रूपान्तरेण चेत्तर्हि किं रूपान्तरमिति चेदुच्यते। क्वचिच्छब्दविशेषवाच्यत्वं क्वचित्तत्तत्प्रवृत्तिनिमित्तासाधारणधर्मः। क्वचिदुभयं निर्धारणीयम्। तथा हि—वियति ज्योतिर्मण्डलमुदीक्षमाणस्यास्ति कश्चिच्चन्द्रप्रातिपदिकस्यार्थः। स चास्मिन् ज्योतिर्मण्डले वर्तत इत्येतावदवगतवतोऽस्मिन् ज्योतिर्मण्डले कश्चन्द्र इति पृष्टवतस्तदभिज्ञोपदिष्टेन लक्षणवाक्येन चन्द्रस्वरूपं वा तत्र चन्द्रत्वं वा न ज्ञापनीयम्, नक्षत्रादिस्वरूपवच्चन्द्रस्वरूपस्य तत्समानवित्तिवेद्यायाः प्रकाशसंस्थानविशेषाभिव्यङ्ग्यायाश्चन्द्रत्वजातेश्च प्रत्यक्षत्वात्। यद्यपि चन्द्रे चन्द्रशब्दोल्लेखी चन्द्रत्वे चन्द्रत्वशब्दोल्लेखी वा प्रत्ययो न जायते, तयोः शक्तिग्रहाधीनत्वात्, तथापि वस्तुत(श्चन्द्र)चन्द्रत्वशब्दवाच्ययोर्व्यक्तिजात्योरनिवार्यं प्रत्यक्षम्। एवं चन्द्रस्य नक्षत्रादिभ्यो व्यावृत्तिरपि प्रत्यक्षैव। अचन्द्राद् व्यावृत्तोऽयमित्येवंरूपा तु व्यावृत्तिधीस्तदा न भवति, तस्याः प्रकृष्टप्रकाशविषयचन्द्रशब्दवाच्यत्वग्रहाधीनत्वात्।

ननु वस्तुतो यश्चन्द्रत्वजातिविशिष्टः स चन्द्रशब्दवाच्य इति प्रागेवाप्तवाक्यादिनावगतवतश्चन्द्रत्वजातिं च व्यक्तिविशेषे पश्यतः प्रकृष्टप्रकाशवाक्य-

मनपेक्ष्य तत्र चन्द्रशब्दवाच्यत्वनिर्णयो भवितुमर्हतीति सोऽपि न लक्षणफलमिति चेन्न, प्रकृष्टप्रकाशाभिव्यङ्ग्यायां दृश्यमानजातौ चन्द्रत्वशब्दशक्तिग्रहवतस्तन्निर्णयसम्भवेऽपि तद्रहितस्य निर्णयासम्भवात् । नहि प्रकृष्टप्रकाशपदशक्तिग्रहरहितस्य वस्तुतः प्रकृष्टप्रकाशं चन्द्रं पश्यतोऽपि प्रकृष्टप्रकाशश्चन्द्र इत्युपदिष्टलक्षणस्यापि तत्र चन्द्रशब्दवाच्यत्वधीर्जायते । तस्मात् प्रकृष्टप्रकाशवाक्येन चन्द्रे चन्द्रपदवाच्यत्वमेव निर्धारणीयम् । यथा 'गोसदृशो गवयः' इत्यादिवाक्येन गवये गवयशब्दवाच्यत्वम् । अत एवाङ्गुलीनिर्देशेन 'अयं चन्द्रशब्दवाच्यः' इति बोधितस्य प्रयोजनान्तरार्थं प्रकृष्टप्रकाशवाक्यापेक्षा न दृश्यते । चन्द्रे चन्द्रत्वजातिं चन्द्रशब्दवाच्यत्वं च जानन् द्वितीयायामेव तिरोहितस्य चन्द्रस्य नक्षत्रसमानाकारकोटिमात्रदर्शनेन घटे शरावादिसमानाकारैकदेशदर्शनेन घटत्वमिव तत्र चन्द्रत्वमनिर्धारयन्तं प्रति कथिते 'शाखाग्रे चन्द्रः' इति लक्षणेन तत्र चन्द्रत्वरूपासाधारणधर्मो निर्धारणीयः । प्रकृतलक्ष्ये तूभयं निर्धारणीयम् ।

तथा हि—"ब्रह्मविदाप्नोति परम्" (तै० उ० २.१.१) इत्यादिवाक्याध्ययनादापाततस्तावदिदमवगम्यते, अस्ति किञ्चिद् ब्रह्मप्रातिपदिकस्य वाच्यं बृहत्त्वार्थानुगमात् स्वरूपतो गुणतो विभूतितश्च निरतिशयमहिमशालीति । तत्किं ब्रह्मेति श्रुतिष्वन्वेषणे मन्त्रार्थवादादिप्रसिद्धमहिमातिशयेषु हरिहरहिरण्यगर्भेन्द्रचन्द्रवह्निसूर्यादिष्वनिर्धारणेन ब्रह्मबुद्धिः प्रसजति, पतिंवरायाः कन्याया इव स्वयंवरमण्डपसमागतेषु बहुषु राजकुमारेषु दूरे दृश्यमानेष्वाप्तमुखार्कर्णितानेकगुणस्वाभिमतवरबुद्धिः । तत्राप्तदर्शितेन स्पृहणीयेन स्वाभिमतवरलक्षणेन पुरुषविशेषे स्वाभिमतवरबुद्धिरिव यतो वेत्यादिब्रह्मलक्षणेन श्रीमति साम्बशिवे ब्रह्मबुद्धिर्व्यवतिष्ठते । अयमेव निरतिशयमहिमशालिब्रह्मशब्दवाच्यश्च, न तु सृष्टिप्रलयविषयबहुवाक्यावगतसृज्यसंहार्यभावा इतरे देवताविशेषा इति । यद्यप्येवं लक्षणवाक्यश्रवणमात्रेण "यदा तमस्तन्न दिवा न रात्रिर्न सन्न चासच्छिव एव केवलः" (श्वे० उ० ४.१८), "अजात इत्येव कश्चिद्भीरुः प्रपद्यते । रुद्र यत्ते दक्षिणं मुखं तेन मा पाहि नित्यम् ॥" (श्वे० उ० ४.२१) इत्याद्यौपनिषदवाक्यनिकुरुम्बप्रदर्शितलक्षणानुगमसम्भावनः शिव एव ब्रह्मेत्यवगतिः संभवति, तथैव पूर्वाधिकरणेऽथशब्दव्याख्यानावसाने दर्शितम्, तथाप्यसाववगतिर्न स्थिरीभवति । "सदेव सोम्येदमग्र आसीत्" (छा० उ० ६.२.१), "सत्यं ज्ञानमनन्तं ब्रह्म" (तै० उ० २.१.१), "आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते" (तै० उ०

३.६.१), "हिरण्यगर्भः समवर्तताग्रे" (ऋ० १०.१२१.१), "एको ह वै नारायण आसीत्" (महो० १.१) इत्यादिवाक्यलक्षणस्य बहुषु प्रतीयमानत्वात्। अतो जगत्कारणं ब्रह्म सज्ज्ञानमानन्दो हिरण्यगर्भो हरो हरिर्वेत्यादिरूपे संशये सति सच्चिदानन्दरूपः शिव एव जगत्कारणं ब्रह्मेति लक्षणस्य शिवैकान्त्यव्यवस्थापनाय जन्मादिसूत्रसूचितन्यायावलम्बनमधिकरणं प्रवर्तयिष्यते।

नन्वेकस्मिन् धर्मिणि विरुद्धनानाप्रकारकं ज्ञानं संशय इति नैयायिकानां घण्टाघोषः। कथमिह नानाधर्मिषु ब्रह्मत्वरूपैकधर्मप्रकारकः संशय उदाह्रियते? उच्यते—एकत्रानेकधर्मप्रकारकसंशयवदनेकत्रैकधर्मप्रकारकोऽप्यस्ति संशयः सकलजनसिद्धः। यथास्मिन् समाजे मित्रायाः पतिर्वर्तत इत्यवगतवतस्तस्याः पतिरयमयं वेति संशयः। नैयायिकोक्तलक्षणासंगृहीतत्वात् तथाभूतः संशयो नाङ्गीकर्तुं युक्त इति चेन्न, तान्त्रिककल्पितलक्षणानुसारेण लोकप्रसिद्धलक्ष्यत्यागायोगात्। अन्यथा विरुद्धैकप्रकारकानेकविशेष्यकः संशय इति लक्षणकल्पनेन तदसंगृहीतमयं स्थाणुः पुरुषो वेति ज्ञानं संशयो न भवतीत्यभ्युपगन्तारं को वारयेत्।

नन्वेकधर्मगतमेकधर्मिनिष्ठतानर्हत्वं विरुद्धत्वं तदेकत्र धर्मे न सम्भवतीति चेन्न, एकधर्मगतमनेकनिष्ठतानर्हत्वं विरुद्धत्वं तदनेकत्र धर्मे न सम्भवतीत्यपि वक्तुं शक्यत्वात्, एकत्र स्थाणुत्वपुरुषत्वे विरुद्धे इतिवदनेकत्रैकभार्यापतित्वं विरुद्धमित्यप्यनुभवस्य तुल्यत्वात्। यदि विरुद्धत्वमनेकगतं वक्तव्यमिति नियमः, अनेकत्रैकभार्यापतित्वं विरुद्धमिति व्यवहारस्यैकस्या भार्याया अनेकः पतिर्विरुद्ध इति धर्मिविरोधे पर्यवसानं स्थाणुत्वपुरुषत्वयोरेकवृत्तित्वं विरुद्धमिति व्यवहारस्येवेत्यङ्गीक्रियते, तथाप्येकप्रकारकविरुद्धानेकविशेष्यकं ज्ञानं संशय इति लक्षणकल्पनेन स्थाणुपुरुषादिसंशयोऽपलप्येत। तस्मादनुभवसिद्धद्विविधसंशयसंग्रहाय विरुद्धानेकैकवैशिष्ट्यावगाहि ज्ञानं संशयलक्षणं कल्पनीयम्। विरोधोऽत्र न सहानवस्थानलक्षणः, किन्त्वेकसम्बन्धाभावः, एकाधिकरणसम्बन्धाभावरूपात् सहानवस्थानादस्य लघुत्वात्। अयं च विरोधो धर्मिणोरेकधर्मसम्बन्धाभावरूपो धर्मयोरेकाधिकरणसम्बन्धाभावरूप इति द्विविधेऽपि संशयेऽनुगत एव। न चैवमपि प्रतिनियतगुणकर्मादिधर्मानधिकरणतया विरुद्धयोर्घटयोर्घटत्ववैशिष्ट्यावगाहिनि समूहालम्बनेऽतिव्याप्तिः, लक्षणप्रविष्टैकसम्बन्धाभावरूपस्य विवक्षितत्वात्। न चैवमप्यनेकस्यैकेन यत्सम्बन्धाभावस्तदन्य-

सम्बन्धावगाहिनि 'मित्रा पत्युर्भ्रातुश्च हितैषिणी' इति ज्ञानेऽतिव्याप्तिः, यत्सम्बन्धाभावो विरोधस्तदवगाहित्वस्य विवक्षितत्वात् ।

वस्तुतस्तु सर्वमिदं लक्षणं न युक्तम्, अविरोधिनोर्विरोधभ्रमजन्ये 'वृक्षः पनसो वा' इति संशयेऽव्याप्तेः, विरोधिनोरविरोधिभ्रमजन्ये 'वृक्षोऽयं भल्लूकश्च' इति विपर्ययेऽतिव्याप्तेश्च । न च लक्षणे वस्तुतो विरुद्धत्वं न विशेषणम्, किन्तु भासमानविरोधत्वमिति वाच्यम्, पीतत्वशङ्खत्वे विरुद्धे इत्यवगच्छतो दोषवशाज्जायमाने पीतशङ्खविभ्रमे तथाप्यतिव्याप्तेः ।

ननु तस्मिन्नेव ज्ञाने भासमानत्वं विरोधे विशेषणम् । पीतशङ्खविभ्रमे तयोर्विरोधो न भासते, किन्तु तटस्थज्ञानान्तर एव । वस्तुतः पीतत्वशङ्खत्वयोर्विरोधेऽपि दोषवशान्मम शङ्खः पीतो भासत इति व्यवहारस्तटस्थज्ञानविषयस्यैव विरोधस्यानुवाद इति चेन्न, पीतशङ्खविभ्रमोदयकाले विरोधाभानसत्त्वे तदुपनीततया पीतशङ्खविभ्रमेऽपि विरोधाभानस्य निवारयितुमशक्यत्वात् । अन्यथा संशयस्थलेऽपि तटस्थज्ञान एव विरोधो भासते, न संशय इति कल्पनापत्त्या लक्षणस्याऽसम्भवप्रसङ्गात् । किञ्च, 'धूमवानयं पर्वतो यदि निर्वह्निः स्यान्निर्धूमः स्यात्' इति तर्केऽप्यतिव्याप्तिः । अपि च, 'परस्परविरुद्धस्थाणुत्वपुरुषत्ववानयम्' इति लौकिकानामाहार्यभ्रमे—'प्रतीपभूपैरिव किं ततो भिया विरुद्धधर्मैरपि भेत्तृतोज्झिता । अमित्रजिन्मित्रजिदोजसा स यद् विचारदृक् चारदृगप्यवर्तत ॥'' इति काव्यश्लोकजन्ये विरोधाभासतन्मूलोत्प्रेक्षालङ्कारोपयोगिनि विरुद्धधर्मैरिति विशेषबललब्धविरुद्धत्वावगाहिनि मित्रजित्त्वतदभावविगतचारदृक्त्वचारदृक्त्ववानयमित्याहार्यज्ञाने च विरोधाभानस्य कथञ्चिदप्यपलपितुमशक्यत्वादतिव्याप्तिरनिवार्या । न चानाहार्यत्वमपि लक्षणे विशेषणम् । लौकिकानां स्थाणुत्वेनावगत एव स्थाणुः पुरुषो वेत्याहार्यसंशये—''जीवनग्रहणे नम्रा गृहीत्वा पुनरुन्नताः । किं कनिष्ठाः किमु ज्येष्ठा घटीयन्त्रस्य दुर्जनाः ॥'' इति काव्यश्लोकजन्ये काव्यशोभोपयोगिन्याहार्यसंशये चाव्याप्तिः । परस्परविरुद्धस्थाणुत्वपुरुषत्ववानयमिति शब्दजन्यज्ञानेऽतिव्याप्तिश्च । किञ्च, विरुद्धानेकविषयकज्ञानस्य संशयत्वे धर्म्यंशेऽपि तस्य ज्ञानस्य संशयत्वापत्तिः । विरुद्धानेकविषयत्वावच्छेदेन संशयत्वमित्यभ्युपगतावेकैककोट्यंशे संशयत्वाभावापत्तिः ।

ननु तर्हि परस्परप्रतिक्षेपरूपमाकारार्थावगाहि ज्ञानं संशय इति लक्षणमस्तु । तथाहि—अस्त्याहार्यसाधारण्येन संशयेष्वेतल्लक्षणम्, तेषु स्थाणुश्चेदयं न पुरुषः, पुरुषश्चेदयं न स्थाणुरित्येवमादिरूपेण परस्पर-

प्रतिक्षेपप्रतीतेः। न चैतल्लक्षणमुदाहृतेष्वाहार्यभ्रमेष्वस्ति, तेषु स्थाणुत्वपुरुषत्वादीनां समुच्चयावभासेन परस्परप्रतिक्षेपाप्रतीतेः।

नन्वेवमपि परस्परप्रतिक्षेपकस्थाणुत्वपुरुषत्ववानित्याहार्यभ्रमेऽतिव्याप्तिः, व्रैहपुरोडाशा यवपुरोडाशा वेष्टिः कार्या, बृहत्पृष्ठो रथन्तरपृष्ठो वा सोमयागः कार्य इति विकल्पितसाधनद्वयावच्छिन्नकर्मविषयशास्त्रार्थोपदेशवाक्यार्थजन्यज्ञाने चातिव्याप्तिरिति चेन्न, सर्वात्मना परस्परप्रतिक्षेपावगाहित्वस्य लक्षणे विवक्षितत्वात्, उदाहृताहार्यभ्रमे तस्मिन्नेव धर्मिणि स्थाणुत्वपुरुषत्वयोः समुच्चयस्यापि प्रतीतेः। अत एव तज्जन्यव्यवहारे नास्ति वाकारप्रयोगः, समुच्चयं विना प्रतिक्षेपमात्रमवगाहमानस्यैव ज्ञानस्य तत्प्रयोगहेतुत्वात्। यद्यपि विकल्पितसाधनद्वयावच्छिन्नकर्मव्यवहारे वाकारप्रयोगोऽस्ति, तथापि तस्मिन्नेवेष्ट्यादौ धर्मिणि प्रयोगान्तरे यवादिप्राप्तिमनिरुध्य व्रीह्यादिप्राप्तिमत्प्रयोगमात्रे यवादिप्रतिक्षेप इति न सर्वात्मना तत्तद्धर्मिणि परस्परप्रतिक्षेपः। नहि "व्रीहिभिर्यवैर्वा यष्टव्यम्" (आप० श्रौ० ६.३१.१३) इति विकल्पोपदेशे व्रीहयो यवान् यवाश्च व्रीहीन् सर्वात्मना यागात् प्रतिक्षिपन्ति, तथा सत्यस्य शास्त्रस्यानिर्णायकत्वेनाननुष्ठापकत्वेन वाऽप्रामाण्यप्रसङ्गात्। तस्माद् विकल्पवाक्येषु वाकारस्य तस्मिन् धर्मिणि सर्वात्मना प्रतिक्षेपो नार्थः, किन्तु तस्मिन् धर्मिणि प्रयोगान्तरे तत्प्राप्तिमनिरुध्य तत्तत्प्रयोगे प्रतिक्षेपः। उभयमपि वाकारार्थः प्रयोगबलादवसीयते। अत एव व्रीहिभिर्यवैर्वा यष्टव्यमिति सन्देहेन पृष्टवन्तं प्रति व्रीहिभिर्यवैर्वा यष्टव्यमिति प्रश्नसमानाकारमेव वाक्यं निर्णायकं प्रश्नमूलसन्देहनिवर्तकमनुष्ठापकं च दृश्यते। प्रश्नवाक्ये वाकारस्तस्मिन् धर्मिणि सर्वात्मना पक्षान्तरप्रतिक्षेपार्थः, उत्तरवाक्ये तस्मिन् धर्मिणि प्रयोगविशेषावच्छिन्ने तत्प्रतिक्षेपार्थ इति विशेषसद्भावात्। यदंशे परप्रतिक्षेपरूपवाकारार्थावगाहित्वं तदंशे संशयत्वमिति न धर्म्यंशे संशयत्वस्य नाप्येकैककोटौ संशयत्वाभावस्य च प्रसङ्गः। परप्रतिक्षेपरूपवाकारार्थावगाहित्वमात्रं तु न संशयलक्षणम्, "विधिर्वा स्यादपूर्वत्वाद् वादमात्रमनर्थकम्" (जै० १.२.१९) इत्यादिसूत्रवाक्यजन्ये—"औदुम्बरो यूपो भवति" (तै० सं० २.१.१.६) इत्यादीनामर्थवादत्वप्रतिक्षेपकवाकारार्थावगाहिनि ज्ञानेऽतिव्याप्तेः। किन्त्वनेकगतं सर्वात्मना परस्परप्रतिक्षेपमवगाहमानं ज्ञानं संशय इत्येव लक्षणम्। तथाभूतस्य ज्ञानस्य संशयत्वं तु परप्रतिक्षेपरूपवाकारार्थावगाहिन्येकैकांशेऽपीत्येतावान् विशेषः। परस्परप्रतिक्षेपस्त्वनेकधर्मकसंशयेऽने-

कस्य धर्मिण एकधर्मवत्त्वेऽनेककोटिकसंशये त्वनेकस्य धर्मस्यैकधर्मनिष्ठत्व इति विशेष इति ।

इदमपि लक्षणं न युक्तम्, व्रीहिभिर्यवैर्वा इष्टिप्रयोगः कर्तव्य इति सन्देहेन पृष्टवन्तं प्रति पक्षद्वयेऽपि साद्गुण्यसम्भवमभिप्रेत्य प्रयुक्तेन 'व्रीहिभिर्यवैर्वायं प्रयोगः कर्तव्यः' इति वाक्येन जनिते, 'मयेदानीं गन्तव्यं स्थातव्यं वा' इति संशयेन पृष्टवन्तं प्रति पक्षद्वयेऽपि फलाविशेषमभिप्रेत्य प्रयुक्तेन 'गच्छ वा तिष्ठ वा' इति वाक्येन जनिते, 'चैत्रः श्यामो गौरो वा' इति सन्देहेन पृष्टवन्तं प्रति तत्र श्यामत्वगौरत्वान्यतरनिर्धारणं मम नास्तीत्यभिप्रेत्य प्रयुक्तेन 'स श्यामो गौरो वेति नाहं वेद' इति वाक्येन जनिते, तादृशलोकरीत्यनुसारेण "को हि तद्वेद यद्यमुष्मिल्लोकेऽस्ति वा न वा" इत्याद्यर्थवादवाक्येन जनिते, संशयत्वं निर्वक्तुं शक्यमित्यभिमानिनं प्रति तद्दुदूषयिषया प्रयुक्तेन 'संशयत्वं जातिर्वोपाधिर्वा' इति वाक्येन जनिते च ज्ञाने तथाप्यतिव्याप्तेः । किञ्च, सर्वेषामेतेषां लक्षणानां तत्तल्लक्षणवाक्यजन्यज्ञानेष्वतिव्याप्तिः ।

ननु चैकस्मिन् धर्मिणि विरोधिनानाप्रकारकमित्यादिलक्षणवाक्यजन्यज्ञानेषु ज्ञानगतं विरोधिनानाप्रकारकत्वादिकं प्रकारः, न त्वर्थगतं तत्तद्विशेषणवैशिष्ट्यमिति नास्ति लक्षणवाक्यजन्याज्ञानानां विशेष्यगततत्तद्वैशिष्ट्यविषयत्वरूपं तत्तत्प्रकारकत्वमिति चेन्न, प्रकारत्वस्य वैशिष्ट्यघटिततया ज्ञानगततत्तत्प्रकारकत्वभानेऽर्थगततत्तद्वैशिष्ट्यभानस्यावर्जनीयत्वेन तत्तत्प्रकारकत्वस्यापि सत्त्वात् । तस्मात् "अनवधारणज्ञानं संशयः" इति वृद्धनैयायिकोक्तं लक्षणं युक्तम् । अनवधारणत्वं च ज्ञानस्य ज्ञेयेन विषयविषयिभावसम्बन्धावान्तरविशेषः, न तु विषयकृतः कश्चिद्विशेषः । यथा 'दण्डी पुरुषः' इति ज्ञानस्य दण्डेन प्रकारप्रकारिभावः, पुरुषेण विशेष्यतद्वद्भावश्च । नहि तद्व्यतिरेकेण दण्डपुरुषसंयोगा इति समूहालम्बनात् 'दण्डी पुरुषः' इति विशिष्टज्ञानस्य कश्चिद् विशेषो लभ्यते । दण्डगतवैशिष्ट्यप्रतियोगित्वस्य पुरुषगतवैशिष्ट्यप्रतियोगित्वस्य च विषयीकरणं विशिष्टज्ञाने ततो विशेष इति चेन्न, दण्डपुरुषदण्डप्रतियोगिकपुरुषानुयोगिकसंयोगा इति समूहालम्बने तस्यापि सत्त्वात् । सम्बन्धावच्छेदकसंयोगत्वादिप्रकारेण सम्बन्धविषयत्वं समूहालम्बने तं विना स्वरूपेण सम्बन्धविषयत्वं विशिष्टज्ञान इति तस्य ततो विशेष इति चेन्न, 'दण्डसंयुक्तपुरुषस्कन्धसंयुक्तदण्डश्चैत्रः' इति विशिष्टज्ञाने सम्बन्धावच्छेदकप्रकारेणापि सम्बन्धविषयत्वस्य सत्त्वात्,

स्वरूपेण वैशिष्ट्यविषयत्वस्य 'दण्डी पुरुषः', 'पुरुषे दण्डः' इ[illegible]ानयो-रविशेषेण तावता तयोः परस्परवैलक्षण्यासिद्धेश्च ।

ननु ज्ञेयज्ञानसम्बन्धविशेषकृतविशेषणविशेष्यव्यवस्थया विशिष्ट-ज्ञानसमूहालम्बनयोरुदाहृतविशिष्टज्ञानयोश्च वैलक्षण्यसिद्धावपि दीर्घबाहुर्बाहु-दैर्घ्यवानिति विशिष्टवैशिष्ट्यज्ञानयोर्वैलक्षण्यं न सिद्धयेत्, ज्ञानद्वयस्यापि बाहौ दैर्घ्ये च प्रकारप्रकारिभावसम्बन्धाविशेषादिति चेन्न, येन ज्ञानेन प्रकारप्रकारिभावसम्बन्धेन विषयीक्रियमाणे यस्मिन् विशेषणत्वं भासते तत्र ज्ञाने तत्तस्य विशेषणमिति व्यवस्थाङ्गीकारात् । विशेषणत्वं तु विशेष्यगत-वैशिष्ट्यप्रतियोगित्वं साक्षाद् विशेषनिरूपितसम्बन्धविशेषो वेत्यन्यदेतत् ।

ननु विशिष्टज्ञाने विशेषणगतविशेषणत्वस्यापि भानाङ्गीकारे तत एव समूहालम्बनव्यावृत्तेः किं विशेषणे ज्ञानसम्बन्धविशेषकल्पनयेति चेन्न, दण्डपुरुषदण्डगतपुरुषविशेषणत्वानीति समूहालम्बनवैलक्षण्याय तस्याप्या-वश्यकत्वात् । न च विशेषणतात्वावच्छेदेन विशेषणत्वविषयत्वं समूहा-लम्बने तदनवच्छेदेन तद्विषयत्वं विशिष्टज्ञान इति ततो विशेषो वाच्यः, दण्डविशेषणकश्चैत्र इत्यादिविशिष्टज्ञाने तदवच्छेदेनापि विशेषणत्वविषयत्व-सत्त्वात् । तस्माद् दीर्घबाहुर्बाहुदैर्घ्यवानिति विशिष्टज्ञानयोर्वैलक्षण्यसिद्धये तत्तद्विशेषणत्वविषयताकृत इव विशिष्टज्ञानसमूहालम्बनयोर्वैलक्षण्यसिद्धये प्रकारप्रकारिभाव इव ज्ञानज्ञेयसम्बन्धकृतोऽपि विशेषोऽङ्गीकर्तव्य एव । यद्यपि न्यायमते ज्ञानस्य ज्ञेयेन स्वरूपमेव सम्बन्धः, तथापि स्वरूपसम्बन्ध एव विशेषस्तैरगत्याभ्युपगन्तव्यः, घटाभावस्य घटेन प्रतियोग्यनुयोगि-भावरूपस्वरूपसम्बन्धो भूतलेनाधाराधेयभावरूप इतिवत् । एवं च ज्ञानस्यानवधारणत्वं 'स्थाणुः पुरुषो वा' इत्यादिज्ञानेष्वनेकधर्मविषय इव 'अयमयं वा चन्द्रः' इत्यादिज्ञानेष्वनेकधर्मविषयेऽप्यनुभूयत इति लक्षणानु-गमादनेकधर्मिविषयोऽपि संशयो युक्त एव । अतो युक्तमुक्तम्—अध्ययनादापा-ततो ज्ञाते ब्रह्मणि तद्योगादिति । "ब्रह्मविदाप्नोति परम्" (तै.उ.२.१) इत्यादि-वाक्याध्ययनात् सामान्यतो निरतिशयबृहत्त्वेनावगते ब्रह्मणि मन्त्रार्थवादादि-प्रसिद्धहरिहरादिदेवताविशेषाणां मध्ये 'अयमयं वा ब्रह्म' इति विशिष्य सन्दिग्धे सति सकलदेवतान्तरव्यवच्छेदेन शिव एव ब्रह्मेति निर्णयार्थस्य लक्षणस्य युक्तत्वादित्यर्थः ।

अत्र केचिदाद्यस्य सर्गादौ प्राथमिकस्य हिरण्यगर्भस्य जन्म यतो भवति, "यो ब्रह्माणं विदधाति पूर्वम्" (श्वे० उ० ६.१८) इति श्रुतेस्तद् ब्रह्मेति

जन्मादि अस्य यत इति सूत्रपदच्छेदः। जन्मादिकं जन्मस्थितिप्रलयतिरोभावानुग्रहरूपं कृत्यमस्य चेतनाचेतनसम्मेलन-

---

सूत्रार्थमाहुः, तन्निरासं हृदि निधाय सूत्रपदविभागं दर्शयति—जन्मादीति। तद्गुणसंविज्ञानबहुव्रीहिणा कृत्यपञ्चकं ग्राह्यमित्याह—जन्मादिकमिति। जन्मप्रलयावुत्पत्तिनाशौ प्रसिद्धौ। स्थितिर्जन्मप्रलययोर्मध्ये प्रपञ्चस्यावस्थानम्। तिरोभावः संसारिवर्गस्य नित्यसिद्धज्ञानक्रियाशक्त्याद्यावरणं सकलसांसारिकानर्थमूलभूतबन्धाख्यम्। अनुग्रहस्ततो मोक्षः। इत्येतानि परमेश्वरस्य सृष्टिपालनसंहारतिरोधानानुग्रहरूपस्वव्यापारसाध्यानि प्रपञ्चधर्मरूपाणि पञ्चकार्याणि। यद्यप्यनुग्रहः परमेश्वरधर्मः, तथाप्यत्रानुग्रहशब्देन तत्साध्या संसारिवर्गधर्मरूपा बन्धनिवृत्तिर्लक्षणीया, प्रपञ्चधर्मजन्मादिसाहचर्यात्। यद्वा 'मुच्यते वत्सः स्वयमेव' इत्यत्र वत्सस्येवानुग्रहशब्दितमोचनव्यापारकर्मणः संसारिणः पक्वमलतया तीव्रभक्तिवैराग्यादियुक्ततया च सौकर्यातिशयेन कर्तृत्वविवक्षया तत्कर्तृकैर्जन्मादिभिः सहानुग्रहस्य पाठः।

ननु जन्मादिपञ्चकस्य प्रपञ्चकर्तृकत्वमात्रमिह न विवक्षितम्, किन्तु प्रपञ्चधर्मत्वम्। अत एव प्रपञ्चधर्मेण जन्मादिना ब्रह्मणः सम्बन्धाभावात् तस्य ब्रह्मलक्षणत्वासम्भवमाशङ्क्यान्यनिष्ठस्यापि तटस्थलक्षणत्वं सम्भवतीति समाधास्यते। एवं च परमेश्वरधर्मानुग्रहणं प्रति कर्मणः कर्तृत्वविवक्षायामप्यनुग्रहस्य प्रपञ्चधर्मत्वालाभाज्जन्मादिसहपाठो न युक्त इति चेत्? उच्यते—सर्वत्र कर्मकर्तुः स्वव्यापारं प्रत्येव कर्तृत्वविवक्षा न तु स्वव्यापारानुकूलं कर्तृव्यापारं प्रति। अत एवोक्तं कैयटेन—"लुनातिस्तावद् द्विधाभवनोपसर्जने द्विधाभावने वर्तते। लुनाति केदारं देवदत्तो द्विधाभावम्, तद्द्विधा भावयतीत्यर्थः। यदा तु केदारस्य सौकर्यातिशयविवक्षायां देवदत्तव्यापारो न विवक्ष्यते, तदा द्विधाभवनमात्रे लुनातिर्वर्तते, अनेकार्थत्वाद् धातूनाम्। भिन्ना एव वा धातवो भिन्नार्थाः। सारूप्यात्तु तत्त्वाध्यवसायः। तत्र द्विधा भवने केदारस्य कर्तुः "कर्मवत् कर्मणा तुल्यक्रियः" (पा० ३.१.८७) इति कर्मकार्याण्यतिदिश्यन्ते। तेन 'लूयते केदारः स्वयमेव' इत्यादयः प्रयोगा उपपद्यन्ते" इति। एवमिहाप्यनुगृह्णातिः कृतार्थीभवनोपसर्जने कृतार्थीभावने वर्तते। अनुगृह्णाति भक्तं परमेश्वरः। कृतार्थीभवन्तं कृतार्थीभावयतीत्यर्थः। यदा तु भक्तस्य सौकर्यातिशयविवक्षायां परमेश्वरव्यापारो न विवक्ष्यते, तदा कृतार्थीभवन-

मात्रेऽनुगृह्णातिर्वर्तते। एवं चात्रानुग्रहस्य प्रपञ्चधर्मत्वमप्युपपद्यत इति। मुक्तिमुमुक्षुत्वादीनां जीवधर्मत्वेन निरूढव्यवहारसिद्धानां जीवधर्मत्वमपि ह्येवमेवोपपादनीयम्। यदि—"आत्मनात्मानमुद्धरेत्" इति स्मृतेः स्वबन्धनिवृत्त्यनुकूलस्वव्यापारः स्वकर्मकमोक्तृव्यापारत्वेन विवक्ष्यत इति कल्प्येत, तर्हि स एवात्र प्रपञ्चधर्मोऽनुग्रहो विवक्षितोऽस्तु, बन्धनिवृत्तिवत् तस्यापि सर्वानुग्राहकपरमेश्वरप्रसादाधीनत्वेन परमेश्वरकार्यत्वात्।

नन्वनाद्यावरणरूपस्य तिरोभावस्य कथं परमेश्वरकर्तृकत्वम्? उच्यते—अनादित्वेऽपि तस्य तत्कर्तृकत्वं युक्तम्। तथाहि—सर्वज्ञत्वेन सर्वेषां संसारिणां दुःखं जानतः सर्वशक्तिकत्वेन सर्वानपि तान् युगपदेव मोक्तुं शक्तस्य परमेश्वरस्य शिवशङ्करादिनामख्यापिता सर्वभूतविषयिणी करुणा निरुपाधिः परदुःखप्रहाणेच्छारूपा तेषामनादिभवसञ्चितनानाविधदुःखजनककर्मवृन्दसामर्थ्यं परिभूय सर्वानर्थमूलावरणोच्छेदपूर्विकामात्यन्तिकदुःखनिवृत्तिं तेषां युगपदेव कथं न कुर्यात्, यदि तस्य तत्तत्कर्मानुवर्तनस्वभावतया तेषां सकलकर्मवृन्ददाहकस्वविषयसाक्षात्कारोदयपर्यन्तं तेषु सहजकरुणोन्मेषविरोधितत्तदावरणानुवृत्तिसङ्कल्पो न स्यात्। अतस्तथाभूतसङ्कल्पावश्यंभावे तदधीनानुवृत्तिकस्यावरणस्य यस्मिन् सत्यग्रिमक्षणे यस्य सत्त्वं यद्व्यतिरेके चासत्त्वं तत्तज्जन्यमिति लक्षणानुसारेण तस्य तज्जन्यत्वसिद्धौ परमेश्वरकर्तृकत्वमपि तस्य सिद्ध्यति, कार्यानुकूलसङ्कल्पवत्त्वस्यैव कर्तृलक्षणत्वात्। किञ्च, ज्ञानक्रियाशक्त्यावरणं न स्वरूपतोऽनादि, संसारदशायां मध्ये मध्ये तत्तदर्थविषयतदाविर्भावशबलत्वात्। नहीदानीमपि जीवानां सर्वात्मना ज्ञानक्रियाशक्त्योरावरणमस्ति, न वा कदाचिदाविर्भूतयोः किञ्चिदर्थविषयज्ञानक्रियाशक्त्योरामोक्षमनावरणमस्ति, अनादौ जन्मप्रवाहे सुरनरपशुपक्षिसरीसृपादिजातिभेदोन्मिषज्ज्ञानक्रियाशक्तिव्यवस्थादर्शनात्। तस्मात् स्वरूपतः सादेस्तत्तिरोभावप्रवाहस्य परमेश्वरकार्यत्वं युक्तमेव। तथाप्यासंसारमावृतानां मुक्तिकाल एवाविर्भविष्यतां सत्यसङ्कल्पत्वादिगुणानामावरणमनादीति तेषां तत्कार्यत्वं न युक्तमिति चेत्, तेषामपि युक्तमेव, तेष्वेकैकस्य तपोविशेषसाध्यतया संसारिफलत्वेनाविर्भावतिरोभावयोः सम्भवेन तेषामप्यासंसारमावृतत्वासिद्धेः।

तथा हि—योगशास्त्रे "स्थूलस्वरूपसूक्ष्मान्वयार्थवत्त्वसंयमाद् भूतजयः" (पात० ३.४४) इति सूत्रेण पृथिव्यादिपञ्चभूतगतस्थूलाद्यर्थवत्त्वान्तधर्मपञ्चकविषयसंयमस्य तद्विषयधारणाध्यानसमाधिरूपस्य भूतजयः फलत्वेन

वर्णितः। स च भूतजयोऽणिमाद्यष्टैश्वर्यरूपः स्वेच्छाधीनभौतिकसृष्टिसंहारा-द्युपयोगिसत्यसङ्कल्पतासिद्धिपर्यन्तो वैयासिकभाष्ये व्याख्यातः। एवमापस्तम्बसूत्रेऽपि—"अथापि सङ्कल्पसिद्धयो भवन्ति" (आ० ध० २.९.२३.६), "यथा वर्षे प्रजादानं दूरे दर्शनं मनोजवता यच्चान्यदेवं युक्तम्" (आ० ध० २.९.२३.७) इति ज्ञानप्रधानानामूर्ध्वरेतसामाश्रमाणां ज्ञानफलसत्यसङ्कल्पशालित्वमुत्कर्षमाशङ्क्य—"स्यात्तु कर्मावयवेन तपसा वा कश्चित् सशरीरोऽन्तवन्तं लोकं जयति सङ्कल्पसिद्धिश्च स्यान्न तु तज्ज्यैष्ठ्यमाश्रमाणाम्" (आ० ध० २.९.२४.१४) इति सूत्रेण गृहस्थैरपि कर्मविशेषादिना सत्यसङ्कल्पत्वं सम्पादयितुं शक्यमिति ब्रह्मज्ञानप्रधानानामाश्रमाणां तत्प्रयुक्तोत्कर्षो निराकृतः। तथा योगशास्त्रे—"परिणामत्रयसंयमादतीतानागतज्ञानम्" (पात० ३.१६), "शब्दार्थप्रत्ययानामितरेतराध्यासात् सङ्करस्तत्प्रविभागसंगमात् सर्वभूतरुतज्ञानम्" (३.१७), "संस्कारसाक्षात्कारात् पूर्वजातिज्ञानम्" (३.१८), "प्रत्ययस्य परचित्तज्ञानम्" (३.१९), "प्रवृत्त्यालोकन्यासात् सूक्ष्मव्यवहितविप्रकृष्टज्ञानम्" (३.२५), "भुवनज्ञानं सूर्ये संयमात्" (३.२६), "चन्द्रे तारकाव्यूहज्ञानम्" (३.२७), "ध्रुवे तद्गतिज्ञानम्" (३.२८), "नाभिचक्रे कायव्यूहज्ञानम्" (३.२९), "क्षणतत्क्रमयोः सम्बन्धसंयमाद् विवेकजं ज्ञानम्" (३.५२) इति सूत्रैस्तत्तद्विषयसंयमफलत्वेनास्मदाद्यसम्भावितज्ञानशक्तिविलासाविर्भावो दर्शितः। तथा च योगशास्त्रे—"ग्रहणस्वरूपास्मितान्वयार्थवत्त्वसंयमादिन्द्रियजयः" (३.४७), "ततो मनोजवित्वं विकरणभावः प्रधानजयश्च" (३.४८) इति सूत्रैरिन्द्रियग्रहणाद्यर्थवत्त्वान्तधर्मपञ्चकसंयमादिन्द्रियजयमुक्त्वा ततः प्रधानजयान्ता सिद्धिरुक्ता। "प्रधानजयश्च सर्वप्रकृतिविकारवशित्वम्" (३.४८) इति वैयासिकभाष्ये व्याख्यातम्।

तेन सर्वप्रकृतिकार्यवशित्वस्य पाप्मजरामरणशोकक्षुत्पिपासाहेतुभूतप्रकृतिकार्यविशेषवशित्वस्यापि सिद्ध्या तद्वश्यत्वाप्रसक्तेः—"अपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सो विपिपासः"(छा.उ.८.१.५)इतिपरिगणितानां मुक्तिकालभाव्याविर्भाववतामपहतपाप्मत्वादीनामपि संयमविशेषफलत्वं सिद्ध्यति। विशिष्य च—"कण्ठकूपे क्षुत्पिपासानिवृत्तिः" (पात० ३.३०) इत्यादिसूत्रैः कण्ठकूपादिसंयमफलत्वेन विजिघत्सत्वादयो दर्शिताः। आगमेषु च पिशाचरक्षोयक्षगन्धर्वेन्द्रप्रजापतिचतुर्मुखानां पार्थिवाप्यतैजसनाभसमानसाहङ्कारिकबौद्धैश्वर्याणि प्रत्येकमष्टगुणान्युत्तरोत्तरेषां पूर्वपूर्वैश्वर्याष्टक-

सहितानि तत्तज्जन्मप्रापकपुण्यफलानि प्रपञ्चितानि । किं बहुना, व्याघ्रादीनां क्रोधलोभादिना मनुष्यादिहनने पाप्मानुदयोऽप्युक्तरीत्या तत्तज्जातिप्रापककर्मविशेषकृतापहतपाप्मत्वाद्याविर्भावप्रयुक्त एव । तस्मात् सत्यसङ्कल्पत्वादितिरोधानस्यापि परमेश्वरकार्यत्वं युक्तम् ।

किञ्च, सर्वमेतत् तिरोधानं न मलाख्येनाञ्जनेनानादिनापि सदैकरूपेण कृतम्, किन्तु नयनपटलवत् कालक्रमेण परिणतिं प्राप्नुवता । तथा च तत्तत्कालभवपरिणतिविशेषविशिष्टेनाञ्जनेन क्रियमाणमावारकविशेषवदनित्यमेव । अपि च, तिरोधानं नाञ्जनेनैव कृतम्, किन्तु सर्गकाले देहद्वयाकारपरिणतया प्रलये सूक्ष्मावस्थां प्राप्तया मायया तत्तज्जात्यायुर्भोगप्रापककर्मभिश्च कृतम् । तत्र कर्माणि स्वरूपत एवानित्यानि । मायापि स्थूलसूक्ष्मावस्थाविशेषवैशिष्ट्येन स्थूलावस्थायामपि तत्तद्देहविशेषवैशिष्ट्येन चानित्येति तत्तदावरकविशेषानित्यत्वकृतं तदाहितविशेषस्यावरणस्यानित्यत्वमनिवार्यमिति तस्य परमेश्वरकार्यतायां न काचिदनुपपत्तिः । अत एव तृतीयाध्याये—"पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ" (ब्र० ३.२.४) इति सूत्रेण जीवस्य सत्यसङ्कल्पादेः संसारदशायां परमेश्वरसङ्कल्पात् तिरोधाने प्रतिपादिते कथमनादेस्तिरोधानस्य परमेश्वराधीनत्वमित्याशङ्कानिवृत्तये "देहयोगाद्वा सोऽपि" (ब्र० ३.२.५) इति तदनन्तरसूत्रेण सर्गकाले तत्तद्देहाकारपरिणतमायाकृतस्य प्रलयकाले सूक्ष्मावस्थमायाकृतस्य च तिरोधानस्य तिरोधायकविशेषकृतविशेषणनवनवत्वावश्यंभावो दर्शितः ।

केचित्तु मलीमसेषु विषयेषु हेयत्वावरणं तिरोभाव इत्याहुः । तदपि वस्त्राच्छादितघटस्येव न विषयवर्गस्य तदाच्छादनकृतमावरणमिति युज्यते, द्रष्ट्रावारकमलमायाकर्मव्यतिरेकेण दृश्यावारककल्पनायां प्रमाणाभावात् । किन्तु विषयगतहेयत्वप्रतीत्यभावनिर्वाहकं द्रष्ट्राच्छादनमेव तथा व्यवहृतमिति नार्थतो भेदः ।

अन्ये तु जीववर्गस्य स्वस्वानुगुणभोगादप्रच्युतिस्तिरोभावस्ततोऽप्रच्यावनम्—[1]"स्वसंस्कारोचिताद् भोगादप्रच्यावः शरीरिणाम् । प्रोक्तं संरक्षणं नाम न्यायेन परिपालनम् ॥" इत्यादिग्रन्थेषु संरक्षणादिशब्देन प्रसिद्धं तिरोभावनमित्याहुः । एतस्मिन् पक्षे तिरोभावस्यानित्यत्वं सूपपादमेव ।

१. मृगेन्द्रागमवृत्तौ (विद्या० २।३-४) वार्त्तिककारवचनत्वेनोद्धृतोऽयं श्लोको द्रष्टव्यः ।

तिरोभावशब्दस्य तस्मिन्नर्थे वृत्तिः परं दुरुपपादा, "अन्तर्धाने तिर्यगर्थे तिर इत्यव्ययं भवेत्" इति नैघण्टुकप्रसिद्धार्थमध्ये कस्यचिदर्थस्याग्रहणात् ।

अपरे तु प्रलये चेतनाचेतनप्रपञ्चस्य सूक्ष्मावस्थापत्तिस्तिरोभाव इत्याहुः । तस्मिन् पक्षे तिरोभावस्यानित्यत्वं तिरोभावशब्दस्य प्रसिद्धार्थपरत्वं च सूपपादमेव । सूत्रकारस्य तत्राभिप्रायस्तु दुरुपपादः । सूत्रकारो यान् प्रपञ्चधर्मान् परमेश्वराधीनानग्रे व्यवहरति, ते जन्मादीत्यादिशब्देन विवक्षिता इत्युपपादनीयम् । अत एव भाष्यान्तरगृहीतजन्मस्थितिभङ्गव्यतिरेकेण तिरोभावानुग्रहावप्यत्र भाष्ये गृहीतौ, "पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ" (ब्र० ३.२.४) इति सूत्रे तिरोभावस्य तन्मूलबन्धसहितस्य बन्धविपर्ययरूपमोक्षस्य च परमेश्वरसङ्कल्पाधीनत्वेन व्यवहारदर्शनात् । न च तत्र तिरोभावः प्रलयकालभवसूक्ष्मावस्थापत्तिरूपः, किन्त्वाजानसिद्धसत्यसङ्कल्पत्वाद्यावरणरूप एव । अयं दोषः पूर्वयोरपि पक्षयोस्तुल्यः । तस्मात् सूत्रकारविवक्षितस्य तिरोभावस्यानित्यत्वेन परमेश्वराधीनत्वं प्रागुक्तप्रकारेणैवोपपादनीयम् ।

ननु स्थितिः कथं परमेश्वरकार्येषु परिगण्यते, सृष्टं यावन्न संहरति तावत् तस्य स्थितेः स्वत एव सिद्धेः । यदि हि संहर्तान्यः प्रसक्तः स्यात् तदा संहारे प्रवृत्तस्य तस्य निवारणं कार्यमिति राज्यस्थितौ राज्ञ इव प्रपञ्चस्थितावीश्वरस्यापेक्षा स्यात् । परमेश्वरः स्वयं यावन्न सञ्जिहीर्षति तावत्तस्य नान्यो नाशकः प्रसज्यते । सत्यम् । घटादिस्थितौ कुलालादिकर्त्रपेक्षाभावेऽपि मृदाद्युपादानापेक्षास्त्येव । परमेश्वरः प्रपञ्चस्योपादानमपीति प्रपञ्चस्थितौ तदपेक्षा केन वा वार्यते । तत्सङ्कल्पापेक्षामप्युपपादयामः । समानकालजन्मनोरल्पाधिककालावस्थायित्वलक्षणमस्ति स्थितिवैषम्यम् । तदिदं स्थितिहेत्वदृष्टवैषम्यकृतं वाच्यम् । तत्र चेतनयोः स्थितिवैषम्यं स्वस्वादृष्टवैषम्यकृतम्, अचेतनयोस्तु तद्भोक्त्रदृष्टवैषम्यकृतमिति विशेषः । तददृष्टद्वयं तज्जन्यकार्यगताल्पाधिककालावस्थानाभिसन्धिमत्परमेश्वरप्रेरणाधीनकर्मानुष्ठानप्रभवमिति सिद्धैव तयोरल्पाधिककालावस्थितेः परमेश्वरसङ्कल्पापेक्षा । किञ्च, जन्मवतः प्रपञ्चस्य यावन्नाशं स्थितिरुह्यमानजलकुम्भस्य स्थितिर्देवदत्तस्येव परमेश्वरस्य धारणव्यापारमपेक्षते । स च व्यापारो जन्मवदिदं यावन्नाशमित्थं तिष्ठत्वित्याज्ञारूपस्तस्य सङ्कल्प एव, "एतस्यैवाक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः,.........द्यावापृथिव्यौ विधृते तिष्ठतः" (बृ० उ० ३.८.९) इत्यादिश्रुतेः । "अक्षरमम्बरान्तधृतेः"

(ब्र० १.३.१०), "सा च प्रशासनात्" (ब्र० १.३.११) इति सूत्रयोस्तथैव प्रतिपादयिष्यमाणत्वाच्च ।

केचित्तु प्रपञ्चान्तर्गतचेतनाचेतनपदार्थानां परमेश्वरनियुक्तस्वस्व-कार्यकरणेन मर्यादायामवस्थितिः स्थितिरित्याहुः । साप्यत्र स्थितिशब्देन संग्राह्यैव, "एतस्यैवाक्षरस्य प्रशासने गार्गि प्राच्योऽन्या नद्यः स्यन्दन्ते श्वेतेभ्यः पर्वतेभ्यः प्रतीच्योऽन्याः । यां यां च दिशमन्वेति । एतस्य वा अक्ष-रस्य प्रशासने गार्गि ददतो मनुष्याः प्रशंसन्ति यजमानं देवाः दर्वीं पितरोऽ-न्वायत्ताः" (बृ० उ० ३.८.९), "भीषास्माद्वातः पवते भीषोदेति सूर्यः" (तै० उ० २.८) इत्यादिश्रुतेः, कूर्मपुराणवायुसंहितादिगतनियोगाध्याय-वचनवृन्दाच्च, "परात्तु तच्छ्रुतेः" (ब्र० २.३.४०), "अन्तर्याम्यधिदै-वादिषु" (ब्र० १.२.१८) इत्यधिकरणयोः सर्वस्यापि चेतनाचेतन-व्यापारस्य परमेश्वरप्रेरणाधीनत्वस्य व्यवस्थापयिष्यमाणत्वाच्च । तस्मात् सौत्रेण जन्मादिशब्देन परमेश्वरकर्तृकं जन्मादि प्रपञ्चधर्मपञ्चकं ग्राह्यमिति युक्तमेव ।

एकवचनं जन्मादीनां समुदायोपलक्षणम्, न त्वेकैकमिति ज्ञापनार्थम् । यद्यप्येकैकमपि लक्षणं भवितुमर्हति, अनतिप्रसङ्गात्, "जगद्वाचित्वात्" (ब्र० १.४.१६) इत्यधिकरणे च श्रुतजन्ममात्रकारणत्वस्य, "अक्षरमम्ब-रान्तधृतेः" (ब्र० १.३.१८) इत्यधिकरणे स्थितिकारणत्वमात्रस्य, "अत्ता चराचरग्रहणात्" (ब्र० १. २. ९) इत्यधिकरणे प्रलयकारणत्वमात्रस्य, "तन्निष्ठस्य मोक्षोपदेशात्" (ब्र० १.१.७) इति सूत्रे मोक्षकारणत्वमात्रस्य च ब्रह्मलिङ्गतयोपन्यासाच्च; तथापि जन्मादीनामन्यतमकारणत्वस्य लक्षण-तयोक्तौ तदितरकारणवस्त्वन्तरसत्त्वशङ्कया लक्षणीयस्य ब्रह्मणो निरतिशयं बृहत्त्वं न सिद्ध्येत् । अतस्तद्ब्रह्मेति शेषाध्याहारलब्धलक्ष्यपरब्रह्मशब्दसम-र्पितनिरतिशयबृहत्त्वरूपलक्ष्याकारविपरीताबृहत्त्वशङ्काव्यवच्छेदेन सप्रयोजनं समुदायस्य लक्षणीकरणम् ।

एवं जन्मादिसमुदायस्य लक्षणत्वमभिप्रेत्यैव यतो वेत्यादिलक्षणवाक्ये तद्ब्रह्मेति सकलल्लक्ष्यनिर्देशः कृतः, तत्प्रदर्शितं कारणत्वं ब्रह्मलक्षणं सिद्धं कृत्वा तेन प्रसिद्धसृज्यभावेन्द्रादिव्यावृत्त्या मन्त्रार्थवादादिप्रसिद्धमहिमसकल-देवतामध्ये किं देवतारूपं ब्रह्मेति संशयनिवृत्तावपि श्रुत्यन्तरश्रुतजगत्कारण-भावहरिहरादिमध्ये किं देवतारूपमिति संशयानिवृत्तेः । तथा संशयानानां ब्रह्मास्तित्वमात्रं जानतां केषाञ्चिद् विमर्शप्रदर्शके—"ब्रह्मवादिनो वदन्ति"

(श्वे० उ० १.१) इत्युपक्रम्य प्रवृत्ते "किं कारणं ब्रह्म कुतः स्म जाता जीवाम केन क्व च सम्प्रतिष्ठाः। अधिष्ठिताः केन सुखेतरेषु वर्तामहे ब्रह्मविदो व्यवस्था ॥" (श्वे० उ० १.१) इति मन्त्रे किं कारणं ब्रह्मेति विमर्शवाक्येन सामान्यतः प्रदर्शितं कारणत्वं तत्प्रपञ्चनपरैः पञ्चभिर्वाक्यैः पञ्चकृत्यकारितारूपत्वेन विवृतम् । तत्र हि 'कुतः स्म जाताः' इत्यादिभिस्त्रिभिर्वाक्यैर्जन्मस्थितिप्रलयकारित्वमुच्यत इति स्पष्टमेव। 'केनाधिष्ठिताः सुखेतरेषु वर्तामहे' इति वाक्येन बन्धकारित्वमुच्यते । सुखेतरेष्वित्यस्य द्वन्द्वसमासेन सुखदुःखात्मकेष्वित्यर्थपरतया पञ्चमीतत्पुरुषेण वैषयिकसुखस्यापि दुःखपक्षे निक्षेपात् केवलदुःखरूपेष्वित्यर्थपरतया वा तथाभूतेषु जन्मप्रवाहेष्वित्यत्र पर्यवसानम् । ब्रह्मविदो व्यवस्थेत्यनेन केनेतिपदानुषङ्गवता बन्धनिवृत्तिकारित्वमुच्यते । ब्रह्मविदो ब्रह्मस्वरूपनिर्धारणपूर्वकतत्साक्षात्कारवतः पुरुषस्य व्यवस्था, सकलदुःखनिवृत्तिपूर्वकनिरतिशयानन्दप्राप्तिलक्षणा विशिष्टावस्था, तस्य केवलं सुखमेव न तु कदाचिदपि दुःखमिति व्यवस्था वा, ब्रह्मज्ञानफलात् कर्मफलादिव कदाचिदपि प्रच्युतिर्नास्तीत्येवंभूता मर्यादा वा केन कारणभूतेन पुरुषधौरेयेण कृतेति तदर्थः ।

ननु लक्षणं लक्ष्यस्येतरभेदसाधने शब्दविशेषवाच्यत्वसाधने वा हेतुतयोपयुज्यते । हेतौ च व्यभिचारवारकमेव विशेषणं निवेश्यं नान्यदिति नैयायिकानां मर्यादा । कथमिह लक्ष्याकारविपरीताकारशङ्काव्यवच्छेदप्रयोजनकं विशेषणं लक्षणे निवेश्यते ? उच्यते—हेतौ व्याप्तिग्रहौपयिकं विशेषणं निवेश्यमिति नियमः, हेतुविशेषणानां व्याप्यतावच्छेदकघटकतयोपयोगात् । न तु व्यभिचारवारकमेव विशेषणं निवेश्यमिति नियमः, तथा सति परिभाषामात्रत्वापत्तेः, रूपादिषु पञ्चसु मध्ये रूपस्यैव व्यञ्जकद्रव्यत्वादिहेतौ मध्यान्तविशेषणस्य व्यभिचारावारकत्वेऽप्यप्रसिद्धिवारकतया तत्सम्पादितप्रसिद्धिकहेतुनिष्ठव्याप्तिग्रहौपयिकतामात्रेण सार्थकत्वाभ्युपगमाच्च । न च मनसि व्यभिचारवारणार्थस्यावधारणस्य मध्यान्तविशेषणं विना स्वरूपालाभेन व्यभिचारवारणाशक्त्या तदपि विशेषणं तल्लाभसम्पादनद्वारा व्यभिचारवारणप्रयोजनकमेवेति वाच्यम्, स्वरूपालाभो ह्यवधारणस्य हेत्वप्रसिद्ध्यापादकतयैव नान्यथा । तथात्वेऽपि तस्य व्यभिचारवारणशक्तिर्न हीयते । नहि हेत्वप्रसिद्ध्यापादकं विशेषणं साध्याभाववति स्वं विशिष्टहेत्वनुसन्धानं न निरुणद्धि ।

ननु रूपादिष्वित्यादिहेतोरयमर्थः—रूपेतरविशेषगुणाव्यञ्जकत्वे सति रूपव्यञ्जकत्वादिति। तथा च सत्यन्तं मनसि व्यभिचारवारकं नात्र किञ्चिदप्रसिद्धिवारकमिति चेन्न, यथाश्रुतहेतावप्यप्रसिद्धिवारकतया व्याप्तिग्रहौपयिकत्वेन विशेषणसार्थकत्वसमर्थनसम्भवे परिभाषामात्रसमर्थनार्थमर्थान्तरकल्पनस्यायुक्तत्वात्, तथार्थान्तरकल्पनेऽपि विशेषणगुणविशेषणस्य हेत्वप्रसिद्धिवारणं विना फलान्तराभावाच्च। यदि तु विशेषगुणविशिष्टप्रतियोगिकाभावस्तदविशिष्टप्रतियोगिकाभावादन्य इति विशिष्टाभावघटितहेतुनिष्ठव्याप्तिग्रहौपयिकतया तद्विशेषणं सार्थकम्, प्रतियोगितावच्छेदकप्रकारकप्रतियोगिभावस्तदविशिष्टज्ञानमन्तरेणाभावविशेषोपस्थितेरसम्भवादित्युच्येत, तदा व्याप्तिग्रहौपयिकतयैव विशेषणसार्थकत्वमभ्युपगतमिति घट्टकुटीप्रभातवृत्तान्तः।

एतेन रसाव्यञ्जकत्वे सति रूपव्यञ्जकत्वादिति तस्य हेतोरर्थ इत्यपि शङ्का निरस्ता, तत्रापि रसविशेषणस्य हेतुप्रसिद्धिसम्पादनेन हेतुशरीरविनिविष्टविशिष्टाभावोपस्थितिसम्पादनेन वा व्याप्तिग्रहोपयुक्ततयैव सार्थकत्वस्य समर्थनीयत्वात्। एवं शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वमिन्द्रियत्वमिति लक्षणे भागासिद्धिवारकं शब्देतरविशेषणं विशिष्टाभावघटितहेतुनिष्ठव्याप्तिग्रहौपयिकतया वा श्रोत्रवृत्तिमनःसंयोगरूपहेतुनिष्ठव्याप्तिग्रहौपयिकतया वा सार्थकं नैयायिकैरङ्गीकृतमित्यादिर्भूयानस्य विषयः। एवं हेतुविशेषणानां व्याप्तिग्रहौपयिकतया साफल्ये स्थिते सत्येतदधिकरणव्युत्पादयिष्यमाणन्यायतः शिवैकान्तिकेन ब्रह्मलक्षणेन हेतुना शिवस्य पूर्वोक्तरीत्या निरतिशयबृहत्त्वरूपे ब्रह्मत्वे तत्प्रवृत्तिनिमित्तकब्रह्मशब्दवाच्यत्वे वा साधनीये यदि जन्मकारणत्वमात्रं तत्र हेतूक्रियेत, तदा जन्मकारणत्वस्य स्थित्याद्युपयोगिज्ञानक्रियाशक्तिप्रयोजकत्वाभावात् स्थित्यादिकारणभूतेश्वरान्तरसद्भावशङ्कानिवर्तकत्वाभावाच्च ततो निरतिशयबृहत्त्वादिकं न सिद्ध्येत्। अतस्तत्सिद्ध्यनुकूलव्याप्तिविरोध्यप्रयोजकत्वादिशङ्कानिरासेन तथाभूतव्याप्तिग्रहोपयोगितया जन्मादिसमुदायस्य लक्षणीकरणमिति न कस्यापि वैयर्थ्यशङ्कावकाशः। एवं जन्ममात्रस्य लक्षणीकरणे निरतिशयबृहत्त्वरूपलक्ष्याकारो न सिद्ध्येदित्यपरितोषादेवाद्यस्य हिरण्यगर्भस्य यतो जन्मेति सूत्रव्याख्यानमयुक्तमिति सूचयितुं प्राक् सूत्रपदविभागो दर्शितः।

ननु यतो वेत्यादिलक्षणकथनं नानुमानविधया ब्रह्मत्वप्रतिपत्त्यर्थम्, किन्तु यतो भूतानि जायन्ते तद् ब्रह्मेति शब्दविधयैव। ततश्च व्याप्तिग्रहविरोध्यप्रयोजकत्वशङ्कानिरसनस्यानपेक्षितत्वाज्जन्मादिसमुदायस्य लक्षणी-

करणं निष्फलम्। अनेकत्र सांशयिकस्य ब्रह्मत्वस्य जगज्जन्ममात्रेणापि शाखाग्रेण चन्द्रशब्दवाच्यत्वस्येव क्वचिद् विशेषे निर्धारयितुं शक्यत्वादिति चेदुच्यते, यदि मन्त्रार्थवादादिप्रसिद्धमहिम्नां देवानां मध्ये को देवो निरतिशयबृहत्त्वशाली, यज्ज्ञानात् "ब्रह्मविदाप्नोति परम्" (तै० उ० २.१.१) इत्यादिषु महाफलं श्रूयत इति जिज्ञासोर्देवविशेषे ब्रह्मत्वनिर्धारणं केवलं शब्दविधया चिकीर्षितमभविष्यत्, तदानोमयं देवो ब्रह्मेति विशिष्यैव निरदेक्ष्यत, प्रतिपत्तिलाघवात्, जन्मादिरूपलक्षणमुखेन तन्निर्धारणे तल्लक्षणं शिवनारायणादिषु बहुषु श्रूयमाणं न निर्धारणक्षममिति शङ्कानिरासार्थमेतत्सूत्रनिरूपणीयदृढन्यायावगत्यपेक्षासत्त्वेन प्रतिपत्तिगौरवात्। तस्माद् यतो वेत्यादिश्रुतौ गुरूपायेनापि लक्षणेन लक्ष्यनिर्धारणात्तत्र सकृदेव लक्ष्यनिर्देशात् तल्लक्षणानुवादके श्वेताश्वतरमन्त्रे कारणत्वस्य पञ्चकृत्यकारित्वरूपतया विवृतत्वाच्च शब्दविधया चिकीर्षितमपि ब्रह्मनिर्धारणमनुमानरूपयोपपत्त्या तात्पर्यविषयतापादनेन दृढीकर्तुं जन्मादिसमुदायस्यैव लक्षणीकरणे श्रुतेस्तात्पर्यमित्यवसीयते। अतो युक्तं सूत्रे जन्मादीत्येकवचनेन समुदायस्य लक्षणत्वसूचनम्। तत्र नपुंसकनिर्वाहार्थं भाष्ये कृत्यमिति बहुव्रीहिलभ्यान्यपदार्थप्रदर्शनम्। एवं सौत्रं जन्मादिपदं व्याख्यातम्।

अथास्येति पदं व्याख्येयम्। तज्जन्मादिधर्मिपरमिति स्पष्टमेव। तद्यदि चेतनवर्गमात्रपरं तदानीमचेतनवर्गजन्मादिकारणवस्त्वन्तरशङ्कानिराकरणाभावाल्लक्षणतो निरतिशयबृहत्त्वं न सिद्ध्येत्। यदि चेतनाचेतनात्मकसर्वकार्यपरम्, तदा तिरोभावानुग्रहयोर्बन्धमोक्षरूपतया चेतनैकान्तिकयोर्यतो वेत्यादिविषयवाक्ये जीवनरूपतयोक्तायाः स्थितेश्च तत्रानन्वयः स्यात्। "यतो वा इमानि भूतानि" (तै० उ० ३.१) इति भूतशब्दस्य "न हिंस्यात् सर्वा भूतानि" इत्यादिप्रयोगात् प्राणिनिकाये रूढत्वेन प्रपञ्चस्य भवनक्रियायोगिकार्यमात्रे योगस्य कल्पनीयत्वेनास्वारस्यादित्याशङ्क्य विशेषयति—चेतनेति। चेतनाचेतनयोः सम्मेलनं शरीरिशरीरभावेन सम्बन्धः, तेन समरसीभूतस्य विशिष्टात्मनैकीभावं प्राप्तस्येत्यर्थः।

अनेनैतदुक्तं भवति—सर्वमप्यचेतनं कार्यं द्रव्यं सुरनरतिर्यक्स्थावररूपस्य भूतग्रामकस्य शरीरमेव। न ततोऽतिरिक्तं किञ्चिदस्ति। शरीरस्य तद्धर्माणां गुणक्रियादीनां जन्मादीनि परम्परासम्बन्धेन शरीरिण्यपि व्यपदिश्यन्ते, "यस्मिञ्ज्ञात एतामिष्टिं निर्वपति पूत एव तेजस्व्यन्नाद इन्द्रियावी पशुमान् भवति" (मै० सं० २.२.५.३) इत्यादिश्रुतिषु, 'चैत्रस्य पुत्रो जातः, स कृशो

समरसीभूतस्य प्रपञ्चविलासस्य यतो यस्मात् तद् ब्रह्मेति

नीलः स्थूलो गौरो जातः, सञ्चाराभिलापादिक्रियावान् जातः' इत्यादि-लौकिकव्यवहारेषु च। एवं च यतो वेत्यादिवाक्ये भूतशब्दोदितेषु स्वस्व-शरीरविशिष्टेषु चेतनेषु शरीरतत्तद्धर्मजन्मादयः शरीरादिद्वारकसम्बन्धेन सर्गाद्यकालभवतत्तद्भोगाद्यनुगुणचिच्छक्तिविकासादिरूपास्तदीयजन्मादयस्तद्-द्वारकसम्बन्धेन च व्यपदिश्य लक्षणीक्रियन्ते। अतो न काचिदनुपपत्तिरिति।

ननु 'इमानि भूतानि' इति विषयवाक्ये बहुवचननिर्दिष्टानां जन्मादि-धर्मिणां सूत्रे किमर्थमेकवचनेन निर्देश इति जिज्ञासायां तत्प्रयोजनं विशेषण-मुखेन दर्शयति—प्रपञ्चविलासस्येति। प्रपञ्चो विलास इव प्रपञ्चविलासस्तस्य लीलाकृतमन्दस्मितादिवदयत्नपूर्वकस्य प्रपञ्चस्येत्यर्थः। एवं चास्येत्येकवचन-मेककार्यवत्परमेश्वरं प्रत्ययत्नसाध्योऽयं विचित्रानन्तकार्ययुक्तः प्रपञ्च इत्येतत्सूचनार्थमित्ययत्नसाध्यत्वलक्षकेण विलासशब्देन दर्शितं भवति। तेनापि परमेश्वरस्यापरिच्छेद्यानन्तशक्तिमत्त्वरूपमहिमविशेषसिद्धिः। एव-मस्येति पदं व्याख्यातम्।

यत इति पदं व्याख्येयम्। तल्लक्षणीकृतजन्मादिप्रपञ्चसम्बन्धित्वेन लक्ष्यनिर्देशकमिति स्पष्टमेव। अत्रेयं शङ्कोन्मिषति—तसिल्प्रत्ययोऽत्र जनिकर्तृप्रकृतिरूपापादानपञ्चम्यन्तान्न भवति, जनिकर्तुः प्रपञ्चस्यात्र षष्ठ्यन्तपदेन जन्माद्युपसर्जनतया निर्दिष्टस्य—"यतो वा इमानि भूतानि जायन्ते" (तै० उ० ३.१) इति मूलश्रुताविव यच्छब्दनिर्दिष्टकारणसम्बन्धित्वे-नान्वयाभावात्, "जनिकर्तुः प्रकृतिः" (पा० १.४.३०) इति सूत्रे जनि-कर्तृविशेषणस्य यत्र जनिकर्तुः कार्यतयाऽन्वयो न तु जनेः, तत्रैवापादान-संज्ञेत्येतदर्थताया वाच्यत्वात्, अन्यथा तद्वैयर्थ्यात्, प्रकृतिशब्दस्योपादान-रूपकारणविशेषवाचितया तत एव तत्कार्यस्याक्षेपतो लाभसम्भवात्।

अथोच्येत प्रकृतिशब्दः स्वभावविषययैव शक्त्या मृत्स्वभावो घट इत्यादिव्यवहारात् कार्यस्वभावरूपेषूपादानेषु प्रयुज्यते, क्लृप्तशक्त्या प्रयोग-निर्वाहे शक्त्यन्तरकल्पनानुपपत्तेः। तथा सति कार्यस्य प्रकृतिस्वरूपं कारण-मित्येतावत् तत्र प्रयोक्तव्यं स्यादिति चेत्? सत्यम्। तथापि लोके वेदे च निरूढ्या प्रकृतिपदमात्रस्य तत्र प्रयोगः, न्यायशास्त्रव्यवहारे कार्यं प्रति समवायिनि कारणे समवायिपदमात्रस्येव। पाणिनिना तु प्रकृतिरित्येतावति सूत्रे कृते विवक्षितार्थः स्पष्टो न भवतीति जायमानस्य स्वभावरूपं यत्कारणं

शेषः। "यतो वा इमानि भूतानि जायन्ते, येन जातानि

तस्यापादानसंज्ञा विधीयत इत्यर्थस्पष्टीकरणाय जनिकर्तुरिति विशेषितम्। अत एव "तदर्थं विकृतेः प्रकृतौ" (पा० ५.१.१२) इति सूत्रे विकृतिपदसन्निधानेन प्रकृतिपदस्योपादानपरत्वं लभ्यतामित्येतदर्थमेव विकृतिग्रहणं कृतम्। एवं जनिकर्तृविशेषणमन्यथैवार्थवदिति नैतद्युक्तम्। अत्र कारक इत्यधिकारतः कारकाणां मध्ये यत् स्वभावरूपं कारकमित्यर्थलाभे सति कस्य स्वभावरूपमित्याकाङ्क्षायां प्रत्यासत्त्या कार्यस्य स्वभावरूपमित्यर्थपर्यवसानेन कारणावान्तरविशेषभूतोपादानपरत्वाधिगतिसम्भवात्, यथाकथञ्चिदत्र "जनिकर्तुः प्रकृतिः" (पा० १.४.३०) इति सूत्रेणापादानसंज्ञासमर्थनेऽपि जन्मकारण इव जगत्स्थितिप्रलयादिकारणेष्वपादानसंज्ञाविधानाभावेनापादानपञ्चम्यन्तस्य स्थित्यादिभिरन्वयाभावप्रसङ्गाच्च, यत इत्यस्यापादानपञ्चम्यन्तत्वाभ्युपगमे निमित्तान्तरशङ्कानिरासाभावेन ततो लक्ष्यस्य निरतिशयबृहत्त्वासिद्धेश्च।

अथोच्येत हेतुपञ्चम्यन्तादिह तसिल्प्रत्ययोऽस्तु, तद्धेतुत्वं सङ्कोचे कारणाभावान्निमित्ततयोपादानतया च विवक्षितमिति ततो निरतिशयबृहत्त्वसिद्धिरप्युपपद्यत इति। नैतदपि युक्तम्, "विभाषा गुणेऽस्त्रियाम्" (पा० २.३.२५) इति गुण एव हेतौ पञ्चमीविधानेन द्रव्ये ब्रह्मणि हेतौ पञ्चम्यसम्भवात्, इतीमां शङ्कां निराकर्तुं व्याचष्टे—यतो यस्मादिति। 'पुत्रात् प्रमोदो जायते' इत्यादिप्रयोगदर्शनात् "विभाषा गुणेऽस्त्रियाम्" (पा० २.३.२५) इति सूत्रे विभाषेति योगविभागेनागुणवचनेभ्योऽपि हेतौ पञ्चमी समर्थनीयेति भावः। "हेतौ" (पा० २.३.२३) इति सूत्रविहितहेतुतृतीयान्तादप्यत्र तसिल्प्रत्यय उपपद्यते। "इतराभ्योऽपि दृश्यते" (पा० ५.३.१४) इति तृतीयान्तादपि तद्विधानादित्यपि द्रष्टव्यम्। सूत्रस्यापेक्षितं पूरयति—तद्ब्रह्मेति शेष इति। यत्पदाक्षिप्ततत्पदाध्याहारेण पूर्वसूत्रगतब्रह्मपदानुषङ्गेण पूर्वसूत्रे प्रथमान्तब्रह्मपदाभावात् "संयजत्रैरङ्गानि"(तै० सं० १.३.८.१) इत्यत्र 'गच्छन्ताम्' इति पदस्येव प्रथमान्तब्रह्मपदस्याप्यध्याहारेण वेदं शेषपूरणम्। एवं प्रदर्शितस्य लक्षणस्य पूर्वपक्षसिद्धान्ताभ्यां शिवैकान्त्यव्यवस्थापनार्थमधिकरणशरीरप्रदर्शनाय विषयवाक्यमुदाहरति—यतो वेति।

नन्वत्रापादानपञ्चमीतस्तसिल्प्रत्यय इत्यभ्युपगन्तव्यम्, न तु सूत्र इव हेतुपञ्चमीतः, उपपदविभक्तितः कारकविभक्तेर्बलीयस्त्वात्, तद्वदिह "जनिकर्तुः

जीवन्ति, यत्प्रयन्त्यभिसंविशन्ति, तद्विजिज्ञासस्व तद् ब्रह्म"

प्रकृतिः" (पा० १.४.३०) इति सूत्राप्रवृत्तिशङ्कानवकाशात्। न च वाच्यं यत इत्यनुवादस्य प्रापकवाक्यसापेक्षत्वात् "तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजत" (छा० उ० ६.२.३) इत्यादिप्रापकवाक्यानुसारेण निमित्तोपादानसाधारण्याय हेतुपञ्चम्यत्र वाच्येति। अनुवादो ह्यनूद्यमानार्थस्य प्रापकमपेक्षत इत्येव नियमः, न तु पुरोवादप्राप्तं सर्वं यथाकथञ्चिच्छब्दस्य सामर्थ्यमाश्रित्यानुवादनीयमिति नियमः। न चात्र सूत्र इव तृतीयान्तात् तसिलिति पक्षान्तरं वक्तुं शक्यम्, येनापादाने तृतीयाभावात् कारकविभक्तिबलीयस्त्वन्यायाप्रवृत्तेर्हेतुतृतीयैव स्यादिति शङ्क्येत, "आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते" (तै० उ० ३.६) इति वाक्ये प्राचीनेष्वन्नादिवाक्येषु च यत इति स्थाने पञ्चमीदर्शनेनात्रापि पञ्चम्यन्ततावगमात्, तृतीयान्तत्वाभ्युपगतावुपपदविभक्त्याश्रयणं स्यादिति कारकविभक्तिबलीयस्त्वेनापि पञ्चम्यन्ततावगमाच्च। तथा च विषयवाक्ये निमित्तान्तरशङ्कानिरासाभावाल्लक्ष्यस्य निरतिशयबृहत्त्वं लक्षणतो न सिद्ध्यतीति चेन्न, लक्षणतो निरतिशयबृहत्त्वसिद्ध्यर्थमेव दुर्बलस्यापि हेतुपञ्चम्यन्तत्वस्याश्रयणोपपत्तेः, अन्यथा लक्षणकथनवैयर्थ्यप्रसङ्गात् तस्य लक्ष्यगतनिरतिशयबृहत्त्वसिद्ध्युपयोग्यनुमानरूपोपपत्तिप्रदर्शनैकफलकत्वस्य प्राक् समर्थितत्वात्, वाक्यवैयर्थ्याच्च पदमात्रे क्लिष्टगत्याश्रयणस्य न्याय्यत्वात्। अत एव "एकादश पशोरवदानानि तानि द्विरवद्यति" (तै० सं० ६.३.१०.३) इति वाक्यवैयर्थ्याय "यद्यपि चतुरवत्ती यजमानः पञ्चावत्तैव वपा कार्या" इत्यत्र वपाग्रहणस्य पाशुकहविर्मात्रोपलक्षकत्वमाश्रितम्।

ननु लक्षणकथने तन्निर्णायकादिषु च जन्मवाक्ये पञ्चमी जीवनवाक्ये तृतीया च व्यवस्थया दृश्यते, सा व्यवस्थाऽर्थव्यवस्थामन्तरेण नोपपद्यते, अतस्तेषु तृतीयानां हेत्वर्थत्वात् पञ्चमीनामपादानार्थत्वमभ्युपगन्तव्यमिति चेन्न, तृतीयानां करणार्थत्वोपपत्तेः, "न प्राणेन नापानेन मर्त्यो जीवति कश्चन। इतरेण तु जीवन्ति यस्मिन्नेतावुपाश्रितौ॥" (कठो० ५.५) इति श्रुत्यन्तरे ब्रह्मणः प्राणिनां जीवने प्राणवाय्वाद्यपेक्षयाऽतिशयितसाधकत्वरूपस्य साधकतमत्वस्य प्रतिपादनात्।

ननु तथापि विषयवाक्ये जन्मादिपञ्चकं नोपात्तमिति श्रुतिसूत्रयोर्नानुगुण्यमिति चेन्न, प्रयन्तीत्यनेन लयप्रतिपादकेन दैनन्दिनप्रलयवदात्यन्तिक-

(तै० उ० ३.१) इति, "प्रधानक्षेत्रज्ञपतिर्गुणेशः संसार-

लयरूपस्य मोक्षस्यापि संग्रहात्, अभिसंविशन्तीत्यनेन अभितः स्वपन्तीत्यर्थकेन तिरोभावस्य प्रतिपादनाच्च विषयवाक्यस्यापि कृत्यपञ्चक-विषयत्वात्।

प्रधानेति। "स विश्वजिद्विश्वकृदात्मयोनिः कालकालो गुणी सर्वविद्यः" (श्वे० उ० ६.१६) इति मन्त्रस्य पूर्वभागः। आत्मयोनिः स्वयम्भूः, आत्मनां योनिर्वा। कालकालः कालस्य क्षणादिनिचयस्य वैवस्वतस्य वा नियन्ता। गुणी सत्यसंकल्पत्वादिकल्याणगुणसम्पन्नः। सर्वा विद्याऽस्येति सर्वविद्यः सर्वविद्याधिष्ठाता, "ईशानः सर्वविद्यानाम्" (तै० आ० १०.४७.१) इति श्रुतेः। प्रधानक्षेत्रज्ञयोः प्रकृतिपुरुषयोः पतिः पालकः। गुणेश-स्त्रैगुण्यनियन्ता। संसारः सन्ततं सरणमिह परत्र च गतागतम्। तेन जन्म-प्रलययोर्ग्रहणम्। बन्धस्तिरोभावः। सूत्रे कृत्यपञ्चकं गृहीतमित्यस्य यत इति पञ्चम्या हेत्वर्थकत्वस्य च स्पष्टीकरणार्थं विषयवाक्यान्तरोदाहरणम्। अनपायगुणद्वारकं तथाभूतविग्रहद्वारकं च स्वरूपलक्षणमप्यनेन सूत्रेण विवक्षितमिति दर्शयितुम्—"सत्यं ज्ञानम्, ऋतं सत्यम्" इति मन्त्रयो-रुदाहरणम्।

अत्र जन्मादिकं ब्रह्मणो लक्षणं भवितुमर्हति न वेति तत्प्रयोजनसम्भवा-सम्भवाभ्यां संशये पूर्वः पक्षः। नैतद् ब्रह्मणो लक्षणं भवितुमर्हति, अतन्निष्ठ-त्वात्। लक्षणस्य हि लक्ष्यगतकिञ्चिच्छेषसिद्धिः प्रयोजनम्। तत्र च प्रयोजनं लक्षणे हेतुतयोपयुज्यत इतीष्यते। न चातन्निष्ठं तन्निष्ठसाध्यसिद्धावुपयुज्यते। विशिष्य च ब्रह्मलक्षणस्येदं वस्तु ब्रह्मेति शृङ्गग्राहिकया वस्तुविशेषब्रह्मत्व-निर्धारणं प्रयोजनमिष्यते। न चैतल्लक्षणं तन्निर्धारणं जनयितुमीष्टे। यतः श्रुतिवाक्येषु क्वचिदानन्दः क्वचित्सत् क्वचिज्ज्ञानं क्वचिच्छिवः कारणत्वेन वर्ण्यते। तेषु किं ब्रह्मेति सर्वसाधारणकूटसाक्षिणानेन लक्षणेन निर्धारणीयम्। न च सर्वेषामेतेषामव्यवस्थितविकल्पेन व्यवस्थितविकल्पेन समुच्चयेन वा जगज्जन्मादिकारणत्वमिति तथैवैतेषां ब्रह्मत्वमपि स्यादिति वाच्यम्, अव्यवस्थितविकल्पे श्रुतहान्यादिदोषापत्तेः।

तथाहि—यदा तावदानन्दशास्त्रस्य प्रामाण्यमभ्युपगम्यते, तदा सदेव सोम्येदमित्यादिशास्त्रश्रुतं सदादीनां कारणत्वं हातव्यमिति सदादिशास्त्राणा-मपौरुषेयत्वेन प्राप्तस्य प्रामाण्यस्य परित्यागो दोषाभावादप्राप्तस्याप्रामाण्यस्य

मोक्षस्थितिबन्धहेतुः" (श्वे० उ० ६.१६), "सत्यं ज्ञानमनन्तं ब्रह्म" (तै० उ० २.१), "ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम्। ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमः ।।"

स्वीकारश्चेति तेषु दोषद्वयमापतति। यदा पुनः सदादिशास्त्राणामन्यतमं प्रमाणमभ्युपगम्यते, तदा तत्र प्राक्स्वीकृताप्रामाण्यपरित्यागः परित्यक्तप्रामाण्यस्वीकारश्चेति तत्र दोषद्वयमापततीत्येवं प्रतिशास्त्रं प्रतीतप्रामाण्यपरित्यागाप्रतीताप्रामाण्यकल्पनारूपदोषद्वयं पर्यायान्तरे कल्पिताप्रामाण्यपरित्यागपरित्यक्तप्रामाण्यस्वीकाररूपं दोषद्वयं चेति चत्वारश्चत्वारो दोषाः प्रादुःष्युः। तस्मादत्यन्तबाधादपि पापीयान् विकल्पः। अत्यन्तबाधे हि यद्वाक्यं दुर्बलत्वेनावधारितं तत्प्रबलविरुद्धत्वात् स्वार्थात् सर्वथैव प्रच्यावितं सदर्थसङ्कोचं वृत्त्यन्तरं वा समासाद्य निर्वृणुयादेव, न त्वव्यवस्थितजयपराजयपर्यायप्राप्तिमदसमाप्यमानसमरसमबलनरपतिद्वयन्यायेन क्लेशानुवृत्तिमनुभवेत्, न वा श्रोतॄन् समबलयोद्धृनरपतिद्वयविषयवासिजनानिवान्यतरसमाश्रयणसन्देहसमुद्भतरङ्गपरम्परानिमज्जनेन क्लेशयेत्। न चैवंभूतयोरेव व्रीहियववाक्ययोर्विकल्पोऽङ्गीकृतः, तथेहापि स्यादिति शङ्कनीयम्, अनुष्ठेयार्थेष्वैच्छिकप्रयोगभेदेनोभयानुग्रहात् कथञ्चिदव्यवस्थापरिहारसम्भवेऽप्यत्र सिद्धे वस्तुनि तत्परिहारासम्भवात्। तस्मादव्यवस्थितविकल्पस्तावदिह न सम्भवति।

कल्पभेदादिना व्यवस्थितविकल्पाभ्युपगमे तु—"एकमेवाद्वितीयम्" (छा० उ० ६.२.१), "द्यावाभूमी जनयन् देव एकः" (ऋ० १०.८१.३) इत्यादिश्रुतिविरुद्धब्रह्मानेकत्वप्रसङ्गः। आनन्दादयः समुच्चिताः कारणमित्येवंरूपसमुच्चयपक्षेऽप्ययं दोषस्तुल्यः। अधिकश्च ब्रह्मनामैकमत्यासम्भवो दोषः। तेषां धर्मसमुच्चयः कारणमित्यपि पक्षो न युज्यते, अचेतनस्य तस्येक्षापूर्वकस्रष्टृत्वाद्यसम्भवात्। एवमभिन्ननिमित्तोपादानत्वरूपतयाऽभिमते लक्षणे कर्तृत्वरूपनिमित्तांशस्यानन्दादिष्विदन्तया ब्रह्मनिर्धारणरूपप्रयोजनपर्यवसायित्वाभावाल्लक्षणानुप्रवेशो न युज्यते। उपादानतांशस्य त्वसम्भवादेव स न युज्यते, "मायां तु प्रकृतिम्" (श्वे० उ० ४.१०) इति श्रुतौ मायाया जगदुपादानत्वश्रवणात्। न च "आत्मन आकाशः सम्भूतः" (तै० उ० २.१) इत्यादिष्वपादानविषयपञ्चमीश्रुत्यादिभिर्ब्रह्मणोऽप्युपादानत्वं प्रतिपाद्यत इति वाच्यम्, ज्ञानादिरूपस्य ब्रह्मणस्तद्विलक्षणप्रपञ्चोपादानत्वासम्भवेन

निर्विकारत्वश्रुतिविरोधेन च पञ्चम्यादीनां हेतुत्वाद्यर्थान्तरपरत्वात्। तस्माद् यदि कर्तृत्वरूपनिमित्तत्वं लक्षणम्, यदि वा बहूनामानन्दादीनामैकमत्यासम्भवेन निमित्तत्वायोगात् तन्तूनामिव बहूनामुपादानत्वसम्भवाच्चोपादानत्वं लक्षणम्, यदि वा निरतिशयब्रह्मत्वसिद्ध्यर्थं मिलितमुभयं लक्षणम्, सर्वथापि जगत्कारणत्वं लक्षणं न सम्भवति। अत एवानन्दरूपत्वं सद्रूपत्वं ज्ञानरूपत्वमुमासहायत्वविरूपाक्षत्वादिविशिष्टविग्रहशालित्वमित्येवमाद्यपि लक्षणं भवितुं नार्हति, विकल्पसमुदायदोषानतिक्रमादेव।

स्यादेतत्। सज्ज्ञानमानन्दः शिव इत्येतेषां नास्ति भेदः, सदेव सोम्येदमित्यादिश्रुतिप्रतिपन्नस्य सत एव जगत्कारणस्य तत्तच्छास्त्रान्तरानुसारेण छागपशुन्यायाच्चेतनतया प्रचुरानन्दतया शिवरूपदेवताविशेषतया च पर्यवसानात्। अतोऽत्र विरोधाभावान्न विकल्पसमुच्चयदूषणशङ्कावकाश इति चेत्, स्यादेतदेवं यद्यत्र विरोधो न स्यात्। अवधारणविरोधात्तु नात्र च्छागपशुन्यायोऽवतरति। तथा हि—"सदेव सोम्येदमग्र आसीत्" (छा० उ० ६.२.१), "आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते" (तै० उ० ३.६), "न सन्न चासच्छिव एव केवलः" (श्वे० उ० ४.१८) इति सदानन्दशिवकारणवाक्येषु तावदवधारणानि छागपशुन्यायेन परस्परस्मात् प्राप्तानां रूपान्तराणां व्यवच्छेदेनैव सप्रयोजनानि वाच्यानि, अन्यथा तद्वैयर्थ्यात् श्रुतिशैलीमनुविदधानेषु कल्पसूत्रेषु "आज्यहविरुपांशुयाजः पौर्णमास्यामेव भवति" इत्यादिवाक्येष्ववधारणस्य कल्पसूत्रान्तरस्थसमानप्रकरणप्राप्तामावास्याकालोपसंहारशङ्काव्यवच्छेदेनैवार्थवत्त्वस्य दृष्टत्वाच्च शिव एवेति वाक्ये सद्रूपताव्यवच्छेदः कण्ठतोऽपि कृतो दृश्यते। तथा बृहदारण्यकोपनिषदि "अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः" (बृ० उ० ४.५.११) इत्यादिना, "अयं च लोकः परश्च लोकः सर्वाणि च भूतान्यस्यैवैतानि सर्वाणि निःश्वसितानि" (बृ० उ० ४.५.११) इत्यन्तेन सर्वकारणं वस्तूपक्षिप्य—"स यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघनः, एवैवं वा अरे अयमात्मा अनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एव" (बृ० उ० ४.५.१३) इति तस्य प्रज्ञानैकरूपत्वप्रतिपादनस्य कारणवाक्यान्तरप्राप्तरूपान्तरव्यवच्छेदपरत्वमवधार्यते, कारणवाक्यान्तरेषु तदन्यकारणवाक्यप्राप्तरूपान्तरव्यवच्छेदकावधारणदर्शनात्। तेनान्येषामपि ज्ञानकारणवाक्यानां कारणं ज्ञानैकरूपमित्यत्र तात्पर्यमवसीयते। न च शाखाभेदेनोदितानुदितहोमव्यवच्छेदेऽपि साध्यरूपस्याग्निहोत्रस्यैक्यवत् सज्ज्ञानानन्दशिवविषयकारणवाक्यभेदेन परस्पर-

(महाना० १२.१) इत्यादिवाक्यं विषयः। अत्र जगतो जन्मादिकं ब्रह्मणो लक्षणतया सम्भवति न वेति सन्देहः। न सम्भवति, सम्बन्धाभावात्। किञ्च, "आनन्दो ब्रह्मेति व्यजानात्" (तै० उ० ३.६) इत्यत्रानन्दस्य जगज्जन्मादि लक्षणं पर्यवस्यति। अन्यत्र—"सदेव सोम्येदमग्र आसीत्" (छा० उ० ६.२.१) इति सतो जगत्कारणत्वमवगम्यते। "सत्यं ज्ञानमनन्तं ब्रह्म" (तै० उ० २.१) इति ज्ञानमेवापरिच्छिन्नं जगत्कारणं ब्रह्मेत्येकत्र विज्ञायते। अपरत्र च—"यदा तमस्तन्न दिवा न रात्रिर्न सन्न चासच्छिव एव केवलः"(श्वे०उ० ४.१८) इति शिवशब्दवाच्यं वस्तु कारणत्वेन सकलपूर्वभावि ब्रह्मेति विज्ञायते। अत्रानन्दादीनां ब्रह्मत्वे विकल्पो वा समुच्चयो वा? विकल्पे श्रुतहान्यादिदोषप्रसङ्गोऽव्यवस्था च। व्यवस्थितविकल्पेऽपि ब्रह्मानेकत्वप्रसङ्गः। समुच्चयपक्षे तेषां धर्मरूपत्वान्निखिलजगन्निर्माणोपायज्ञानविशेषविशिष्टब्रह्मत्वासम्भवः। अपि च, "मायां तु प्रकृतिं विद्यात्" (श्वे० उ० ४.१०) इति श्रुतिर्मायाया अचेतनाया जगत्कारणत्वमभिधत्ते। तदेव युक्तम्, ब्रह्मणो ज्ञानरूपस्य जगत्कारणत्वे तस्य

धर्मव्यवच्छेदे सिद्धरूपस्य कारणस्यैक्यमुपपद्यते। तस्मान्न कारणवाक्येषु छागपशुन्यायावतारः। अस्तु वा ज्ञानानन्दपर्यन्तस्तन्न्यायावतारः, शिवपर्यन्तस्तु न सम्भवति, "हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्"(ऋ० १०.१२१.१), "एको ह वै नारायण आसीन्न ब्रह्मा नेशानः" (महो० १.१) इत्यादीनां विशेषान्तरविषयाणामपि कारणवाक्यानां सत्त्वेन तेषां सत्यज्ञानादिवाक्यानां च क विषये पर्यवसानं भवत्वित्यत्र विनिगमनाविरहात्। तस्माद् ब्रह्मणो लक्षणं न सम्भवतीति।

इत्थं संशयप्रदर्शनपूर्वकं पूर्वपक्षं प्रापय्य सिद्धान्तयितुं प्रतिजानीते—अत्र जगतो जन्मादिकमित्यादिना एवमादौ पूर्वपक्षविक्षेपे प्राप्ते ब्रूम इत्यन्तेन।

विकारापत्त्या "निष्कलं निष्क्रियं शान्तम्" (श्वे० उ० ६.१९) इत्यादिश्रुतिभङ्गप्रसङ्गः। अतः सर्वथाऽपि ब्रह्मणो जगत्कारणत्वादिलक्षणमभिधातुमशक्यमित्येवमादौ पूर्वपक्षविक्षेपे प्राप्ते ब्रूमः—यद्यपि जन्मादेर्जगन्निष्ठत्वेन ब्रह्मण्यसम्बन्धः, तथापि ताटस्थ्येन लक्षणत्वं युज्यते। यत् सर्वज्ञत्वादि-

---

अतन्निष्ठत्वेन तल्लक्षणत्वासम्भवं तावत् परिहरति—यद्यपीति। असम्बन्धो धर्मधर्मिभावसम्बन्धाभावः। ताटस्थ्येनेति। यथा शाखाग्रस्य चन्द्रलक्षणत्वं तद्वदिति भावः।

ननु शाखाग्रं नानुमाने स्वयं हेतुभावेन तल्लक्ष्यगतकिञ्चिद्विशेषप्रतीतावुपयुज्यते, किन्तु कस्मिन् गगनप्रदेशे चन्द्रो वर्तत इत्यजानतस्तज्जिज्ञासया पृष्टवतो गगने सर्वत्र चक्षुर्विक्षेपक्लेशो मा भूदिति देशविशेषे चक्षुर्नियमनमात्रे तदुपयुज्यते। तत्र यदि प्रागवगतचन्द्रं तस्य प्रदेशविशेषवर्तित्वमात्रं जिज्ञासमानं प्रतीदं लक्षणकथनम्, तदा तस्य चक्षुर्नियमनानन्तरं प्रत्यक्षेण जायमानं प्रदेशविशेषवर्तित्वज्ञानमेव फलम्। यदि प्रागनवगतचन्द्रमसि ज्योतिर्मण्डलेऽस्ति चन्द्रशब्दवाच्य इत्येतावदवगत्य तं विशिष्य जिज्ञासमानं प्रतीदं लक्षणकथनम्, तदा चक्षुर्नियमने सति शाखोर्ध्वदेशे चन्द्रसमीपस्थितनक्षत्रादिसाधारण्येन चन्द्रे दृश्यमानेऽप्ययं चन्द्रशब्दवाच्य इति निश्चयोदयासम्भवात् तत्र 'प्रकृष्टप्रकाशश्चन्द्रः' इत्यादिस्वरूपलक्षणमपि वक्तव्यमिति तन्मुखेन जायमानं चन्द्रशब्दवाच्यत्वनिर्धारणं फलमिति विशेषः। उभयथापि शाखाग्रं चन्द्र इति तटस्थलक्षणकथनं चक्षुर्नियमनमात्रे व्याप्रियते, न तु साक्षाल्लक्ष्यविशेषज्ञापने। लोके तस्य तटस्थलक्षणत्वव्यपदेशो 'वृक्षं प्रति विद्योतते विद्युत्' इत्यत्र वृक्षस्य व्याकरणे लक्षणत्वव्यपदेशश्च प्रमाणान्तरव्यवधानेनापि लक्ष्यविशेषज्ञाने फलपर्यवसानमस्तीत्येतावता। एवं च शाखाग्रस्य लक्ष्यगतविशेषसाधने हेतुत्वाभावात् ताद्धर्म्याभावेऽपि लक्षणत्वं भवतु नाम, जन्मादिसमुदायस्य लक्ष्यगतनिरतिशयबृहत्त्वसिद्धौ हेतुभावेनैवोपयोग इति तस्य कथं ताद्धर्म्याभावे लक्षणत्वमुपपद्यत इति चेदुपपद्यत एव, निमित्तोपादानसाधारणहेतुहेतुमद्भावसम्बन्धेन जन्मादिकस्य लक्षणीकरणात्, तेन सम्बन्धेन तस्य व्यभिचाराप्रसङ्गात्, धूमादीनामपि तेन तेन सम्बन्धविशेषेणैव व्याप्तेरुपपादनीयत्वात्। जन्मादिकारणत्वस्य लक्षणीकरणे ताद्धर्म्यमपि लभ्यते किमनेन प्रयासेनेति चेन्न, तस्य लक्षणी-

विशिष्टमष्टाभिधानाधिकरणं शिवतत्त्वं तदेव जगत्कारणं ब्रह्मेत्युच्यते। आनन्दादीनामत्रैव धर्माणां पर्यवसानं भवति। सर्वज्ञत्वं नित्यतृप्तत्वमनादिबोधत्वं स्वतन्त्रत्वमलुप्तशक्तिमत्त्व-

---

करणेऽपि सम्बन्धान्तरेण तस्य ब्रह्मान्यवृत्तितया व्यभिचारवारणाय सम्बन्धविशेषविवक्षावश्यंभावे लाघवाज्जन्मादिकस्यैव सम्बन्धविशेषेण लक्षणीकर्तुं युक्तत्वादित्यभिप्रायः।

एवं लक्षणसामान्यप्रयोजनासम्भवशङ्का निराकृता। अथ विशिष्य ब्रह्मलक्षणस्य विवक्षितं प्रयोजनं न सम्भवतीत्युपन्यस्तां शङ्कां परिहर्तुमुपक्रमते—यदित्यादिना। शिवो निरतिशयबृहत्त्वशाली। जगज्जन्मादिसमुदायादिहेतुभावेन प्रकृतलक्षणस्य विशिष्य विवक्षितमपि प्रयोजनं सम्भवति। बहुषु कारणत्वप्रतिपादकवाक्यानां मुख्यार्थासम्भवेन किञ्चिद्विषयाणामेव तेषां मुख्यार्थपरत्वे वक्तव्ये किंविषयवाक्यानां तद्युक्तमिति तत्र न्यायगवेषणायां शिवस्य पञ्चकृत्यकारित्वोपपादकसर्वज्ञत्वादिरूपषडङ्गप्रसिद्ध्या जन्मादिकारणत्वतदुपपादकप्रवृत्तिनिमित्तकभवादिनामाष्टकाभिधेयत्वप्रसिद्ध्या च तद्विषयाणामेव कारणवाक्यानां यथाश्रुतार्थपरत्वस्य न्याय्यत्वावधारणात्, जन्मादिकारणत्वोपपादकगुणजातस्य तत्र क्लृप्ततया तदाक्षेपानपेक्षणेन बुद्धिलाघवात्, जन्मादिकारणत्वादिप्रवृत्तिनिमित्तकनामाष्टकसंवादाच्चेत्याशयेन सर्वज्ञत्वादिविशिष्टमष्टाभिधानाधिकरणमिति विशेषणद्वयमुपन्यस्तम्। शिवशब्दप्रवृत्तिनिमित्तपर्यालोचनयाप्युक्तार्थसिद्धिमभिप्रेत्य तेन विशेष्यनिर्देशः कृतः। शिव एव तत्त्वं शिवतत्त्वम्। तत्त्वशब्देनात्र कालत्रयवर्ति शाश्वतं वस्तूच्यते। अत एव—"ब्रह्म वेदा ब्रह्म तपो ब्रह्म ज्ञानं च शाश्वतम्" इति प्राचीननानार्थकोशार्थसंग्राहके—"वेदस्तत्त्वं तपो ब्रह्म"(३.३.११४) इत्यमरकोशे शाश्वतज्ञानशब्दस्थाने तत्त्वशब्दप्रयोगः। एवं चात्र तत्त्वशब्दप्रयोगेण शिवस्य—"न सन्न चासच्छिव एव केवलः"(श्वे० उ० ४.१८) इति मन्त्रोक्तसर्गाद्यकालावस्थायित्वप्रदर्शनेन कारणवाक्यान्तरेभ्यः प्रबलेन तेनापि जगत्कारणत्वस्य शिवैकान्त्यसिद्धिरिति सूच्यते।

एवं षडङ्गनामाष्टकशिवशब्दप्रवृत्तिनिमित्त'यदातमो'मन्त्रप्राबल्यपर्यालोचनया सच्चिदानन्दरूपतापि छागपशुन्यायेन शिव एवावतरतीत्याह—आनन्दादीनामिति। एवं यत्सर्वज्ञत्वादिविशिष्टमित्यादिना संक्षिप्तमर्थजातं प्रपञ्चेनोपपादयति—सर्वज्ञत्वमित्यादिना अत आनन्दादीनां विकल्पादिचिन्ता

मनन्तशक्तिमत्त्वं चेत्येतानि सर्वज्ञत्वादीनि। नित्यापरोक्षानपेक्षितबाह्यकरणनिष्कलङ्कानुभवविषयनिखिलवस्तुत्वमिह सर्वज्ञत्वम्। "यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः" (मु० उ० १.१.९) इत्यादिभिरिदं ब्रह्मणः सिद्धम्। अनेन सकलचेतनबहुविधकर्मफलभोगानुकूलतत्तच्छरीरनिर्माणोपायसामग्रीविशेषज्ञं ब्रह्म निमित्तं भवति। निरस्तसमस्तोपप्लवकलङ्कनिरतिशयानन्दपरिपूर्णत्वमिह नित्यतृप्तत्वम्। अत एव "आनन्दो ब्रह्म" (तै० उ० ३.६) इति श्रूयते। यः खलु "अन्योऽन्तर आत्माऽऽनन्दमयः" (तै० उ० २.५) इति प्रस्तुत्य

निरर्थिकेत्यन्तेन ग्रन्थसन्दर्भेण। तत्र सर्वज्ञत्वादिषट्कं प्राणिनिकायस्य तत्तदनुष्ठितकर्मज्ञानानुसारेण वैषम्यनैर्घृण्ये विनाऽनादिकालप्रवृत्तपञ्चकृत्यकर्तृतायामुपयुज्यते। यः खलु सृज्यपालनीयसंहार्यतिरोभावनीयानुग्राह्यजातमशेषविशेषसंहितमनादिसिद्धेन बोधेन सदा प्रत्यक्षमनुभवति, तदनुकूलानाद्यसंख्येयशक्तिशाली च भवति, सर्वं च प्रपञ्चमधितिष्ठति, स्वयं निरतिशयानन्दनित्यतृप्ततया स्वतःसिद्धतत्त्वावबोधोपहतभक्ताभक्तविषयरागद्वेषोन्मेषतया च स्वार्थपरार्थप्रयुक्तसृष्ट्यादिवैषम्यनैर्घृण्यरहितश्च भवति, स एवास्य प्रपञ्चस्योक्तविधया पञ्चकृत्यानि कर्तुं शक्नोति। अलुप्तशक्तिकत्वमनन्तशक्तिकत्वं च प्रपञ्चोपादानभावेऽप्युपयुज्यते। भाष्ये सर्वज्ञतादिषु कस्यचित् क्वचिदुपयोगवर्णनं यथार्हमन्यत्राप्युपयोगस्योपलक्षणम्। एवं नामाष्टके शिवशब्दे च यथासम्भवं जन्मादिकारणत्वतदुपपादकप्रवृत्तिनिमित्तके भाष्यकृतं कस्यचित् कयाचिद् व्युत्पत्त्या प्रवृत्तिनिमित्तप्रदर्शनं व्युत्पत्त्यन्तरेण सम्भवतां प्रवृत्तिनिमित्तान्तराणामप्युपलक्षणम्। अत्र व्याख्येयांशव्याख्यानपूर्वकमपेक्षितार्थानाविष्कुर्मः।

ननु—"आनन्दो ब्रह्म" (तै० उ० ३.६) इति श्रुतिरानन्दस्य वैषयिकसुखन्यायप्राप्तदुःखमिश्रणराहित्यरूपं निरस्तसमस्तोपप्लवकलङ्कत्वं निरतिशयत्वं च न प्रतिपादयति, नाप्यानन्दवत्त्वं ब्रह्मणः प्रतिपादयति, किन्तु तस्यानन्दरूपत्वमेवेत्याशङ्क्य पूर्वसन्दर्भानुसारेणोदाहृतश्रुतेस्तथाभूतानन्दवद् ब्रह्मेत्यर्थे पर्यवसानं दर्शयति—यः खल्वित्यादिना। प्रस्तुत्येति। "अन्योऽन्तर आत्माऽऽनन्दमयः। तस्य प्रियमेव शिरः" (तै० उ० २.५)

"सैषानन्दस्य मीमांसा भवति" (तै० उ० २.८) इत्यारभ्य अभ्यासान्निरतिशयानन्दशिरस्कत्वेन "स एको ब्रह्मण आनन्दः" (तै० उ० २.८) इति निरूपितः। परब्रह्मधर्मत्वेन च स एव "आनन्दो ब्रह्म" (तै० उ० ३.६) इति प्रचुरत्वाद् ब्रह्मत्वेनोपचर्यते। तादृशानन्दभोगरसिकं ब्रह्म नित्यतृप्त-मित्युच्यते। ब्रह्मणो मनसैव महानन्दानुभवो न बाह्यकरण-द्वारा। तथा हि श्रुतिः—"आकाशशरीरं ब्रह्म सत्यात्म प्राणारामं मनआनन्दं शान्तिसमृद्धममृतम्" (तै० उ० १.६) इति। आकाशत इत्याकाशः प्रकाशश्चिदम्बरमुच्यते। न भूताकाशः, विशेषाभावात्। निखिलजगदण्डषण्डबुद्बुद-निकुरुम्बजलधिस्थानीया परप्रकृतिरूपा परमशक्तिर्हि चिदम्बर-मुच्यते। तत्स्वरूपं ब्रह्म आकाशशरीरम्। परप्रकृतित्वं

इत्यादिप्रियमोदाद्यात्मकसुखविशेषरूपशिरःपक्षाद्यवयवयुक्तत्वेनानन्दमयं प्र-स्तुत्येत्यर्थः। तेन सैन्धवखिल्ये लवणरसविरोधिनो रसान्तरस्येवानन्दमये प्रियमोदादिरूपसर्वावयवयुक्ते सुखविरोधिनो दुःखस्यानुप्रवेशो नास्तीत्याद्य-विशेषणार्थसद्भावः सूचितः। निरतिशयशिरस्कत्वेनाभ्यासादित्यनेन द्वितीयविशेषणार्थो दर्शितः। 'ब्रह्मण आनन्दः' इति श्रुतिभागोदाहरेण आनन्दस्य ब्रह्मधर्मत्वं दर्शितम्।

ननु ब्रह्मधर्मस्तथाभूतानन्दः कथमिह वाक्ये ब्रह्मेति व्यपदिश्यत इत्या-शङ्क्य तद्गुणसारत्वादिति वक्ष्यमाणन्यायेनाभेदोपचारादित्याह—प्रचुरत्वाद् ब्रह्मत्वेनोपचर्यत इति। सर्वज्ञत्वनिरुक्तावनपेक्षितबाह्यकरणेति करणे बाह्यत्वविशेषणेन सूचितं ब्रह्मणो मनःसद्भावमिहानन्दानुभवोपयोगितया निरूपयति—मनसैवेति। न बाह्येति। स्रक्चन्दनादिविषयसुखानुभववद्बाह्य-करणं परम्परयापि नापेक्षत इत्यर्थः। नन्वाकाशशब्दः प्रसिद्धिप्राचुर्याद् भूताकाशपरः स्यादित्याशङ्क्याह—विशेषाभावादिति। सर्वप्रपञ्चशरीरकस्य भूताकाशशरीरप्रतिपादनमात्रेण न कश्चिदतिशयो वर्णितो भवतीत्यर्थः। प्रसिद्धभूताकाशरूपाम्बरव्यतिरेकेण किमिदं चिदम्बरं नामेत्याकाङ्क्षायामा-ह—निखिलेति। सकलप्रपञ्चपरिणामिनी परमेश्वरस्य चिच्छक्तिश्चिदम्बर-

चिदाकाशस्य—"सर्वाणि ह वा इमानि भूतानि आकाशादेव समुत्पद्यन्ते आकाशं प्रत्यस्तं यन्ति" (छा० उ० १.९.१), "आकाशो ह वै नामरूपयोर्निर्वहिता" (छा० उ० ८.१४.१) इत्यादिश्रुतिसिद्धम् । सत्यात्म सत्तारूपम् । प्राणारामम्, प्राणः सकलाधारभूता चिदम्बरप्रकृतिरुच्यते । स्वरूपभूतायां तस्यामारामो यस्य तत् प्राणारामम् । मनआनन्दम्, मनस्येवानन्दो यस्य न बाह्यकरणे तन्मन आनन्दम् । अत्राप्यानन्द इति चिदम्बरप्रकृतिरुच्यते । तथा च श्रूयते—"को ह्येवान्यात् कः प्राण्याद् यदेष आकाश आनन्दो न स्यात्" (तै० उ० २.७)

मुच्यत इत्यर्थः । तत्स्वरूपमिति । स एवाकाशः स्वरूपं घटस्य घटत्ववत् स्वरूपनिरूपकधर्मोऽस्येति बहुव्रीहिः ।

चिच्छक्तिः परमेश्वरस्य जगद्व्यापारे छेदने कुठारवत् करणभूतैव केवलं न तु प्रपञ्चप्रकृतिरिति केचिदाहुः । तन्निरासार्थमाह—परप्रकृतित्वमिति । "यस्य सा परमा देवी शक्तिराकाशसंज्ञिता । अनन्तैश्वर्ययोगात्मा महेशो दृश्यते हि सः ॥" (२.३१.३६) इति कौर्मवचने चिच्छक्तेराकाशसंज्ञास्तित्ववर्णनादुदाहृतश्रुत्योराकाशशब्दश्चिच्छक्तिपर इति भावः । सत्तारूपमिति । सर्वत्र प्रपञ्चे सत्सदित्यनुगतप्रत्ययविषयतया स्फुरन्ती सर्वप्रकृतिभूता सैव चिच्छक्तिः सत्ता । सा रूपमस्येति बहुव्रीहिः । सत्यात्मेति श्रुतौ सत्यशब्देन "सच्च त्यच्चाभवत्" (तै० उ० २.६) इति श्रुतेः सत्त्यदात्मकसकलप्रपञ्चाकारपरिणामिनी तदनुगतसत्तारूपा चिच्छक्तिरुच्यते । सत्तारूपमित्यर्थंतस्तद्व्याख्यानम् । सकलाधारभूतेति । प्राणशब्दस्य गौणप्रवृत्तिनिमित्तोक्तिः । प्राणवायुर्हि सर्वेषां भूतानां शरीरस्येन्द्रियाणां चाधारः, "मा मोहमापद्यथ । अहमेवैतत् पञ्चधात्मानं प्रविभज्यैतद्बाणमवष्टभ्य धारयामि" (प्र० उ० २.३) इति प्राणसंवादे वागादीन् प्राणान् प्रति मुख्यप्राणवचनाच्चिच्छक्तिः समुख्यप्राणस्य सर्वस्यापि प्रपञ्चस्याधारभूतेत्यस्यामतिशयितप्राणगुणवत्त्वेन ताच्छब्द्यमिति भावः । मनस्येवानन्दो न बाह्यकरण इति । शरीरे सुखमितिवदौपचारिकः सप्तम्याऽधिकरणत्वनिर्देशः । को ह्येवान्यादिति । अननं प्राणवायुव्यापारः, प्राणनं चक्षुरादिव्यापारः । यद्वा अननं सांसारिकसुखानुभवः,

इति । शान्तिसमृद्धं शिवतासम्पन्नम् । अमृतमनादिमुक्तम् । अत्र सच्चिदानन्दरूपपरमाकाशरूपं ब्रह्म स्वरूपानन्दं मनसैवानुभवति बाह्यकरणनिरपेक्षमिति सिद्धं मनआनन्दमित्यनेन । इदमेव ज्ञापकं ब्रह्मभावमापन्नानां मुक्तानां निरतिशयस्वरूपानन्दानुभवसाधनं बाह्यकरणनिरपेक्षमन्तःकरणमस्तीति । अतो बाह्यकरणनिरपेक्षेण शुद्धबोधशक्तिरूपेण मनसा स्वरूपानन्दमनन्तमनुभवद् ब्रह्म नित्यतृप्तम् । न तस्य कदापि बाह्यसांसारिकसुखलवापेक्षा भवतीत्यर्थः । स्वतःसिद्धनिरतिशयज्ञानवत्त्वमनादिबोधत्वम् । यत्स्वरूपानन्दानुभवसाधनमन्तःकरणं ज्ञानं तदनादिसिद्धमेव । अतोऽनादिबोधं ब्रह्म संसारनिवर्तकस्य ज्ञानस्यानादिसिद्धत्वान्नित्यनिवृत्तसंसारदोषं

प्राणनमापवर्गिकसुखानुभवः । तदुभयमपि परमाकाशरूपपरशक्त्यानन्दाधीनमेव, सांसारिकसुखानामुपाधितिरोधानकृताविर्भावतारतम्यशालितल्लेशविशेषरूपत्वात्, तस्यैव परमानन्दस्य मुक्त्यनुभाव्यसुखत्वाच्च । "एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति" (बृ० उ० ४.३.३२) इति, "स एको ब्रह्मण आनन्दः" (तै० उ० २.८) इति, "श्रोत्रियस्य चाकामहतस्य" (तै० उ० २.८) इति च श्रवणात् । शिवतासम्पन्नं नित्यनिर्धूतनिखिलदोषमनादिमुक्तं नित्याविर्भूतसत्यसङ्कल्पत्वादिमङ्गल्यगुणगणम् ।

आकाशशरीरमित्यादिश्रुतिव्याख्यानं प्रकृते सङ्गमयति—अत्रेति । प्रसङ्गान्मनआनन्दमिति लिङ्गानुगतं मुक्तानां मनःसद्भावं दर्शयति—इदमेवेति । मुक्तेर्ब्रह्मसाम्यरूपत्वाद् ब्रह्मणो मनस्यानन्दानुभवो मुक्तानामपि तथाभावे लिङ्गमिति भावः । भट्टभास्करेणापि यजुर्वेदारण्यकभाष्ये मनआनन्दमिति वाक्यमित्थमेव व्याख्यायोक्तम्—"इदमेव लिङ्गं मुक्तात्मनामीश्वरस्य च मनोविशेषोऽस्तीत्यत्र" इति । नित्यतृप्तत्वस्य स्वार्थप्रयुक्तसृष्टिवैषम्यप्रसक्त्यभावसिद्धावुपयोगमाह—न तस्य कदापीति । अनादिबोधस्य परार्थप्रवृत्तिसृष्टिवैषम्यापादकरागादिदोषाभावसिद्धावुपयोगमाह—अतोऽनादिबोधमिति । ज्ञाज्ञौ द्वाविति, भोक्ता भोज्यमिति, विद्याविद्ये इति च श्वेताश्वतरोपनिषदि पशुपाशपतिनिर्णायकानां मन्त्राणामेकैकः पादः । ज्ञाज्ञौ सर्वज्ञ-

"शान्तिसमृद्धममृतम्" (तै० उ० १.६) इति श्रूयते। अन्यप्रेष्यताकार्पण्यरहितत्वेन स्ववशीकृतस्वेतरसकलवस्तुत्वं स्वातन्त्र्यम्। "ज्ञाज्ञौ द्वावजावीशानीशौ" (श्वे० उ० १.९), "भोक्ता भोज्यं प्रेरितारं च मत्वा" (श्वे० उ० १.१२), "विद्याविद्ये ईशते यस्तु सोऽन्यः" (श्वे० उ० ५.१) इत्यादिषु ब्रह्मणो जडाजडप्रपञ्चप्रेरकत्वेन स्वतन्त्रत्वं सिद्धम्। सर्वविषयस्वातन्त्र्येण ब्रह्मणः सर्वकर्तृत्वसिद्धिः। स्वाभाविकशक्तिमत्त्वमलुप्तशक्तिमत्त्वम्। तथा हि श्रवणम्—"पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च" (श्वे० उ० ६.८) इत्यादि। चिदचित्प्रपञ्चरूपशक्तिविशिष्टत्वं स्वाभाविकमेव ब्रह्मणः कदाचिदपि न निर्विशेषत्वमित्यनेन सिद्धम्। अपरिच्छिन्नशक्तिविशिष्टत्वमनन्तशक्तिमत्त्वम्। अनन्ताभिरेव शक्तिभिर्जगतो जनकं शासकं च ब्रह्म भवति। तथा हि श्रूयते—"एको रुद्रो न द्वितीयाय

किञ्चिज्ज्ञौ द्वावजौ सनातनौ। ईशानीशौ नियन्तृनियम्यौ। भोक्ता भोज्यं पशुः पाशश्चेति द्वयम्। तयोः प्रेरकं परमेश्वरं च मत्वा ब्रह्मभावमेतीत्युत्तरत्रान्वयः। यस्तु विद्याविद्ये पशुपाशौ ईशते ईष्टे, विकरणव्यत्ययो वचनव्यत्ययो वा, स ताभ्यामन्यः।

इत्यादिष्वित्ति। आदिशब्देन—"क्षरं प्रधानममृताक्षरो हरः क्षरात्मनापीशते देव एकः" (श्वे० उ० १.१०), "वशी सर्वस्य लोकस्य स्थावरस्य चरस्य च" (श्वे० उ० ३.१८), "प्रधानक्षेत्रज्ञपतिर्गुणेशः" (श्वे० उ० ६.१६) इत्यादिमन्त्रभागसंग्रहः। शक्तिविशिष्टत्वं स्वाभाविकमेवेति। उक्तं हि कूर्मपुराणे—"किं तत्परतरं तत्त्वं का विभूतिर्जनार्दन" (१.१.९१) इति पृष्टवन्तमिन्द्रद्युम्नं प्रति भगवता—"परात्परतरं तत्त्वं परब्रह्मैकमव्ययम्। नित्यानन्दं स्वयंज्योतिरक्षरं तमसः परम्॥ ऐश्वर्यं तस्य तन्नित्यविभूतिरिति गीयते॥"(१.१.९२-९३) इति। एको रुद्र इति। एक एव रुद्रः। द्वितीयाय द्वितीयस्तत्सदृशः। प्रातिपदिकार्थे छान्दसश्चतुर्थीप्रयोगः।

तस्थुः" (श्वे० उ० ३.२), "तुरीयमिमं लोकमीशत ईषनीयुर्जननीयुः", "यः सर्वांल्लोकानीशत ईशनीभिर्जननीभिः परमशक्तिभिः" (अथर्वशिर० ३.७) इत्यादि । अनन्तशक्तिमत्त्वाद् ब्रह्मणोऽपरिच्छिन्नप्रपञ्चसमवायिकारणत्वं सिद्ध्यति । अष्टाभिधानाधिकरणमिति भवशर्वेशानपशुपतिरुद्रोग्रभीममहादेवाभिधानाष्टकस्याधिकरणं वाच्यं परं ब्रह्म । अस्य सकलशब्दवाच्यत्वेऽपि परभावबोधकत्वेन मुख्यतया भवादिशब्दाभिधेयत्वेन नान्यशब्दाभिधेयत्वाभाव-

---

न तस्थुः न तस्थौ । छान्दसं बहुवचनम् । इमं लोकं शुद्धमिश्राशुद्धाध्वरूपं लोकत्रयम्, तुरीयमुक्तलोकत्रयापेक्षया चतुर्थम्—"अध्वनामध्वपते श्रेष्ठस्याध्वनः पारमशीय" (आ० म० ब्रा० २.३.३२) इति सर्वाधिकारिप्रेप्सनीयत्वेन श्रुतिसिद्धमध्वनां मध्येऽतिश्रेष्ठस्य शुद्धाध्वनोऽप्युपरि स्थितं परमाकाशरूपं परमपदं च । ईशते ईष्टे । ईशनीयुः ईशनानुकूलेच्छाशक्तिमान् । जननीयुः जननानुकूलेच्छाशक्तिमान् । ईशनमैश्वर्यम् । जननं जनयितृत्वम् । जनेर्ण्यन्तात्ल्युट् । ईशनमात्मन इच्छति जननमात्मन इच्छतीत्यर्थयोः—"सुप आत्मनः क्यच्" (पा० ३.१.८) इति क्यचि "क्याच्छन्दसि" (पा० ३.२.१७०) इत्युप्रत्यये च रूपद्वयसिद्धिः । "न छन्दस्यपुत्रस्य" (पा० ७.४.३५) इति सूत्रेण "क्यचि च" (पा० ७.४ ३३) इति प्राप्तस्य ईत्वस्य निषेधस्तु न भवति, सर्वविधीनां छन्दसि विकल्पितत्वात् । ईशनीभिः ईशनकारिणीभिः । जननीभिः जननकारिणीभिः । पूर्वोदाहृतश्रुतावीशनजननानुकूलेच्छाशक्तिमत्त्वमुक्तम्, इह तदनुकूलक्रियाशक्तिमत्त्वमिति भेदः ।

नन्वष्टाभिधानाधिकरणमिति किमुच्यते । सन्ति हि शम्भुशङ्करादीन्यन्यान्यपि शिवस्य नामानि । किं बहुना, "इमा रुद्राय स्थिरधन्वने गिरः" (ऋ० ७.४६.१) इति श्रुतिः प्रत्यक्षादिसन्निधापितसकलशब्दवाच्यत्वं शिवस्य प्रतिपादयति । आश्वलायनोऽपि शिवं प्रस्तुत्याह—"सर्वाणि ह वा एतस्य नामधेयानि" इति । तस्मादिदमनुपपन्नमित्याशङ्क्याह—अस्य सकलशब्देति । परभावबोधकत्वेनेति । विशिष्य जन्मादिकारणत्वतदुपपादकगुणबोधकत्वेनेत्यर्थः । इदमुपलक्षणम् । भवादिनामाष्टकस्य आप-

प्रसङ्गः । सर्वत्र सदा भवतीति भवशब्दवाच्यं ब्रह्म । भूधातोः सत्तार्थकत्वात् सर्वत्रानुवर्तमानं सद्रूपं ब्रह्मेति विज्ञायते । तथा हि श्रुतिः—"सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्" (छा० उ० ६.२.१), "सत्यं ज्ञानमनन्तं

स्तम्बीयानां मन्त्रेष्वाम्नानेनापस्तम्बसूत्रे ईशानबलौ बोधायनाश्वलायनसूत्रयोः शूलगवहोमे बोधायनसूत्रे महादेवस्य प्रतिष्ठाविधौ नित्यपूजाविधौ प्रदोषपूजाविधौ च होमतर्पणार्चनेषु विनियोगवर्णनेन च मुख्यत्वं द्रष्टव्यम् । तथा च—"षट्त्रिंशदहो वा एष यज्ञो यद् द्वादशाहः" इति श्रुतेः षट्त्रिंशताहोभिः साध्यस्यापि क्रतोर्द्वादशसौत्यान्यहानि मुख्यानीति यथा द्वादशाह इति व्यपदेशः, तथैवात्राष्टाभिधानाधिकरणमित्युक्तिरिति भावः । सर्वत्र सदेति । यद्यपि भवशब्दस्य पचाद्यच्प्रत्ययान्तस्य भवनकर्तृमात्रे शक्तिः, तथापि—"तत्र भवः" (पा० ४.३.५३) इति व्याकरण इव पद्मभवादिनामस्विव च भवनाधिकरणविशेषसमर्पकोपपदादिसङ्कोचकाभावात् सर्वत्र सदा भवनमर्थो लभ्यत इति भावः ।

अस्त्वेवम्, तथापि भवशब्दस्य परभावबोधकत्वं कथं सिद्ध्यतीत्याशङ्क्य—"सदेव सोम्येदमग्र आसीत्" (छा० उ० ६.२.१) इति श्रुतजगत्कारणसमर्पकसच्छब्दपर्यायत्वप्राप्तेरित्युपपादयति—सर्वत्रानुवर्तमानमित्यादिना । भवशब्दस्तावद् भूधातोरस्तिधातोर्वा पचाद्यच्प्रत्ययान्तः, इत्युभयथापि सत्तार्थकत्वाविशेषात् तस्यास्तिधातोः शत्रन्तस्य सच्छब्दस्य चैकार्थ्यमस्तीति भावः । कारणवाक्यान्तरश्रुतसत्यशब्दस्य—"सत्ये साधौ च सच्छब्दः" इति [1]भारतोक्तेः सच्छब्दपर्यायत्वात् तदैकार्थ्यमपि लभ्यत इत्यभिप्रायेण—"सत्यं ज्ञानम्" (तै० उ० २.१), "सत्यात्म" (तै० उ० १.६) इति श्रुत्योरुदाहरणम् । न केवलं सच्छब्दभवशब्दयोः शक्तिपर्यालोचनयैकार्थ्यम्, किन्तु—"सदेव सोम्येदमग्र आसीत्" (छा० उ० ६.२.१) इति वाक्यश्रुतसच्छब्दस्य—"पुरुषो वै रुद्रः सन्महः" (महाना० १३.२) इति श्रुत्यन्तरे शिवपर्यवसायित्वस्य कण्ठतः प्रदर्शितत्वादपि शिवनाम्नो भवशब्दस्य तदैकार्थ्यमित्यभिप्रायेण सन्मह इति श्रुत्युदाहरणम् ।

---

१. महाभारतपादसूच्यां नोपलभ्यते वचनमिदम् ।

ब्रह्म" (तै० उ० २.१), "सत्यात्म प्राणारामं मनआनन्दम्" (तै० उ० १.६), "सन्महः"(महाना० १३.२) इत्यादि । 'सन् घटः, सन् पटः' इति सर्ववस्तुष्वनुगतवृत्त्या सद्रूपस्य ब्रह्मणः सर्वोपादानत्वं सिद्ध्यति । मृदुपरक्तं हि घटादिकं मृदुपादानकमिष्यते । ततः सद्रूपं ब्रह्म भवशब्दवाच्यं भवति । शर्वशब्देन "शॄ हिंसायाम्" (१४८९ क्र्या०) इति धात्वर्थवशात् सकलसंहर्तृ ब्रह्म प्रतिपाद्यते । "तस्मादुपसंहर्त्रे महाग्रासाय वै नमः" (अ०शि०उ० ३.३), "यस्य ब्रह्म च क्षत्रं च उभे भवत ओदनः" (कठो० २.२५) इति सर्वसंहर्तृ ब्रह्म

ननु भवशब्दस्य त्रैकालिकसद्रूपवस्तुवाचित्वमुक्तम् । सच्छब्दस्तु सर्गाद्यकालमात्रावस्थायिसद्रूपवस्तुवाची, आसीदिति लङाख्यातस्य भूतार्थवाचित्वात् । न च जगदुपादानस्य सतो यावज्जगदनुवृत्तेरपेक्षिततत्वात् तस्य सर्गाद्यकालमात्रावस्थायित्वमयुक्तमिति वाच्यम्, घटशरावादिरूपापन्ने मृत्पिण्डे पिण्डरूपस्येव प्रपञ्चरूपापन्ने सति सद्रूपस्य निवृत्तिसम्भवात् । अत एव 'इदं घटशरावादिकं पूर्वेद्युर्मृत्पिण्ड एवासीत्' इति लोकव्यवहारसमानैव "सदेव सोम्येदमग्र आसीत्" इति वाक्यच्छाया दृश्यते । "सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्" (छा० उ० ६.२.१) इत्येकस्यैव सतः सर्गाद्यसमयेऽवस्थानोक्त्या तस्य भवशब्दोक्तस्य सतश्चैक्यं सिद्ध्यति, अन्यथा सर्गाद्यसमये सद्द्वयावस्थानप्रसङ्गादिति चेदेवं तर्हि भवशब्दस्यैव त्रैकालिकसद्रूपवस्तुवाचित्वं त्यक्तव्यमापद्यते, उपपत्तिसहस्रेणापि व्यावृत्तानुवृत्तसत्ताविशिष्टयोरैक्यसमर्थनायोगात् । एकमेवेति श्रुत्यनुसारेण भवशब्दस्य सङ्कोचन्यायमात्रप्राप्तरूपविशेषवाचित्वस्य त्यक्तुमशक्यत्वादित्यत आह— सन् घट इति ।

यथा मृद्घटो मृच्छराव इत्यादिव्यवहारान्मृद्रूपानुवृत्त्या मृदो घटशरावाद्युपादानत्वम्, तथा 'सन् घटः, सन् पटः' इत्यादिव्यवहारात् सद्रूपानुवृत्त्यैव ब्रह्मणः सर्वोपादानत्वम् । न तु मृत्पिण्डरूपस्येव तस्मिन् सद्रूपस्य निवृत्तिरस्ति । आसीदिति प्रयोगस्त्वविभक्तभूतभौतिकनामरूपकेवलसद्रूपाभिप्रायेण । यथा 'पूर्वेद्युरिदं घटशरावादिकं सर्वं मृदेवासीत्' इति व्यवहारो घटशरावादिनामरूपविभागरहितकेवलमृद्रूपाभिप्रायेणेति भावः ।

श्रूयते । निरुपाधिकपरमैश्वर्यविशिष्टत्वादीशानशब्दवाच्यं ब्रह्म, "य इमाँल्लोकानीशत ईशनीभिः"(श्वे० उ० ३.२) इति श्रवणात् । ईश्वरस्येशितव्यापेक्षतया पशुपतिशब्दवाच्यं ब्रह्म । तथा हि श्रूयते—"येषामीशे पशुपतिः पशूनां चतुष्पदामुत च द्विपदाम्" (तै० सं० ३.१.४.१) इत्यादि । पाशसम्बन्धेन पशुत्वव्यवहारात् पशुग्रहणात् पशुपाशद्वयं च गृहीतं भवति ।

'भवत्यस्मात् सर्वम्' इति भवशब्दव्युत्पादने तु जगत्कारणत्वं ततो वाच्यवृत्त्यैव लभ्यते, "ॠदोरप्" (पा० ३.३.५७) इत्यप्प्रत्ययस्य बहुलग्रहणादपादानार्थेऽपि वृत्तिसम्भवात् । यद्यपि "श्रिणीभुवोऽनुपसर्गे" (पा० ३.३.२४) इति विधानादनुपसर्गाद् भूधातोर्घञ्प्रत्ययेन भाव्यम्, तथाप्यस्त्यादेशाद् भुवोऽयम् "ॠदोरप्" (पा० ३.३.५७) इत्यप्प्रत्यय उपपद्यते, "श्रिणीभुव" (पा० ३.३.२४) इति सूत्रे श्रिणीसाहचर्येण भूधातोरेव ग्रहणमित्यवगमात् । किञ्च, बहुलग्रहणादेव भूधातोरप्ययं प्रत्यय उपपद्यते । णीञ्धातोरेव यतो नय इति रूपसिद्धिः । उभयथापि भवशब्दस्य भवत्यस्मात् सर्वमित्यर्थग्रहणे न काचिदनुपपत्तिः । तथैव हरिवंशे कृष्णकृतशिवस्तोत्रे तस्यार्थवर्णनं कृतम्—"भूतं यस्माज्जगदत्यन्तवीर त्वत्तोऽव्यक्तादक्षरादक्षरेश । तस्मादाहुर्भव इत्येव भूतं सर्वेश्वराणां महतामप्युदारम् ॥" इति । "कृगृशृदृभ्यो वः" (१६१ उ०) इति शृधातोर्वप्रत्ययान्तः शर्वशब्दः सङ्कोचकाभावन्यायेन "तस्मादुपसंहर्त्रे" (अथर्व० उ० ३.३) इत्यादिश्रुत्यन्तरसंवादेन च सकलसंहर्तृवाचक इत्यर्थः ।

निरुपाधिकेति । "स्थेशभासपिसकसो वरच्" (पा० ३.२.१७५) इति ताच्छील्यार्थविहितवरच्प्रत्ययान्तेश्वरशब्दसमानार्थ ईशानशब्दः–"ताच्छील्यवयोवचनशक्तिषु चानश्" (पा० ३.१.१२९) इति सूत्रविहितचानश्प्रत्ययान्तः स्वाभाविकमसंकुचितं शिवस्यैश्वर्यमाचष्ट इति भावः । तदैश्वर्यस्य सकलचेतनाचेतनविषयत्वं पशुपतिनाम्नापि सिद्ध्यतीत्याह—ईश्वरस्येति ।

ननु तेन पशुशब्दोक्तचेतनविषयत्वमैश्वर्यस्य सिद्ध्यति, न त्वचेतनविषयत्वमपीत्याशङ्क्याह—पशुग्रहणादिति । "ब्रह्माद्याः स्थावरान्ताश्च देवदेवस्य शूलिनः । पशवः परिकीर्त्यन्ते संसारवशवर्तिनः ॥ तेषां पतित्वाद्देवेशः शिवः पशुपतिः स्मृतः । मलमायादिभिः पाशैः स बध्नाति पशून्

अनेन चिदचिन्नियामकं ब्रह्मेति विज्ञायते। संसाररुग्द्रावकत्वाद् रुद्रशब्दवाच्यं ब्रह्म, "तरति शोकमात्मवित्" (छा० उ० ७.१.३) इति श्रवणात्। परतेजोभिरनभिभवनीयत्वादुग्रशब्दवाच्यत्वं ब्रह्मणः, "न तत्र सूर्यो भाति न

पतिः ॥ स एव मोचकस्तेषां भक्त्या सम्यगुपासितः। चतुर्विंशतितत्त्वानि मायाकर्मगुणा अमी ॥ विषया इति कथ्यन्ते पाशा जीवनिबन्धनाः। ब्रह्मादिस्तम्बपर्यन्तान् पशून् बध्वा महेश्वरः ॥ पाशैरेतैः पतिर्देवः कार्यं कारयति स्वकम् ॥" (लि० पु० २.९.११-२१) इति हि पुराणेषु श्रूयते। अनेनैतत्सिद्धं भवति—पशुपतिनामान्तर्गतः पशुशब्दो न गवाश्वादिप्रसिद्धपशुवाची, नापि "प्रमथेऽपि पशुः पुमान्" इति निघण्ट्वनुसारेण प्रमथवाची, किन्तु ब्रह्मादिस्थावरान्तसकलचेतनवाची। "येषामीशे" इति मन्त्रे द्विपाच्चतुष्पाद्ग्रहणमपि सकलचेतनोपलक्षणम्। तद्वाचित्वं च न शक्त्या, किन्तु गवाश्वमहिषादयस्तत्स्वामिभिः पाशैराबध्य स्ववशीकृत्य वाहनदोहनादिकर्मस्विव सर्वेऽपि चेतना शिवेन मलमायादिभिः पाशैराबध्य स्ववशीकृत्य स्वाराधकरूपतया यथाकथञ्चित् स्वाराधनोपयोगितया वा स्वकीयेषु तत्तद्वस्तुसामर्थ्याधीनेषु कार्येषु विनियुज्यन्त इत्यनेन सादृश्येन गौण्या वृत्त्येति। एवं च पश्वधिष्ठानं पाशाधिष्ठानाधीनमिति तदुक्त्यैव पाशाधिष्ठानमप्यर्थतो लभ्यत इति भावः।

संसारेति। रुजं द्रावयतीत्यस्मिन्नर्थे रुद्रशब्दः—"रुग् दुःखं दुःखहेतुत्वात् तद् द्रावयति नः प्रभुः। रुद्र इत्युच्यते तस्माच्छिवः परमकारणम् ॥" इति पौराणिकैर्व्युत्पादितः पृषोदरादिः। उत्पूर्वाद्गमेरुद्गच्छति उत्तरो भवतीत्यस्मिन्नर्थे "ऋज्रेन्द्राग्रवज्र"[1] इत्यादिना रन्प्रत्ययान्ततया निपातित उग्रशब्दः श्रेष्ठवाची। अत एव हि—"उग्रोऽस्युग्रोऽहं सजातेषु भूयासम्" (तै० सं० १.६.२.१) इति मन्त्रे जातिश्रैष्ठ्याशंसाविषये स्वस्मिन्नुग्रशब्दः प्रयुक्तः। इह तु सङ्कोचकाभावात् "यस्मात्परं नापरमस्ति किञ्चित्" (श्वे० उ० ३.९), "न तत्समश्चाभ्यधिकश्च दृश्यते" (श्वे० उ० ६.८) इत्यादिश्रुतिप्रतिपन्नपरभावबोधकसर्वोत्तरत्वपरः। यद्यप्यनेन नियामकान्तरानियम्यत्वं कार-

१. "ऋजेन्द्राग्रवज्रविप्रकुब्रचुब्रक्षुरखुरभद्रोग्रभेरभेलशुक्रशुक्लगौरवम्रेरामालाः" (१९६) इत्येतदौणादिकं सूत्रं वेदितव्यम्।

चन्द्रतारकम्'' (श्वे० उ० ६.१४) इति श्रवणात् । नियामकत्वेन निखिलचेतनभयहेतुतया भीमशब्दाभिधेयं ब्रह्म, ''भीषास्माद् वातः पवते'' (तै० उ० २.८) इत्यादिश्रुतेः । महत्त्वेन दीव्यमानतया महादेव इत्युच्यते शिवः । तथाऽथर्वशिरसि—''अत्र कस्मादुच्यते महादेवः ? यः सर्वान् भावान् परित्यज्यात्मज्ञानयोगैश्वर्ये महति महीयते तस्मादुच्यते महा-

---

णान्तराकार्यत्वमभिभावकान्तरानभिभवनीयत्वमित्यादि सर्वं सिद्ध्यति, तथापि तस्य सर्वस्योपलक्षणतयैकमुदाहरति—परतेजोभिरिति । ''भीमादयोऽपादाने'' (पा० ३.४.७४) इति निपातितो भीमशब्दोऽपि–''भीषास्माद् वातः पवते'' (तै० उ० २.८) इत्यादिश्रुतिप्रतिपन्नपरभावबोधकनियन्तृत्वप्रयुक्तमहाभयहेतुत्वपर इत्याह—नियामकत्वेनेति ।

महत्त्वेनेति । मानुषानन्दादिहैरण्यगर्भानन्दपर्यन्तसांसारिकभावापेक्षयोत्कृष्टे स्वात्मानन्दानुभवे विषये दीव्यति रमत इति देव इति सप्तमीसमासोऽत्र महादेवशब्देन विवक्षितः ।''आन्महतः समानाधिकरणजातीययोः'' (पा० ६.३.४६) इति सूत्रस्य ''अष्टन आ विभक्तौ'' (पा० ७.२.८४) इत्यात्वप्रकरणं विहायान्यत्र प्रणयनान्महत आदिति सूत्रयितव्ये 'आन्महतः' इति सूत्रणाच्च तत्र यथेष्टं योगविभाग इष्यते । तेनात्र महच्छब्दस्य देवशब्देन सामानाधिकरण्याभावेऽप्येकादशाष्टाकपालयोरिवात्वम् । एवं चानन्यत्र भावो विषयशब्दार्थ इति विषयसप्तमीमहिम्ना तुच्छान् सांसारिकान् सर्वान् भावान् परित्यज्य महति स्वात्मानन्दानुभव एव रमत इत्येतावानर्थो महादेवशब्दस्य लभ्यते । स्वात्मानन्दानुभवस्य महत्पदेन निर्देशश्च तन्महत्त्वस्येतरपरित्यागे हेतुत्वमभिप्रेत्येति द्योतयितुं महत्त्वेनेति तृतीयान्तनिर्देशः । देवनताच्छील्यं देवशब्दार्थमभिप्रेत्य दीव्यमानतयेति शानच्प्रत्ययान्तप्रयोगः ।

आत्मज्ञानयोगैश्वर्य इति । आत्मविषयं ज्ञानमात्मज्ञानं स्वात्मानन्दानुभवः, तेन योगो नित्यसम्बन्धः, तदेवैश्वर्यं महाविभूतिः, तत्र महीयते रमत इत्यर्थः । धातूनामनेकार्थत्वात् ''महीङ् पूजायाम्''(१९८३) इति कण्ड्वादिधातोर्देवनमर्थमङ्गीकृत्य तेन देवशब्दार्थप्रदर्शनं कृतम् । यद्वा महादेवशब्दान्तर्गतस्य महच्छब्दस्य शिवे वृत्तौ तत्प्रवृत्तिनिमित्तप्रदर्शनपरेयमाथर्व-

देवः'' (३.४) इति । निरस्तसमस्तसंसारकलङ्कतया निखिल-मङ्गलाधारतया शिवतत्त्वं यदवगम्यते, तदुक्तस्वभावतया

शिरसी श्रुतिः । ''पूज्यते यः सुरैर्नित्यं महांश्चैव प्रमाणतः । धातुर्महीति पूजायां महादेवस्ततः स्मृतः ॥'' इति साम्बपुराणोक्तिश्च । एवं ''भवाय देवाय स्वाहा''(आ०म० २.१८.१४) इत्यादिमूर्त्यष्टकमन्त्राम्नाने 'महते देवाय स्वाहा' इति पाठेन महादेवशब्दान्तर्गतस्य महच्छब्दस्यापि शिववृत्तितावगत्या प्रकृतभाष्ये तद्गतप्रवृत्तिनिमित्तप्रदर्शनौचित्यात् । ततश्च श्रुतौ 'महीयते' इत्येतावदेव महच्छब्दप्रवृत्तिनिमित्तप्रदर्शनपरम् । महीयते तदभिज्ञैः पूज्यत इत्यर्थः । ''वर्तमाने पृषद्बृहन्महज्जगच्छतृवच्च'' (६.४.३० वा०) इति सूत्रेण[1] पूज्यत इत्यर्थे महच्छब्दो निपातितः । किंभूत इत्ययमभिज्ञैः पूज्यत इत्याकाङ्क्षायां तुच्छान् विषयान् परित्यज्य स्वात्मानन्दानुभवे निविष्टोऽयमेवं स्वशैलीप्रकटनार्थमेव वस्त्रमाल्याभरणानुलेपनादिकं विहाय चर्मास्थिदामभुजगभस्मादिकं धारयतीति तच्चरितरहस्याभिज्ञैः पूज्यत इति दर्शयितुं श्रुतौ महतीत्यन्ते निविष्ट इत्यध्याहार्यम् । अयमर्थो भागवतेऽपि शिवं प्रस्तुत्य वर्णितः—''हसन्ति यस्याचरितं हि दुर्भगाः स्वात्मन्रतस्याविदुषः समीहितम् । यैर्वस्त्रमाल्याभरणानुलेपनैः श्वभोजनं स्वात्मतयोपलालितम् ॥ यस्यानवद्यं चरितं मनीषिणो गृणन्त्यविद्यापटलं विभित्सवः । यत्पादपद्मं महतां मनोऽलिभिर्निषेव्यते ब्रह्म रसासवार्थिभिः ॥'' (३.१४.२७-२८) इति । एवं च महत्त्वेन दीव्यमानतयेति भाष्यं महच्छब्ददेवशब्दयोः समानाधिकरणसमासस्थयोः परस्परनिरपेक्षप्रवृत्तिनिमित्तप्रदर्शनार्थं व्याख्येयम् ।

निरस्तेति । शाम्यन्त्यस्मिन् दोषा इत्यर्थे ''सर्वनिघृष्वरिष्वलष्वशिवपट्वप्रह्वेष्वा अस्वतन्त्रे''(उ० १५९) इति सूत्रे शमिधातोर्वन्प्रत्ययेन इत्वमलोपाभ्यां च शिवशब्दो निपातितः समस्तसांसारिकदोषराहित्यवाची । निखिलेति । निखिलानि शिवशब्दवाच्यानि मङ्गल्यान्यस्य सन्तीति मत्वर्थीयाच्प्रत्ययान्तः शिवशब्दः सकलमङ्गल्यगुणवत्त्ववाची । तदुक्तस्वभावतयेति । तत्प्रकृतं शिवतत्त्वं जगत्कारणत्वोपपादकसर्वज्ञत्वसर्व-

---

१. सूत्रेण, वार्त्तिकेन इत्यर्थः । वार्त्तिकस्यापि प्रामाण्यविषये सूत्रसादृश्यात् तथा निर्देश इति वेदितव्यम् ।

सकलजगज्जन्मादिकारणं भवति। तत्र तादृशमहिम्नि जगदुभयकारणत्वसम्भवात्। तदेतादृशमहत्त्वाद् ब्रह्मेत्युच्यते।

शक्तिकत्वादिगुणस्वभावतया सृष्टिवैषम्यनैर्घृण्यापादकदोषरहितस्वभावतया च जगदुभयकारणं भवितुमर्हतीति कृत्वा परस्परविरुद्धानेककारणवाक्यसमवायेऽपि तदेव जगज्जन्मादिकारणमङ्गीकर्तुं युक्तमित्यर्थः।

तदिति। तच्छिवतत्त्वमेतादृशमहत्त्वात् सर्वज्ञत्वादिकमङ्गषट्कमष्टाभिधानप्रवृत्तिनिमित्तजातमित्येवंप्रकारान्महत्त्वात् कारणत्वाक्षेपकलिङ्गाद् जगज्जन्मादिकारणत्वरूपब्रह्मलक्षणयोगीति तदेव "ब्रह्मविदाप्नोति परम्" (तै० उ० २.१) इत्यादिश्रुतिषु ब्रह्मेत्युच्यत इत्यर्थः। अत्र पूर्वपक्षे यदा तमस्तदिति मन्त्रोदाहरणात्, सिद्धान्ते शिवतत्त्वमिति तत्रत्यशिवशब्देन व्यवहारात्, तत्त्वशब्देन तदुक्ततमोमात्रावशिष्टकालविशेषावस्थायित्वप्रतिपादनात्, एतादृशशब्देनैवंप्रकारवाचिना "तदक्षरं तत्सवितुर्वरेण्यं प्रज्ञा च तस्मात् प्रसृता पुराणी" (श्वे० उ० ४.१८) इति तदुत्तरार्धप्रतिपादिताक्षरशब्दप्रवृत्तिनिमित्तसवितृवरेण्यत्वबहुभवनसङ्कल्परूपजगत्कारणत्वाक्षेपकलिङ्गान्तरसंग्रहाच्च सर्वज्ञत्वादिषट्काष्टाभिधानप्रवृत्तिनिमित्तसद्भावरूपस्य सर्वकारणवाक्यानां शिवे पर्यवसानोपपादकस्य न्यायजातस्यानुग्राह्यं प्रमाणं सर्वेषां कारणवाक्यानां शिवे पर्यवसानमाहत्य प्रतिपादयितुमेव प्रवृत्तो "यदा तमः" (इति) मन्त्र इति सूचितं भवति।

तमिमं भाष्यसूचितमर्थं स्पष्टीकुर्मः। 'यदा तमः' इति पूर्वार्धेन तमोऽवशेषाङ्कितं कालमनूद्य तत्कालवर्ती शिव इति विधीयते। तेन "तमो वा इदमेकमास" (मैत्रा० उ० ५.५), "तत्परेणेरितं विषमत्वं प्रयाति" (मैत्रा० उ० ५.५), "प्रजापतिर्वा इदमेक आसीत्", "नाहरासीन्न रात्रिरासीत्", "सोऽस्मिन्नन्धे तमसि प्रासर्पत्", "नासदासीन्नो सदासीत् तदानीम्" (ऋ० १०.१२९.१), "तम आसीत् तमसा गूढमग्रेऽप्रकेतम्" (ऋ० १०.१२९.३) इत्यादिषु तत्पुरोवादेषु तथाभूतकालविशेषावस्थायिकारणवस्तुसमर्पकाणां परप्रजापत्यादिशब्दानां शिवे पर्यवसानं दर्शितं भवति। तृतीयपादेन मुण्डकादिश्रुतकारणवाक्येषु कारणवस्तुसमर्पकाणामक्षरादिपादानामादित्यमण्डलवर्तिनि पुरुषे कारणत्वाक्षेपकलिङ्गं सर्वान्तर्यामित्वमुपवर्णयन्त्या गायत्र्याश्च तस्मिन् पर्यवसानं दर्शितम्। चतुर्थपादेन "तदैक्षत बहु स्यां प्रजायेय"

(छा० उ० ६.२.३) इति, "स ईक्षत लोकान्नु सृजा" (ऐत० उ० १.१) इति, "सोऽकामयत बहु स्यां प्रजायेय" (तै० उ० २.६) इति, "तपसा चीयते ब्रह्म" (मु०उ० १.१.८) इति च स्रष्टुरादिसृष्टिपूर्वकालीनं स्रष्टव्यवस्तुजातालोचनं प्रतिपादयतां छान्दोग्यादिश्रुतकारणवाक्यानां तत्र पर्यवसानं दर्शितम् । एवं सर्वेषां कारणवाक्यानां शिवे पर्यवसानं प्रतिपादयितुं प्रवृत्तेनानेन मन्त्रेण शिव एव जगत्कारणं ब्रह्मेत्यवसीयते ।

एतेन 'यदा तमः' इति मन्त्रो न स्वयं कारणस्य तमसः प्रापकः, यदेति कालविशेषप्राप्तानुवादात् । प्राप्तिश्च-"अव्यक्तमक्षरे लीयते, अक्षरं तमसि लीयते, तमः परे देव एकीभवति" (२.२) इति सुबालोपनिषद्वाक्येन । तत्र च परशब्दो नारायणपरः, "एष[1] आत्माऽपहतपाप्मा दिव्यो देव एको नारायणः" (सु० उ० ६.१) इति तत्र श्रवणात् । ततश्च नारायणाधिष्ठितस्य तमसः प्रापकं श्रुत्यन्तरमिह पुरोवाद इति तदनुरोधादनुवादमन्त्रश्रुततमोऽधिष्ठातृपरः शिवशब्दो नारायण एव वर्तयितव्य इति निरस्तम् । भवत्येव 'यदा तमः' इत्यनुवादः, न तु सौबलवाक्यमेव पुरोवादः, अन्येषामप्यनूद्यमानार्थप्रापकवाक्यानां सत्त्वात् । नाप्यस्मिन् मन्त्रे 'तन्न दिवा' इत्यादिरप्यनुवादः, तद्वृत्तयोगेन तत्काले कस्यचिद्विधेयताप्रतीतेः । विधेयश्च तत्र न दिननिशाविभागाभावः सदसदात्मकप्रपञ्चाभावो वा, "नाहरासीन्न रात्रिरासीत्" इति, "नासदासीन्नो सदासीत्" (ऋ० १० १२९.१) इति च पुरोवादत एव तयोः प्राप्तेः । नहि किञ्चिदनूद्य किञ्चिद्विधातुं प्रवृत्तं वाक्यमनुवादायावश्यापेक्षितात् पुरोवादादेव प्राप्तेऽर्थे पर्यवस्यत् साफल्यमश्नुवीत । अतस्तत्रापि न दिवेत्यादिरनुवादः । एवं च शिवशब्दोऽपि यदि कथञ्चिदौत्सर्गिकार्थपरतां हित्वा पुरोवादविशेषप्राप्ते नारायणे पर्यवस्येत्, तदा यदा तमस्तदिति किञ्चिद्विधातुमुद्यम्यार्धपथे स्थितं वाक्यं किं विधेयमासाद्य विश्राम्यतु । नहि तस्य नारायणवृत्तित्वे पुरोवादादप्राप्तं कञ्चिद् विधानार्हं तदर्थं पश्यामः । तस्मात् परमते वाक्यमेव तावद्वैयर्थ्यं प्राप्नुयात् । अतस्तत्तत्पुरोवादश्रुततमोऽधिष्ठातृपरब्रह्मप्रजापतिनारायणादिसकलशब्दार्थनिर्धारणेदम्परैतद्विधिबलात् सौबालश्रुत्याम्नातस्य नारायणनाम्न एव शिवे पर्यवसानं स्यात्, न तु वैपरीत्यम् ।

---

१. "एष आत्माऽपहतपाप्मा" इति वचनं छान्दोग्ये (८.१.५) मैत्रायण्यां (७.७) च दृश्यते, न सुबालोपनिषदि ।

ननु शिवशब्दस्य नारायणे क्षेमंकरत्वादियोगेन वृत्तिः सम्भवति, "पन्थानः सन्तु ते शिवाः", "पावको अस्मभ्यं शिवो भव" (तै० सं० ४.६.१.१) इत्यादिलौकिकवैदिकव्यवहारेष्वन्यत्रापि तस्य योगेन प्रयोगदर्शनात्। नारायणशब्दस्य तु नारमयनमस्येत्यादियोगेन शिवे वृत्तिर्न सम्भवति, केवलयोगे णत्वासिद्धेः, "पूर्वपदात् संज्ञायामगः" (पा० ८.४.३) इति सूत्रतः संज्ञाशब्दतयैव तत्र णत्वस्योपपादनीयत्वात्, तस्य शिवनामत्वाभावेन तत्र तत्संज्ञाशब्दत्वेन णत्वस्योपपादयितुमशक्यत्वादिति चेत्, यदि तस्य शिवनामत्वं नास्ति, तदा विष्णुनाम्न एव तस्य भावितदवस्थोपलक्षिते सर्गाद्यसमयवर्तिनि शिवे लक्षणया वृत्तिः स्यात्, घटं करोतीति वाक्य इव घटशब्दस्य भाविघटावस्थोपलक्षिते मृत्पिण्डे, न तु तस्य शिवे योगो न सम्भवतीत्येतावता शिवशब्दस्य नारायणपरत्वं स्यात्, मन्त्रवाक्यवैयर्थ्यापत्तेरुक्तत्वात्, योगाद्रूढिपूर्वकलक्षणाया एवाभ्यर्हितत्वाच्च।

यदि तु "सर्वाणि ह वा एतस्य नामधेयानि" इत्याश्वलायनस्मरणात्, "नामानि तव गोविन्द यानि लोके महान्ति च। तान्येव मम नामानि नात्र कार्या विचारणा॥" इति हरिवंशे शिववचनेन विष्णुनाम्नामन्येषां च प्रकृष्टप्रवृत्तिनिमित्तानां नाम्नां "घनसारश्चन्द्रसंज्ञः" (अ० को० २.६.१३०) इति वचनेन चन्द्रनाम्नां कर्पूरनामत्ववत् शिवनामत्वस्य विधानात्, कूर्मपुराणे—"वशित्वादप्यवश्यत्वादीश्वरः परिभाषितः। ऋषिः सर्वगतत्वेन हरिः सर्वगुणायुतः॥ अनुत्पादाच्च पूर्वत्वात् स्वयंभूरिति स स्मृतः। नारा अप्ययनं यस्मात् तेन नारायणः स्मृतः॥ हरः संसारहरणाद् विभुत्वाद् विष्णुरुच्यते। भगवान् सर्वविज्ञानादवनादोमिति स्मृतः॥ सर्वज्ञः सर्वविज्ञानात् सर्वः सर्वमयो यतः। शिवः स निर्मलो यस्माद्विभुः सर्वगतो यतः॥"(१.४.५९–६३) इति साक्षादेव नारायणशब्दस्य शिवनामसु निर्वचनाच्च तन्नामत्वमपीष्यते, तदा न कश्चिच्छङ्कावकाशः। न च नारायणशब्दस्य विष्णवैकान्तिकत्वमस्ति, "एकार्णवे तदा तस्मिन्नष्टे स्थावरजङ्गमे। तदा समभवद् ब्रह्मा सहस्राक्षः सहस्रपात्॥ सहस्रशीर्षा पुरुषो रुक्मवर्णो ह्यतीन्द्रियः। ब्रह्मा नारायणाख्यस्तु सुष्वाप सलिले तदा॥ इमं चोदाहरन्त्यत्र श्लोकं नारायणं प्रति। ब्रह्मस्वरूपिणं देवं जगतः प्रभवाप्ययम्॥ आपो नारा इति प्रोक्ता आपो वै नरसूनवः। अयनं तस्य ता यस्मात् तेन नारायणः स्मृतः॥" (१.६.२-५) इति कूर्मपुराणे विरिञ्चिनामत्वेनापि तन्निर्वचनदर्शनात्। न च तत्र क्वचित् कल्पविशेषे वैरिञ्चमप्यधिकारं

निर्वर्तयन् विष्णुरेव ब्रह्मेत्युक्तः, अग्रे तस्य पृथिव्युद्धरणार्थवराहरूपपरिग्रहोक्तेरिति वाच्यम्, पृथिव्युद्धरणानन्तरं वाराहरूपं परित्यज्य कौमारसर्गपर्यन्तं जगत्सृष्टिं कृतवतस्तस्यैव–"मुमोह मायया सद्यो मायिनः परमेष्ठिनः" (कू० पु० १.७.२१) इति मोहप्राप्तिमुक्त्वा–"तं बोधयामास सुतं जगन्मायो महामुनिः । नारायणो महायोगी योगिचित्तानुरञ्जनः ॥" (कू० पु० १.७.२२) इति तज्जनकस्य भगवतो नारायणस्योपदेशात् तस्य मोहनिवृत्तिप्रतिपादनात्, अग्रे च तस्य नारायणनाभिपद्मादाविर्भावं पुनरपि मोहप्राप्तिं तस्य नारायणोपदेशेन मोहनिवृत्तिं "कथं स भगवान् जज्ञे ब्रह्मा लोकपितामहः । अब्जजो भगवानीशस्तन्नो वक्तुमिहार्हसि ॥" (कू० पु० १.९.४) इति प्रश्नोपक्रमेण "अवाप्य संज्ञां गोविन्दात् पद्मयोनिः पितामहः"(कू० पु० १.१०.१८) इत्यन्तेन प्रबन्धेन प्रतिपाद्य तस्य प्रजासृष्टिसामर्थ्यसिद्ध्यर्थं तपश्चर्यां ततो रुद्राविर्भावादिकं च रुद्रान्तर्धानपर्यन्तमुक्त्वा "सोऽपि योगं समास्थाय ससर्ज विविधं जगत् । नारायणाख्यो भगवान् यथापूर्वं प्रजापतिः ॥" (कू० पु० १.१०.८५) इति पुनः स्रष्टुं प्रवृत्ते तस्मिन् विरिञ्च एव नारायणनामत्वानुवाददर्शनाच्च विरिञ्चस्य वाराहरूपपरिग्रहोक्तिरपि न विरुध्यते ॥ "आपो वा इदमग्रे सलिलमासीत् तस्मिन् प्रजापतिर्वायुर्भूत्वाचरत् स इमामपश्यत्तां वराहो भूत्वाहरत्तां विश्वकर्मा भूत्वा न्यमार्ट् साप्रथत सा पृथिव्यभवत्तत्पृथिव्यै पृथिवीत्वं तस्यामश्राम्यत् प्रजापतिः स देवानसृजत" (तै० सं० ७.१.५.१) इत्यादिश्रुतौ प्रजापतिशब्दोक्तस्य विरिञ्चस्य वाराहरूपपरिग्रहप्रतिपादनात् ।

एवम्—"ब्रह्मा नारायणाख्योऽसौ ससर्ज भगवान् यथा" (१.४.१), "नारायणाख्यो भगवान् ब्रह्मा लोकपितामहः" (१.३.४) इत्यादिविष्णुपुराणप्रदेशेषु, "तस्मादण्डादभूत् स्रष्टा शिवात्मा चतुराननः । सर्वलोकस्य निर्माता ब्रह्मा विश्वसृजां पतिः ॥ स चाप्सु शयनादेव शिवात्मा स्वेच्छया चिरम् । नारायणाख्यामभजच्छक्तिरूपः प्रजापतिः ॥" इत्याश्वलायनधर्मशास्त्रे स्मृतिपुराणान्तरेषु च विरिञ्चस्य नारायणनामत्ववर्णनं द्रष्टव्यम् । तस्मात् 'यदा तमः' इति मन्त्रगते शिवपदे विष्णुविषयत्वशङ्कानवकाशात् सर्वेषां कारणवाक्यानां शिवे पर्यवसानं प्रतिपादयन् मन्त्रोऽयमिहानुग्राह्यप्रमाणत्वेन विवक्षित इति युक्तमेव ।

एवं श्वेताश्वतरशाखिनां मन्त्रोपनिषदुपक्रमेऽपि—"ब्रह्मवादिनो वदन्ति किं कारणं ब्रह्म कुतः स्म जाताः" (श्वे० उ० १.१) इत्यादिना केषाञ्चिद् ब्रह्मवादिनामृषीणां जगतः पञ्चकृत्यकारणभूतं ब्रह्म किंदेवतात्मकमिति

संशयमुपक्षिप्य जगतोऽकारणकत्वस्य कालाद्यन्यकारणकत्वस्य वोपपत्तेर्ब्रह्म जगज्जन्मादिकारणमित्येतदेवासिद्धमिति संशयस्य निरालम्बनत्वप्रसङ्गपरिहाराय तैरेव कृतं जगदकारणकत्वान्यकारणकत्वपक्षद्वयनिरासम्—"कालः स्वभावो नियतिर्यदृच्छा भूतानि योनिः पुरुष इति चिन्त्यम्। संयोग एषां न त्वात्मभावादात्माप्यनीशः सुखदुःखहेतोः॥" (श्वे० उ० १.२) इति मन्त्रेण प्रदर्श्य स्वतस्तन्निर्णयाशक्तानां ब्रह्मविद्याधिदेवतायाः परशक्तेरम्बिकायाः प्रसादादेतन्निर्णयो भविष्यतीत्यभिप्रायेण तां ध्यायतां तत्साक्षात्कारं "ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढाम्" (श्वे० उ० १.३) इत्यर्धेनोपन्यस्य "यः कारणानि निखिलानि तानि कालात्मयुक्तान्यधितिष्ठत्येकः" (श्वे० उ० १.३) इत्यादिना तस्याः प्रसादात् कालादिसकलावान्तरकारणाधिष्ठातारं परमकारणं महादेवमपश्यन्नित्येतदर्थप्रतिपादनात् सोऽपि सन्दर्भोऽत्रानुग्राह्यप्रमाणतयाऽनुसन्धेयः। तत्र यद्यपि यः कारणानीत्यादिमन्त्रे तमपश्यन्निति पूर्वक्रियानुषङ्गवति सकलकारणाधिष्ठातारं कारणमपश्यन्नित्येतावदेव प्रतीयते, न तु शिवं तथाभूतकारणमपश्यन्निति, तत्र शिववाचकपदाभावात्; तथापि "क्षरं प्रधानममृताक्षरं हरः क्षरात्मना विशते देव एकः" (श्वे० उ० १.१०), "संयुक्तमेतत् क्षरमक्षरं च व्यक्ताव्यक्तं हरते विश्वमीशः" (श्वे० उ० १.८), "विश्वाधिको रुद्रो महर्षिः" (श्वे० उ० ३.४), "तस्मात् सर्वगतः शिवः" (श्वे० उ० ३.११), "मायिनं तु महेश्वरम्" (श्वे० उ० ४.१०), "तमीशानं वरदं देवमीड्यम्" (श्वे० उ० ४.११) इत्याद्यनन्तरसन्दर्भो यावदुपनिषत्समाप्ति हरेशरुद्रशिवमहेश्वरेशानादिशिवासाधारणनामभिरेव जगत्कारणस्य निर्देशदर्शनाद् यः कारणानीति मन्त्रस्य शिवमेव जगत्कारणमपश्यन्नित्यस्मिन्नर्थे तात्पर्यमुन्नीयते।

एवमेव संक्षेपेणोपबृंहितं कूर्मपुराणे—"समेत्य ते महात्मानो मुनयो ब्रह्मवादिनः। वितेनिरे बहून् वादानात्मविज्ञानसंश्रयान्॥ किमस्य जगतो मूलमात्मा वाऽस्माकमेव हि। कोऽपि स्यात् सर्वभूतानां हेतुरीश्वर एव च॥ इत्येवं मन्यमानानां ध्यानकर्मावलम्बिनाम्। आविरासीन्महादेवी गौरी गिरिवरात्मजा॥....निरीक्षितास्ते परमेशपत्न्या तदन्तरे देवमशेषहेतुम्। पश्यन्ति शम्भुं कविमीशितारं रुद्रं बृहन्तं पुरुषं पुराणम्॥" (२.३७.१५१-१५३, १५७)इति। अत्र "किमस्य जगतो मूलम्"इत्यनेन "कुतः स्म जाताः" इत्येतदर्थो दर्शितः। "आत्मा वास्माकमेव हि" इत्यनेन "जीवाम केन" इत्यादिसकलसंशयार्थः संगृहीतः, आत्मशब्दस्याधिष्ठातृपरत्वात्। 'कोऽपि

स्यात्' इत्यर्धेन 'कालः स्वभाव'इत्यादिमन्त्रप्रतिपादितकालकारणत्वादिवाद-निराससामर्थ्यसिद्धसर्वकारणत्वसर्वेश्वरत्वविशिष्टब्रह्मरूपसंशयधर्मिसम्प्रतिपत्तिरुपन्यस्ता ।

शिवपुराणेऽप्यम्बिकामाहात्म्यं प्रस्तुत्य प्रपञ्चेनोपबृंहितम्—"मुमुक्षया पुरा केचिन्मुनयो ब्रह्मवादिनः । संशयाविष्टमनसो विमृशन्ति यथातथम् ॥ किं कारणं कुतो जाता जीवामः केन वा वयम् । क चास्माकं सम्प्रतिष्ठा केन वाधिष्ठिता वयम् ॥ इह वर्तामहे शश्वत् सुखेष्वन्येषु वाऽनिशम् । अविलङ्घ्या च विश्वस्य व्यवस्था केन वा कृता ॥ कालः स्वभावो नियतिर्यदृच्छा नात्र युज्यते । भूतानि योनिः पुरुषो योगो वैषां परेऽथवा ॥ अचेतनत्वात् कालादेश्चेतनत्वेऽपि चात्मनः । सुखदुःखाभिभूतत्वादनीशत्वाद् विचार्यते ॥ ते ध्यानयोगानुगताः प्रापश्यंच्छक्तिमैश्वरीम् । पाशविच्छेदिकां साक्षान्निगूढां स्वगुणैर्भृशम् ॥ तया विच्छिन्नपाशास्ते सर्वकारणकारणम् । शक्तिमन्तं महादेवमपश्यन् दिव्यचक्षुषा ॥ यः कारणान्यशेषाणि कालात्मसहितान्यपि । अप्रमेयोऽनया शक्त्या साकमेकोऽधितिष्ठति ॥" (७.२.७.११-१८) इति । एवं श्वेताश्वतरोपनिषदाम्नातस्य 'यदा तमो' (४.१८) मन्त्रस्य तदुपक्रमस्य च तात्पर्यमस्माभिः शिवतत्त्वविवेके शैवकर्णामृते च प्रपञ्चेनोपपादितं तत्रैवानुसन्धेयम् ।

एतेनेदं निरस्तम् । जगत्कारणं वस्तु—"सदेव सोम्येदमग्र आसीत्" (छा० उ० ६.२.१), "ब्रह्म वा इदमग्र आसीत्"(बृ० उ० १.४.१), "आत्मा वा इदमेक एवाग्र आसीत्"(ऐ० उ० १.१)इत्यादिकारणवाक्येषु सद्ब्रह्मात्मशब्दैरुत्तरोत्तरं विशेषपर्यवसायिभिः सद्रूपं बृहच्चेतनं चेत्येतावत्पर्यन्तबुद्धिगृहीतम्, "एको ह वै नारायण आसीत्" (महो० १.१) इत्यादिष्वनितरसाधारणेन नारायणशब्देन निर्देशात् छागपशुन्यायेन नारायण एवेति निश्चीयत इति सर्वेषां कारणवाक्यानां शिवे पर्यवसानं साक्षादेव प्रतिपादयति मन्त्रेऽस्मदादीनामिव पूर्वमृषीणां सञ्जातं जगत्कारणं ब्रह्म किंदेवतात्मकमिति संशयं प्रदर्श्य स्वयं निर्णेतुमशक्नुवन्तस्ते ध्यानयोगप्रसादितपरमेश्वरीकटाक्षमहिम्ना शिव एवेति निश्चयं लेभिर इति प्रतिपादयति मन्त्रजाते च जाग्रति क्षुद्रबुद्धिकल्पितन्यायसञ्चारेणान्यत्र पर्यवसानासम्भवात् । 'यदा तमो'-मन्त्रादिगतशिवादिशब्दानां वृत्त्यन्तरेण शिवान्यपरत्वे तदविरोधेन सर्वेषां कारणवाक्यानां तत्र पर्यवसानं सम्भवतीति चेन्न, 'यदा तमो' (श्वे० उ० ४.१८)-मन्त्रगतस्य शिवशब्दस्य नारायणवृत्तित्वे मन्त्रवाक्यवैयर्थ्यापत्तेरुक्तत्वात्,

"क्षरं प्रधानममृताक्षरं हरः" (श्वे० उ० १.१०) इत्यादिमन्त्रेषु श्रुतानां हरादिशब्दानामपि जगत्कारणधर्मिकस्ववाच्यतदितरदेवताविशेषकोटिकसंशयप्रदर्शनानन्तरं निर्णयवाक्ये श्रुतानाम् 'अयं स्थाणुः पुरुषो वा' इति संशयानन्तरम् 'अयं पुरुष एव' इति निर्णयवाक्ये श्रुतस्य पुरुषशब्दस्येव व्यवच्छेदनीयायां प्रतिकोटौ वृत्त्ययोगात्। न च क्वचित् क्वचित् कारणवाक्ये नारायणशब्दस्याभ्यासदर्शनेन तात्पर्यवत्त्वावगमात् तस्यापि वृत्त्यन्तरं न युज्यत इति वाच्यम्, कारणे बहुशोऽभ्यस्तस्यापि तस्य तद्विषयप्राणाकाशशब्दवद् वृत्त्यन्तरकल्पनसहिष्णुत्वेनान्यथासिद्धत्वात्।

किञ्च, "वेदार्थो यः स्वयंजातस्तत्राज्ञानं भवेदपि। ऋषिभिर्निश्चिते तस्मिन् का शङ्का स्यान्महात्मनः॥" इति, "बिभेत्यल्पश्रुताद्वेदो मामयं प्रतरिष्यति। इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्॥" इति च स्मरणात् पुराणादिषु ऋषिभिर्निश्चित एव वेदार्थोऽभ्युपगन्तव्यः। तत्र श्वेताश्वतरोपनिषदुपक्रमार्थनिर्णायकानि कूर्मपुराणादिवचनानि प्रागुदाहृतानि। तदनन्तरस्यापि—"संयुक्तमेतत् क्षरमक्षरं च" (श्वे० उ० १.८) इत्यादेरुपनिषत्समाप्तिपर्यन्तस्य तत्सन्दर्भस्यार्थनिर्णायकः शिवपुराणे पशुपाशपतिनिर्णयाध्यायो दृश्यते। एवं च यद्यपि विष्णुपुराणादिश्रुतसृष्टिवाक्येषु कारणस्य नारायणनामभिरपि निर्देशो दृश्यते, तथापि शब्दोऽर्थतः क्रमतश्च तत्तदुपनिषत्सन्दर्भस्पर्शीन्युपबृंहणानि प्रबलानीति तैरेव तत्तदर्थनिर्णयो युक्तः। न चोपबृंहणानुसारेण शिवविषयकारणवाक्यानां तद्विरोधिकारणवाक्यान्तरेभ्यः प्राबल्यमुपबृंहणानामुपबृंहणीयशब्दार्थक्रमस्पर्शित्वेन तद्विरुद्धपुराणान्तरादिभ्यः प्राबल्यमिति प्राबल्यसिद्धौ परस्परापेक्षणादन्योन्याश्रयः शङ्कनीयः, वर्नसिहन्यायेन प्राबल्यसिद्धौ परस्परापेक्षणस्यादोषत्वात्।

एतेनेयमपि शङ्का निरस्ता—शिवविषयकारणवाक्यानां सर्वज्ञत्वादिषाड्गुण्याष्टाभिधानप्रवृत्तिरूपन्यायोपस्कृततया यत् प्राबल्यमुक्तं तन्न सङ्गच्छते, "ज्ञानमप्रतिपन्नस्य वैराग्यं च जगत्पतेः। ऐश्वर्यं चैव धर्मश्च सह सिद्धं चतुष्टयम्॥" इति हिरण्यगर्भे, "ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः। भगवच्छब्दवाच्यानि विना हेयैर्गुणैः" (वि० पु० ६.५.७९) इति नारायणे च कारणत्वोपपादकसंज्ञासार्वज्ञ्यादेः पुराणेषु प्रतिपादनोपलम्भात्, हिरण्यगर्भादीनामपि जगज्जन्मादिकारणत्वतदाक्षेपकधर्मप्रवृत्तिनिमित्तकनामसद्भावाच्च। हिरण्यगर्भस्य हि स्रष्टा विधाता विश्वसृड् विधिर्वेधा विरिञ्च

इति नाम्नां जगन्निर्मातृत्वं प्रवृत्तिनिमित्तम् । आत्मभूः स्वयंभूरिति नाम्नो-र्जगन्मूलकारणत्वोपपादकं स्वयं जनिराहित्यं विश्वात्मनाम्नोर्जगदुपादानत्वो-पपादकं सार्वात्म्यं लोकेशप्रजापतिनाम्नोः स्थितिहेतुत्वोपपादकं सर्वैश्वर्यं "द्रुहिदक्षिभ्यामिनज्" (२१८ उ०) इति द्रुह्यतिधातोरिनजन्तस्य द्रुहिण-नाम्नः सर्वसंहर्तृत्वं परमेष्ठिनाम्नः परमपदावस्थायित्वं शम्भुनाम्न आनन्दरूपत्वं सर्वानन्दयितृत्वं वा ।

किं बहुना, ब्रह्मनाम्नो निरतिशयबृहत्त्वं प्रवृत्तिनिमित्तम् । विष्णोरपि वासुदेवनाम्नो वसत्यस्मिन् सर्वमिति, वस्यति छिनत्ति सर्वमिति, वासयति छादयति सर्वजीवानित्यर्थेषु "वस निवासे" (१००५ भ्वा०), "वसु छेदने" (१२१४ दि०), "वस आच्छादने" (१७४५ चु०) इति धातुभ्यो बहुलग्रहणा-दुण्प्रत्यये सति निष्पन्नस्य वासुशब्दस्य देवशब्दस्य च समानाधिकरणसमास-पदरूपस्य सर्वभूतस्थितिसंहृतितिरोधानकर्तृत्वं प्रवृत्तिनिमित्तम्, विष्णुनाम्नः सर्वत्र व्याप्तत्वम्, स्वयम्भूनाम्नो जनिराहित्यम्, अच्युतनाम्नः क्षरणराहित्यं प्रवृत्तिनिमित्तमित्यादि दृश्यते । तस्मात् पुराणप्रतिपन्नं सार्वज्ञ्यादिकं भवादिनामप्रवृत्तिनिमित्ततया लब्धमिन्द्रनामप्रवृत्तिनिमित्ततुल्यं लिङ्गजातं च न शम्भोः परभावनिर्णायकत्वेन श्रुत्यनुग्राहकमित्युपबृंहणीयोपबृंहण-योरिव मानतर्कयोरपि परस्परमनुग्राह्यानुग्राहकभावेन च वनसिंहन्याय-विषयतया वनानुप्रविष्टसिंहस्य तदननुप्रविष्टसिंहादिव स्वतः प्रबलमुदाहृत-मन्त्रोपनिषन्मन्त्रजातं प्रमाणमनुप्रविष्टस्य शिवे श्रुतस्य सार्वज्ञ्यादेस्तदननु-प्रविष्टाद् देवतान्तरे श्रुतात् सार्वज्ञ्यादितः प्रबलत्वेन तत्साम्यापादनायोगात् । न च शिवस्य सार्वज्ञ्यादिकं पुराणमात्रप्रसिद्धम्, "ज्ञः कालकालो गुणी सर्वविद्यः" (श्वे० उ० ६.२), "तमादिमध्यान्तविहीनमेकं विभुं चिदानन्द-मरूपमद्भुतम्"(कै० उ० ७) इत्यादिश्रुतिष्वपि विशिष्य शिवस्य सार्वज्ञ्यादि-प्रसिद्धिसत्त्वात् । न चेन्द्रशब्दः "इदि परमैश्वर्ये" (६३ भ्वा०) इति धातोर्निष्पन्नः, येन तत्साम्यं भवादिनाम्नामापद्येत, नामप्रवृत्तिनिमित्ततः परभावसिद्धावीश्वरमहेश्वरनाम्नः शिवादिन्द्रमहेन्द्रनामा शक्रोऽधिकः स्यादिति वाऽऽपद्येत । "ऋज्रेन्द्राग्रवज्र" (१९६ उ०) इत्यादिसूत्रेण हीन्द्र-शब्दः "ञिइन्धी दीप्तौ" (१४४९ रु०) इति धातोरिध्यते ब्रह्मतेजोभिरित्यर्थे तत्पूर्वानुवृत्तरन्प्रत्ययान्तो निपातितः, न तु "इदि परमैश्वर्ये" (६३ भ्वा०) इति धातोरिन्दतीत्यर्थे, ततो रन्प्रत्ययविधानेनैव रूपसिद्धिसम्भवे निपातन-प्रयोजनाभावात् । अत एवैतत्सूत्रवृत्ताविन्दतिधातोरिन्द्रशब्दनिपातनमुक्त्वा

तदेव शिवशब्दवाच्यमानन्दादिधर्माश्रयतया सिद्धम् । अत आनन्दादीनां विकल्पादिचिन्ता निरर्थिका । "मायां तु प्रकृतिं विद्यात्" (श्वे० उ० ४.१०) इति मायायाः प्रकृतित्वमीश्वरात्मिकाया एव, "मायिनं तु महेश्वरम्" (श्वे० उ० ४.१०)

"वृधिवपिभ्यां रन्" (१९५ उ०) इति पूर्वसूत्रे इन्दतिधातोरपि ग्रहणेन रूपसिद्धिसम्भवे निपातनप्रयोजनं नास्तीत्यस्वारस्यादिध्यते तेजोभिरितीन्द्र इति इन्धिधातोर्निपातनमाश्रितम् । एवं "ब्रह्म हि देवेभ्यो विजिग्ये" (केनो० ३.१) इति तलवकारिणामुपनिषद्युक्तेन प्रकारेणासुरविजयसमयेषु ब्रह्मतेजोभिरिध्यमानः शक्रो महासुरस्य वृत्रस्य वधे नितरां तैरिद्धो जात इति महेन्द्र इत्युच्यते । अत एव श्रूयते—"महान् वा अयमभूद् यो वृत्रमवधीदिति तन्महेन्द्रस्य महेन्द्रत्वम्" इति । तस्मादुक्तन्यायानुगृहीतस्वतःप्रबलमन्त्रोपनिषन्मन्त्रजातबलाच्छिव एव जगत्कारणमित्येतदुपपन्नमिति ।

अवधारणादिबलात् सदानन्दज्ञानानां भेदानापाद्य तेषां विकल्पेन समुच्चयेन वा कारणत्वमनुपपन्नमिति यच्छङ्कितम्, तदप्येवं सति नावकाशं लभत इत्याह—तदेवेति । यत्सर्वज्ञत्वनित्यतृप्तत्वाद्याश्रयतया प्रतिपन्नं तदेव सामान्यतः सकलमङ्गल्यगुणवत्त्वप्रतिपादकस्य शिवशब्दस्यापि वाच्यमिति तस्य सामान्यतो विशेषतश्च ज्ञानानन्दादिधर्माश्रयत्वसिद्धेस्तत्र कारणवाक्यश्रुतान्यवधारणानि न शाखान्तरगतकारणवाक्यश्रुतरूपान्तरव्यावर्तनार्थानि । किन्तु "आनन्दाद्ध्येव" इत्यवधारणं स्थूलारुन्धतीन्यायेन ब्रह्मणि क्रमेण पूर्वंप्रतिपन्नानामन्नादिविज्ञानान्तरूपाणां व्यावर्तकम्, "सदेव" (छा० उ० ६.२.१) इत्यवधारणमिदानीं पृथिव्यादिषु दृश्यमानस्य स्थूलरूपस्य सर्गाद्यसमद्वे व्यावर्तकम्, प्रज्ञानघनवाक्यं त्वत्युज्ज्वलस्य रत्नस्यान्तर्बहिश्च प्रभयेव ब्रह्मणः प्रज्ञानगुणेन व्याप्तिप्रतिपादकं न कस्यापि ब्रह्मणि व्यावर्तकम् । अतो नावधारणादिविरोधोऽपीति भावः । मायैवोपादानमिति शङ्कां निरस्यति—मायाया इति । सत्यं मायोपादानमिति ब्रह्माप्युपादानमेव । अपृथक्सिद्धकार्यावस्थाश्रयत्वरूपं हि मायाया उपादानत्वं समर्थनीयम् । तत्समर्थ्यमानमेव ब्रह्मपर्यन्तमायाति । नित्ययोगे खलु मायिनमिति मायाशब्दादिनिप्रत्ययः । ततश्च मायाया ब्रह्मापृथक्सिद्धयैव तदपृथक्सिद्धायाः कार्यावस्थाया अपि ब्रह्मापृथक्सिद्धिः सिद्ध्यति । एवं च यद्यपि ब्रह्माश्रया माया वियदाद्य-

इति वाक्यशेषात् । सूक्ष्मचिदचिद्विशिष्टं ब्रह्म कारणम्, स्थूलचिदचिद्विशिष्टं तत्कार्यं भवति । अतो जगज्जन्मादिलक्षणं ब्रह्मेति सिद्धान्तः ।।

इति जन्माद्यधिकरणम् ।। २ ।।

चेतनरूपेण परिणमति, ब्रह्माश्रया तदाश्रयजीवाश्रया च चिच्छक्तिज्ञानादिरूपेण, न तु ब्रह्म केनाप्याकारेण परिणमति; तथापि तथा तथा परिणममानानां मायादीनां ब्रह्मैवायुतसिद्धाश्रयत्वपर्यवसानभूमिरिति ब्रह्मपर्यन्तमुपादानत्वमायातीति भावः ।

ननु यद्येवं कार्यावस्थाश्रयत्वरूपमुपादानत्वमिष्यते, तदा यथा मृदो भाविघटावस्थाश्रयभूतायाः पिण्डावस्थाविशिष्टत्वेन कारणत्वेऽपि घटावस्थाविशिष्टत्वेन कार्यत्वमपि, एवं ब्रह्मणः सर्गाद्यसमये सूक्ष्मचेतनाचेतनविशिष्टत्वेन कारणत्वेऽपि स्थूलचेतनाचेतनविशिष्टत्वेन कार्यत्वमपि स्यादित्याशङ्क्याभ्युपगमेन परिहरति—सूक्ष्मेति । एवं व्यक्तिविशेषव्यवस्थितब्रह्मत्वनिर्धारणरूपप्रयोजनपर्यवसायित्वाज्जगज्जन्मादिब्रह्मलक्षणमित्येतदुपपन्नमित्यधिकरणार्थमुपसंहरति—अत इति । एवं तटस्थलक्षणव्यवस्थितौ तदुपलक्षितस्य गुणविग्रहविशेषरूपं स्वरूपलक्षणमपि व्यवतिष्ठत इति भावः ।

इति जन्माद्यधिकरणम् ॥ २ ॥

अथ शास्त्रयोनित्वाधिकरणम् ॥ ३ ॥

लक्षणप्रमाणाधीना हि वस्तुसिद्धिः। जगत्कारणं ब्रह्म किंप्रमाणकमित्यत आह—

सू० ॥ शास्त्रयोनित्वात् ॥ ३ ॥

यतः शास्त्रं योनिः प्रमाणम्, अत एव जगज्जन्मादिलक्षणं ब्रह्म भवतीति शेषः। अत्र जगत्कारणं ब्रह्म शास्त्रैक-

---

सङ्गतिं प्रदर्शयन्नुत्तराधिकरणमवतारयति—लक्षणेति। न केवलं लक्षणेनेदमित्थमिति लक्ष्यनिर्धारणसिद्धिः, किन्तु लक्ष्यस्वरूपे तस्य लक्षणरूपधर्मवैशिष्ट्ये च प्रमाणे सत्येव। अतस्तत्र प्रमाणप्रदर्शनार्थमुत्तराधिकरणमित्यर्थः। यद्यपि तस्मिन् यतो वेत्यादिशास्त्रं प्रमाणमिति पूर्वाधिकरण एवोदाहृतम्, तथाप्यानुमानिके जगज्जन्मादिकर्तरि तत्सिद्धार्थानुवादकं तद्वाक्यं न प्रमाणमिति तस्य पूर्वाधिकरणे तत्र प्रमाणतयोदाहरणमयुक्तमिति प्राप्ते शास्त्रप्रामाण्यादेव जगज्जन्मादिकारणं ब्रह्म, न त्वनुमानप्रामाण्यादिति व्यवस्थापयितुमाक्षेपसङ्गत्येदमधिकरणमारभ्यत इति भावः।

सू० ॥ शास्त्रयोनित्वात् ॥ ३ ॥

सूत्रं व्याचष्टे—यत इति। यतः शास्त्रं योनिः प्रमाणम्, अत इत्यनेन शास्त्रस्य योनित्वं शास्त्रयोनित्वं तस्मादिति षष्ठीसमासाश्रयणेन शास्त्रस्य प्रामाण्यादित्यर्थे सूत्रं योजितम्। यतश्चैत्रः श्रुतशीलशाली, अतस्तत्पुत्रोऽयं पूजनीय इत्युक्ते हि चैत्रस्य श्रुतशीलशालित्वादिति हेत्वर्थो लभ्यते। इह योनित्वशब्दस्य गुणवाचित्वेऽपि "पूरणगुण०" (पा० २.२.११) इत्यादिसूत्रेण षष्ठीसमासनिषेधो न भवति, "तदशिष्यं संज्ञाप्रमाणत्वात्" (पा० १.२.५३) इति सौत्रनिर्देशदर्शनात्। अत एवेत्येवकारेण शास्त्रप्रामाण्यादेवायमर्थः सिद्ध्यति, न त्वनुमानप्रामाण्यादिति सौत्रहेतुनिर्देशसामर्थ्यलब्धार्थो दर्शितः। जगज्जन्मादिलक्षणं ब्रह्म भवतीति शेष इति। अनेन पूर्वसूत्रार्थस्य साधनत्वेनान्वयो दर्शितः। एवमत्र सूत्रद्वयस्य साध्यहेतुपरतयै-

गम्यमुत प्रमाणान्तरेणापि गम्यमिति सन्देहः । जगदिदं सावयवं

कार्य्येऽपि प्रत्येकं निराकरणीयपूर्वपक्षसत्त्वेनाधिकरणभेदादस्य सूत्रस्य वर्णकान्तरे साध्यान्तराध्याहाराच्च योगभेदः समाश्रितः । अत्र यतो वेत्यादिवाक्यं ब्रह्मणि प्रमाणं न वेत्यधिकरणाङ्गसंशयं मनसि निधाय तदर्थसंशयमाह—अत्रेति । यदि ब्रह्म शास्त्रैकगम्यं तदा तत्र तत्प्रमाणम्, यदि प्रमाणान्तरेणाधिगम्यं तदा न प्रमाणम्, "अप्राप्ते शास्त्रमर्थवत्" इति न्यायादिति संशययोः फलफलिभावः । तदर्थसंशयकोटिद्वयालम्बनेन पूर्वपक्षसिद्धान्तप्रदर्शने कृते सत्यधिकरणाङ्गसंशयकोटयोस्तौ पर्यवसास्यत इति तु तयोरेव तौ प्रदर्शयिष्येते ।

ननु कथमीश्वरः प्रमाणान्तरगम्य इति पूर्वपक्षस्यावकाशः । तत्र हि न प्रत्यक्षं प्रवर्तते । नाप्यनुमानम्, तद्व्याप्तलिङ्गाभावात् । नोपमानम्, तस्य शक्तिसादृश्यान्यतरपरिच्छेदफलत्वात् । न लौकिकः शब्दः, तस्य प्रत्यक्षादिमूलप्रमाणापेक्षत्वात् । क्षितिगिरिसमुद्रादिरूपं जगत् सकर्तृकं कार्यत्वादिति सामान्यतोदृष्टानुमानं तत्र मानमिति चेन्न, अस्मदाद्यनुपलभ्यमानप्राक्कोटिषु क्षित्यादिषु कार्यत्वासिद्धेः । "एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च । खं वायुर्ज्योतिरापः पृथ्वी विश्वस्य धारिणी ॥" (मुण्डको० २.१.३), "अतः समुद्रा गिरयश्च सर्वे" (मुण्डको० २.१.९) इत्याद्यौपनिषदवाक्यप्रमाणकं यदि कार्यत्वं तेषां समर्थ्येत, तर्हि तत एवेश्वरस्यापि सिद्धिरिति न तदपेक्षमनुमानं तत्र प्रमाणीकर्तुमर्हमित्याशङ्क्य हेत्वन्तरेण तेषां कार्यत्वसिद्धिमाह—जगदिदमिति ।

ननु सावयवत्वमवयवारब्धत्वं चेत्, तस्याप्यसिद्धिः स्यात् । द्रव्यसमवेतद्रव्यं चेत्, तद्द्रव्यसमवेतजात्यादेरिवाकार्यत्वेनाप्युपपन्नमप्रयोजकम् । अस्यायमवयव इति व्यवहारप्रयोजकेन स्वरूपसम्बन्धविशेषेणावयवत्वं चेत्, तदप्यप्रयोजकम्, कालस्यावयवः क्षणलवादिरित्यादिव्यवहारप्रयोजकक्षणलवादिसम्बन्धवति कालादौ व्यभिचारि च तत् । तस्मात् सावयवत्वं न कार्यत्वसाधकमित्याशङ्क्य तस्य तत्साधकतां सूचयितुं सावयवं कार्यमेवेत्यवधारणम् । यदेकदेशाः पटैकदेशास्तन्तव इव परस्परवियोजनार्हाः, तदिह सावयवं विवक्षितम् । भूभूधरसमुद्राद्येकदेशा मृच्छिलासलिलादिरूपाः खननटङ्कनिर्भेदधरोद्धरणादिव्यापारैः परस्परवियोजनार्हा इति सम्प्रतिपन्नमेतत् । तथाभूतं चावश्यं कार्यं भवेदेव । वियोजनव्यापारेण तत्तदेकदेशरूपाणामवयवानां विभागजननस्य विभज्यमानानां प्राचीनसंयोगनाशस्य

कार्यमेव । तच्च वैचित्र्यगर्भितत्वेन स्वोचितकर्तृकमिति

नश्यतां संयोगानां सादित्वस्य साद्यवयवसंयोगानन्तरभावित्वान्नियतस्यासमवायिकारणसंयोगनाशेन नश्यतश्च सावयवस्य सादितायाश्चानिवार्यत्वादिति भावः ।

नन्वेवं सति भूभूधरादिकं सकर्तृकं कार्यत्वादित्यनुमानतो नास्मदादिविलक्षणस्तत्कर्ता सिद्ध्येत्, भूगोलकादिष्वस्मदादिकर्तृकस्य खननपूरणादिरूपस्य वियोजनसंयोजनव्यापारस्य सर्वदा सत्त्वात्, अवयववियोजने सति महापटध्वंसजन्यखण्डपटन्यायेन भूगोलकान्तराद्युत्पत्तेरवश्यम्भावात् । अवयवान्तरसंयोजने सति पूर्वसिद्धेऽवयविन्यागन्तुकानामवयवानां कारणत्वासम्भवेन पूर्वसिद्धावयविनागन्तुकावयवैश्चावयव्यन्तरोत्पादनस्यावश्यंभावाच्च । ततश्च पूर्वतन्तुवियोजनतन्त्वन्तरसंयोजनकर्तारस्तदनन्तरभाविनः पटस्येव खननपूरणादिकर्तारस्तदनन्तभाविनो भूगोलकादेः कर्तारः स्युरिति तैः सिद्धसाधनेन दुष्टमिदमनुमानं कथमस्मदादिविलक्षणं सर्वज्ञत्वादिलक्षणयुक्तं कर्तारं साधयेदित्याशङ्क्याह—तच्चेति । अतिविचित्रं महद्गोपुरप्राकारसौधादिकमेकदेशे किञ्चिच्छिलादिवियोजनसंयोजनाभ्यां कैश्चिन्नवीक्रियमाणं पश्यन्तस्तद्गतसकलविचित्रसन्निवेशनिर्माणोचितज्ञानशक्त्यादियुक्तं तदादिकर्तारमनुमिमाना दृश्यन्ते । न तेषामनुमानमेकदेशे संयोजनवियोजनकर्तृभिः सिद्धसाधनेन दुष्टं जायते । तद्वदिहापि विविधविचित्रसन्निवेशस्य क्षित्यादेस्तदुचितादिकर्त्रनुमानं नास्मदादिभिः सिद्धसाधनेन दुष्टं जायते, घटादिकमिवास्मदादिकर्तृकत्वेन सम्प्रतिपन्नं क्षित्यादिकमपहाय आद्यक्षित्यादिमात्रस्याङ्कुरादेश्च पक्षीकरणसम्भवात् । ततस्तत्तदनन्तविविधविचित्रसन्निवेशरचनानुकूलज्ञानशक्तियुक्तस्यास्मदादिविलक्षणस्य तत्कर्तुः सिद्धिर्भवत्येवेति भावः ।

तच्चानुमानमेव नैयायिकाः कल्पयन्ति । अदृष्टद्वारकस्वोपादानगोचरजन्यकृतिजन्यभिन्नानि समवेतानि जन्यानि स्वजनकादृष्टोत्तरोपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यानि भावकार्यत्वाद् घटवदिति । अत्र जन्यमात्रपक्षीकरणे ध्वंसस्यापि पक्षत्वेन तस्मिन्नुपादानघटितसकर्तृकत्वरहिते साध्यस्य बाधः स्यादिति तन्निवृत्त्यर्थं समवेतानीति विशेषणम् । एवमपि पक्षतावच्छेदकस्य घटादिसाधारण्येन तदंशे सिद्धसाधनं स्यात्, तन्निवृत्त्यर्थं जन्यभिन्नानीति विशेषणम् ।

तावत्युक्ते क्षित्यादेरपि जन्यत्वेनाश्रयासिद्धिः स्यात्, तन्निवृत्त्यर्थं जन्यकृतीति। एवमपि शब्दफूत्कारादेः पक्षता न स्यात्, तस्य शब्दादिनिमित्तभूतमृदङ्गताल्वादिगोचरास्मदादिनिष्ठजन्यकृतिजन्यत्वात्तस्यापि पक्षत्वेन संग्रहः कार्य एव, अन्यथा पक्षातिरिक्ते हेतुमति तस्मिन् साध्यसन्देहेन सन्दिग्धानैकान्तिकतापत्तेः। तत्संग्रहार्थं स्वोपादानगोचरेति। तस्य निमित्तभूतमृदङ्गादिगोचरजन्यकृतिजन्यत्वेऽपि स्वोपादानगोचरजन्यकृतिजन्येभ्यो घटादिभ्यो भिन्नत्वमस्त्येव, अस्मदादिनिष्ठजन्यकृतेस्तदुपादानातीन्द्रियाकाशादिगोचरत्वासम्भवात्। एवमपि क्षित्यङ्कुरादिषु पक्षतावच्छेदकं सन्दिग्धं स्यात्, यागदानाद्युपयुक्तहविर्देवादीनामपि दैवाद्यागदानादिप्रभवादृष्टजन्यक्षित्यङ्कुराद्युपादानानुप्रवेशसम्भवेन हविर्देयादिगोचरकृतीनामुपादानगोचरत्वसम्भवात्। काल्या तपश्चरणेन यन्नीलरूपं परित्यज्य गौररूपं प्राप्तं तस्य च पक्षता न स्यात्, तस्य स्वोपादानभूतशरीरगोचरतपश्चर्यानुकूलजन्यकृतिजन्यत्वेन तद्भिन्नत्वाभावात्। तत्संग्रहार्थमदृष्टद्वारकेति। हविर्देयादिगोचरकृतिः कालीकृततपश्चादृष्टद्वारैव तत्तज्जनिकेति तत्संग्रहः। साध्ये ज्ञानचिकीर्षाकृतीनां मध्ये एकैकनिर्देशमपहाय त्रितयनिर्देशो यावदभिमतविशेषणगुणवत्त्वेनेश्वरसिद्ध्यर्थः। केवलं कृतिमज्जन्यत्वे साध्ये चिकीर्षावज्जन्यत्वं ज्ञानवज्जन्यत्वं वा सन्दिग्धोपाधिः स्यात्। एवं केवलं चिकीर्षावज्जन्यत्वे ज्ञानवज्जन्यत्वे वा साध्ये कृतिमज्जन्यत्वादिकं यथायथं सन्दिग्धोपाधिः स्यादिति तद्व्यावृत्त्यर्थश्च। अपरोक्षपदमुपादानज्ञानस्यापरोक्षज्ञानत्वेनैव हेतुत्वाद् व्यापकत्वसिद्ध्यौपयिकम्। एवमपि सिद्धसाधनम्, क्षित्यादेरपि स्वजनकादृष्टजनकयत्किञ्चिदुपादानभूतयागीयहविरादिगोचरापरोक्षज्ञानचिकीर्षाकृतिमदस्मदादिजन्यत्वात्। तद्वारणाय स्वजनकादृष्टोत्तरेति ज्ञानादिविशेषणम्। न च क्षित्यादिजनकादृष्टोत्तरयत्किञ्चिदुपादानगोचरेदानीन्तनज्ञानादिमतास्मदादिना सिद्धसाधनम्, ज्ञानादीनामपि जनकत्वस्य विवक्षितत्वात्। न्यायभाष्यादिषु सकर्तृकत्वनिरुक्तावुपादानवद्दर्शनाद् ध्वंसव्यावृत्तं सकर्तृकत्वमभिमतमिति तदनुरोधेन पक्षसाध्यहेतुषु समवेतोपादानगोचरभावपदानीति।

अत्रेदं विचारणीयम्—उपादानगोचरत्वप्रवेशेन कथं साध्यस्य ध्वंसाद् व्यावृत्तिः, ध्वंसस्यापि रूपाद्युपादानघटादिगोचरापरोक्षज्ञानचिकीर्षाकृतिभिर्मुद्गरपातादिहेतुभिर्जन्यत्वात्। न चात्र पक्षविशेषण इव स्वोपादानगोचरत्वं विवक्षितुं शक्यम्, स्वोपादानगोचरजन्यकृतिजन्यभिन्नत्वस्य

पक्षविशेषणतया भिन्नपदोपात्तान्याभावप्रतियोगिविशेषणत्वेन तस्य प्रसिद्धिसम्भवेऽप्यत्रान्यविशेषणत्वाभावेन क्षित्याद्युपादानगोचरत्वरूपतापर्यवसायितया तथाभूतापरोक्षज्ञानाद्यप्रसिद्ध्या साध्याप्रसिद्धिप्रसङ्गात्। न च वाच्यं मुद्गरपतनानुकूला कृतिरेव ध्वंसजनिका न तु ज्ञानं चिकीर्षा वा, ज्ञानादीनां त्रयाणां स्वविषयसमवेतकार्यं प्रत्येव जनकत्वनियमादिति, घटतद्ध्वंसजननयोः कुलालघटध्वंसगतापरोक्षज्ञानचिकीर्षाकृतीनामन्वयव्यतिरेकतौल्येनोक्तनियमस्याप्रामाणिकत्वात्, प्रामाणिकत्वे वा ज्ञानादित्रयजन्यत्वाभावादेव ध्वंसव्यावृत्तसकर्तृकत्वलाभेन तद्व्यावृत्त्यर्थोपादानगोचरत्वविशेषणवैयर्थ्यात्। न चोपादानगोचरत्वघटितधर्मावच्छिन्नज्ञानादिनिष्ठजनकताप्रतियोगिजन्यताश्रयत्वं विवक्षितमिति नोक्तदोषद्वयमिति वाच्यम्, घटादिषु लाघवान्मृदादिगोचरत्वेनैव ज्ञानादीनां जनकतयोपादानगोचरत्वस्य ज्ञानादिनिष्ठजनकतावच्छेदककोट्यप्रवेशात्। न च ज्ञानादिनिष्ठविशेषकारणतावच्छेदके मृदादिगोचरत्वप्रवेशेऽपि सामान्यकारणतावच्छेदके उपादानगोचरत्वप्रवेशः स्यादिति वाच्यम्, ध्वंससाधारणकार्यसामान्यकारणतावच्छेदके तत्प्रवेशाभावात्। भावकार्यसामान्यकारणतावच्छेदके उपादानगोचरत्वप्रवेशः स्यादिति चेन्न, यत्किञ्चिदुपादानगोचरत्वस्य ध्वंसकारणज्ञानादिष्वतिप्रसक्तत्वेन तत्तदुपादानगोचरत्वस्याननुगमेन च तत्रापि तत्प्रवेशासम्भवात्।

किञ्च, तत्प्रवेशे स्वजनकादृष्टोत्तरेति विशेषणं व्यर्थं स्यात्, हविरादिगोचरज्ञानादीनामुपादानगोचरत्वेन क्षित्यादिजनकत्वाभावादेवार्थान्तरवारणासम्भवात्। तस्मादुपादानगोचरविशेषणं तावद् व्यर्थत्वादयुक्तम्। तथैव स्वजनकादृष्टोत्तरेति विशेषणमप्ययुक्तम्, अर्थान्तरवारणैकप्रयोजनकस्य तस्य व्याप्तिग्रहानौपयिकत्वात्, बीजसामान्येन व्यापकेऽपि व्यर्थविशेषणत्वस्य दोषत्वात्।

अपि च, स्वजनकेत्यत्र स्वपदं पक्षीकृतक्षित्यादिपरं दृष्टान्तीकृतघटादिपरं वा वाच्यम्, समभिव्याहृतपरत्वे व्यापकतावच्छेदकस्यैकस्यालाभेनाननुगमप्रसङ्गात्। तत्र पक्षद्वयेऽपि यावत् स्वजनकादृष्टोत्तरत्वं विवक्षितमुत यत्किञ्चित् स्वजनकादृष्टोत्तरत्वं वा ? आद्ये दृष्टान्तस्य साध्यवैकल्यं स्यात्, यावत् क्षित्यादिजनकादृष्टोत्तरत्वस्य यावद् घटादिजनकादृष्टोत्तरत्वस्य वा कस्याञ्चिदपि घटादिजनकज्ञानादिव्यक्तौ सम्प्रतिपत्त्यभावात्। द्वितीये क्षित्यादिजनकादृष्टजनकहविरादिगोचरज्ञानादिमतास्मदादिना सिद्धसाधनं स्यात्, सर्वस्या अपि क्षित्यादिजनकादृष्टजनकज्ञानादिव्यक्तेरनादिकार्य-

प्रवाहान्तःपातियत्किञ्चित्क्षित्यादिघटादिजनकादृष्टोत्तरत्वात्। न च पक्षतावच्छेदकावच्छिन्नक्षित्यादिमध्ये दृष्टान्तत्वाभिमतघटादिमध्ये वा यत्र व्यक्तौ यदा साध्यमुपसंह्रियते तदा तत्परत्वं स्वपदस्य वक्तुं शक्यम्, तथा सति स्वपदस्य पक्षदृष्टान्तान्यतरपरत्वस्याप्यननुगमतादवस्थ्यप्रसङ्गेन तस्यादृष्टद्वारकस्वोपादानगोचरजन्यभिन्नसमवेतजन्यत्वरूपपक्षतावच्छेदकावच्छिन्नसामान्यपरत्वस्यादृष्टद्वारकस्वोपादानागोचरजन्यकृतिजन्यत्वरूपदृष्टान्तगतधर्मावच्छिन्नसामान्यपरत्वस्य वा वक्तव्यत्वात्। न च स्वपदं किञ्चिद्घटव्यक्तिपरमङ्गीक्रियते, तज्जनकादृष्टोत्तरकुलालज्ञानादिजन्यत्वं तत्र सम्प्रतिपन्नमिति स एव दृष्टान्तो भविष्यतीति वाच्यम्, तथा सति तत्पूर्वकालोत्पन्नेषु घटादिषु हेतुमत्सु साध्यस्य सन्दिग्धतया सन्दिग्धानैकान्तिकतापत्तेः, पक्षादन्यत्र हेतुमति साध्यस्य सन्देहस्य दोषत्वे च क्षितिमात्रपक्षीकरणेनाप्यनुमानप्रवृत्तिसम्भवेन यावदीश्वरमात्रकर्तृकत्वाभिमतसंग्राहकपक्षतावच्छेदकनिर्वचनप्रयासवैयर्थ्यापत्तेः। एतेन दृष्टान्तीकृतघटव्यक्तिव्यतिरिक्तं सर्वं कार्यं पक्षीकृतमिति न सन्दिग्धानैकान्तिकत्वदोषापत्तिः, पक्षे साध्यसन्देहस्यादोषत्वादित्यपि शङ्का निरस्ता, तथा सत्येतद्घटव्यतिरिक्तसमवेतजन्यानीत्येव पक्षीकर्तव्यत्वेनादृष्टद्वारकेत्यादिपक्षतावच्छेदकनिर्वचनप्रयासवैयर्थ्यापत्तेः। तस्मात् स्वजनकादृष्टोत्तरेत्यपि विशेषणमयुक्तम्।

ननु तर्हि स्वजनकादृष्टोत्तरेत्यस्य स्थानेऽदृष्टप्रागभावव्याप्यप्रागभावप्रतियोगिभिन्नेति विशेषणं क्रियते, हविरादिगोचरज्ञानादिन्यदृष्टप्रागभावव्याप्यप्रतियोगिनि यत्र तेषां प्रागभावस्तत्र तत्कार्यादृष्टप्रागभावावश्यंभावादिति तद्व्यवच्छेदः। अतस्तज्जन्यत्वेन सिद्धसाधनम्। यद्यप्यदृष्टाजनकेति ऋजुविशेषणेनापि तद्व्यवच्छेदः कर्तुं शक्यः, तथाप्यत्र सिसाधयिषितानामीश्वरज्ञानादीनामदृष्टजनकत्वाङ्गीकाराद् बाधः स्यात्, स मा भूदित्येवं विशेषणमिति चेन्न, कुलालादिगतघटादिजनकज्ञानादीनामपि तन्निष्ठविहितनिषिद्धक्रियाजन्यादृष्टप्रागभावव्याप्यप्रागभावप्रतियोगित्वेन दृष्टान्तत्वाभावप्रसङ्गात्। अथोच्येत स्वजन्यत्वमदृष्टे विशेषणं क्रियते। एवं च यान्यदृष्टजनकानि जन्यानि च तेषामेव स्वजन्यादृष्टप्रागभावव्याप्यप्रागभावप्रतियोगित्वं कुलालादिकृतीनां त्वन्यजन्यदृष्टप्रागभावाव्याप्यप्रागभावप्रतियोगित्वमिति न दृष्टान्तस्य साध्यवैकल्यम्। न चैवं सति तीर्थाभिगमनतीर्थस्नानादिजनकज्ञानादीनामदृष्टजनकानां स्वजन्यादृष्टप्रागभावव्याप्यप्रागभावप्रतियोगितया तद्भिन्नत्वाभावेन तथाभूतज्ञानादिजन्यत्वसाध्यसम्प्रतिपत्तिस्तीर्थादिगमनादिषु

नास्तीति तेषु सन्दिग्धानैकान्तिकत्वापत्तिः। तीर्थाभिगमनादिकारणज्ञानादीनां तेषु कार्येष्वदृष्टद्वारकत्वेऽपि स्वर्गादिकार्यान्तरेष्वदृष्टद्वारकत्वेन तेषामदृष्टद्वारकस्वोपादानगोचरजन्यभिन्नतया पक्षान्तर्भावेन पक्षे साध्यसन्देहस्यादोषत्वादिति चेन्न, स्वपदस्य यद्वस्त्वदृष्टजनकत्वेन गृह्यते तदा तत्परत्वेऽननुगमप्रसङ्गेन व्यवस्थितैकार्थपरत्वे वक्तव्ये पक्षीकृतक्षित्यादिजनकादृष्टजनकानन्तहविरादिगोचरज्ञानादिमध्ये यज्ज्ञानादित्रयं स्वशब्देन ग्राह्यम्, ततोऽन्येषां स्वजन्यादृष्टप्रागभावव्याप्यप्रागभावप्रतियोगिभिन्नत्वेन तज्जन्येषु क्षित्यादिषु सिद्धसाधनं प्रसज्यत इत्यत्रापि पक्षे स्वपदार्थानुप्रवेशप्रयुक्तदोषानतिक्रमणात्।

एतेनादृष्टप्रागभावेत्यादौ स्वजनकत्वमदृष्टविशेषणं कुलालगतज्ञानादीनां तद्गतविहितनिषिद्धक्रियान्तरजन्यादृष्टप्रागभावव्याप्यप्रागभावप्रतियोगित्वेऽपि घटजनकादृष्टप्रागभावव्याप्यप्रागभावप्रतियोगित्वं नास्ति। यद्यपि घटकर्तुः कुलालस्यैव घटभोक्तृत्वे घटजनकादृष्टप्रागभावं प्रति तद्गतघटजनकज्ञानादिप्रागभावानां दैशिकव्याप्तिरस्ति, तथापि कालिकव्याप्तेरिह विवक्षितत्वान्न दोष इत्यपि शङ्का निरस्ता। स्वपदार्थाननुगमदोषानिस्तारात् सर्वनाम्नां समभिव्याहृतपरत्वस्य "तेन रक्तं रागात्" (पा० ४.२.१) इत्यादिप्रयोगेषु व्युत्पत्तिसिद्धत्वात् तदर्थाननुगमो न दोष इति चेत्, सत्यम्, शब्देन बोधने तथा इहानुमानेनेश्वरं सिषाधयिषसि तत्र व्यापकतावच्छेदकाननुगमो दोष एव। तस्मादिदमनुमानमयुक्तमिति।

अत्र ब्रूमः—ध्वंससाधारणमेवात्र सकर्तृकत्वं साध्यम्, अन्यथा जगज्जन्मस्थितिलयकारणत्वश्रुतेरनुमानसिद्धार्थानुवादकत्वपूर्वपक्षानिर्वाहात्। ततश्च पक्षे समवेतपदं साध्ये उपादानगोचरपदं हेतौ भावपदं च नोपादेयम्। एवं च ध्वंसवच्छब्दफूत्कारादिकमप्यस्मदादिकर्तृकमिति तत्संग्रहाय पक्षे स्वोपादानगोचरपदमपि नोपादेयम्। अदृष्टप्रागभावेत्यादिविशेषणस्यादृष्टद्वारकत्वमर्थः। एवं च हविरादिगोचरज्ञानादीनां क्षित्यादिकार्येष्वदृष्टद्वारकत्वान्न तद्वतास्मदादिना सिद्धसाधनम्। न चैवं सति बाधः, ईश्वरज्ञानादीनामप्यदृष्टद्वारकत्वात् तज्जन्यस्तज्जन्यजनको व्यापार इति तल्लक्षणाङ्गीकारादिति वाच्यम्, यद्धर्मावच्छिन्नं प्रति जनकीभूतो व्यापारी तज्जननाय तद्धर्मावच्छिन्नं यं व्यापारमपेक्षते तस्यात्र द्वारपदेन विवक्षितत्वात्, ईश्वरज्ञानादीनां कार्यत्वावच्छिन्नजननार्थं तत्तददृष्टापेक्षायामप्यदृष्टव्यापीश्वरज्ञानजन्यतावच्छेदककार्यत्वावच्छेदकत्वेन तदनवच्छिन्नत्वाभावात्। न

चैवमर्थान्तरवारणैकप्रयोजनस्यादृष्टद्वारकत्वविशेषणस्य व्याप्तिग्रहानौपयिकत्वाद् वैयर्थ्यदोषः, व्यापकविशेषणे वैयर्थ्यबीजाभावात्, साध्यनिरूपिता हेतुनिष्ठा व्याप्तिर्हेतुगतलघुधर्मावच्छेदेन ग्राह्येति सा धूमत्वादिलघुधर्मावच्छेदेनैव गृह्यते, न तु नीलधूमत्वादिगुरुधर्मावच्छेदेनेति हि व्याप्यविशेषणवैयर्थ्ये बीजम्। न चैवं व्यापकविशेषणे वैयर्थ्यमापादयितुं शक्यम्, यतस्तत्र साधनसमानाधिकरणात्यन्ताभावप्रतियोगितायामनवच्छेदकत्वमेव ग्राह्यम्, न त्ववच्छेदकत्वम्। न चानवच्छेदकत्वग्रहे गौरवं विरोधि, तथा सति गुरुधर्मस्यावच्छेदकत्वप्रसङ्गाभावात्। न चात्यन्ताभावगर्भव्याप्तौ व्यापकतावच्छेदकेऽनवच्छेदकत्वस्य ग्राह्यत्वेऽप्यन्योन्याभावगर्भव्याप्तौ साधनसमानाधिकरणमन्योन्याभावप्रतियोगितानवच्छेदकतायां साध्यगतायामवच्छेदकत्वं ग्राह्यम्, तद्ग्रहे च गौरवं विरोधीति व्यापकेऽपि व्यर्थविशेषणता स्यादिति वाच्यम्, तत्रापि साधनसमानाधिकरणान्योन्याभावप्रतियोगितावच्छेदकतायामनवच्छेदकत्वस्यैव व्यापकतावच्छेदके ग्राह्यत्वात्, गन्धपृथिवीत्वव्याप्तौ तत्तद्गन्धत्वाकारेण साधनसमानाधिकरणान्योन्याभावप्रतियोगितावच्छेदकेषु गन्धेषु तद्भिन्नत्वस्याभावेन गन्धत्वेऽपि तदवच्छेदकत्वासम्भवात्। न चान्योन्याभावस्य व्याप्यवृत्तित्वनियमात् तत्तद्गन्धत्वाकारेणावच्छेदकेषु गन्धेषु गन्धत्वाकारेणावच्छेदकभिन्नत्वासम्भवेऽप्यवच्छेदकत्वात्यन्ताभावः सम्भवति, तस्याव्याप्यवृत्तित्वाभ्युपगमादिति तथाभूते साधनसमानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदकत्वे व्यापकतावच्छेदकस्यावच्छेदकत्वं ग्राह्यमिति वाच्यम्, अवच्छेदकत्वग्रहणसापेक्षत्वावच्छेदकत्वात्यन्ताभावापेक्षया तन्नैरपेक्ष्येणावच्छेदकान्योन्याभावस्य लघूपस्थितिकतयाऽवच्छेदकभिन्नत्वरूपस्यैवानवच्छेदकत्वस्य व्याप्तिशरीरे प्रवेशयितुमुचितत्वात्। तस्मात् पक्षद्वयेऽप्यनवच्छेदकत्वमेव व्यापकावच्छेदके ग्राह्यमिति न व्यापके व्यर्थविशेषणताबीजम्। अत एव व्यापके व्याप्तिग्रहानौपयिकान्यर्थान्तरवारणेन स्वाभिमतसाध्यसिद्धिप्रयोजनानि विशेषणानि कथकसम्प्रदाये सर्वेऽपि वादिनो निवेशयन्ति।

एतेनेदमपि निरस्तम्—ज्ञानेच्छाकृतिषु कारणतावच्छेदकेनादृष्टद्वारकत्वमपि निवेशनीयम्, गौरवात्। न च तथा सत्यदृष्टद्वारकज्ञानादिसत्त्वात् कुलालज्ञानादिकं विनापि घटादिकार्योत्पत्तिप्रसङ्गः, घटादिकार्यविशेषे मृदादि तत्तदुपादानगोचरादृष्टद्वारकजन्यज्ञानादीनां विशेषकारणरहितसामान्यकारणमात्रेण कार्यापादनायोगादित्यदृष्टद्वारकत्वस्य ज्ञानादिगतकारणताव-

कल्पनीयः सर्वज्ञत्वादिमान् । नासौ शास्त्रैकगम्य इति नास्मिन्

च्छेदकत्वेऽप्यर्थान्तरवारणाय व्यापकशरीरे निवेशस्योपपादितत्वात् । तस्माददृष्टद्वारकजन्यकृत्यजन्यानि जन्यान्यदृष्टाद्वारकापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यानि जन्यत्वात्, यद्यज्जन्यं तत्तददृष्टद्वारकापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यं यथा घटादीत्यनुमानादीश्वरसिद्धिरप्रत्यूहा ।

नन्वनुमानादपि तत्सिद्धिः । तावता शास्त्रस्य प्रामाण्यं न हीयते । अनुमानवत्तस्यापि तत्प्रमाजननसामर्थ्यावैकल्यादित्याशङ्क्याह—नासाविति । शास्त्रैकगम्य एवार्थे शास्त्रस्य प्रामाण्यं न तु प्रमाणान्तरविषयेऽपि, तत्र शास्त्रवैफल्यादिति भावः ।

ननु स्यादेतत् । प्रमाणान्तरविषयेऽपि शास्त्रस्य प्रामाण्यं दृश्यते, यथा व्रीहीनवहन्तीति शास्त्रस्यावहनने, यथा वा—"इमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्ते" (तै० सं० ५.१.२.१) इति शास्त्रस्य मन्त्राश्वाभिधानीसम्बन्धे पुरोडाशसाधनतयोपात्तेषु व्रीहिषु तुषविमोकार्थं शास्त्रेण विधीयमानमवहननं हि तत्र लोकसिद्धकारणत्वादाक्षेपरूपस्यापि प्रमाणस्य विषयः । अश्वाभिधान्यादानानुष्ठानोपयोग्यनुष्ठेयार्थज्ञानसाधनतया शास्त्रेण विधीयमानः "इमामगृभ्णन्" (तै० सं० ५.१.२.१) इति मन्त्रश्च रशनाप्रकारकसामर्थ्यरूपलिङ्गाधीनविनियोगकल्पनस्यापि विषयः ।

ननूदाहृतविधिविधेययोरवहननमन्त्रसम्बन्धयोः प्रमाणान्तरविषयत्वं नास्त्येव । तथा हि—अवहनने तावदाक्षेपो हन्तिशास्त्रस्य प्रवृत्तेः पूर्वं न प्रवर्तते । "व्रीहिभिर्यजेत" (आप० श्रौ० ६.३१.१३) इति शास्त्रेण व्रीहीणां पुरोडाशनिर्वर्तकद्वारयागसाधनत्वावगत्यनन्तरं तेषां पुरोडाशनिर्वर्तकत्वं तुषविमोकं विनाऽनुपपन्नमिति तत्र साधनाकाङ्क्षायां यावन्नखविदलनसाधारणलोकसिद्धकारणभावानुसन्धानेन पाक्षिकतत्साधनत्वेनावहननमाक्षिप्यते, ततः प्रागेव झटिति प्रत्यक्षशास्त्रेणावहननस्य तत्साधनतया समर्पणात् । नापि तदनन्तरं प्रवर्तते, प्रत्यक्षशास्त्रसिद्धेनावहननेनैव साधनाकाङ्क्षानिवृत्तेः । एवम्—"इत्यश्वाभिधानीमादत्ते" (तै० सं० ५.१.२.१) इति शास्त्रप्रवृत्तेः पूर्वं मन्त्रस्याश्वगर्दभरशनासाधारणलैङ्गिकविनियोगकल्पना न प्रवर्तते, आक्षेपतः प्रत्यक्षशास्त्रस्य शीघ्रप्रवृत्तिकत्वात् । नापि तदनन्तरं प्रवर्तते, प्रत्यक्षशास्त्रसमर्पितविनियोगेन मन्त्रस्य नैराकाङ्क्ष्यादिति चेत्, सत्यम् । अत्र वास्तवी प्रमाणान्तरप्रवृत्तिर्नास्त्येव ।

तथापि यदीमे शास्त्रे न प्रवर्तेतां तदानीमाक्षेपलैङ्गिककल्पनयोः प्रवृत्तिः स्यादिति तर्किता तयोः प्रवृत्तिरस्ति। अत एव ह्यनयोः शास्त्रयोरप्रवृत्तावर्थाक्षेपेण नखविदलनस्यापि कदाचित् प्राप्त्याऽवघातस्य पाक्षिक्येव प्राप्तिः स्यात्। मन्त्रस्य च लिङ्गाविशेषेण गर्दभरशनाग्रहणेऽपि विनियोगः स्यात्। अनयोः प्रवृत्तौ त्वाक्षेपलैङ्गिककल्पनयोराकाङ्क्षाभावेनानवतारादवघातस्य नियतता मन्त्रस्य गर्दभरशनातो निवृत्तिश्च लभ्यत इति नियमपरिसंख्याफलकत्वमनयोर्विध्योरभ्युपगम्यते।

ननु तर्किते प्रमाणविषये शास्त्रप्रवृत्तावपि वास्तवप्रमाणविषये शास्त्रप्रवृत्तिर्न सम्भवति। न चात्रापि तर्कितैवानुमानप्रवृत्तिः, न तु वास्तवी, झटिति प्रवृत्तेन प्रत्यक्षशास्त्रेणेश्वरसिद्धौ सिद्धसाधनेनानुमानानवतारादिति वाच्यम्, सिद्धेरप्यनुमित्सयाऽनुमानावतारसम्भवादिति चेन्, सत्यम्। तर्कितवास्तवसाधारण्येन प्रमाणान्तरविषयेऽपि शास्त्रप्रवृत्तिरस्तीत्येतावत्येतदुदाहरणद्वयं दर्शितम्। वास्तवप्रमाणान्तरविषयेऽपि तत्प्रवृत्तिर्दृश्यत एव। यथा—"अथातोऽग्निष्टोमेनानुयजन्ति तमुक्थ्येन तमतिरात्रेण तं द्विरात्रेण तं त्रिरात्रेण तं चतूरात्रेण तं पञ्चरात्रेण" इत्यादिसन्दर्भे। अत्र प्रथमवाक्येन प्रकृत्यग्निष्टोमाङ्गत्वेन सिद्धस्याग्नेः सर्वासु तद्विकृतिष्वतिदेशतः प्राप्तिरस्तीति द्विरात्रादिष्वग्नेरङ्गत्वे चोदकवाक्यविषय एव "तं द्विरात्रेण" इत्यादिशास्त्रप्रवृत्तिर्दृश्यते। न च द्विरात्रादिषु चोदकवाक्यमग्निव्यतिरिक्ताङ्गविषयं कल्पनीयम्, अखण्डोपकारकमुखेन सर्वाङ्गविषयतया प्रवर्तमानस्य चोदकवाक्यस्य किञ्चिद्व्यतिरिक्ताङ्गविषयत्वं कल्पयितुं न शक्यत इति तद्वर्जनातिदेशपक्षस्य गृहमेधीयाधिकरणे निराकृतत्वात्। यथा "उपांशुयाजमन्तरा यजति" इत्युपांशुयाजोत्पत्तिवाक्येन पौर्णमासीकर्तव्याग्नेयाग्नीषोमीययागद्वयान्तराले उपांशुयाजं विदधानेनार्थसिद्धतया सामर्थ्यरूपप्रमाणान्तरविषय एवोपांशुयाजस्य पौर्णमासीकालत्वे—"तावब्रूतामग्नीषोमावाज्यस्यैव नावुपांशु पौर्णमास्यां यजन्ति" (शां० ब्रा० ३.६) इति शास्त्रप्रवृत्तिर्दृश्यते। तथा—"द्वे आहवनीये चतस्रो गार्हपत्ये चतस्रोऽन्वाहार्यपचने दश सम्पद्यन्ते दशाक्षरा विराड् य एवं विद्वान् विराट्सम्पन्नमग्निहोत्रं जुहोति" इत्यत्र विराट्सम्पत्तिवाक्यानुसारेण दशसंख्यानामग्निहोत्राहुतीनां मध्ये द्वे एवाहवनीये न त्वष्टावितरा इति परिसंख्यानामष्टानां गार्हपत्यान्वाहार्यपचनरूपाधिकरणान्तरविधानसामर्थ्यात् सिद्ध्यतीति सामर्थ्यरूपप्रमाणान्तरविषय एव परिसंख्याने द्वे आहवनीय इति शास्त्रप्रवृत्तिर्दृश्यते।

नन्वस्तु नाम प्रमाणान्तरविषयेऽपि शास्त्रप्रवृत्तिः, तथापि यत्प्रमाणान्तरविषयावलम्बनं शास्त्रान्तरस्य किञ्चित् फलं वाच्यम्, अन्यथा तस्य सर्वथैव वैयर्थ्यप्रसङ्गात्। अस्ति च प्रमाणान्तरविषयावलम्बनानामुदाहृतशास्त्राणां किञ्चित् किञ्चित्फलम्। तथाहि—द्विरात्रादिशास्त्राद् द्विरात्रादिष्वग्न्याश्रितगुणकामादिप्राप्तिः फलम्। अग्न्याश्रिता हि गुणकामाः श्रूयन्ते-"श्येनचितं चिन्वीत स्वर्गकामः" (तै० सं० ५.४.११.१) इत्यादयः। तेन चोदकादग्नेः प्राप्तौ न प्राप्नुवन्ति। अङ्गस्य हि सतश्चोदकात् कथंभावाकाङ्क्षया कल्प्यात् प्राप्तिः, न त्वङ्गाश्रितानां फलार्थगुणानाम्, तथाष्टमाध्याये निर्णीतत्वात्। उपदेशादग्नेः प्राप्तौ तु प्रकृताविव द्विरात्रादिष्वपि तदाश्रिताः काम्यगुणाः प्राप्नुवन्ति। "तावब्रूताम्" (शां० ब्रा० ३.६) इत्यादिशास्त्रस्योपांशुयाजे—"दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत" इत्यधिकारिवाक्योद्देश्यफलसम्बन्धसिद्धिः फलम्। तदभावे हि विद्वद्वाक्यस्थेनाधिकारवाक्यस्थेन च पौर्णमासपदेन—"यदाग्नेयोऽष्टाकपालोऽमावास्यायां च पौर्णमास्यां चाच्युतो भवति। अग्नीषोमीयमेकादशकपालं पूर्णमासे प्रायच्छत्" (तै० सं० २.६.३.३) इत्युत्पत्तिवाक्यावगतपौर्णमासीकालयोराग्नेयाग्नीषोमीययागयोरेव झटिति प्रवृत्तिनिमित्तावगत्या प्रथमगृहीतफलयोः सम्बन्धकरणादर्थावगम्यपौर्णमासीसम्बन्धस्योपांशुयाजस्य विलम्बितप्रवृत्तिनिमित्तप्रतीतिकतया विद्वद्वाक्याधिकारवाक्यगतपौर्णमासपदागृहीतस्य फलसम्बन्धो न सिद्ध्येत्।

तत्सम्भवे तु—"उपांशु पौर्णमास्यां यजन्ति" इति प्रकृत्य "जामि वा एतत्" (तै० सं० २.६.६.१) इत्याद्याम्नानादुपांशुयाजोत्पत्तिवाक्यश्रुतोऽन्तरालकालः पौर्णमासीरूपतां प्रापितो भवतीत्याग्नेयाग्नीषोमीययोरिवोपांशुयाजस्याप्युत्पत्तिवाक्यावगतपौर्णमासीकालत्वेन विद्वद्वाक्याधिकारवाक्यगतपौर्णमासपदप्रवृत्तिनिमित्तप्रतीतौ विशेषाभावात् तस्यापि फलसम्बन्धः सिद्ध्यति। "द्वे आहवनीये" इति शास्त्रस्य "दशानामप्याहुतीनामग्निहोत्रं जुहुयात् स्वर्गकामः" इत्यधिकारवाक्योद्देश्यफलसम्बन्धसिद्धिः फलम्। तदभावे हि गार्हपत्यान्वाहार्यपचनवाक्ये संख्याधिकरणविशिष्टकर्मविधायके स्यातां न तु—"अग्निहोत्रं जुहोति" (तै० सं० १.५.९.१) इति वाक्यविहितकर्मानुवादेन गुणमात्रविधायके प्राप्ते कर्मणि, संख्याधिकरणरूपानेकगुणविधाने वाक्यभेदापत्तेः। ततश्च गार्हपत्यान्वाहार्यपचनवाक्ययोः संख्याधिकरणविशिष्टहोमविध्यवश्यंभावेनेष्टावपि होमाः—"अग्निहोत्रं जुहोति"

(तै० सं० १.५.९.१) इति वाक्यविहिताद्धोमादन्य एव स्युः, विहितस्य विधानायोगादिति। न तेषामग्निहोत्रमिति नाम सिद्ध्यति, किन्त्वग्निहोत्रवाक्यविधेयस्यैकस्यैव होमस्य तन्नामेति प्राप्नोति, तदुत्पत्तिवाक्यगतत्वात्। अग्निहोत्रवाक्यविहितस्य सायंप्रातःकालयोर्देवताभेदेन द्विर्द्विरभ्यसनीयस्य होमस्य गार्हपत्यान्वाहार्यपचनवाक्यविहितानामष्टानां होमानां चानुवादके विराट्सम्पत्तिवाक्ये तावत् साधारण्येनाग्निहोत्रशब्दप्रयोगसत्त्वेऽपि तस्य छत्रिन्यायेन लक्षणोपपत्तेः। अग्निहोत्रवाक्यविहिते कर्मणि प्रथमावगतशक्त्यवश्यंभावेन तत्सम्बन्धादितरेषु लक्षणोपपत्तावनेकत्र शक्तिकल्पनस्यान्याय्यत्वात्। "रथन्तरं पृष्ठं भवति" (ता० ब्रा० ११.४.६), "बृहत्पृष्ठं भवति" (ता० ब्रा० ११.४.६) इत्युत्पत्तिवाक्ययोर्माहेन्द्रस्तोत्रनामत्वेन प्रथमावगतस्य पृष्ठशब्दस्य—"सप्तदशानि पृष्ठानि" इत्यनुवादवाक्ये माहेन्द्रादिषु चतुर्षु स्तोत्रेषु प्रयोगो लाक्षणिक इति सप्तमाध्याये निर्णीतत्वात्।

एवं चाधिकारवाक्यस्थेनाऽग्निहोत्रनाम्नाग्निहोत्रवाक्यविहितस्यैव होमस्य समर्पणात् तस्यैव द्विरभ्यसनीयस्य फलसम्बन्धः सिद्ध्येत्, न तु गार्हपत्यान्वाहार्यपचनवाक्यविहितानां होमानाम्। "द्वे आहवनीये" इति वाक्यसद्भावे तु विराट्सम्पत्तिवाक्यम् "अग्निहोत्रं जुहोति" (तै० सं० १.५.९.१) इति विहितस्यैव होमस्य दशधाभ्यासपरम्, अग्निहोत्रनामानुसारेणोपपादनसम्भवात्। तेषां दशानामभ्यासानां मध्ये—"द्वे आहवनीये" इत्यनेनाहवनीयपरिसंख्यया तेषामपेक्षितमधिकरणमेव गार्हपत्यान्वाहार्यपचनवाक्याभ्यां विधीयते। तयोश्चतुःसंख्याश्रवणं तु—"समं स्यादश्रुतत्वात्" (जै० १०.३.५३) इति न्यायप्राप्तानुवादकमिति लभ्यते। एवमग्निहोत्रवाक्यविहितस्यैव होमस्य देवताभेदेनाधिकरणभेदेन च सायं प्रातश्च दशदशाभ्यासाः, न तु तद्व्यतिरिक्ता होमाः सन्तीति पर्यवसानेऽधिकारवाक्यगतमग्निहोत्रनाम सर्वविधाभ्याससहितस्याग्निहोत्रस्य समर्पकमिति सर्वसाधारण्येन फलसम्बन्धः सिद्ध्यति। एवं प्रमाणान्तरविषयावलम्बनेषु शास्त्रेषु किञ्चित्फलं न कल्प्यते चेत्, द्विरात्रादिवाक्यानि स्तुत्याद्यर्थानुवादकान्येव स्युः। इह त्वनुमानविषये जगत्कर्तरि प्रवर्तमानस्य शास्त्रस्य न तथा किञ्चित्फलं दृश्यत इत्यनुवादकत्वकल्पनमेव न्याय्यमिति चेन्मैवम्। इहापि वेदान्तरूपेण शास्त्रेण जगत्कर्तृज्ञानमभ्युदयनिःश्रेयसोपयोगि न त्वनुमानेन तज्ज्ञानमित्येवंफलकल्पनोपपत्तेः। एवंभूतफलकल्पनयापि केषाञ्चिच्छास्त्राणां साफल्यदर्शनात्।

शास्त्रस्य प्रामाण्यम्, शास्त्रस्य प्रमाणान्तराप्राप्तविषयत्वादिति पूर्वः पक्षः ।

तथाहि—नानाशाखाग्निहोत्रादिवाक्यानि परस्परप्राप्तविषयाणि तत्तच्छाखाध्यायिनां तत्तच्छाखान्तर्गतवाक्यजन्यान्येवाग्निहोत्रादिज्ञानान्यभ्युदयाद्युपयोगीनि, न तु शाखान्तरगतवाक्यजन्यज्ञानानीत्येवं कल्पनया सफलान्युपपादनीयानि । स्वर्गकामवाक्यप्राप्तार्थविषयस्वर्गकामवाक्यादीन्यप्येवमेव सफलानि वक्तव्यानि । आहत्य च मीमांसकैरनारभ्याधीतसाप्तदश्यवाक्यसाफल्यमित्थमेवोपपादितम् । तथा हि—''सप्तदश सामिधेनीरनुब्रूयात्'' (श० ब्रा० १.५.१.१२) इत्यनारभ्य श्रूयते । अत्र विधीयमानस्य साप्तदश्यस्य न सामिधेनीद्वारा प्रकृतौ निवेशः, प्राकरणिकतत्पाञ्चदश्यविरुद्धत्वात् । किन्तु विकृतिष्वेव । तत्रापि श्रुतसाप्तदश्यासु मित्रविन्दादिष्वेव निवेशो न सर्वासु विकृतिषु । अनारभ्य श्रुतं साप्तदश्यं हि यावत् सामिधेनीद्वारा सकलविकृत्यङ्गं कल्प्यते, तावत् प्राकरणिकैर्वाक्यैर्मित्रविन्दादिसम्बन्धे क्षीणार्थापत्तिर्न क्रत्वन्तरसम्बन्धं कल्पयति । तेनानारभ्याधीतस्य साप्तदश्यस्योपसंहारार्थानि तत्तत्प्रकरणाम्नातानि साप्तदश्यवचनानि । ततश्च प्राकरणिकवचनैः साप्तदश्यस्य क्रतुसम्बन्धसिद्धिरनारभ्याधीतवाक्येन सामिधेनीसम्बन्धसिद्धिरिति मीमांसकमर्यादा । अत्रानारभ्यविधानाभावे साप्तदश्यस्य क्रतुसम्बन्धवत् सामिधेनीसम्बन्धोऽपि प्राकरणिकवचनैरेव सिद्ध्यतीत्यनारभ्यविधानस्य वैयर्थ्यशङ्का प्राप्नोति । अत्रोक्तं तन्त्ररत्ने—"यद्यपि प्राकरणिकेनैव क्रतुसम्बन्धः सामिधेनीसम्बन्धश्च सिद्ध्यति, तथापि वाक्यद्वयाम्नानादेवंविज्ञानमभ्युदयकारीति विज्ञायते, अर्थवादप्ररोचितवत्" इति । तस्मात् प्रमाणान्तरविषयेऽपि शास्त्रप्रामाण्यस्य बहुषु स्थलेषु दर्शनादनुमानविषयेऽपि जगत्कर्तरि तत्प्रामाण्यमुपपद्यत इत्याशङ्क्याह—शास्त्रस्य प्रमाणान्तराप्राप्तविषयत्वादिति ।

अयं भावः—प्रागेव प्राप्तेऽर्थे शास्त्रस्य प्रामाण्यं क्वचिदपि न दृश्यते । तथाहि—द्विरात्रादिवाक्यान्यग्निबोधकपदयुक्तान्यखण्डोपकारमुखेन तज्जनकानि सर्वाण्यपि प्राकृताङ्गान्यविशेषेण प्रापयतो विशिष्य तत्तदङ्गेषु सामान्यमुखेन पर्यवस्यतश्च द्विरात्रादिचोदकवाक्यात् प्रागेव तेषु विशिष्याग्निसम्बन्धं बोधयन्ति । ''तावब्रूताम्'' (शां० ब्रा० ३.६) इति वाक्यं पौर्णमासीपदयुक्तमन्तरालकालविधानसामर्थ्यपरामर्शात् प्रागेवोपांशुयाजे पौर्णमासी-

कालयोगं बोधयति। "द्वे आहवनीये" इति वाक्यं गार्हपत्यान्वाहार्यपचन-वाक्यद्वयसामर्थ्यपरामर्शात् प्रागेव "द्वे आवहनीये" इत्याहुत्यन्तराणा-माहवनीयाद् व्यावृत्तिं बोधयति। नानाशाखागताग्निहोत्रादिवाक्यानि च तत्तच्छाखाध्यायिनं प्रति स्वशाखाध्ययनप्राथम्यात् शाखान्तर-वाक्येभ्यः प्रागेवाग्निहोत्रादिकर्तव्यतां बोधयन्ति। स्वर्गकामवाक्यं च सामान्यमुखप्रवृत्तात् स्वर्गकामवाक्यात् प्रागेव ज्योतिष्टोमस्य विशिष्य स्वर्गसम्बन्धं बोधयति। ([1]एवमेषां द्विरात्रादिवाक्यानां चोदकवाक्यादिभ्यः प्रागेव स्वस्वार्थबोधकत्वाभावे तेषामज्ञातज्ञापकत्वरूपं प्रामाण्यमेव न सिद्धयेत्। दूरे प्रामाण्यविशेषरूपं शास्त्रत्वम्)। न चैवमिहापि गृहीतव्युत्पत्तिकप्रसिद्धपदघटितं यतो वेत्यादिशास्त्रं प्रसिद्धव्याप्यव्यापक-तद्व्याप्तिग्रहादिसापेक्षादनुमानात् प्रागेव जगत्कर्तारं बोधयतीति शङ्कनीयम्, यतो वेत्यादिशास्त्रं हि यच्छब्दयोगाज्जगज्जन्मादि-कारणस्यानुवादकं न स्वयं तस्य प्रापकम्। तस्य शास्त्रप्रतिपन्नार्थानुवाद-कत्वाभ्युपगमेऽपि—"सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः" (छा० उ० ६.८.४) इति वाक्यं तस्य पुरोवादकमभ्युपगन्तव्यम्, अर्थैक-रूप्यात्। तत्तु—"अन्नेन सोम्य शुङ्गेनापोमूलमन्विच्छ, अद्भिः सोम्य शुङ्गेन तेजोमूलमन्विच्छ, तेजसा सोम्य शुङ्गेन सन्मूलमन्विच्छ" (छा० उ० ६.८.४) इति कार्यलिङ्गेन जगत्कारणानुमानप्रदर्शनपूर्वकं प्रवृत्तत्वादनुमानसिद्धा-र्थानुवादकमिति स्वप्रकरण एव स्पष्टम्। अतस्तदुपजीवनेन प्रवृत्तस्य यतो वेत्यादिवाक्यस्यानुमानमुखनिरीक्षणावश्यम्भावात् तदनन्तरप्रवृत्तिकस्यास्य जगज्जन्मादिकारणे कथमपि न प्रामाण्यशङ्कावकाशः।

ननु जगत्कर्तुरनुमानतः सिद्धिसम्भवेऽपि तस्य यतो वेत्यादिवाक्य एव तद्ब्रह्मेति विधीयमानं तस्य त्रिविधपरिच्छेदराहित्यं वाक्यान्तरेषु विधीय-मानं च तस्य गुणचरितविग्रहविशेषादिवैशिष्ट्यं वेदान्तैकप्रमाणकमभ्यु-पगन्तव्यमिति चेदस्तु नाम, न तावता तस्यानुमानप्रमाणत्वं यतो वेत्यादि-लक्षणवाक्यस्य तदनुवादकत्वं च हीयते। नहि प्रत्यक्षादिना स्वरूपतो लक्षणतश्च देवदत्तं जानानं प्रति लक्षणमुखेन तदनुवादपूर्वकं तस्य पुत्रेयत्ता-दिकथने क्रियमाणे पुत्रेयत्तादिकथनस्य श्रोतारं प्रत्यननुवादकत्वमस्तीत्येता-वता लक्षणकथनस्य प्रत्यक्षादिसिद्धार्थानुवादकत्वमपैतीति।

---

१. कोष्ठाङ्कितं वाक्यं क्वचिन्न दृश्यते।

सिद्धान्तस्तु—जगत्कारणं ब्रह्म वेदान्तशास्त्रैकगम्यम्, "नावेदविन्मनुते तं बृहन्तम्" (इति० उ० २०) इत्यादिषु वेदान्तशास्त्रमन्तरेण ब्रह्मणो बोधासम्भवश्रवणात् । यदुक्तं सावयवत्वात् कार्यत्वसिद्धौ प्रपञ्चस्य कर्ता समुचितः कल्प्य एक इति, तदसत्, विचित्ररचनस्य गोपुर-

---

एवं पूर्ववृत्तानुमानरूपप्रमाणान्तरप्राप्तार्थविषयकत्वाद् यतो वेत्यादिशास्त्रस्य तत्पुरोवादकत्वाभिमतस्य—"सन्मूलाः सोम्येमाः सर्वाः प्रजाः" (छा० उ० ६.८.४) इत्यादिशास्त्रस्य वा जगत्कर्तरि प्रामाण्यं नोपपद्यत इति पूर्वपक्षे प्राप्ते तस्य तत्र प्रामाण्यमुपपादयितुं जगत्कर्तुस्तथाभूतप्रमाणान्तरप्राप्तत्वं निराकुर्वन् सिद्धान्तयति—सिद्धान्तस्त्विति । इत्यादिष्वित्यादिशब्देन "नैषा तर्केण मतिरापनेया" (कठो० २.९) इत्यादिवाक्यान्तरं गृह्यते ।

ननु—"नावेदवित्" (इति० उ० २०) इत्यादिवाक्यजातं मुमुक्षुज्ञेययावद्विशेषणविशिष्टतया ब्रह्मावगतिरन्यतो न सम्भवतीत्येतत्परम्, न तु जगज्जन्मादिकर्तृतामात्रेणाप्यन्यतस्तदवगतिर्न सम्भवतीत्येतत्परम् । तथा तदवगतिहेतोः श्रुत्यैव प्रदर्शितस्यानुमानस्य जागरूकत्वादित्याशङ्क्याह—यदुक्तमिति ।

विचित्रेति । अयमाशयः—महीमहीधरमहार्णवादीनामेकेन कर्त्रा युगपत्कृतत्वेनैव सकर्तृकत्वं निर्वाह्यमित्यत्र नास्ति प्रमाणम्, महतो देवालयस्य प्रासादमण्डपगोपुरप्राकारादीनामिव तेषां क्रमेण बहुभिः कृतत्वेनापि सकर्तृकत्वोपपत्तेः । प्रत्युत महीमहीधरादिकमनेककर्तृकं यावत्सम्प्रतिपन्नैककर्तृकघटाद्यपेक्षया महाकार्यत्वात्, गोपुरप्राकारादिवदिति बहुकर्तृकत्वस्यैवानुमातुं शक्यत्वाच्च । न च लाघवात् कर्त्रैक्यसिद्धिः । नहि प्रसिद्धसंसारविलक्षणा बहवः कर्तारः कल्प्यन्ते, किन्तु संसारिष्वेव केचित् कर्मोपासनाविशेषैरुपचितपुण्यविशेषाः क्षित्यादिषु कस्यचित् कस्यचित् कालविशेषेषु कर्तारः कल्प्यन्ते । प्रसिद्धं ह्यगस्त्यविश्वामित्रादीनां विन्ध्यसंस्तम्भनमहार्णवचुलुकीकरणस्वर्गान्तरसृष्ट्यादिसामर्थ्यम् । अद्यतनेष्वङ्कुरादिष्वपि सूक्ष्मव्यवहितविप्रकृष्टार्थज्ञानादिमन्तस्तत्र तत्र सन्तो योगिनः कर्तारः सम्भवन्ति । अतः क्षित्यादिसकलोपादानगोचरापरोक्षज्ञानचिकीर्षादिमतः संसारिविलक्षणस्य कस्यचित् कर्तुः कल्पन एव धर्मिकल्पनागौरवम् ।

किञ्च, अदृष्टद्वारकेत्याद्यनुमानेन लाघवादेकस्य कर्तुः सिद्धिरिति कोऽर्थः ? किं वस्तुत एकमेव कर्तारं विषयीकुर्वाणाऽनुमितिर्भवति, उतैकत्वविशेषितं कर्तारं विषयीकुर्वाणेति ? नाद्यः, एकत्वाविषयत्वे वस्तुत एकः कर्ता विषय इति निर्णेतुमशक्यत्वात् । न द्वितीयः, एकत्वस्य संख्यारूपत्वे बहुष्वपि प्रत्येकं तद्वैशिष्ट्यसत्त्वेन तद्विषयत्वस्य बहुकर्तृकत्वाविरोधित्वात् । अनेककर्तृकत्वाभावविशिष्टं सकर्तृकत्वमेककर्तृकत्वमिति तद्विषयिण्यनुमितिरिति चेत्तर्हि लघुविषयोपनयेन प्रमाणानुग्राहकतया प्रसिद्धं लाघवं गुरुविषयोपनायकं कृतं स्यात् । नैतद्युक्तम् । नह्येवंभूतं लाघवं सम्प्रतिपन्नमस्ति, यदग्रे वस्तुलाघवसिद्ध्यर्थं स्वानुग्राह्यप्रमाणस्य विषयगौरवमापादयेत् । तत्सम्प्रतिपत्तौ पक्षे लिङ्गज्ञानस्यानुमितिकारणतां गृह्णतः प्रमाणस्यानुग्राहको लाघवतर्को 'धूमो वह्निव्याप्यः', 'पर्वतश्च धूमवान्' इति ज्ञानद्वयस्थले 'वह्निव्याप्यधूमवान् पर्वतः' इति विशिष्टज्ञानस्याकल्पनया वस्तुलाघवसिद्ध्यर्थं व्याप्यतावच्छेदकप्रकारकत्वमेव कारणतावच्छेदकत्वेनोपनयेत्, न तु व्याप्तिप्रकारकत्वं लघुधर्म इष्टम् । पुरोवर्तिज्ञानस्य प्रवृत्तिकारणतां गृह्णतः प्रमाणस्यानुग्राहको लाघवतर्कश्च विसंवादिप्रवृत्तिस्थलेऽप्यधिकरणप्रकारकज्ञानस्याकल्पनया वस्तुलाघवसिद्ध्यर्थं भेदाग्रहणमेव कारणतावच्छेदकत्वेनोपनयेत्, न तु ज्ञानवित्तिवेद्यतयोपस्थितं वैशिष्ट्यम् । अतो लाघवात् कर्त्रैक्यसिद्धिरित्ययुक्तमेव ।

एतेन पक्षीकृतक्षित्यादिजननसमर्थापरोक्षज्ञानचिकीर्षाकृतीनां लाघवात् प्रत्येकमेकैकत्वसिद्धौ तदाश्रयकर्त्रैक्यसिद्धिरित्यपि शङ्का निरस्ता, सम्प्रतिपन्नानामेव संसारिणां योगप्रभावादिसिद्धैः क्षित्यादिजननसमर्थापरोक्षज्ञानचिकीर्षाकृतिविशेषैस्तत्कर्तृकत्वसम्भवात् । न च संसारिण एव सम्प्रतिपन्नाः, न तु तेषु क्षित्यादिजननसमर्था अपरोक्षज्ञानादय इति शङ्कनीयम्, तेषामपि योगशास्त्रादिप्रामाण्यसिद्धत्वात् । किन्तु तेषां क्षित्यङ्कुरादिजननपूर्वक्षणे सद्भावमात्रं कल्पनीयम् । तत्कल्पना तु धर्मिकल्पनातो वरं धर्मकल्पनेति लाघवानुसारिण्येव । एकैकज्ञानादिजन्यत्वसाधने च नास्ति विषयलाघवम् । किन्त्वनेकज्ञानाद्यजन्यत्वे सति ज्ञानादिजन्यत्वरूपस्य तस्य साधन एव गौरवमित्येतदपि दूषणमत्रापि तुल्यम् ।

अपि चेश्वरानुमाने लाघवतर्कमनुग्राहकमन्विच्छता पक्षतावच्छेदकशरीरानुप्रविष्टस्य कुलालादिकृतिषु जन्यत्वस्य ग्राहके प्रमाणे लाघवमनुग्रा-

प्रासादादेर्बहुकर्तृकत्वदर्शनात् । तथा च नानुमानेनैककर्तृ-

हकमादरणीयम् । तत्र कुलालादिकृतिषु कृतित्वमेव जन्यतावच्छेदकं युक्तम्, लाघवात् । न तु कुलालादिकृतित्वमीश्वरकृत्यन्यकृतित्वं वा, गौरवाद् अननुगमादप्रसिद्धिदोषाच्च । तथा चानुमानप्रवृत्तेः प्रागेव कृतिमात्रस्य जन्यत्वनिश्चयेऽनुमानतो लाघवसहस्रेणापि न नित्यसर्वविषयैककृति-सिद्धिर्भवेत् । अपि च नित्यसर्वविषयैकचिकीर्षासिद्धिरपि न भवेत् । अस्मदादिनार्थान्तरवारणार्थं ज्ञानचिकीर्षाकृतीनामपि जनकत्वं साध्ये विवक्षितमिति खलूक्तम् । ततश्च घटादीनां चिकीर्षाकृतिव्यवहितकुलालादिज्ञान-जन्यत्वं चिकीर्षादिद्वारा ग्राह्यमिति चिकीर्षाया द्वारत्वनिर्वाहाय ज्ञान-जन्यत्वं ग्राह्यम् । तत्र लाघवाच्चिकीर्षात्वमेव जन्यतावच्छेदकं प्राप्नोति ।

ननु तर्हि ज्ञानचिकीर्षे विहाय कृतिमज्जन्यत्वमात्रं साध्यते, कृतेर्जनकत्व-विवक्षामात्रेणार्थान्तरवारणासम्भवात्, अनुमानतः कृत्याश्रयत्वेनेश्वरसिद्धौ तदनुवादेन सार्वज्ञ्यादेरपि श्रुत्या बोधनसम्भवाच्च । न च तथा सति ज्ञानवज्जन्यत्वं चिकीर्षावज्जन्यत्वं वा सन्दिग्धोपाधिः स्यादिति वाच्यम्, ज्ञानस्य चिकीर्षया चिकीर्षायाः कृत्या चान्यथासिद्धतया घटादिषूपाधेः साध्यव्यापकत्वभङ्गात् । न च ज्ञानोपलक्षितजन्यत्वं चिकीर्षोपलक्षितजन्यत्वं वा सन्दिग्धोपाधिः स्यादिति शङ्कनीयम्, ज्ञानचिकीर्षयोः कार्याप्रयोजकत्वे हेतुसाध्ययोरिव साध्योपाध्योर्व्याप्तिग्राहकस्य कार्यकारणभावमूलकस्यानुकूल-तर्कस्याभावेन तथाप्युपाधेः साध्यव्यापकत्वभङ्गात् । अन्यथा ज्ञानादित्रय-जन्यत्वेऽपि साध्येष्वेकैकजन्यत्वस्य साध्यातिरिक्तस्योपाधिताया वारयितु-मशक्यत्वादिति चेत्, एवं तर्हि कृतेरपि चेष्टयाऽन्यथासिद्धेर्वक्तुं शक्यत्वेन घटादिदृष्टान्तः साध्यविकलः स्यात् । नहि ज्ञानचिकीर्षे चिकीर्षाकृतिभ्या-मन्यथासिद्धे । कृतिस्तु चेष्टया नान्यथासिद्धा, किन्तु तद्द्वारा घटादिजनि-केति कल्पने न नियामकं कञ्चिद्विशेषमीक्षामहे । अतः कृतेर्घटादिजनकत्वमभ्यु-पगच्छता ज्ञानचिकीर्षयोरपि जन्यजनकत्वमभ्युपगम्य उपाधिसन्देहवारणार्थं तयोरपि साध्यानुप्रवेशः कल्पनीय एव । तदकल्पने चास्मदादीनां जीवनयोनि-कृत एव तत्तद्भोग्यक्षित्यङ्कुरादीनामपि जनिकाः कल्पयितुं शक्यन्त इति तद्व(द)द्भिरस्मदादिभिः सिद्धसाधनं च स्यात् । तस्मात् क्षित्यादिकर्त्रनुमानेनैव कर्त्रैक्यसिद्धये तदनुग्राहकं लाघवमाद्रियमाणस्य तत्प्राक्प्रवृत्तप्रमाणेषु लाघवा-नादरणे हेत्वभावेन लाघवानुगृहीतप्रथमप्रवृत्तप्रमाणविरोधात् कर्तृसिद्धिरेव

कत्वसिद्धिः, व्याप्तिबलेन तस्य कर्मपारवश्यादिप्रसङ्गश्च । हेतोः

प्रतिहन्यत इति वृद्धिमिच्छतो मूलमपि नष्टमिति न्यायः समापद्यत इति ।

ननु तर्हि क्वचिदपि लाघवं नाद्रियते, अनुमानसिद्धक्षित्यादिकर्त्रैक्यं तु श्रुत्याऽवगंस्यते, इत्यनुशयानं प्रति तथापि नानुमानतस्त्वदभिमतेश्वरसिद्धिरित्याह—व्याप्तिबलेनेति । यथा हि घटादिकर्तरि ज्ञानेच्छादिमत्त्वं दृष्टम्, तथा कर्मपारवश्यशरीरत्वादिकमपि । तथा च क्षित्यादिकर्तरि ज्ञानेच्छादिवत्तदपि सिद्धं निवारयितुं न शक्यत इत्यर्थः । ज्ञानादिसिद्धौ कार्यकारणभावमूलकानुकूलतर्कसाचिव्यनिष्कलङ्का व्याप्तिर्मूलमस्ति, न कर्मपारवश्यादिसिद्धाविति चेन्न, सामान्यकार्यकारणभावाननुप्रविष्टादृष्टद्वारकत्वविशेषितज्ञानादिमत्त्वसिद्धिवत् तत्सिद्धेरप्यनिवार्यत्वात् । अभिमतसिद्ध्यर्थमदृष्टद्वारकत्वं साध्ये निवेशितम् । कर्मपारवश्यादिकं त्वनभिमतत्वान्न निवेश्यत इति चेन्न, यथादर्शनमात्रप्रवृत्तानुमानशरणस्य दृष्टान्तदृष्टविशेषणेषु क्वचिदभिमतेरन्यत्रानभिमतेश्च निर्मूलत्वात् । "न कर्मणा वर्धते नो कनीयान्" (इति० उ० २०) इत्यादिश्रुतिबाधितं कर्मपारवश्यादिकं न त्वदृष्टद्वारकज्ञानादिकमिति चेन्न, जगत्कर्तरि धर्मिग्राहकमानसिद्धं ज्ञानादित्रयं द्रव्यत्वसामान्यप्राप्तं संख्यादिपञ्चकं च विहाय गुणान्तरं नास्ति । तदनुसारेणानन्दादिश्रुतयोऽन्यथा व्याख्येया इत्यभिमन्यमानस्यानुमानैकशरणस्य शुष्कतार्किकस्य दृष्टान्तदृष्टं कर्मपारवश्यादिकमपि साध्येऽन्तर्भाव्य "न कर्मणा वर्धते" (इति० उ० २०) इत्यादिश्रुतेरन्यथाव्याख्याने विचिकित्साहेत्वभावात्, कर्मतारतम्यप्रयुक्ततारतम्यवदानन्दादिसद्भावमात्रं जगत्कर्तर्यङ्गीकृत्य तत्र नित्यनिरतिशयानन्दश्रुतिमात्रस्यान्यथाव्याख्यानोपपत्तेश्च ।

न च जगत्कर्तुः कर्मवश्यत्वेऽस्मदादिसाम्यापत्तिर्बाधः, विहितानुष्ठाननिषिद्धपरिहारनियमेन तस्य विशेषोपपत्तेः, यथाकथञ्चित् साम्यमात्रस्य दोषत्वे ज्ञानादिमत्त्वसाम्यस्यापि दोषत्वापत्तेश्च । ज्ञानादीनां नित्यत्वेन सर्वविषयत्वेन च विशेषोऽस्तीति चेत्, तर्हि तत एव कर्मवश्यत्वेऽपि विशेषोऽस्ति । किञ्च, ईश्वरज्ञानादेर्नित्यसर्वविषयत्व एव भूयान् युक्तिबाधः । कथं हि सदा सर्वविषयिण्येकैव तस्येच्छा कालविशेषेण सिसृक्षासञ्जिहीर्षात्वादिरूपविशेषं भजेत । स हि विशेषाविषयविशेषोपधानात्मैव क्लृप्तस्तत्तत्कार्यसामग्रीविशेषोपधानरूपतया समर्थयितुमयुक्तः । न च शिवसूर्यप्रभारूपा चिच्छक्तिरिव तार्किककल्पितेश्वरगुणभूतेच्छा समयभेदेन विविधरूपपरि-

पक्षधर्मताबलादनुमानेन जगतो विलक्षणैककर्तृकत्वसिद्धावपि

णामिनी। सिसृक्षासञ्जिहीर्षात्वादिरूपाणां सार्वदिकत्वे च सदैव सृष्टिसंहारादिकं प्रसज्येत। न च सिसृक्षादिसद्भावेऽपि सहकारिसमवधानक्रमात्, कार्यक्रम उपपादनीयः, तदिच्छायां सहकारिसमवधानेच्छारूपत्वस्यापि सदातनत्वेन तत्समवधानक्रमस्याप्यशक्यसमर्थनत्वात्। एवं सत्यपि यदि सिसृक्षादिप्रयुक्तं कार्यं कालान्तरेऽपि न स्यात्, तदा तार्किकेश्वरो वितथसङ्कल्पत्वादनीश्वर एव स्यात्। तथा तार्किकैर्यन्नित्यमकारणमभ्युपगतं पारिमाण्डल्यादि, तदपीश्वरचिकीर्षाकृत्योर्विषय इति वक्तव्यम्, विषयविशेषनियमनहेतोः कारणविशेषप्रभवत्वस्याभावेनापाततः सर्वविषयत्वस्य तदंशे सङ्कोचयितुमशक्यत्वात्। पारिमाण्डल्यादिविषयाभ्यां चिकीर्षाकृतिभ्यां न पारिमाण्डल्यादिकमुत्पादयितुं ध्वंसयितुं वा शक्यम्, न वा तेन कार्यान्तरमुत्पादयितुं शक्यमिति तत्रापि स वितथसङ्कल्पो वितथप्रयत्नश्च स्यात्। एवंविधानेकयुक्तिविरुद्धमपि नित्यसर्वविषयज्ञानादिकमङ्गीकुर्वतः किमपराद्धमीश्वरस्य कर्मवश्यत्वादिना। तस्माद् दृष्टान्तदृष्टतामात्रेणादृष्टद्वारकत्वं विशेषणं निवेशयतः कर्मवश्यत्वादिविशेषणं प्रतिक्षेप्यमित्यानुमानिकेश्वरवादे तस्य कर्मवश्यत्वादिप्रसङ्गो वारयितुमशक्यः।

ननु तर्ह्यदृष्टद्वारकत्वं त्यज्यते, अपरोक्षज्ञानचिकीर्षाकृतिमज्जन्यत्वमात्रं सिद्धमिष्यते। न चैवं सति हविरादिगोचरज्ञानादिमताऽस्मदादिनाऽर्थान्तरप्रसङ्गः, क्षित्यादिजनकतया साध्यमानस्य ज्ञानादित्रयस्य तदुपादानस्य च परस्परमप्रत्यासन्नत्वे कार्यनिष्पादकत्वायोगेन प्रत्यासत्तावपेक्षितायां घटादिजनकज्ञानादित्रयोपादानयोर्विषयविषयिभावः प्रत्यासत्तिः क्लृप्त इत्यत्रापि तस्यैव प्रत्यासत्तितया सिद्धेरिति चेन्न, विशिष्य क्षित्यादिजनकादृष्टजनकहविरादिगोचरज्ञानत्रयेषु क्लृप्तस्य दृष्टद्वारकतत्तदुपादानसम्बन्धस्यैव तदुभयप्रत्यासत्तित्वसम्भवेऽन्यत्र विषयविषयिभावस्तत्प्रत्यासत्तित्वेन क्लृप्त इति तल्लोभेन क्लृप्तहविरादिगोचरज्ञानादिकं परित्यज्याऽक्लृप्तनित्यज्ञानादिकल्पनायोगात्, शब्दफूत्कारादिजनकज्ञानादिकस्याकाशादिविषयत्वाभावेनान्यत्रापि विषयविषयिभाव एव तदुभयप्रत्यासत्तिरिति नियमासिद्धेश्च। तस्माज्ज्ञानादिमज्जन्यत्वमात्रे साध्येऽर्थान्तरं स्यादिति तद्वारणेनाभिमतसिद्ध्येकप्रयोजनमदृष्टद्वारकत्वं विशेषणं निवेशयतस्तथैव कर्मवश्यत्वादिनिवेशनमपि स्यादित्यनिवार्यः कर्मवश्यत्वादिप्रसङ्गः।

निमित्तोपादानशक्तियुक्तैककर्तृकत्वासिद्धिर्नास्ति । ततो वेदान्तशास्त्रैकगम्यं तत्प्रमाणकं ब्रह्मेति सिद्धम् ।

स्यादेतत् । भवत्वेवमष्टगुण ईश्वर इति स्वमनीषिकया कल्पयित्वा तदनुरोधेनानन्दादिश्रुतिमन्यथा कुर्वतः शुष्कतार्किकस्यानुमाने दूषणमिदम् । अनुमानसिद्धमीश्वरमनूद्य वेदान्तैस्तस्य विधीयमानं गुणचरितविग्रहादिकं प्रत्यक्षादिसिद्धं पृथिव्यादिकमनूद्य पृथिवी गन्धादिपञ्चगुणा, सलिलं रसादिचतुर्गुणमित्यादिप्रकारेण तैर्विधीयमानं गुणव्यवस्थादिकमिव तथैवाभ्युपगम्यत इति मन्यमानस्य पूर्वपक्षिणोऽनुमाने नेदं दूषणं प्रसरति । अतश्चोक्तानुमानेन हेतोः पक्षधर्मबलात् क्षित्यादिजननानुकूलापरोक्षज्ञानचिकीर्षाकृतिमांस्तत्कर्ता सिध्यन् वस्तुतोऽस्मदादिविलक्षण एकश्च सिद्धयति । कर्मवश्यत्वादिनाऽस्मदादिसालक्षण्ये गोपुरादिकर्तृन्यायेनानेकत्वे वा—"न कर्मणा वर्धते नो कनीयान्" (इति० उ० २०), "एको रुद्रो न द्वितीयाय तस्थुः" (अ० शि० २.७) इत्यादिश्रुतिविरोधप्रसङ्गादित्याशङ्क्याह—हेतोरिति । यद्यनुमानसिद्धमीश्वरमनूद्य वेदान्तैर्विशेषा विधेयाः, तर्हि तमनूद्य तस्य जगदुपादानत्वं तैर्विधातुमशक्यं स्यात्, ईश्वरः पृथिव्युपादानं न भवति तत्कर्तृत्वात् कुलालवदित्याद्यनुमानविरोधात् । ईश्वरस्य श्रुतिसिद्धत्वाभ्युपगमे हि धर्मग्राहकमानविरोधादिदमनुमानं नोन्मिषेत् । अनुमानसिद्धत्वे तु तत्सिद्धेश्वरपक्षीकरणेनोन्मिषेदेव । उन्मिषितं चोपजीव्यजातीयत्वेन शुचि नरशिरःकपालं प्राण्यङ्गत्वात् शङ्खवदित्यनुमानान्नरशिरःकपालाशुचित्वप्रतिपादकवाक्यमिव ब्रह्मणो जगदुपादानत्वविधायकाद् वाक्यजातादिदमनुमानं प्रबलमित्यपि शङ्क्येत । एवं तर्ह्यनेककर्तृकत्वाद्यनुमानमपि वेदान्तेभ्यः प्रबलमाशङ्कितुं शक्यम्, कथं विलक्षणैककर्तृकत्वसिद्धादर्पोति तदभ्युपगमः । सत्यम् । अभ्युपेत्य वादोऽयमित्यपिशब्देनैव ध्वनितम् । तस्माच्छुष्कतार्किकरीतिमपहाय परमेश्वरे वेदान्तप्रतिपाद्ययावद्धर्मवैशिष्ट्यमुपादित्समानेन तन्निर्वाहाय वेदान्तैरेतत्सिद्धिरेष्टव्येति शास्त्रप्रमाणकमेव ब्रह्म नानुमानप्रमाणकम् ।

"अन्नेन सोम्य शुङ्गेन" (छा० उ० ६.८.४) इत्यादिश्रुतिप्रदर्शितमनुमानं तु "सदेव सोम्येदमग्र आसीत्" (छा० उ० ६.२.१) इत्यादिना प्रपञ्चेन प्रागुपदिष्टे जगत्कारणे ब्रह्मणि प्रकरणस्य तात्पर्यनिर्णायकम् । यथाकथञ्चिद् युक्त्युपन्यासात्मकमुपपत्तिरूपं लिङ्गं न तु स्वतन्त्रप्रमाणमित्यभिप्रेत्याधिकरणार्थमुपसंहरति—तत इति । अनेन पूर्वपक्षिणापि परमेश्वरस्य वेदान्तप्रति-

अनेन सूत्रेण पूर्वाधिकरणप्रतिपादितजगत्कारणत्वसिद्ध्युपयोगि सर्वज्ञत्वं ब्रह्मणः शास्त्राणां वेदानां योनित्वात् कारणत्वात् सिद्ध्यतीत्यपि प्रतिपाद्यत इति केचिदाहुः । सूत्रस्य सूचनात्मकस्यार्थद्वयाभिधाने श्लेषकाव्यवद् वाक्यभेदादिदोषाभावात् पुनरधिकरणान्तरप्रस्तावः ।

"अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेदः" (बृ० उ० २.४.१०) इत्यादिः श्रूयतेऽस्य विषयः । ब्रह्मणो वेदकर्तृत्वं युक्तं न वेति सन्देहः । न युक्तमिति पूर्वपक्षः, "वाचा विरूपनित्यया" (ऋ०

पाद्ययावद्धर्मवैशिष्ट्यमभ्युपगम्यते चेत्, पक्षद्वयेऽपि फलभेदाभावात् किमर्थमिदमधिकरणमित्यपि शङ्का निरस्ता, परमेश्वरस्यानुमानिकत्वे तदभ्युपगम एव न निर्वहतीति फलभेदसत्त्वेन तत्त्वबुबोधयिषयाऽधिकरणप्रवृत्तेरिति ।

अत्र सूत्रे भाष्यान्तरप्रदर्शितं वर्णकान्तरमभ्यङ्गीकृत्य तदुपपादयितुमुपक्रमते—अनेनेति । जगत्कारणत्वोपयोगि सार्वज्ञ्यं श्रुतेन जगत्कारणत्वेनैवाक्षिप्यते । साक्षाच्च श्रूयते—"यः सर्वज्ञः सर्ववित्" (मुण्डको० १.१.९) इत्यादिषु । किमत्र हेत्वन्तरगवेषणया । अथापि तद्गवेषणया जगत्कारणत्वोपयोगिनि सर्वशक्तिकत्वेऽपि हेत्वन्तरं किमिति नान्विष्यते । उच्यते—वेदनित्यत्वमूलकसर्वजगत्कारणत्वरूपलक्षणासम्भवशङ्कानिरासोऽप्यनुषङ्गतो लभ्यत इत्यन्यतः सिद्ध्यत्यपि सर्वज्ञत्व एव वेदकारणत्वरूपं हेत्वन्तरमुच्यते । अत एव वेदनित्यत्वव्यवस्थापनं वियत्पादे सङ्गतं नात्र कर्तुं युक्तमित्यपि शङ्का निरस्ता, अनुषङ्गलभ्येऽर्थे पृथक्सङ्गत्यनपेक्षणात् ।

श्लेषकाव्यवदिति । "त्रातः काकोदरो येन द्रोग्धापि करुणात्मना । पूतनामारणाख्यातः श्रेयसेऽस्तु स मे विभुः ॥" इति श्लिष्टकविपद्ये यथा श्लेषालङ्कारकृतविच्छित्तिविशेषसिद्धये वक्तुरनेकार्थविवक्षासत्त्वात् स्वतन्त्रानेकार्थत्वकृतवाक्यभेदोऽनेकार्थप्रतीत्यर्था वाक्यावृत्तिश्च न दोषाय, एवमिहाप्यनेकार्थसूचनसिद्धये सूत्रकृतस्तदनुकूलानेकार्थविवक्षासत्त्वात् तत्कृतो वाक्यभेदो वाक्यावृत्तिश्च न दोषायेत्यर्थः । "अस्य महतो भूतस्य" (बृ० उ० २.४.१०) इति वाक्ये ब्रह्मणो वेदकर्तृत्वेन सर्वज्ञत्वमाक्षेप्तुं प्रभवति न वेत्यधिकरणाङ्ग-

इत्यादेर्वाचो नित्यत्वप्रतिपादिकायाः श्रुतेः संशयं सिद्धं कृत्वा तदर्थसंशयं दर्शयति—ब्रह्मण इति। वेदनित्यत्वपौरुषेयत्वविरोधाविरोधौ संशयबीजमित्यभिप्रेत्य तद्विरोधं पूर्वपक्षहेतुं दर्शयति—वाचेति।

ननु वर्णानां नित्यत्वेन नित्यया वाचेति विशेषणमुपपद्यते। मैवम्। यदि वर्णा नित्यास्तदा लौकिकवाक्यगता अपि ते नित्या इति विशिष्य वेदवाचि नित्यत्वं विशेषणं न स्यात्। अतो वेदाख्यग्रन्थरूपेण नित्यत्वमभिप्रेत्येदं विशेषणं कृतमिति ज्ञायते। नन्वानुपूर्वीविशेषणविशिष्टवर्णरूपस्य वेदस्य नित्यत्वं न सम्भवति, आनुपूर्व्याः कृतकत्वादिति चेत्, सत्यम्। स्वरूपनित्यत्वं न वेदनित्यत्वश्रुतेरर्थ इष्यते, किन्त्वविच्छिन्नप्रवाहत्वरूपं प्रवाहनित्यत्वम्। न च प्रवाहनित्यत्वे सति स्वरूपानित्यत्वमात्रेण स्वतन्त्रपुरुषप्रणीतत्वरूपं सकर्तृकत्वं सम्भवति, येन ब्रह्मणः सार्वज्ञ्याक्षेपकं वेदकर्तृत्वं युक्तं स्यात्। तथा सति कालिदासाद्युपज्ञस्य कुमारसम्भवादेरिव वेदस्य प्रवाहः सादिरेव स्यात्।

ननु निःश्वसनश्रुतितो वेदनित्यत्वश्रुतेः किं प्राबल्यकारणम्, येन तद्विरोधान्निःश्वसितश्रुतिप्रतिपन्नं ब्रह्मणो वेदकर्तृत्वमयुक्तमिति वक्तव्यं स्यात्? उच्यते—निरवकाशत्वं तत्प्राबल्यकारणम्। असम्भवत्स्वरूपनित्यभावानां वेदानां प्रवाहतोऽपि नित्यत्वस्यानभ्युपगमे तन्नित्यत्वश्रुतेर्नास्ति कश्चिदवकाशः। वेदकर्तृत्वश्रुतेस्त्वस्त्यवकाशः। कथम्? ब्रह्मण इव प्रजापतेरग्न्यादीनां च वेदकर्तृत्वं श्रूयते—"षड्ढोता भूत्वा प्रजापतिरिदं सर्वमसृजत। ऋचो यजूंषि सामानि", "ऋग्वेद एवाग्नेरजायत यजुर्वेदो वायोः सामवेद आदित्यात्" इत्यादिश्रुत्यन्तरेषु। न चैकस्मिन् ग्रन्थे बहूनां स्वतन्त्रकर्तृत्वं सम्भवति। तस्माद्वेदाभिमानिदेवतानां प्रजापतेरग्न्यादिभ्यश्च जननविषयाणि वेदानामेव तत्तत्प्रवर्तितत्वविषयाणि वा तानि श्रुत्यन्तराणीति योजनीयम्। तथैव निःश्वसितश्रुतेरपि योजनोपपद्यते। सन्ति हि पृथिव्याद्यभिमानिदेवतावत् तत्तद्वेदाभिमानिन्योऽपि देवताः। उक्तं च तन्त्रवार्त्तिकेऽपि ग्रहैकत्वाधिकरणे—"शब्दब्रह्मेति यच्चेदं शास्त्रं वेदाख्यमुच्यते। तदप्यधिष्ठितं सर्वमेकेन परमात्मना॥ तथर्ग्वेदादयो वेदाः प्रोक्ता येऽपि पृथक् पृथक्। भोग्यत्वेनात्मनां तेऽपि चैतन्यानुगताः सदा॥" इति। तासां च देवतानां ब्रह्मणो जातानामपि समयान्तरे पुनरग्न्यादिभ्योऽपि जननमुपपद्यते। ब्रह्मणो मानसपुत्राणां दक्षनारदवसिष्ठभृग्वादीनामिव समयान्तरे पुनरन्यतोऽपि

विरोधात्, वेदानां ब्रह्मकार्यत्वे पौरुषेयत्वादप्रामाण्य-

जननम्। एवमादौ ब्रह्मणा प्रवर्तितानामपि वेदानां कालक्रमेण लुप्तानां कालान्तरे पुनरग्न्यादिभिरपि प्रवर्तितत्वं सम्भवति। तस्माद् युक्तमुक्तं वेद-नित्यत्वश्रुतिविरोधाद् ब्रह्मणो वेदकर्तृत्वमयुक्तमिति।

बाधकान्तरमाह—वेदानामिति। यदि वेदाः स्वतन्त्रपुरुषप्रणीताः स्युः, तदा तत्प्रणेतरि भ्रमप्रमादविप्रलिप्साकरणापाटवशङ्कानामपरिहार्यत्वेन बुद्धाद्यागमवदेव तेषामप्रामाण्यं प्रसज्येत। न चेश्वरे सार्वज्ञ्यादिनिश्चयादुक्त-शङ्कानवतारः, वेदादन्यतस्तन्निश्चयासम्भवात्, बुद्धादीनामपि सार्वज्ञ्यादे-स्तदागमतो निश्चयसम्भवस्याविशिष्टत्वाच्च। न च वेदेषु महाजनपरिग्रहो बुद्धाद्यागमाद् विशेषः, महत्त्वस्य पूज्यत्वरूपत्वे वेदपरिगृहीतॄणां पूज्यत्वस्य तत्प्रामाण्यनिर्णयं विना निर्णेतुमशक्यत्वात्, संख्याधिक्यरूपत्वे सन्दिग्धा-सिद्धेः। न च सर्वसम्मतवैद्यकपरिग्रहः, तथाभूतव्याकरणपरिग्रहो वा महाजनपरिग्रहः, बौद्धागमानुसारिवैद्यशास्त्रे रोगशान्त्यर्थं तदागमोक्तकर्म-विधानेन जैनव्याकरणदर्शनेन च तयोरतिप्रसक्तत्वात्। न च वेदोक्तस्य सत्यसम्भाषणादीनां धर्मत्वस्य सम्मतत्वं महाजनपरिग्रहः, बौद्धोक्ताहिंसा-धर्मत्वस्यापि सर्वसम्मतत्वाच्च। न च वैदिकमन्त्रजपादिषु फलसंवादो महाजनपरिग्रहः, एकदेशसंवादस्य सर्वसाधारण्यात्, बुद्धोक्ताग्निस्तम्भनादि-कर्मणां क्षपणकर्षिकमन्त्राणां च केषाञ्चित् फलसंवाददर्शनात्, सार्वत्रिक-संवादस्य वैदिककर्मस्वप्यदर्शनात्। तस्माद् वेदस्य प्रामाण्ये सिद्ध एव तत्प्रतिपाद्यस्यापीश्वरस्य सार्वज्ञ्यादिकं तत्परिगृहीतॄणां पूज्यत्वरूपं महत्त्वं च सिद्ध्यति। न तु तेन वेदप्रामाण्यमिति तस्य प्रामाण्यसिद्ध्यर्थमवश्यं पौरुषेयत्वमभ्युपगन्तव्यम्।

न च वेदस्य स्वतन्त्रवक्तृप्रमितिपूर्वकत्वाभावे 'शुक्लः पटः' इत्यन्ध-वाक्यस्य चक्षुष्मत्प्रमितिपूर्वकत्वाभाव इव न प्रामाण्यं निर्वहतीति वाच्यम्, अपौरुषेयत्वेन वक्तृदोषाभावसिद्धौ शुकबालादिप्रमाणवाक्यसाधारणेन योग्यवाक्यत्वेनैव तत्प्रामाण्यनिर्वाहात्। अन्धवाक्यन्यायेन मूलापेक्षा तु पौरुषेयवाक्य एव। अर्थमुपलभ्य रचितं हि वाक्यं पौरुषेयम्। तत् स्वप्रामाण्यनिर्वाहार्थं स्वमूलोपलम्भस्य नियमेन प्रामाण्यमपेक्षते, 'शुक्लः पटः' इत्यन्धवाक्यमिव तन्मूलभूतस्योपदेष्टुश्चक्षुष्मत्ताम्। अपौरुषेयं तु वाक्यमपौरुषेयवेदमूलप्रमाणनिरपेक्षम्। तदेव चतुष्मत्स्थानीयमिति न तत्र

प्रसङ्गाच्च । तस्माद् ब्रह्मणो वेदकर्तृता कथमिति प्राप्ते ब्रूमः । युक्तमेव ब्रह्मणो वेदकर्तृत्वम्, "अस्य महतो भूतस्य निःश्वसितमेतद् यदृग्वेदो यजुर्वेदः सामवेदः" (बृ० उ० २.४.१०) इत्यादिश्रुतेर्निःश्वसितवद् वेदराशेरप्रयत्नेन ब्रह्मणः प्रादुर्भावावगमात्, "अष्टादशानामेतासां विद्यानां भिन्नवर्त्मनाम् । आदि-

---

लौकिकवाक्यन्यायावतारः। न च लौकिकवाक्ये वक्तृज्ञानप्रामाण्याधीनं प्रामाण्यं दृष्टमिति वेदेऽपि तथात्वं शङ्कितुं शक्यम्, 'शुक्लः पटः' इत्यन्धवाक्ये चक्षुष्मद्वाक्यमूलकत्वं दृष्टमिति चक्षुष्मद्वाक्येऽपि चक्षुष्मद्वाक्यान्तरापेक्षकत्वकल्पनाप्रसङ्गात् । तस्माद् वेदनित्यत्वश्रुतिविरोधाद् वक्तुर्भ्रमप्रमादादिसम्भवेन तत्प्रामाण्यसंशयप्रसङ्गात् स्वतन्त्रवक्तृप्रमितिपूर्वकत्वाभावेऽप्यपौरुषेयत्वेन प्रामाण्यनिर्वाहाच्च न ब्रह्मणो वेदकर्तृत्वम् । अतो न तेन तस्य सार्वज्ञ्यसिद्धिरिति पूर्वपक्षमुपसंहरति – तस्मादिति ।

सौत्रं सार्वज्ञ्ये हेतुमुपपादयितु प्रतिजानीते—युक्तमेवेति । ननु निःश्वसितश्रुतिर्ब्रह्मणो वेदोपादानताविषयत्वेन आधुनिकाध्यापकरीत्या सर्गादौ सर्ववेदाध्यापकताविषयत्वेन वोपपन्ना । न तस्य ततोऽर्थमुपलभ्य रचयितृत्वरूपस्य वेदकर्तृत्वस्य सिद्धिः, येन तस्य सार्वज्ञ्यं सिद्ध्येदित्याशङ्क्योपबृंहणवशात् तदभिप्रेतश्रुत्यन्तरवशाच्चोक्तरूपं वेदकर्तृत्वं तदर्थोऽवसीयत इत्यभिप्रेत्योपबृंहणमुदाहरति—अष्टादशानामिति ।

चत्वारो वेदाः, शीक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति षडङ्गानि, पुराणन्यायमीमांसाधर्मशास्त्राण्यायुर्वेदधनुर्वेदगान्धर्वार्थशास्त्ररूपाश्चत्वार ऋग्वेदाद्युपवेदाश्चेत्यष्टादश विद्यास्थानानि । तानि विद्योत्पत्तिस्थानत्वादिह विद्याशब्देन लक्ष्यन्ते । तानि प्रधानोपसर्जनभावेनैकफलपर्यवसायित्वेऽपि द्वारभेदेन भिन्नवर्त्मानि । तत्र ब्रह्माराधनभूतकर्मोपासनाद्वारेण साक्षाच्च ब्रह्मप्रतिपादकाश्चत्वारो वेदाः प्रधानभूताः। तदीयस्वरवर्णपदतदर्थावधारणोपायभूतानि शीक्षाव्याकरणनिरुक्तानि । तदुक्ताग्निहोत्रादिकर्मानुष्ठानप्रकारप्रतिपादकः कल्पः । कर्माङ्गमन्त्रेषु ज्ञातव्यानां गायत्र्यादिच्छन्दसां निर्णायकं छन्दः । कर्माङ्गकालविशेषनिर्णायकं ज्योतिषम् । सृष्टिवाक्याद्यर्थप्रपञ्चनेन पारमेश्वरमहाविभूत्युपबृंहणार्थानि पुराणानि । वेदान्त-

कर्ता कविः साक्षाच्छूलपाणिरिति श्रुतिः ॥'' इति परमेश्वरस्य सकलविद्याकर्तृत्वप्रतिपादनाच्च। दृष्टेः प्राक् स्वात्मनि

तात्पर्यनिर्णयानुकूलषड्विधलिङ्गान्तर्गतोपपत्तिरूपानुमानतत्परिकरशोधनार्थं न्यायशास्त्रम्। वेदार्थनिर्णयानुकूलन्यायविचारात्मिका मीमांसा। वर्णाश्रमानुगुणनिमित्तसाधारणधर्मप्रतिपादकं धर्मशास्त्रम्। सकलानुष्ठानसाधनदेहपाटवार्थं आयुर्वेदः। राज्यपालनोपयोग्यस्त्रजातज्ञानार्थो धनुर्वेदः। सकलदेवताप्रीणनगीतिज्ञानाद्यर्थं गान्धर्वम्। दृष्टादृष्टोपयोगिधनार्जनोपायज्ञानार्थमर्थशास्त्रम्। वैदिकहरिश्चन्द्राद्युपाख्यानार्थप्रपञ्चपराणामितिहासानां वैदिकदेवतातदाराधनप्रकारविशेषप्रतिपादकानामागमानां च पुराणशब्देनैव संग्रहः।

सर्वेषामेषां विद्यास्थानानामादिकर्ता सर्गाद्यकालेषु प्राथमिकः कर्ता शूलपाणिः। अत्र श्रुतिः—"छन्दांसि यज्ञाः क्रतवो व्रतानि भूतं भव्यं यच्च वेदा वदन्ति। अस्मान्मायी सृजते विश्वमेतत्" (श्वे० उ० ४.९) इति। न चायमध्यापकरीत्या तत्तद्विद्यास्थानगतवर्णावलीमात्ररचयिता, किन्तु साक्षात्कविः। अर्थविशेषानुपलक्ष्य श्लोकादिनिर्मातारो हि कवयः। ते च परमेश्वरादन्ये पूर्वपूर्वकविच्छायापत्त्या कवयः। अयं तु साक्षात्कविः स्वयमेव तत्तदर्थमुपलभ्य सर्वेषां विद्यास्थानानां निर्माता। अत्रापि श्रुतिः—"तदेव ब्रह्म परमं कवीनाम्" (महाना० १.६) इति। तत्प्रकृतं ब्रह्मैव कवीनां मध्ये परममुत्कृष्टम्। तत्तद्विद्यास्थानैकदेशप्रबन्धारो ह्यन्ये कवयो देवर्षिमनुष्यादिरूपाः। अयं तु सकलविद्यास्थानप्रथमप्रबन्धृत्वात् सर्वोत्कृष्टः कविरिति तदर्थः। "कविं कवीनामुपमश्रवस्तमम्" (ऋ० २.२३.१), "उदीरय कवितमं कवीनाम्" (ऋ० ५.४२.३), "कविं सम्राजम्" (ऋ० ६.७.१) इत्यादिश्रुत्यन्तराणामप्युक्तरूपे परमेश्वरस्य सर्वोत्कृष्टकवित्व एव तात्पर्यमिति तादृशानि श्रुत्यन्तराण्यप्यत्र विवक्षितानि।

ननु यदि कविशब्देन निर्देशादर्थमुपलभ्य वेदादिरचयितृत्वमीश्वरस्य सिद्ध्येत्तर्हि तत एव स्वेच्छाधीनयानुपूर्व्या तद्रचयितृत्वमपि सिद्ध्येत्, नहि प्राक्सिद्धयानुपूर्व्या प्राचीनश्लोकादिकं कीर्तयन् कविरित्युच्यते, ततश्चानुपूर्व्यनन्यथात्वरूपस्यापि वेदनित्यत्वस्याभावात् तन्नित्यत्वश्रुतिः सर्वथा निर्विषया स्यादित्याशङ्क्यां परिहरति—सृष्टेरिति। सर्वज्ञः सर्वानुग्राहकः परमेश्वरः प्रलये स्वस्मिन् विलीनान् वेदान् सृज्यमानाः प्राणिन एतेभ्यो

विलीनानां वेदानां पूर्वपूर्ववर्णानुपूर्व्यनुरूपरचनया पुनः कर्ता

वेदवाक्येभ्यः कर्मोपासनादिकं ज्ञात्वा तदनुष्ठानेन कृतार्था भवन्त्वित्यभिप्रायेणैव हि विरचयति। एवमभिप्रायपूर्विका वाक्यविरचनार्थानभिज्ञाध्यापकोच्चरितवेदवाक्यवदर्थोपलम्भमनपेक्ष्य वर्णावलिज्ञानमात्रेण न सम्भवतीत्यर्थमुपलभ्य रचयितृत्वं तावत् कविशब्देन संग्राह्यम्, न त्वानुपूर्व्यन्तरेण रचयितृत्वमपि, कर्मोपासनादिप्रतीत्यर्थं प्राचीनानुपूर्व्यपेक्षणात्। अतस्तदन्यथात्वरूपमनित्यत्वं न प्रसज्यत इति न नित्यत्वश्रुतिविरोध इत्याशयः।

ननु कर्मोपासनादिप्रतीत्यर्थमानुपूर्व्यैक्यं नापेक्षते, आनुपूर्वीभेदेऽप्यर्थैक्यदर्शनात्। प्रतिदिनमहरादौ भृत्यान् यथापूर्वं तत्तत्कार्येषु नियुञ्जानो हि स्वाम्येकरूप एवार्थे भिन्नभिन्नानुपूर्वीकमपि वाक्यं रचयतीति दृष्टान्तविषम उपन्यासः। भृत्यनियोगवाक्येष्वानुपूर्वीभेदेऽप्यर्थो न भिद्यते। वेदे तु क्रमविशेषविशिष्टवाक्यसन्दर्भविषयेषु वेदपारायणादिविधिषु उपक्रमोपसंहारपाठक्रमादिपर्यालोचनया निर्णेतव्येषु कर्मसु चार्थो भिद्येतैव। तथा च कल्पभेदेन धर्माधर्मव्यवस्थाविप्लवापत्तिः। न च पूर्वानुपूर्व्यनुरोधमात्रेण वेदवक्तुस्तत्र स्वातन्त्र्यभङ्गप्रसङ्गः, तथा सति पूर्वकल्पेषु यानि भूतानि यद्गुणकानि येन रूपेण प्राणिनामुपकारकाणि येन क्रमेणोत्पत्तिमन्ति येन क्रमेण विलयवन्ति च, तानि तथैव सृजतः संहरतश्च परमेश्वरस्य जगन्निर्माणमात्रे पारतन्त्र्यप्रसङ्गात्। यदि तु प्राणिनां प्राचीनमदृष्टनिचयं भोगेन क्षपयित्वाताननुजिघृक्षन् परमेश्वरः पूर्वं प्राणिभिर्यथाभूतेन भूतभौतिकवर्गेण भोगाननुभूय पुनरपि तादृग्भोगसिद्ध्यर्थं यान्यदृष्टान्यार्जितानि, तानि तथाभूतेनैव तेन भोगं सम्पाद्य क्षपणीयानीति तत्क्षपणेच्छयैव भूतं भूतभौतिकसर्गं सृजति, न तु किञ्चित् पारतन्त्र्येणेत्युच्येत, तदा पूर्वपूर्वकल्पेषु—"पुण्यः पुण्येन कर्मणा भवति" इत्यादिवाक्यं दृष्ट्वा तत्कालप्रचरद्वेदसिद्धयज्ञदानतपोवेदपारायणादिपुण्यकर्मसिद्ध्यर्थं यान्यदृष्टान्यार्जितानि तानि तथाभूतेनैव पुण्यकर्मवर्गानुष्ठानेन क्षपणीयानीति तथाभूतयज्ञादिप्रतिपादकं तथाभूतानुपूर्वीकमेव वेदं रचयतीति तुल्यम्। यद्येवं वस्तुतः स्वातन्त्र्ये सत्यपि पूर्वानुरोधमात्रेण जगन्निर्माणे वेदनिर्माणे वा पारतन्त्र्यं व्यपदिश्येत, न तावता वस्तुकृतस्वातन्त्र्यस्य स्वेच्छया जगत्स्रष्टृत्वरूपस्यार्थमुपलभ्य वेदरचयितृत्वरूपस्य च काचन हानिः प्रसज्यते।

भवति सर्वज्ञः परमेश्वरः। अत एव वेदानामपौरुषेयत्व-

ननु क्रमान्यथात्वाभावेन वेदनित्यत्वश्रुतिविरोधपरिहारेऽप्यर्थमुपलभ्य रचितत्वरूपस्य पौरुषेयत्वस्याङ्गीकारान्न तन्मूलोपलम्भप्रामाण्याधीनं वेदप्रामाण्यमापद्यत इति तत्र भ्रममात्रादिशङ्कया वेदप्रामाण्येऽप्यनाश्वासः स्यादित्याशङ्कां निराकरोति—अत एवेति। यत एव वेदानामनादिसिद्धा एव वर्णपदवाक्यप्रकरणतदानुपूर्वीतदर्थाः, न त्वेतेषु किञ्चिदपि पुरुषबुद्ध्यानीतं नूतनमभ्युपगम्यते। अर्थमुपलभ्य रचितत्वं तु तेषामस्माद्वाक्यादेतदर्थप्रतीतिरस्य भवत्वित्यभिप्रायवतार्थाभिज्ञाध्यापकोच्चरितवेदवाक्यस्येवाभिप्रायनिर्वाहार्थमभ्युपगम्यते, तन्निर्वाहोपयोग्यर्थोपलम्भपूर्वकेणापि सकलवेदकर्तृत्वेन परमेश्वरस्य सार्वज्ञ्यसिद्धेः। न तु पौरुषेयवाक्यवद् वेदानां प्रामाण्यनिर्वाहार्थं मूलप्रमाणवत्त्वसिद्धये तदभ्युपगम्यते, येन तद्भ्रमत्वशङ्कया वेदप्रामाण्येऽप्यनाश्वासः स्यात्। वेदानां प्रामाण्यं त्वनादिसिद्धवर्णपदवाक्यप्रकरणतदानुपूर्वीतदर्थानामविपर्यासेनैव सिद्ध्यति। तदेव च तेषामपौरुषेयत्वम्। अत एव वेदानामुक्तमपौरुषेयत्वमर्थमुपलभ्य परमेश्वरेण रचितत्वरूपं तत्सार्वज्ञ्यसाधकं तत्कार्यत्वं चाविरोधेनोपपद्यत इत्यर्थः।

एतेन तार्किकाणां वेदपौरुषेयत्वानुमानानि पूर्वमीमांसकानां तदकर्तृकत्वानुमानानि च निरस्तानि। तार्किकास्तावदेवमनुमानानि कल्पयन्ति—वेदः सजातीयोच्चारणानपेक्षोच्चरितजातीयः, वाक्यत्वात्, लौकिकवाक्यवत्। वेदत्वं सजातीयोच्चारणानपेक्षोच्चरितवृत्ति, महाजनपरिग्राह्यतावच्छेदकत्वे सति वाक्यवृत्तित्वात्, भारतत्ववत्। वेदः शब्दाजन्यवाक्यार्थगोचरयथार्थज्ञानजन्यः, प्रमाणशब्दत्वात्, प्रत्यक्षमूललौकिकवाक्यवत्। बुबोधयिषुपठितो वेदः स्वानपेक्षस्वसमानविषयकज्ञानपूर्वकः, बुबोधयिषुवाक्यत्वात्, तथाभूतलौकिकवाक्यवदिति। अत्र प्रथमानुमानसाध्ये सजातीयपदं श्रुतिवाक्यान्याकर्ण्य रचितेषु तदर्थसंग्राहकेषु व्यभिचारवारणाय। जातीयपदमाधुनिकोच्चरितवेदेंऽशतो बाधवारणाय। तदुभयमपि समानानुपूर्वीकत्वपरम्। तथा च समानानुपूर्वीकोच्चारणापेक्षभिन्नोच्चारणविषयसमानानुपूर्वीकत्वं प्रथमसाध्यार्थः। तत्र सजातीयेत्यनेन यत्किञ्चित्समानानुपूर्वीकत्वे विवक्षिते स्मृतिमूलभूतश्रुतिवाक्यस्याप्यन्योच्चरितश्रुतिवाक्यसमानानुपूर्वीकत्वेन व्यभिचारतादवस्थ्यप्रसङ्गात् स्वसमानानुपूर्वीकत्वं विवक्षणीयमिति पक्षदृष्टान्तानुगतस्वत्वाभावादननु-

गमस्तावदेको दोषः। अयमुत्तरानुमानेष्वपि समानः। सर्गादिष्वीश्वरोच्चारणं सजातीयोच्चारणानपेक्षमस्माभिरप्यभ्युपगम्यत इति तत्समानानुपूर्वीकत्वेन सिद्धसाधनमपरो दोषः। मौनिना स्वयं निर्माय विलिख्यान्यस्मै मौनिने दत्ते तेनापि लिपिभिरनुमायावगतार्थे ततोऽन्येन केनाप्यनवगते श्लोके उच्चरितत्वाभावाद् व्यभिचारश्चान्यो दोषः।

द्वितीयानुमानहेतौ तत्तद्वेदव्यक्तिवृत्तिमात्रव्यभिचारवारणाय सत्यन्तम्। वेदत्वमेव वेदे लाघवान्महाजनपरिग्राह्यतावच्छेदकं न तु तत्तद्वेदत्वमिति व्यभिचारनिरासः। तत्र सिद्धसाधनं पूर्ववदुन्नेयम्। हेतुरप्यसिद्धः, शब्दतदुपजीविप्रमाणेतरप्रमाणजन्यप्रमित्यविषयार्थकत्वविशेषितशब्दजन्यवाक्यार्थज्ञानाजन्यप्रमाणशब्दत्वरूपतार्किकाभिमतवेदत्वापेक्षया लघुधर्मस्य तदेकदेशभूतस्य स्मृतिपुराणादिसाधारणस्य शब्दतदुपजीविप्रमाणेतरप्रमाणजन्यप्रमित्यविषयार्थकप्रमाणशब्दत्वस्य प्रमाणशब्दत्वमात्रस्यैव वा महाजनपरिग्राह्यत्वावच्छेदकत्वे सम्भवत्युक्तरूपस्य वेदत्वस्य तदनवच्छेदकत्वात्। न च नित्याध्ययनविषयत्वं वेदत्वमिह विवक्षितमिति वाच्यम्, अङ्गसाधारणस्य तस्य वेदत्वरूपत्वाभावात्। न चाङ्गव्यतिरिक्तत्वमपि विशेषणम्, तदविशेषितस्याङ्गसाधारणस्य लघुधर्मस्य तदवच्छेदकत्वे सम्भवति तस्यानवच्छेदकत्वात्। न चादृष्टजनकशब्दत्वं वेदत्वम्, पुराणादिसाधारण्यात्, तद्व्यावर्तकविशेषणदानेन तदविशिष्टस्यैव लाघवादवच्छेदकत्वे सम्भवति तद्विशिष्टस्यानवच्छेदकत्वात्।

तृतीयानुमानसाध्येऽर्थाभिज्ञेनाध्यापकेनार्थविवक्षयोच्चरितवेदवाक्येंऽशतः सिद्धसाधनवारणाय शब्दाजन्येति विशेषणम्। अर्थानभिज्ञाध्यापकोच्चरितवेदवाक्येष्वीश्वरज्ञानजन्यत्वमादाय साध्यसिद्धेर्नांशतो बाधः। शुकशारिकादिप्रमाणवाक्येष्वीश्वरज्ञानमादाय साध्यसिद्धिरिष्यत इति पक्षसमत्वान्न व्यभिचार इति तार्किकाणां मतम्, तत्रावश्यकवर्णावलीज्ञानादेव वाक्यरचनोपपत्तेः। साभिप्रायवाक्येषु दृष्टान्वयव्यतिरेकं वाक्यार्थज्ञानमभिप्रायोपक्षीणं क्वचिदपि वाक्यप्रयोगे न कारणम्, विसंवादिशुकशारिकादिवाक्ये व्यभिचारात्। अन्यथा तदर्थगोचरमीश्वरस्य भ्रान्तिज्ञानमस्तीत्यपि कल्पनाप्रसङ्गादिति दृष्टान्तः साध्यविकलः। साभिप्रायवाक्यस्थले वाक्यार्थज्ञानस्याभिप्रायद्वारा वाक्यप्रयोगकारणत्वाभ्युपगमेऽपि सर्गादिषु वेदानां स्रष्टुरीश्वरस्याभिप्रायमूलभूतं ज्ञानं तद्रचितवेदवाक्येषु तद्द्वारा तन्मूलकेष्वन्योच्चरितवेदवाक्येषु च कारणं भविष्यतीति सिद्धसाधनम्।

एवमभिप्रायमूलमीश्वरज्ञानमादाय सिद्धसाधनं चतुर्थानुमानसाध्येऽपि समानम्। वेदवक्तुरीश्वरस्याभिप्रायमूलभूतं ज्ञानमस्माभिरिव तार्किकैरभ्युपगन्तुं न शक्यत इति तन्मतमर्यादया बाधोऽधिकः। तथा हि—असदर्थावलम्बनेनापि विधेयस्तुतिपराणि निषेध्यनिन्दापराणि च वाक्यानि दृश्यन्ते। यथा—"स आत्मनो वपामुदखिदत्तामग्नौ प्रागृह्णात्ततोऽजस्तूपरः समभवत्तं स्वायै देवताया आलभत" (तै० सं० २.१.१.४) इति वाक्यं स्वावयवोत्कर्तनेनापि विशिष्टप्रयोजनं कर्म क्रियते, बाह्येन धनत्यागेनास्य कर्तव्यता किं वक्तव्येति तत्र प्रवृत्त्यर्थं प्रजापतिवपोत्खननरूपासदर्थावलम्बनेन विधेयस्तुतिपरम्। "सोऽरोदीद्यदरोदीत्तद् रुद्रस्य रुद्रत्वं यदश्रुवशीर्यत तद्रजतं हिरण्यमभवत्तस्माद् रजतं हिरण्यमदक्षिण्यम्" (तै०सं० १.५.१.) इति वाक्यमश्रुप्रभवं रजतममङ्गलमिति यज्ञे दक्षिणात्वेन तद्दानान्निवृत्त्यर्थमत्र रोदनश्रुतावश्रुप्रभवत्वरूपासदर्थावलम्बनेन निषेध्यनिन्दापरम्। यद्यपि न्यायविचारेणासदर्थावलम्बनत्वमेवंभूतस्तुतिनिन्दयोर्जानीयुः श्रोतारः, तथापि यथात्यन्तहितैषिणः परमाप्तस्य पित्रादेर्वचने कस्यचिद्दोषं गुणत्वेन गुणं वा दोषत्वेन प्रदर्शयत्यसदर्थावलम्बनत्वावगतावप्यन्यदेव किञ्चित् फलमभिप्रेत्य तत्र प्रवर्तयितुमन्यत् किञ्चिदनिष्टमाशङ्क्य ततो निवर्तयितुं वेदमारोपितार्थावलम्बनं स्तुतिनिन्दावचनमिति तद्विश्वासेन प्रवर्तन्ते निवर्तन्ते च।

एवं मातापितृसहस्रेभ्योऽपि प्रत्ययिततरे वेदे स्तुतिनिन्दावचनमसदर्थावलम्बनमपि विध्यवगतफलार्थमवश्यं प्रवर्तितव्यं निवर्तितव्यं वेति तात्पर्येण प्रवर्तितमिति विश्वासेन प्रवर्तेरन्निवर्तेरंश्च विद्वांसः। एवं च वेदस्याभिप्रायमूलभूतवाक्यार्थज्ञानपूर्वकत्वनियमाभ्युपगतावसदर्थावलम्बनयानया स्तुत्या निन्दया चावश्यकर्तव्यतामवश्यपरिहरणीयतां च ज्ञात्वा विहितेषु प्रवर्तन्तां निषिद्धेभ्यो निवर्तन्तामित्यभिप्रायेण स्तुतिनिन्दावाक्यरचनार्थमभिप्रायपूर्वभावितदालम्बनासदर्थविषयमाहार्यज्ञानं वेदरचयितुरङ्गीकरणीयम्, कवेरिव काव्यरचनोपयोग्यौत्प्रेक्षिकार्थविज्ञानम्। तन्नित्यमेकं सन्मात्रविषयमीश्वरज्ञानमिति मन्यमानानां तार्किकाणां न सम्भवति। अस्माकं तु हिताहितप्रवर्तननिवर्तनाभ्यां लोकानुग्रहैकरसिकस्य परमेश्वरस्य तदुपयोगीनि चिच्छक्तिपरिणामविशेषरूपाणि स्तुतिनिन्दार्थान्याहार्यज्ञानानि काव्यमूलज्ञानवदेव सम्भवन्ति।

सर्वाणि चैतान्यनुमानान्यप्रयोजकानि। नह्यनुमानसाध्ययोः सजातीयोच्चारणानपेक्षत्वस्य तृतीयानुमानसाध्ये शब्दाजन्यत्वस्य चतुर्थानुमानसाध्ये

मीश्वरकार्यत्वं च । येषां रागद्वेषादयस्तेषां वचनं प्रमाणमप्रमाणमपि भवति । निरस्तसमस्तदोषकलङ्कस्य निरुपप्लवनिरतिशयज्ञानप्रत्यक्षानुभूयमानत्रैकालिकवस्तुविलासस्य स्वतःप्रमाणस्य परमेश्वरस्य परमाप्तस्यावाप्तसमस्तकामस्य

स्वानपेक्षत्वस्य च व्यापकविशेषणस्य वैशिष्ट्येन तत्तन्निरूपिततया व्याप्तिग्रहे कश्चिदनुकूलतर्कोऽस्ति, पूर्वपूर्वाध्यापकोच्चारणापेक्षोच्चारणादीनामपि वाक्यत्वादिहेतूपपत्तेः । एवमन्यान्यपि तार्किकाणां वेदपौरुषेयत्वानुमानानि सिद्धसाधनत्वाप्रयोजकत्वादिदुष्टानि वेदितव्यानि ।

मीमांसकास्तु कर्त्रस्मरणादिभिर्वेदस्याकर्तृकत्वं साधयन्ति । तान्यपि— "छन्दांसि यज्ञाः क्रतवो व्रतानि" (श्वे० उ० ४.९) इत्यादिश्रुतिपुराणादिसत्त्वादसिद्ध्यादिदुष्टान्युपेक्षणीयानि ।

नन्वनादिवर्णपदानुपूर्व्यभङ्गादपौरुषेया वेदा इत्यङ्गीकृत्यापि यदि तेषां प्रलयेऽपि लयः पुनः सर्गादौ तयैव वर्णपदानुपूर्व्या समुद्धरणमित्येवं परमेश्वरकर्तृकत्वमित्यङ्गीक्रियते, तदा समुद्धर्तुस्तस्य भ्रमप्रमादकरणापाटवविप्रलिप्सासम्भवेनानाद्यानुपूर्वीभङ्गशङ्कया तेषां प्रामाण्येऽनाश्वासः स्यादित्याशङ्क्याह—येषामिति । येषां विप्रलिप्सादिहेतवो रागादिदोषाः सन्ति, तेषामेव वचनं कदाचिदप्रमाणमपि भवेत्, परमेश्वरस्य तु कदाचिदपि न ते सन्तीति तेनोद्ध्रियमाणेषु वेदेषु पूर्वानुपूर्वीभङ्गशङ्कानवतारेण तदप्रामाण्यशङ्का नावकाशं लभत इत्यर्थः । निरस्तसमस्तदोषकलङ्कस्येति सामान्यतः प्रदर्शितो दोषाभाव उत्तरविशेषणैर्विशिष्य तत्तद्दोषाभावप्रदर्शनेन समर्थ्यते । तत्र निरुपप्लवेत्यादिविशेषणेन भ्रमाभाव उक्तः । स्वतः प्रमाणस्येत्यनेन प्रमादाभावः । तात्त्विकार्थनिर्धारणशक्तस्यापि कदाचिदन्यथाज्ञानहेतुभूतमनवधानं हि प्रमादः । स तु नित्यमेव सर्वविषयप्रमाश्रयतया नित्यावहितस्य न सम्भवतीति भावः । स्वतःप्रमाणस्येत्यनेन हि नित्यप्रमाश्रयत्वमेवोच्यते । यतः प्रमाणशब्दः प्रमित्ययोगव्यवच्छेदवाची । स तु प्रमाकरणानां चक्षुरादीनां विषयसन्निधानाद्यन्याधीनो भवति । परमेश्वरस्य तु स नित्यप्रमाश्रयत्वरूपः स्वत एव भवतीति । परमेश्वरस्येत्यनेन स्ववशीकृतसकलप्रपञ्चत्ववाचकेन करणापाटवासम्भव उक्तः । परमाप्तस्येत्यनेन विप्रलिप्साभावः । तत्र हेतुभूतो रागाद्यसम्भवस्तु अवाप्तसमस्तकामस्येत्यनेन समर्थितः ।

शिवस्य ब्रह्मणो वचनं तु प्रमाणमेव भवति । "ईशानः सर्वविद्यानामीश्वरः सर्वभूतानाम्" (महाना० १०.८), "स नो देवः शुभया स्मृत्या संयुनक्तु" (महाना० १०.३) इति हि परमेश्वरस्य सर्वविद्याप्रवर्तकत्वं शुभस्मृतिहेतुत्वं च श्रूयते । अतः सर्ववस्त्ववभासकानां वेदानां परमेश्वरकर्तृकतया परमेश्वरस्य सर्वज्ञता निश्चीयते, अज्ञातस्य वक्तुमशक्यत्वात् ।

यद्यपि सर्वगतस्य परमेश्वरस्य सर्ववस्तुसंयोगेन सर्वज्ञत्वं सिद्ध्यति, तथापि सर्ववस्त्ववभासकानां वेदानां प्रणेतृताविशेषं दर्शयति । यथा दीपः स्वप्रभासंयुक्तेष्वपि रूपादिषु

उपन्यस्तं शिवस्य भ्रमाद्यभावं श्रुत्युदाहरणेन द्रढयति—ईशान इति । "ईशानः सर्वविद्यानाम्" (महाना० १०.८) इति श्रुतिः शिवस्य सकलविद्यैश्वर्यं प्रतिपादयति, तस्य यथावद्विद्यासम्प्रदायप्रवर्तनविरोधिनां भ्रमादीनामभावं गमयति, अन्यथा तदैश्वर्यानुपपत्तेरिति भावः । ननु यथावदुपदेष्टुं शक्तोऽपि विप्रलिप्सयाऽन्यथोपदिशेदित्याशङ्क्य तदभावे श्रुत्यन्तरमुदाहरति—स नो देव इति । निरतिशयानन्दप्रापकतत्त्वबोधसंयोजकत्वं शिवस्य प्रतिपादयन्ती—"स नो देवः" (महाना० १०.३) इति श्रुतिस्तस्मिन् विप्रलिप्सागन्धमपि न सहत इति भावः । एवं शास्त्रयोनित्वहेतुमुपपाद्य तस्याध्याहृतेन साध्येनान्वयं दर्शयति—अत इति । तत्रानुकूलतर्कमाह—अज्ञातस्येति । वक्तुं परबुबोधयिषया शब्दसन्दर्भं रचयितुम् । ननु सर्वगतस्य परमेश्वरस्य यावदाश्रयव्यापिनी चैतन्यशक्तिः सर्ववस्तुसंयोगिनीति तत एव हेतोस्तस्याः सर्वविषयत्वसिद्धेः परमेश्वरस्य सर्वज्ञत्वं सिद्ध्यति, किं शास्त्रयोनित्वहेतुप्रसाधनक्लेशेनेत्याशङ्क्य शास्त्रयोनित्वहेतुना सिद्ध्यन् विशेषः सर्ववस्तुसंयोगेन न सिद्ध्यतीत्याह—यद्यपीत्यादिना ।

ननु वेदप्रणेतृतारूपं शास्त्रयोनित्वं कुतो विशेषं गमयति, यदर्थं सर्ववस्तुसंयोगहेतुमुपेक्ष्य स हेतुरन्विष्यत इत्याकाङ्क्षायां तेन गमयितव्यं विशेषमाह—यथेति । सकलमपि प्रकाशयतीति विशेषं वेदानां प्रणेतृता दर्शयति गमयतीति पूर्वेणान्वयः । यथा दीपप्रभा रूपरसादिसम्बन्धाविशेषेऽपि रूपमेव प्रकाशयति न रसादि, तथा परमेश्वरप्रभारूपचैतन्यशक्तिरपि किं व्यव-

रूपमेव प्रकाशयति न रसादि, तथा न परमेश्वरः, किन्तु स्वशक्तिसंयुक्तं सकलमपि प्रकाशयतीति ।

ननु परमेश्वरस्य सर्वज्ञत्वं नाम वेदोक्तसकलपदार्थाभिज्ञत्वम् । तर्हि महर्षीणामपि वेदार्थवेदिनां सर्वज्ञत्वं सिद्धम् । किमत्र वैषम्यमिति चेन्न, तत्कर्तुरीश्वरस्याधिकं ज्ञानमस्ति व्याकरणादेरधिकार्थविदां हि पाणिनिप्रभृतीनां तत्प्रणेतृत्वं

स्थितविषयेत्याशङ्का शास्त्रयोनित्वहेतुना सर्वविषयज्ञातृत्वसाधनेनैव निवर्तनीयेति तदर्थमपि तदन्वेषणमावश्यकमिति भावः ।

ननु यथा सर्वसंयोगिचैतन्यशक्तिमत्त्वेन निरङ्कुशं सर्वज्ञत्वं न सिद्ध्यति, तथैव वेदकर्तृत्वेनापि । तेनापि हि वेदाद् वेदार्थमवगच्छतां महर्षीणामिव वेदोक्तमकलपदार्थाभिज्ञत्वमात्रं सिद्ध्यति, न तु वेदार्थबहिर्भूतगङ्गावालुकासंख्यादिज्ञातृत्वमपीत्याशङ्कते—नन्विति । सर्वज्ञत्वं सिद्धमिति सकलवेदार्थवेदित्वरूपं संकुचितं सर्वज्ञत्वं सिद्धमित्यर्थः । किमत्रेति । वेदादर्थमवगच्छतां सार्वज्ञ्याद् वेदकर्तृत्वेन सिद्ध्यतीश्वरसार्वज्ञ्ये वैषम्यं नास्ति, उभयस्यापि यावद्वेदार्थविषयतारूपत्वादित्यर्थः । यद्वा सर्वसंयोगित्वेन सिद्ध्यतः सार्वज्ञ्यात् तत्र नास्ति वैषम्यम्, विषयसङ्कोचस्योभयत्रापि सद्भावादित्यर्थः । वेदकर्तृत्वेन वेदार्थविषयमेव सार्वज्ञ्यं न सिद्ध्यति, किन्त्वधिकविषयमपि प्रबन्धॄणां प्रबन्धमूलज्ञानस्य प्रबन्धाधिकविषयत्वदृष्टेरिति परिहरति—नेति ।

नन्वपूर्वप्रबन्धरचयितुरेव प्रबन्धार्थाधीनस्य करणीयप्रबन्धोचितवर्णपदवाक्यविन्यासादिप्रकारस्य तत्परिहरणीयदोषजातस्य तत्तत्प्रदेशकर्तव्यार्थसंक्षेपविस्तरौचित्यस्य तत्र तत्र सम्भाविताक्षेपसमाधानव्यञ्जनसमर्थविशेषणविन्यासस्येत्येवमादेर्ज्ञानमपेक्षितम् । अनादिमपौरुषेयप्रबन्धं लोके खिलीभूतं प्रचारयितुं पूर्वसिद्धयैव वर्णपदानुपूर्व्योच्चारयतस्तु तन्नापेक्षितम् । अतोऽनपेक्षितत्वादप्रयोजकमधिकज्ञानं न वेदकर्तृत्वेन सिद्ध्येत् । अन्यत्र दर्शनमात्रेण तत्सिद्धावन्यत्र प्रबन्धान्तराध्यासजनितमधिकज्ञानं दृष्टमितीश्वरस्यापि तथाभूतमेव तत्सिद्ध्येदित्याशङ्क्याह—व्याकरणादेरिति । पाणिनिप्रभृतयो हि परमेश्वरोपज्ञपूर्वपूर्वव्याकरणप्रसिद्धमर्थजातं संगृह्णन्तोऽपि रचनीयसूत्रादिगतवर्णपदानुपूर्व्याद्यधिकार्थविषयज्ञानवन्तो भवन्ति । तथा

दृश्यते । वेदश्च सर्वार्थविभासकोऽपि न सर्वं मुख्यतः प्रकाशयति, किन्तु किमपि लक्षणया किमपि सामान्येन किमपि

वेदकर्तुरपि वैदिकवर्णपदानुपूर्व्यादिज्ञानमावश्यकमिति वेदकर्तृत्वेन वेदार्थाधिकविषयज्ञानसिद्धिर्भवत्येवेति भावः ।

यद्यपि महर्षीणामिव सकलवेदार्थाभिज्ञत्वरूपमेव सार्वज्ञ्यं सिद्ध्येत्, तथापि तेषां वेदश्रवणाधीनात् सार्वज्ञ्यात् परमेश्वरस्य वेदरचनामूलभूतं वेदकर्तृत्वेन सिद्ध्यत् सार्वज्ञ्यं विशिष्टं सिद्ध्येदित्याह—वेदश्चेति । सर्वार्थेति । स्वविषयीभूतसर्वार्थविभासकोऽपीत्यर्थः । वेदः स्वविषयं सर्वमर्थं न मुख्यया वृत्त्या प्रकाशयति, किन्त्विक्षुक्षीरमाधुर्यादिवदनुभवैकवेद्यमर्थजातं तत्तदसाधारणवाचकशब्दाभावान्मुख्यवृत्त्या प्रख्यापयितुमशक्नुवन् यथाकथञ्चिल्लक्षणया ख्यापयति । यथा—"यतो वाचो निवर्तन्ते अप्राप्य मनसा सह । आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन ॥" (तै० उ० २.४.१) इति । नहि ब्रह्मानन्दगतः सर्वोत्कर्षः केनचिदसाधारणेन शब्देनेत्थंभूत इति प्रख्यापयितुं शक्यते, अतो वाङ्मनसातीतत्ववचनेन लक्षणया ज्ञाप्यते । विशिष्य प्रख्यापयितुमशक्यं किञ्चिदर्थजातं तु सामान्यमुखेन ज्ञापयति । यथा "अनन्ता वै वेदाः" इत्यानन्त्यमनन्तोत्कर्षापकर्षशालि । तद्यथा—अतीतक्षणानन्त्यमस्मिन् कल्प इव पूर्वकल्पेऽप्यस्ति । तत्र पूर्वकल्पगतात् तस्मादेतत्कल्पगतं भूयसोत्कृष्यते । एवमागाम्यनन्तकल्पगतानि तान्युत्तरोत्तरमुत्कृष्यन्ते । एवमनन्तविधानन्त्यमध्ये वेदानन्त्यमीदृशमिति विशिष्य प्रदर्शयितुं नास्ति तदसाधारणः शब्दः । अतः सामान्यमुखेन ज्ञाप्यते । एवं सामान्यमुखेन क्वचित् क्वचित् प्रवर्तमानस्य वेदस्य तत्तदर्थं प्रत्यक्षतः स्वयं विशिष्यानुभूय तत्तद्वेदवाक्यप्रणेतुरीश्वरस्य च महति वैषम्ये स्थिते तत्तद्वेदवाक्यश्रवणेन तत्तदर्थमवगच्छतां महर्षीणां तत्तदर्थे न तथा स्पष्टावभासः, यथा यथार्थतस्तदप्रत्यक्षतोऽनुभूय तत्तद्वाक्यप्रणेतुरीश्वरस्येति व्यक्तमेव । नहि क्षीरमाधुर्यविशेषं स्वयमनुभूय क्षीरं मधुरतरमिति प्रयुञ्जानस्येव तस्माद् वाक्यात् तन्माधुर्यमवगच्छतस्तथा तत्र स्पष्टावभासोऽस्तीति भावः ।

नन्वीश्वरस्य वेदरचनामूलत्वेन सिद्ध्यज्ज्ञानं विशिष्य सर्ववेदार्थविषयं तदधीनवर्णपदानुपूर्व्यादिविषयं च सिद्ध्यतु नाम, तथापि तस्य नदीवालुकासंख्यादिविषयत्वासिद्धेर्न निरङ्कुशसार्वज्ञ्यसिद्धिरिति प्रश्नस्य किमुत्तरं निष्पन्नम् । वेदरचनामूलभूतं ज्ञानं यावद्वेदतदर्थविषयमिति सिद्धौ शिवशक्ति-

विशेषेण। परमेश्वरः सर्वसाक्षी सर्वं प्रत्यक्षयतीति वेदेश्वरयोरेतावद् वैषम्यमिष्यते।

ननु परमेश्वरस्यैव वेदकर्तृत्वमिति न नियमः, "षड्ढोता वै भूत्वा प्रजापतिरिदं सर्वमसृजत ऋचो यजूंषि सामानि"

दीपप्रभान्यायेन व्यवस्थितविषयेति शङ्कायां निरस्तायां नदीवालुकासंख्यादिविषयत्वमपि सिद्ध्यतीति चेत्, तथाप्यतीतानागतवस्तुविषयज्ञानं न सिद्ध्यति। ज्ञानसंयोगस्य विद्यमानेष्वेव सम्भवात् सत्कार्यवादे सर्वेषामर्थानां सदा सत्त्वेऽपि तत्तदागन्तुकभूतभविष्यदवस्थाविशेषज्ञानं न सिद्ध्यतीति चेत्, उच्यते—वेदकर्तृत्वेन वेदरचनामूलभूतज्ञानसिद्धौ तद्रचनासमयेष्वसतां भूतभविष्यतामपि वेदार्थानां ज्ञानं सिद्ध्यतीति तद्बहिर्भूतानामपि भूतभविष्यतां ज्ञानं सिद्ध्येत्। शिवज्ञानस्य विद्यमानविषयेषु व्यवस्थितविषयत्वशङ्काया इव भूतभविष्यद्विषयत्वासम्भवशङ्काया अपि निरासे सति सङ्कोचकाभावेन सर्वविषयत्वसिद्धेः। यस्य प्रसादादतीतानागतविषयं ज्ञानं देवर्षिमनुष्यादीनां जायते, तस्य परमेश्वरस्यातीतानागतज्ञातृत्वकल्पने कानुपपत्तिः। कारणाधीनमतीतानागतविषयत्वमनित्यज्ञानानां सम्भवति। नित्यस्य तु परमेश्वरज्ञानस्य तत्तदर्थसम्बन्धाधीनमेव तत्तद्विषयत्वं वाच्यमित्यतीतानागतावस्थाविशेषविशिष्टैः सम्बन्धाभावे कथं तद्विषयत्वं स्यादिति चेन्न, जीवानामिवेश्वरस्यापि चिच्छक्तिः—"प्रज्ञा च तस्मात् प्रसृता पुराणी" (श्वे० उ० ४.१८) इति वचनप्रामाण्येन नादृष्टादिकारणाधीननानापरिणामविशेषवतीत्यभ्युपगमात्। तदेतत् सर्वमभिप्रेत्योक्तं भाष्ये—परमेश्वरः सर्वसाक्षी सर्वं प्रत्यक्षयतीति। न सर्वं मुख्यतः प्रकाशयतीत्येतन्न सर्वं विशिष्य प्रकाशयतीत्यस्याप्युपलक्षणम्। किमपि विशेषेणेति दृष्टान्ततयोपन्यस्तम्।

ननु ब्रह्मणो वेदकर्तृत्वे सति तेन महर्षीणां सार्वज्ञ्याद् विशिष्टमीश्वरस्य सार्वज्ञ्यं सिद्ध्येदपि, तत्रैव न प्रमाणम्, निःश्वसितादिश्रुतीनां षड्ढोतृवाक्यादीनामिव तत्तदभिमानिदेवतादृष्टत्वादिविषयत्वादित्यभिप्रायेण शङ्कते—नन्विति। प्रजापतेः परमेश्वराद् वेदावाप्तिश्रवणात् तस्य वेदप्रणेतृत्वमनुपपन्नं दूरे तत्सृष्टानामग्न्यादीनामिति तेषां वेदकर्तृत्वश्रुतेरन्यथा नेतव्यत्वेऽपि परमेश्वरस्य वेदकर्तृत्वश्रुतयो नान्यथा नेतव्याः,

इत्यादिश्रवणाद् हिरण्यगर्भादेरपि तत्कर्तृत्वावगमादिति चेन्न, हिरण्यगर्भोत्पत्तेः प्रागपि वेदानां सद्भावात् । श्रूयते हि—"यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै" (श्वेता० ६.१८) इति । यः सर्वदेवानामादिमस्य हिरण्यगर्भस्यापि कर्ता, तस्मै सर्वान् वेदानुपदिशति, स एव सर्वाधिको वेदकर्ता परमदेशिकः । तथा हि श्रुत्याऽभिव्यज्यते—"यो देवानां प्रथमं पुरस्ताद् विश्वाधिको रुद्रो महर्षिः । हिरण्यगर्भं पश्यत जायमानं स नो देवः शुभया स्मृत्या संयुनक्तु ।।" (महाना० १०.३) इति । महर्षिर्वेदकर्ता यः सर्वज्ञत्वादिना

बाधकाभावात् । अतः सृज्यमानाय प्रजापतये वेदप्रदानश्रवणात् ततः प्रागेव परब्रह्मणा वेदाः प्रणीता इत्यभ्युपगन्तव्यमित्याशयेन परिहरति—नेति । सर्वदेवानामादिमस्येति विशेषणमग्न्यादीनां वेदकर्तृत्वश्रवणस्यान्यथा नेतव्यतायाः कैमुतिकन्यायेन सिद्धिं दर्शयितुम् । यद्यप्युदाहृतमन्त्रे पूर्वमित्युक्त्यैवोपन्यस्तविशेषणार्थः सिद्ध्यति, तथापि तस्य स्पष्टीकरणार्थं मन्त्रान्तरमुदाहरति—तथा हीति । अस्मिन् मन्त्रे देवानां प्रथममिति स्पष्टमुक्तम् । पुरस्तात् कल्पादौ । पश्यतेत्यडागमाभावः, आत्मनेपदं चेत्युभयं छान्दसम् । जायमानमित्यनेन जननावस्थायामेव चराचरसृष्ट्युपयोगिसकलवेदतदर्थस्फूर्तिसमर्थयाऽनुग्रहदृष्ट्या दर्शनं व्यज्यते । अत एव—"यो ब्रह्माणं विदधाति" (श्वे० उ० ६.१८) इति मन्त्रेऽपि लडाख्याताभ्यां सृष्टिवेदप्रदानयोः समानकालत्वमुक्तम् । पुराणेषु च—"ज्ञानमप्रतिमं यस्य वैराग्यं च जगत्पतेः । ऐश्वर्यं चैव धर्मश्च सह सिद्धं चतुष्टयम् ॥" इति हिरण्यगर्भस्य ज्ञानादीनां सहजत्वमुक्तम् । स्मृत्येत्यनेन मोक्षार्थं दहराद्युपासनारूपा स्मृतिसन्ततिरुच्यते । तज्जन्यसाक्षात्कारो वा तद्वाचकेन लक्ष्यते । "स्मृतिलाभे सति सर्वग्रन्थीनां विप्रमोक्षः" (छा० उ० ७.२६.२) इति श्रुत्यन्तरेऽपि मोक्षजनकज्ञाने स्मृतिशब्दप्रयोगो दृश्यते ।

मन्त्रं व्याचष्टे—महर्षिरिति । तस्मिन् जन्मनि कुतश्चिदध्ययनमनपेक्ष्य स्वयमेव सूक्तविशेषरूपवेदैकदेशद्रष्टारो हि वसिष्ठादय ऋषय उच्यन्ते । अतः परमेश्वरः कदाचिदप्यध्ययनमनपेक्ष्य सकलवेदप्रणेतृत्वान्महर्षिरिति

विश्वस्माच्चिदचित्प्रपञ्चादधिको रुद्रः परब्रह्मभूतः सर्वेषां देवानामिन्द्रादीनां प्रथममादिमं हिरण्यगर्भं ब्रह्माणं स्वसङ्कल्पेन प्रकृतेरुपादानात्मनो जायमानं सृष्टिकाले सर्वज्ञानोपायसकलवेदोपदेशरूपयाऽपश्यत्, स परमदेशिको नः अस्मानपि सकलसंसारपाशमहानर्थनिवृत्तिहेतुभूतया परमामृतलक्ष्मीसमावेशपरानन्दप्राप्तिकारिण्या अत एव परममङ्गलरूपया वेदान्तसारसामरस्यसिद्धया स्मृत्या बोधकलया स्वविषयया संयोजयत्विति तात्पर्यम् । ततः सकलवेदकर्तृत्वमीश्वरस्य सिद्धम् । वाचो नित्यत्वश्रुतिरीश्वरेण पूर्वसत्तानुवृत्त्या

निर्दिष्टः। इदं विशेषणं हिरण्यगर्भसृष्ट्यवस्थायां वेदप्रदानरूपानुग्रहदृष्ट्या दर्शनं समर्थयितुम्। ततः प्रागेव वेदप्रणेतृत्वप्रदर्शनार्थं सर्वज्ञत्वादिनेति। निरतिशयं सर्वज्ञत्वमत्रैव विश्रान्तमिति भावः। रुद्रशब्दोऽत्र संसाररुजां द्रावके परब्रह्मणि वर्तते, न तु संहाररुद्रादाविति व्याचष्टे—रुद्र इति। स्वसङ्कल्पेनेति। निमित्तरूपस्य स्वस्य सङ्कल्पेन प्रकृत्यवस्थाविशेषात्मकोपादानरूपात् स्वात्मनो जायमानमित्यर्थः। "हिरण्यगर्भं जनयामास पूर्वं स नो बुद्ध्या शुभया संयुनक्तु" (श्वे० उ० ३.४) इति श्वेताश्वतरोपनिषद्यस्य मन्त्रस्य पाठात् स्वसङ्कल्पेनेति विशेषितम्। पश्यतेति दर्शनमात्रोक्तेः फलाभावात्, "यो वै वेदांश्च प्रहिणोति" (श्वे० उ० ६.१८) इति मन्त्रान्तरदर्शनाच्च विशिष्टदर्शनमिह विवक्षितमित्यभिप्रेत्य विशेषयति—सर्वज्ञानेति। परमामृतेति। परमममृतं ब्रह्म तल्लक्ष्मीसमावेशः सत्यसङ्कल्पत्वादिना तत्सादृश्यप्राप्तिः परानन्दप्राप्तिः। उक्तस्मृतिविशेषणार्थः सर्वोऽपि शुभयेति तद्विशेषणेन लब्ध इत्यभिप्रेत्याह—अत एवेति। सामरस्यमैककण्ठ्येन ब्रह्मणि तात्पर्यम्। तस्मान्निःश्वसितादिश्रुतीनां षड्ढोतृवाक्यादिवैषम्यात् ततः सकलवेदकर्तृत्वमीश्वरस्य सिध्यतीत्युपसंहरति—तत इति।

तथापि वेदनित्यत्वश्रुतिविरोधः स्यादित्याशङ्क्य पूर्वं सृष्टेः प्रागित्यादिग्रन्थेन सूचिते तत्समाधाने स्थित एव समाधानान्तरमाह—वाच इति। पूर्वं प्रलयेषु घटादीनामिव वेदानामसत्त्वेऽपि प्रतिकल्पं प्रादुर्भावात् प्रवाहनित्यत्वमस्तीति तद्विषयतया वेदनित्यत्वश्रुतेरविरोध उक्तः, इदानीं तु

विहितत्वाद् वेदानामविरुद्धा । ततो वेदानामीश्वरप्रणीतत्वं नित्यत्वं चाविरुद्धमेव ।

इति शास्त्रयोनित्वाधिकरणम् ।। ३ ।।

क्रमविशेषविशिष्टवर्णरूपाणां वेदानां प्रलयेऽपि क्रमोपाधिभूतपरमेश्वरबुद्ध्यनुवृत्त्या सत्तानुवृत्तिरस्तीति तद्विषयतयेति भेदः ।

ननु वेदानां प्रलयेऽपि सत्त्वे कथं तेषां सर्गादावीश्वरप्रणीतत्वमुपपद्यत इत्याशङ्क्याह—तत इति । प्रलये वेदानां परमेश्वरबुद्धिगोचरतयैवानुवृत्तिः, सर्गादौ तु तेषां परश्रवणगोचरतया वैखरीवृत्तिविशिष्टत्वेन परमेश्वरप्रणीतत्वमित्युभयमप्यविरोधेनोपपद्यते । अत एव—"अनादिनिधना दिव्या वागुत्सृष्टा स्वयंभुवा । आदौ वेदमयी भूता यतः सर्वा प्रवृत्तयः ॥" (महा० १२.२२४.५५) इति वेदानां नित्यत्वेऽपि शिवप्रणीतत्वं स्मर्यंत इति भावः ॥ ३ ॥

इति शास्त्रयोनित्वाधिकरणम् ॥ ३ ॥

।। अथ समन्वयाधिकरणम् ।।

प्रथमाधिकरणे जिज्ञास्यतया प्रतिपादितस्य परब्रह्मणः शिवस्य परिज्ञाने लक्षणापेक्षायां द्वितीयाधिकरणेन लक्षणं

प्रथमाधिकरणे शास्त्रानारम्भहेतुशङ्कानिरासेन तदारम्भमुपपाद्य जन्मादिसूत्रप्रभृति शास्त्रं प्रवर्तितम्। समन्वयाधिकरणे पुनः सिद्धरूपे ब्रह्मणि वेदान्तानां प्रामाण्यं न सम्भवतीति शङ्काहेतुनिरासेन तत्र तेषां प्रामाण्यमुपपाद्यते। अतः शास्त्रारम्भोपपादकतया जन्माद्यधिकरणात् प्रागेव समन्वयाधिकरणं निवेशमर्हति। वेदान्तानां ब्रह्मणि प्रामाण्ये हि तन्निर्णय-फलकवेदान्तविचारोपयोगिन्यायग्रथनात्मकं शास्त्रमारम्भणीयं भवेत्, न तु तेषां तस्मिन्नप्रामाण्ये। तथा च समन्वयाधिकरणस्य शास्त्रयोनित्वाधि-करणानन्तर्यं न युक्तमित्याशङ्क्य सङ्गतिविशेषप्राप्तं तदानन्तर्यमिति वृत्तसङ्कीर्तनेनोपादयति—प्रथमाधिकरण इति।

प्रथमाधिकरणे ब्रह्म विचार्यं प्रतिज्ञातम्। तेनापरिच्छेद्यत्वाद् ब्रह्म न विचार्यमिति शङ्कानिरासार्थमिदमित्थमिति परिच्छेत्तुमशक्यत्वेऽपि लक्षणमुखेनेतरव्यावृत्ततया परिच्छेत्तुं शक्यं तदिति सूचितम्। ततस्तत्किं-लक्षणं येन तत्तथा परिच्छेत्तुं शक्यमित्याङ्क्षायां जगज्जन्मादि तल्लक्षण-मिति प्रदर्श्य तस्य तल्लक्षणत्वं तदनुपपत्तिशङ्कानिरासेनोपपादितम्। ततो जगज्जन्मादिकारणे ब्रह्मणि किं प्रमाणमित्याकाङ्क्षायां शास्त्रं प्रमाणमिति प्रदर्श्यानुमानगम्ये ब्रह्मणि शास्त्रस्य प्रामाण्यं न सम्भवतीति शङ्कानिरासेन तस्य तत्र प्रामाण्यमुपपादितम्, तथापि शब्दानां कार्य एव व्युत्पत्तेः सिद्धार्थ-बोधकत्वासम्भवात्तस्य तत्र प्रामाण्यं न सम्भवतीति शङ्का तदनन्तरमेवा-वतरति। नहि ततः पूर्वं ब्रह्मणि शास्त्रस्य प्रामाण्यं प्रसक्तम्, येनैतच्छङ्का-निरासार्थं समन्वयाधिकरणं ततः पूर्वं निवेशनीयं भवेत्। तस्मात् समन्वया-धिकरणनिरसनीयशङ्कोत्थानहेतुपर्यालोचनया तस्य शास्त्रयोनित्वाधि-करणानन्तर्यं प्राप्तमित्यर्थः।

ननूक्तशङ्कानिरासाय समन्वयाधिकरणं चेत्, तदेवानारम्भणीयम्। सर्व-विधशास्त्रानारम्भहेतुशङ्कानिरासेन तदारम्भोपपादनार्थं प्रवृत्ते प्रथमाधि-

जगज्जन्मादिरूपधर्मैर्भिहितम्। तस्मिन् किं प्रमाणमित्या-काङ्क्षायां तृतीयाधिकरणेन वेदान्तशास्त्रस्य तद्विषये

करण एव साऽपि निरसनीया। शास्त्रानारम्भहेतुशङ्कात्वाविशेषादित्याशङ्कानिरासो जिज्ञास्यतया प्रतिपादितस्य ब्रह्मण इत्युक्त्या सूचितः। तत्रायमाशयः—"अथातो ब्रह्मजिज्ञासा" (ब्र० १.१.१) इति सूत्रसामर्थ्येन यासामनारम्भहेतुशङ्कानां निरसनस्य सूचनं लभ्यते, तावन्निरसनेन शास्त्रारम्भोपपादनं प्रथमाधिकरणार्थः। तथा च यथा तत्राथातःशब्दसामर्थ्येन सम्बन्धाधिकार्यसम्भवशङ्कानिराससूचनं लभ्यते, यथा च ब्रह्मजिज्ञासेति समासान्तर्गतषष्ठीसामर्थ्येन ब्रह्मणो विषयत्वप्रयोजनत्वसम्भवशङ्कानिरसनसूचनं लभ्यते, न तथा वेदान्तानां सिद्धरूपे ब्रह्मणि प्रामाण्यं न सम्भवतीति शङ्कानिरसनसूचनं तत्रत्यकिञ्चित्पदसामर्थ्येन लभ्यते। ब्रह्मविचारकर्तव्यता हि तस्य सूत्रस्यार्थः, न तु ब्रह्मज्ञानाय वेदान्तविचारकर्तव्यता, येन तच्छङ्कानिरसनसूचनमपि लभ्येत। इहौपनिषदी मीमांसेति प्रथमाधिकरणावतारिकाभाष्यमारभ्य प्राग्भाष्ये तत्र तत्रास्य शास्त्रस्य वेदान्तविचारशास्त्रत्वव्यवहारस्तु विचार्यत्वेन प्रतिज्ञाते ब्रह्मणि वेदान्तानां प्रामाण्यं शास्त्रयोनित्वाधिकरणेन समन्वयाधिकरणेन च समर्थयिष्यत इति तत्सामर्थ्यसिद्धमर्थं पर्यालोच्य।

न च सूत्रसामर्थ्यलभ्यत्वाभावेऽपि सम्भावितसर्वविधानारम्भहेतुशङ्कानिरसनं शास्त्रारम्भसमर्थनार्थे तदुपोद्घाताधिकरण एव यथाकथञ्चिन्निवेशनीयमिति नियमः, पूर्वमीमांसायां बहुभिः प्रथमाध्यायाधिकरणैर्निवर्तनीयानां वेदाप्रामाण्यशङ्काविशेषाणां शास्त्रानारम्भहेतुत्वेन तेषां सर्वेषामपि तदारम्भसमर्थनार्थे तदीयप्रथमाधिकरणे निवेशनापत्तेः। तस्माद् यथा तत्र धर्मे चोदनायाः प्रामाण्ये प्रतिज्ञात एव तदप्रामाण्यशङ्काः समुत्तिष्ठन्तीति तन्निरसनार्थानामधिकरणानां चोदनासूत्रानन्तरमारम्भः, एवमिहापि ब्रह्मणि वेदान्तानां प्रामाण्ये प्रतिज्ञात एव तदप्रामाण्यशङ्काः समुत्तिष्ठन्तीति शास्त्रयोनित्वसूत्रानन्तरं समन्वयाधिकरणारम्भो युक्त इति। तन्मूलत्वं चेति। शास्त्रस्य ब्रह्मकर्तृकत्वं चेत्यर्थः। इदं तृतीयाधिकरणानुषक्तवर्णकान्तरप्रमेयत्वेन वस्तुतः पूर्ववृत्तान्तर्गतमिति पूर्ववृत्तमध्ये सङ्कीर्तितम्, न तु समन्वयाधिकरणसङ्गत्यपेक्षितत्वेन।

प्रामाण्यं तन्मूलत्वं च निरूपितम्। येन यदव्यभिचारेण

एवं समन्वयाधिकरणस्य प्राङ्निवेश्यत्वशङ्कां निरस्य तस्य शास्त्रयोनित्वाधिकरणानन्तर्यमुपपादयितुं तेनाक्षेपिकीं सङ्गतिं दर्शयति—येनेत्यादिना। ननु—'येन यदव्यभिचारेण सिद्ध्यति तद्धि तस्य प्रमाणमुच्यते' इति भाष्येण किं प्रदर्श्यत इति, पूर्वाधिकरणसमर्थितवेदान्तानां ब्रह्मणि प्रामाण्यं न सम्भवतीत्याक्षेपोपयोगितया तार्किकाभिमतम्—"प्रमाकरणं प्रमाणम्" इति प्रमाणलक्षणं प्रदर्श्यत इति चेत्, कथमनेन वाक्येन तत्प्रदर्श्यते। अतिशयितं कारणं हि करणम्। अतिशयस्त्वत्रेन्द्रियलिङ्गशब्दादीनां प्रमाकरणानां प्रमाव्याप्तत्वरूपो विवक्षित इत्यव्यभिचारशब्देन ख्यापनात् तत्प्रदर्श्यत इति चेन्न, सकलसहकारिसमवधाने प्रमाव्याप्तत्वस्य सर्वप्रमाकरणसाधारण्येनाव्यावर्तकत्वात्, तदसमवधाने इन्द्रियादीनामपि तदसम्भवात्। अथोच्येत—अव्यभिचारशब्देनेन्द्रियादिगतः प्रमितव्यभिचारो न विवक्षितः, किन्तु प्रत्यक्षानुमित्यादिप्रमारूपकार्यगत इन्द्रियलिङ्गाद्यव्यभिचारः, ततश्च प्रत्यक्षानुमित्यादिगतेन्द्रियलिङ्गादिनिरूपितकार्यतावच्छेदकानामनुभवत्वव्याप्यत्वेन क्रोडीकारादनुभवत्वव्याप्यधर्मावच्छिन्नकार्यताप्रतियोगिककारणताश्रयत्वे सति प्रमाकरणं प्रमाणमिति लक्षणमिह विवक्षितं पर्यवस्यतीति चेन्न, चाक्षुषज्ञानादिवृत्त्यनुभवत्वव्याप्यधर्मविशेषावच्छिन्नकार्यताप्रतियोगिककारणताश्रयेष्वालोकादिष्वतिव्याप्तेः। अनुभवत्वव्याप्यधर्मेत्यनेन अनुभवत्वसाक्षाद्व्याप्यजातिविवक्षायामनुभवत्वसाक्षाद्व्याप्यायाः प्रत्यक्षत्वजातेर्नित्यज्ञानसाधारण्यान्नेन्द्रियादिनिरूपितकार्यतावच्छेदकत्वम्, किन्तु जन्यप्रत्यक्षत्वस्येति तार्किकाणामभ्युपगमेन लक्षणस्येन्द्रियेष्वव्याप्तेः।

ननु जन्यत्वातिरिक्तविशेषणघटितानुभवत्वसाक्षाद्व्याप्यजात्यवच्छिन्नकार्यतानिरूपितकारणताश्रयत्वं विवक्षितमिति चेन्न, ईश्वरज्ञानव्यावृत्त्यर्थमिन्द्रियनिरूपितज्ञाननिष्ठकार्यतावच्छेदकशरीरे विनाशित्वस्यापि निवेशयितुं शक्यत्वेनेन्द्रियेषु तेन विशेषणेनाव्याप्तिनिरासालाभात्। ननु नित्यमात्रव्यावृत्तिप्रयोजकातिरिक्तविशेषणाघटितत्वं विवक्षितम्। यद्यपि जन्यत्वं विनाशित्वं वा नित्यमात्रव्यावृत्तं न भवति, अनित्यनित्याभ्यां प्रागभावध्वंसाभ्यामपि व्यावृत्तत्वात्। तथापि प्रकृतकार्यतावच्छेदके तद्विशेषणमीश्वरज्ञानव्यावर्तनैकप्रयोजनमिति नोक्तदोषानुवृत्तिः। मात्रपददानान्नित्यानित्योभयव्यावृत्तिप्रयोजनकलौकिकत्वविशेषणघटितप्रत्यक्षत्वावच्छिन्नकार्यतानिरू-

पितकारणताश्रये विषये नातिव्याप्तिरिति चेन्न, एवमपि शाब्दत्वरूपोक्त-विशेषणविशिष्टजात्यवच्छिन्नकार्यतानिरूपितकारणताश्रयेष्वाकाङ्क्षाज्ञानादिष्वतिव्याप्तेः ।

ननु व्यापारवत्त्वमपि विशेषणं विवक्षितम् । न च पदज्ञानानां पदार्थस्मृतिवदाकाङ्क्षाज्ञानादीनां कश्चिद् व्यापारोऽस्तीति चेन्न, तथा सत्यनुमानप्रमाणत्वेनाभिमतस्य लिङ्गपरामर्शस्य व्यापाराभावेन तत्राव्याप्तेः । ननु यद्ययं निर्वह्निः स्यान्निर्धूमः स्यादिति विषयपरिशोधकस्तर्कस्तद्व्यापारः, तस्य धूमाभावापादनरूपस्य स्वारसिकधूमवत्त्वज्ञानापेक्षत्वेन परामर्शजन्यत्वादिति चेन्न, विरोधिशङ्कानिवर्तनद्वारानुमित्युपयोगिनस्तस्य शङ्काया असार्वत्रिकत्वेनानावश्यकत्वात् । न च परामर्शद्वारा व्याप्तिज्ञानं कारणम्, तद्द्वारा लिङ्गज्ञानस्यापि कारणत्वसम्भवेन विनिगमनाविरहात् लिङ्गविशेष्यकपरामर्शस्थले लिङ्गज्ञानस्येव व्याप्तिविशेष्यकपरामर्शस्थले विशकलितव्यभिचाराभावसहचारज्ञानजन्यपरामर्शस्थले च व्याप्तिज्ञानस्याभावेनासार्वत्रिकस्योभयत्रापि तुल्यत्वात् ।

ननु तर्हि व्याप्तिव्यभिचाराभावसहचारलिङ्गज्ञानानि सर्वाण्यपि करणानि सन्तु । न च क्वचित् किञ्चित् सम्भवति न सर्वं सर्वत्रेत्यनुगमः, परामर्शजनकज्ञानत्वेनानुगतेन रूपेण कारणत्वाभ्युपगमात् । न च स्मृतिरूपपरामर्शस्थलेऽनुमित्यजनकसंस्कारव्यवहितस्य पूर्वानुभवरूपपरामर्शजनकज्ञानस्यानुमितिजनकत्वासम्भवः, व्यापारेणेव व्यापारजनकेन व्यवधानस्यापि कार्यकारणभावाविरोधित्वात्, स्वर्गजनकावान्तरापूर्वव्यवहितस्यापि यागस्य स्वर्गजनकत्वाभ्युपगमादिति चेन्न, प्रत्यक्षपरामर्शस्थले व्याप्तिज्ञानलिङ्गज्ञानेश्वरज्ञानानामनुमितिरूपपरामर्शस्थले परामर्शतज्जनकज्ञानानां शब्दपरामर्शस्थले पदपदार्थाकाङ्क्षादिज्ञानानां च बहूनां परामर्शजनकज्ञानानां मेलने कस्यचिदेव प्रमाणत्वमित्यत्र विनिगमनाविरहेणैकानुमित्युत्पत्तावनेकानुमितिकरणरूपानुमानप्रमाणाभ्युपगमावश्यम्भावे लाघवान्मनःकालेश्वरादिसाधारणेन परामर्शजनकत्वेनैव तत्कारणताभ्युपगमौचित्यात् । परामर्शाव्यवहितपूर्वक्षणोत्पत्तिकं तत्कारणं ज्ञानमनुमानमभ्युपगम्यत इति चेन्न, स्मृतिरूपपरामर्शस्थले तदभावात् । अस्तु तर्हि सर्वं परामर्शकारणमनुमानमिति चेत्, तथा सति प्रत्यक्षादिप्रमोत्पत्तावप्यनेकप्रमाणाभ्युपगतौ नास्ति कश्चिद्दोष इति । येन यत्सिद्ध्यति तत्प्रमाणमित्येतावत एव लक्षणत्वसम्भवाद् व्यर्थमव्यभिचारेणेति विशेषणम् ।

एतेनानुभवत्वसाक्षाद्व्याप्यैकजात्याश्रययावज्जन्यवृत्तितदन्यावृत्तिधर्मावच्छिन्नकार्यतानिरूपितकारणताश्रयत्वविशेषितं प्रमाकरणत्वं प्रमाणलक्षणमित्यपास्तम् । असम्भवश्चात्राधिकः । प्रत्यक्षादिप्रमाणजन्याश्चतुर्विधा अपि ह्यनुभवा अनुभवत्वसाक्षाद्व्याप्यैकजात्याश्रयाः । नह्येतेषां मध्ये कश्चिदप्यनुभवोऽनुभवत्वसाक्षाद्व्याप्यजातिद्वयस्याश्रयः । तथा च चतुर्विधप्रमाणजन्यसकलानुभववृत्तिकार्यतानिरूपितकारणताश्रयत्वमिन्द्रियलिङ्गादिषु क्वचिदपि नास्तीति स्पष्टमेव । नन्वनुभवत्वसाक्षाद्व्याप्या एकजातिश्चतुर्विधेष्वनुभवेषु नानुवर्तत इति चेन्मानुवर्तिष्ट, तथापि प्रत्यक्षादिष्वनुभवत्वसाक्षाद्व्याप्यजातित्वमिव प्रत्येकमेकत्वमपि तावदस्ति । तथा च यथानुभवत्वसाक्षाद्व्याप्यजातीनां भेदेऽपि सर्वेऽप्यनुभवा अनुभवत्वसाक्षाद्व्याप्यजात्याश्रयाः, एवमेकत्वविशेषिततज्जात्याश्रया अपि भवन्तः केन वारयितुं शक्यन्ते । नन्वेकजातीत्यत्रैकशब्द एकत्वाधिकरणत्वप्रतीत्यर्थो न भवति, सर्वासामपि जातीनां प्रत्येकमेकत्वेनाव्यावर्तकत्वात्, किन्त्वनुभवत्वसाक्षाद्व्याप्यजातीनां मध्ये कस्याश्चिदेव ग्रहणार्थः । तदन्यावृत्तीत्यस्य चोक्तरूपजात्याश्रययावज्जन्यवृत्त्यनित्यज्ञानत्वावच्छिन्नकार्यतानिरूपितकारणताश्रयशरीराद्यतिव्याप्तिवारणार्थमुपात्तस्यानुभवत्वसाक्षाद्व्याप्यजात्यन्तराश्रयावृत्तित्वमर्थः, न त्वनुभवत्वसाक्षाद्व्याप्यजात्याश्रयान्यावृत्तित्वमर्थः । अतोऽपि हेतोरेकशब्दोऽनुभवत्वसाक्षाद्व्याप्यजातीनां मध्ये कस्याश्चिदेव ग्रहणार्थ इति नासम्भवशङ्कावकाश इति चेत्, किमयमेकशब्द उक्तरूपजातीनां मध्ये व्यवस्थितकिञ्चिज्जात्याश्रयग्रहणार्थः, उत यदा यत्र प्रमाणे लक्षणमुपसंह्रियते तदा तत्प्रमाणजन्यज्ञानवृत्तिजातिग्रहणार्थः । आद्ये व्यवस्थितरूपा, द्वितीयेऽननुगमरूपा चाव्याप्तिः ।

ननु प्रमाया अननुगतत्वादननुगते लक्ष्ये लक्षणाननुगमो न दोषायेति तार्किका वदन्तीति चेत्, सत्यम् । एकमेव ज्ञानं विषयविशेषेण प्रमा चाप्रमा चेति विषयविशेषेण प्रमात्वस्याननुगतत्वात्तद्वति तत्प्रकारकज्ञानं प्रमेत्यादिलक्षणेषु तत्तत्प्रमाविषयपरामर्शे सर्वनामार्थाननुगमो न दोषायेति ते वदन्ति । नैवमेकमेव ज्ञानं नानाकरणजन्यत्वेन तत्तत्करणांशे प्रत्यक्षमनुमितिश्चेत्यादिरूपेण प्रमात्वाप्रमात्वसङ्करवत् प्रत्यक्षत्वानुमितित्वादिसङ्करोऽपि तैरिष्यते, येनायमप्यननुगमो न दोषः स्यात् । तस्मादिहाव्यभिचारेणेति विशेषणं प्रमाकरणं प्रमाणमिति प्रमाणसामान्यलक्षणप्रत्यायनार्थं प्रमाकरणगतप्रमाव्याप्तिपरं प्रमागतकरणविशेषव्याप्तिपरं वेत्येतदयुक्तम् ।

ननु तर्हि प्रमासाधनं प्रमाणमित्येवंरूपस्यैव प्रमाणसामान्यलक्षणस्य प्रत्यायनार्थं सिद्ध्यतिशब्दोक्तस्य ज्ञानस्य भ्रमव्यावृत्तत्वलाभायाव्यभिचारेणेतिपदम्—"इन्द्रियार्थसन्निकर्षोत्पन्नमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम्" (१.१.४) इति न्यायसूत्रगतमव्यभिचारिपदमर्थाव्यभिचारपरमस्तु । नैतदपि युक्तम्, सिद्ध्यतिपदेनैव तल्लाभात्, भ्रमकरणेन दुष्टचक्षुरादिना तत्तदर्थज्ञानस्येव तत्तदर्थसिद्धेर्व्यवहाराभावेन सिद्ध्यतेरर्थाव्यभिचारिज्ञानपरत्वात् । तस्मात् किमपि वक्तव्यं यदुदाहृतेन भाष्येण प्रदर्श्यत इति । उच्यते—अनेन भाष्येण न्यायमतसिद्धं मतान्तरसिद्धं वा प्रमाणसामान्यलक्षणं न प्रदर्श्यते, किन्तु "अप्राप्ते शास्त्रमर्थवत्", "यश्चार्थादर्थो न स चोदनार्थः" इति मीमांसकमर्यादाप्रसिद्धं शास्त्रप्रामाण्यप्रयोजकं प्रदर्श्यते, वेदान्तानां ब्रह्मणि प्रामाण्यस्य पूर्वसूत्रोक्तस्याक्षेपे समनन्तरवाक्येन करिष्यमाणे तत्प्रदर्शनस्योपयोगित्वात् । तथा च यच्छास्त्रार्थत्वाभिमतं वस्तु येन शास्त्रेणाव्यभिचारेण तच्छास्त्रावतारमात्रेण सिद्ध्यति, न तु तच्छास्त्रावतारानन्तरमपि तदर्थसामर्थ्यस्य तदुपजीविवाक्यान्तरस्य वावतारमपेक्षते, तच्छास्त्रं तत्र प्रमाणमिति न्यायविद्भिरुच्यत इत्यर्थः । यद्धि यच्छास्त्राधीनसिद्धिकमपि तदर्थसामर्थ्येन तदर्थोपजीविवाक्यान्तरेण वा लभ्यम्, तत्रोभयत्रापि न तच्छास्त्रं प्रमाणम्, तत्र सामर्थ्यवाक्यान्तररूपप्रमाणान्तरसद्भावात् । किन्तु साक्षात् स्वप्रमेयार्थे प्रमाणम्, तत्र प्रमाणान्तराभावात्, तत्प्रमितिं विना सामर्थ्यवाक्यान्तरप्रमाणयोरनुन्मेषाच्च ।

तत्र सामर्थ्यलभ्यं यथा—"दर्शपूर्णमासयोरितिहायेडोर्बर्हिःप्रतिसमानयेते जुह्वामौपभृतम्" इति शास्त्रस्य जुह्वौपभृदाज्यसमानयनकालविधिरर्थः । तत्सामर्थ्याज्जौहवमाज्यमादिमप्रयाजत्रयार्थमौपभृतमाज्यार्थं बर्हिरादिप्रयाजद्वयार्थमिति व्यवस्था लभ्यते । एतच्छास्त्रार्थसामर्थ्यापरामर्शे हि—"यज्जुह्वां गृह्णाति प्रयाजेभ्यस्तत्, यदुपभृति प्रयाजानूयाजेभ्यस्तत्" इति जौहवाज्यस्यौपभृताज्यार्थस्य चाविशेषेण प्रयाजार्थत्वश्रवणादुभयमपि विकल्पेन सर्वप्रयाजार्थं भवेत् ।

वाक्यान्तरलभ्यं यथा–"तं द्विरात्रेण" इति शास्त्रस्य अग्नेर्द्विरात्राङ्गत्वविधिरर्थः । तेनाग्नेर्द्विरात्रेत्यौपदेशिकाङ्गत्वे सिद्धे औपदेशिकाङ्गत्वसिद्धिमुपजीव्य प्रकृताविव द्विरात्रेऽपि प्रवृत्तेन "श्येनचितं चिन्वीत स्वर्गकामः" (तै० सं० ५.४.११.१) इत्यादिवाक्येन तत्र श्येनाकृत्यादिकाम्यगुणप्राप्तिर्लभ्यते । एवमन्यलभ्ययोरन्ययोरुदाहृतशास्त्रद्वयाधीनसिद्धिकत्वेऽपि न तयोरिदं

सिद्धयति तद्धि तस्य प्रमाणमुच्यते । वेदान्तवाक्यानां कथं वा ब्रह्मसाधकत्वमित्याकाङ्क्षायां चतुर्थाधिकरणमवतार्यते—

॥ सू० ॥ तत्तु समन्वयात् ॥ ४ ॥

शास्त्रद्वयं प्रमाणमिति व्यवच्छेदार्थमव्यभिचारेणेति विशेषणं तदर्थसामर्थ्यादिरूपप्रमाणान्तरावतारानपेक्षत्वार्थकमुपात्तम् ।

एवं शास्त्रप्रामाण्यप्रयोजकं प्रदर्श्य तदभावाद् वेदान्तानां ब्रह्मणि प्रामाण्यं न सम्भवतीत्याक्षेपं दर्शयति—वेदान्तवाक्यानामिति । करिष्यमाणाक्षेपाभिप्रायः कथंशब्दः । यदि वेदान्तैः साक्षादेव ब्रह्म सिद्धयतीति मतम्, तन्न सङ्गच्छते, वक्ष्यमाणरीत्या सर्वशब्दानां कार्यपरत्वात् । अथ मतं कार्यपरत्ववादे तेषां रात्रिसत्रन्यायप्राप्तब्रह्मानन्दानुभवतत्सादृश्यप्राप्तिफलकोपासनाविधिरूपकार्यपरत्वं वक्तव्यमिति तत्सामर्थ्यान्निरतिशयानन्दशालिसत्यसङ्कल्पत्वादिगुणकं ब्रह्म सिद्धयति, तदभावे तदानन्दानुभवतत्सादृश्यप्राप्त्यसम्भवादिति । तदपि न युक्तम्, तावता वेदान्तानां ब्रह्मणि प्रामाण्यानिर्वाहात् । ब्रह्मणो वेदान्ताधीनसिद्धिकत्वेऽपि तस्य तैरव्यभिचारेण सिद्धयभावादित्याक्षेपणीयस्य वेदान्तानां ब्रह्मणि प्रामाण्यसमर्थनस्य द्वैविध्यसूचनार्थो वाकारः । एवं द्विविधप्रामाण्यसमर्थनप्रकाराक्षेपोपयोगितयैव शास्त्राप्रामाण्यप्रयोजकमुपन्यस्तम् ।

सू० ॥ तत्तु समन्वयात् ॥ ४ ॥

सूत्रे तदिति पदं प्रकृतब्रह्मपरामर्शिद्वितीयान्तम् । तुरवधारणार्थः । तस्य वेदान्ताः साधयन्तीत्यध्याहृतेन सम्बन्धः । ततश्च साधकत्वलक्षणविशेषसङ्गतस्यावधारणस्यायोगव्यवच्छेदरूपतापर्यवसानात् 'कुमुदं श्वेतमेव' इति वाक्ये विशेषणसङ्गतावधारणबलात् सर्वेषु कुमुदेषु श्वैत्यमिव सर्वेषु वेदान्तेषु ब्रह्मसाधकत्वं लक्ष्यते । न च नीलं सरोजं भवत्येवेत्यत्रेव क्रियासङ्गतत्वादवधारणस्यात्यन्तायोगव्यवच्छेदतापर्यवसानात् केषुचिदेव वेदान्तेषु ब्रह्मसाधकत्वं लभ्येतेति शङ्कनीयम्, पृथक्पदोपात्तविशेषणान्वयापादकक्रियासङ्गतावधारणस्यैवात्यन्तायोगव्यवच्छेदरूपत्वादिह क्रियाया एव विशेषणसमर्पकतयावधारणस्य विशेषणसङ्गतत्वेनायोगव्यवच्छेदरूपतौचित्यात् । सम्यगन्वयः समन्वयः, उपक्रमादिलिङ्गावगमिततात्पर्यसम्बन्धः । पञ्चमी हेत्वर्था । तथा च सर्वे वेदान्ता ब्रह्म साधयन्ति, उपक्रमादिलिङ्गावगमितब्रह्मतात्पर्यकत्वा-

तच्छब्देन प्रकृतं ब्रह्म परामृश्यते । तुशब्देन सर्वाणि वेदान्तवाक्यानि समाह्रियन्ते । समन्वयशब्देन तात्पर्येण संबन्ध उच्यते । तद् ब्रह्म वेदान्तवाक्यानि तात्पर्यलिङ्गसम्बन्धाद् बोधयन्तीति सूत्रार्थः । अस्य सर्वाणि वेदान्तवाक्यानि विषयः । वेदान्तवाक्यानां ब्रह्मबोधकत्वं युक्तं न वेति संशयः । सर्वत्र सम्बन्धग्रहणसापेक्षं शब्दस्यार्थावबोधकत्वम् । शब्दार्थयोः सम्बन्धज्ञानमन्तरेण हि पुरुषस्य शब्दार्थप्रत्ययो न भवति । सम्बन्धज्ञानं च वृद्धव्यवहारसापेक्षम् । व्यवहारश्च कार्यैक-गोचरः । तथा हि–'गामानय', 'गां बधान' इति वृद्ध-

---

दिति सूत्रार्थः । न च धूमोऽस्तीत्यादिवाक्यानां वह्न्यादितात्पर्यस्येव वेदान्तानां ब्रह्मणि तात्पर्यस्य तदुपजीविमानान्तरव्यवधानेन निर्वाहः, बाधकाभावेनौत्सर्गिकस्य साक्षात्साधकस्य सिद्धेः, उपक्रमादिलिङ्गानां साक्षाच्छब्दविषयेष्विव शब्दोपजीविमानान्तरेष्वसम्भवाच्च, ब्रह्मणो वेदान्ता-प्रतिपाद्यत्वे तत्साधनसमर्थस्य तदुपजीविमानान्तरस्यासम्भवाच्चेत्यभिप्रेत्य सूत्रं व्याचष्टे—तुशब्देनेति ।

एवं सूत्रार्थं प्रदर्श्य सूत्रार्थसूचितमधिकरणशरीरं दर्शयितुमुपक्रमते—अस्येति । यद्यपि पूर्वाधिकरणे जगत्कारणस्वरूपसाधकस्य वेदान्तभागस्य ब्रह्मणि प्रामाण्यं समर्थितमिति तत्प्रामाण्याक्षेपमात्रेणास्य पूर्वाधिकरणे-नाक्षेपिकी सङ्गतिर्लभ्यते, तथापि तदाक्षेपहेतुसाधारण्यात् सर्वेषां वेदान्तानां ब्रह्मणि प्रामाण्यमाक्षिप्तं भवतीत्यभिप्रेत्याह—सर्वाणि वेदान्तवाक्यानीति । व्युत्पत्तिग्रहस्य सिद्धार्थसाधारण्यकार्यविषयत्वाभ्यां संशयं दर्शयति—वेदान्त-वाक्यानामिति । व्युत्पत्तिग्रहस्य कार्यविषयत्वमुपपादयन् पूर्वपक्षयति—सर्वत्रेति । ननु शब्दादर्थप्रत्ययस्य शब्दार्थसम्बन्धरूपव्युत्पत्तिग्रहापेक्षानियमेऽपि व्युत्पत्तिग्रहस्य न कार्यविषयत्वनियमः, व्याख्यानवाक्यशेषप्रसिद्धपद-सामानाधिकरण्यव्याकरणकोशाप्तोपदेशैः सिद्धार्थेऽपि तद्ग्रहसम्भवादित्या-शङ्क्याह—सम्बन्धज्ञानं चेति । आद्यव्युत्पत्तिग्रहाधीनव्याख्यानादिभिः शब्दार्थसम्बन्धविशेषग्रहणमाद्यव्युत्पत्तिग्रह उत्तममध्यमवृद्धव्यवहारसापेक्षः, तद्व्यवहारः कार्यैकविषय इत्याद्यव्युत्पत्तिग्रहस्य कार्यविषयत्वात् तदधीनः सर्वोऽपि व्युत्पत्तिग्रहस्तद्विषयः सिद्ध्यतीत्यर्थः ।

वाक्यश्रवणसमनन्तरं प्रवर्तमानं प्रयोज्यवृद्धमवगम्य पार्श्वस्थो व्युत्पित्सुरेवमवधारयति सर्वथाऽयं कार्यावगतिसमनन्तरमेव प्रवर्तते। सा च कार्यावगतिरेतस्मादेव वाक्यात् समुत्पन्ना, अन्यथा कथमस्यैतद्वाक्यश्रवणसमनन्तरं प्रवृत्तिरिति। पुनर्गवानयनबन्धनदर्शनात् कार्यविशेषं निश्चिनोति। तदेवं कार्यार्थत्वाद्

उक्तमर्थमुपपादयितुमुपक्रमते—तथा हीति। ननु 'गामानय' इत्याद्युत्तमवृद्धवाक्यश्रवणसमनन्तरभाविन्यां प्रयोज्यवृद्धप्रवृत्तौ बालः स्वप्रवृत्ताविव कार्यताज्ञानजन्यत्वमनुमाय तत्र कार्यताज्ञानस्य उत्तमवृद्धवाक्यश्रवणसमनन्तरभावित्वेन तज्जन्यत्वं निश्चिनोतीति तद्वाक्यस्य कार्यसामान्यज्ञानजनने शक्तिः सिद्ध्यतु नाम, तथापि कथमानयनबन्धनादिकार्यविशेषे तत्तत्पदविशेषशक्तिसिद्धिरित्याकाङ्क्षायामाह—पुनरिति। 'गामानय', 'गां बधान' इत्यादिना वाक्यश्रवणानन्तरं तत्तत्कार्यविशेषे प्रवृत्तिमवलोक्य व्यावृत्तस्य पदस्य व्यावृत्तकार्यविशेषोऽर्थः, अनुवर्तमानस्य पदस्यानुवर्तमानकार्यविशेषोऽर्थ इति निश्चिनोतीत्येवमावापोद्वापाभ्यां तत्तत्पदविशेषस्य तत्तत्कार्यविशेषे शक्तिः सिद्ध्यतीत्यर्थः। एवं च व्युत्पत्तिग्रहस्य कार्यैकविषयत्वात् तदनुरोधेन कार्यपदरहितानामपि वेदान्तवाक्यानां तदध्याहारादिना कार्यार्थ एव प्रामाण्यस्य समर्थनीयत्वात् सिद्धरूपे ब्रह्मणि तेषां प्रामाण्यं न सम्भवतीत्याह—तदेवमिति।

स्यादेतत्। उक्तक्रमेण 'आनय, बधान' इत्यादिपदानामेव कार्ये शक्तिः सिद्धा, न तु घटादिपदानामपि। ततश्च यथैव 'गामानय', 'गां बधान' इत्यादिव्यवहारेषु क्रियापदानां तत्र तत्र कार्यविशेषे शक्तिः सिद्ध्यति, तथा 'घटमानय', 'पटमानय' इत्यादिव्यवहारेषु घटादिपदानामप्यावापोद्वापाभ्यां तत्र तत्र सिद्धार्थविशेषे शक्तिः सिद्ध्यतीत्याद्यव्युत्पत्तिग्रहस्य विरोधादग्रे सिद्धार्थपदमात्रसमभिव्याहारादपि वाक्यार्थप्रतीतिर्भवन्ती न निवारयितुं शक्यते। अतः कार्यपदरहितेषु वेदान्तेषु न तदध्याहारादिप्रसक्तिः।

नन्वाद्यव्युत्पत्तिग्रहस्य प्रयोज्यवृद्धप्रवृत्त्यनुमितकार्यविषयत्वात्तदनुरोधेन घटादिपदानामावापोद्वापाभ्यां भवन्नपि शक्तिग्रहस्तद्विषयः स्यात्, न च सर्वेषामपि क्रियाकारकपदानां कार्यमात्रे शक्तिरित्यभ्युपगमे पर्यायत्वापत्तिः, कार्यान्वितस्वार्थे शक्तिरित्यभ्युपगमे कार्यवाचिपदानां कार्यान्वितस्वार्था-

भावात्तदसम्भवः, सर्वेषामपि पदानां कार्ये शक्तिरित्येव नियमाभ्युपगमात्, तस्य नियमस्य कार्यवाचिपदानां तन्मात्रशक्त्या तदितरपदानां तदन्वितस्वस्वार्थशक्त्या च निर्वाहादिति चेत्, एवमपि कार्यवाचिपदरहितेषु वेदान्तेषु तदध्याहारादिकं न प्रसज्यते, कार्यान्वितस्वार्थवाचिनां तत्रत्यसिद्धार्थवाचिपदानां विशेषणीभूतकार्यसमर्पकतयैव तेषां कार्यविषयत्वनिर्वाहात् ।

ननु प्रयोज्यप्रवृत्तिहेतुकार्यताज्ञानजननसामर्थ्यं शब्दस्याद्यव्युत्पत्तिग्रहकालेऽवधारितम्, तद्यतो भवति तदपेक्षा सर्वेष्वपि शब्देष्ववश्यंभाविनी । न च सिद्धार्थविशेषणकार्यसामान्यज्ञानेन क्वचित् प्रवृत्तिर्भवति, किन्तु लिङादियुक्तक्रियापदात् कार्यविशेषज्ञानेनैव । अतस्तदर्थं क्रियापदाध्याहारादिकमपेक्षितमिति चेत्, तर्हि सर्वेषां पदानां कार्यजनकशक्तिनियमो न सिद्ध्येत् । प्रवर्तकज्ञानजनकत्वनिर्वाहाय हि तत्कल्पनम् । तन्निर्वाहश्चेत् सिद्धार्थवाचिशब्दानां तद्विशेषणकार्यशक्त्या न सम्भवति, किन्तु लिङादियुक्तक्रियापदशक्त्यैव, तदा किं तत्कल्पनया । किञ्चाद्यव्युत्पत्तिग्रहसमये 'गामानय' इति वृद्धवाक्यस्य ततः प्राक् सामान्यतोऽप्यर्थज्ञानजनकत्वेनाज्ञातस्य जृम्भितहसितादिसाधारण्येन तदीयमुखशब्दमात्रतया श्रुतस्य तदनन्तरप्रभवप्रयोज्यप्रवृत्तिहेतुज्ञानजनकत्वमनाकलितपदविभागस्यैवावधार्यत इति तस्मिन् समये 'गामानय' इत्यस्य समुदायस्यैव गवानयनकार्यताज्ञानजननसामर्थ्यं गृह्यते, न तु तदनन्तर्गतपदानां स्वार्थमात्रेऽपि शक्तिः, न तरां कार्यान्वितस्वार्थे, किन्त्वावापोद्वापयुक्तप्रयोगान्तरेषु क्रियाकारकपदानां प्रत्येकशक्तिर्गृह्यते । तथा च कार्यवाचिपदसमभिव्याहारादेव कार्यताज्ञानजनकत्वं सम्भवतीत्यन्यलभ्यत्वप्रतिसन्धानान्न गवादिपदानां कार्यान्वितस्वार्थशक्तिकल्पनाप्रसक्तिः, अनुपपत्त्यभावात् ।

नन्वाद्यव्यवहारदर्शनसमये यद्यप्यनाकलितपदविभागस्य 'गामानय' इति समुदायरूपस्य शब्दस्य कार्यताज्ञानजननसामर्थ्यं गृह्यते, तथापि तद्गामानयेति शब्दविशेषत्वोपाधिना न गृह्यते, किन्तु शब्दत्वसामान्योपाधिना । तथा च सत्यावापोद्वापयुक्तप्रयोगान्तरेषु गवादिपदरूपशब्दत्वसामान्यालिङ्गितावयवशक्तिग्रहोऽपि कार्यत्वापरित्यागेन कार्यान्विते तत्तदर्थे पर्यवस्येदिति चेत्, किमाद्यव्यवहारदर्शनसमये शब्दसामान्यस्य प्रवृत्त्युपयोगिकार्यताज्ञाने सामर्थ्यं गृहीतम्, उत कार्यताज्ञानमात्रे ? आद्ये गवादिपदानां कार्यसामान्यशक्त्या न प्रवृत्त्युपयोगिकार्यताज्ञानलाभ इति व्यर्थं तेषां कार्यान्वितस्वार्थे शक्तिकल्पनम् । द्वितीये कार्यपदरहितेषु वाक्येषु सिद्धार्थ-

व्युत्पत्तेर्न सिद्धे ब्रह्मणि शब्दस्य प्रामाण्यम् । किञ्च, कार्यविशेषत्वाज्जगतः कर्तृविशेषस्य ब्रह्मणोऽनुमानादपि सिद्धेः

विशेषणकार्यसामान्योपस्थित्यैवाद्यव्यवहारानुरोधसिद्धेस्तेषु प्रवर्तकज्ञानजननसमर्थक्रियापदाध्याहारो न सिद्ध्येत् । अथात्र प्रथमपक्ष एवाश्रीयते, तस्मिन् पक्षे गवादिपदानां कार्यान्वितस्वार्थे शक्तिर्न सिद्ध्यतीति चेन्मा सैत्सीत्, क्रियापदरहितेषु वाक्येष्वाद्यव्यवहारानुरोधेन प्रवर्तकज्ञानजननसमर्थकार्यवाचिपदाध्याहारः सिद्ध्येदेव । तावदेव वेदान्तानां सिद्धरूपे ब्रह्मणि प्रामाण्यं न सम्भवतीत्याक्षेप उपयुज्यत इति चेदियमपि दुराशैव । 'गामानय' इति वाक्यश्रवणानन्तरं प्रयोज्यस्य गवानयने प्रवृत्त्या हि गवानयनकार्यताज्ञानमनुमितं बालेन न कार्यताज्ञानमात्रम्, प्रवृत्तिविशेषे तस्यानुपयोगात्, आवापोद्वापयुक्तप्रयोगान्तरेषु गवादिपदशक्तिग्रहेऽनुपयोगाच्च । गवानयनकार्यताज्ञाने च 'गामानय' इति शब्दविशेषस्यैव कारणत्वग्रहणं स्यात्, न शब्दसामान्यस्य । न च निरर्थकवर्णसमुदायसाधारणस्य शब्दत्वसामान्यस्य कार्यताज्ञानमात्रेऽपि कारणत्वग्रहो युक्तः, न वा तद्व्यावृत्तस्य पदसमुदायरूपवाक्यत्वस्याद्यव्यवहारसमयेऽवधारणमस्ति ।

तस्माद् यद्यपि प्रवृत्तिसामान्यानुमितकार्यताज्ञानसामान्ये कार्यताज्ञानत्वपुरस्कारेणापि गामानयेतिशब्दस्य कारणत्वं गृह्येत, तथापि प्रत्यक्षेण कारणताग्रहे तत्सहकार्यन्वयव्यतिरेकपरिचायकतया कारणतावच्छेदकग्रहापेक्षावत्प्रमाणान्तरेण कारणताग्रहे तदपेक्षाया अभावात् कार्यताज्ञानत्वसामानाधिकरण्येन गामानयेति शब्दगतयत्किञ्चिद्धर्मसामानाधिकरण्येन च कार्यकारणभावग्रहो भवेत् । नह्यागमेन स्वर्गे स्वर्गत्वपुरस्कारेण ज्योतिष्टोमकार्यत्वग्रहस्तदवच्छिन्नकार्यत्वविषयः, दानादिजन्यस्वर्गे व्यभिचारेण स्वर्गत्वस्य ज्योतिष्टोमकार्यतानवच्छेदकत्वात्, किन्तु तत्समानाधिकरणकार्यत्वविषयः । एवं चावापोद्वापयुक्तप्रयोगान्तरेषु 'आनय, बधान' इत्यादिपदानां कार्ये शक्तिग्रहे सति शब्दानां कार्यताज्ञानजनकत्वस्य गवादिज्ञानजनकत्वस्येव तद्वाचकपदसमभिव्याहारप्रयुक्तत्वावसायात् केवलसिद्धार्थपरवाक्यप्रयोगदर्शनाच्च कार्यवाचिपदसमभिव्याहृतवाक्यत्वं प्रवृत्त्युपयोगिकार्यताज्ञानजनकतावच्छेदकमवधार्यत इति न कथञ्चिदपि सिद्धार्थपरवाक्येषु कार्यवाचिपदाध्याहारप्रसक्तिः । तस्माद् व्युत्पत्तिग्रहस्य कार्यविषयत्वासिद्धेर्वेदान्तानां ब्रह्मणि प्रामाण्यस्य न काचित् क्षतिरित्यस्वरसादाह—किञ्चेति ।

कथमस्मिन्नप्राप्तविषयाणां वेदान्तवाक्यानां प्रामाण्यम् ।

ननु पूर्वाधिकरणे जगत्कर्तुरनुमानतः प्राप्तिर्निराकृता । सत्यम् । अयुक्तं तन्निराकरणम्, "अन्नेन सोम्य शुङ्गेन" (छा० उ० ६.८.४) इत्यादिवेदान्तवाक्यप्रदर्शितानुमानप्रामाण्यस्य वेदान्तप्रामाण्यवादिभिरप्यवश्यं समर्थनीयत्वात् । न च यथाकथञ्चिद् युक्त्युपन्यासात्मकं तद्वाक्यमिति वाच्यम्, शास्त्रदर्शितयुक्तेराभासत्वे शास्त्रस्यैवाप्रामाण्यप्रसङ्गात्, ईश्वरमनङ्गीकुर्वन्तं सांख्यं प्रति—"रचनानुपपत्तेश्च नानुमानम्" (ब्र० २.२.१) इत्यधिकरणे तस्मिन्ननुमाने प्रमाणमुपन्यस्यतः सूत्रकारस्यानाप्तत्वप्रसङ्गाच्च । न चेश्वरानुमानस्य सद्युक्तित्वेऽपि वेदान्ततात्पर्यग्राहकषड्विधलिङ्गान्तर्गतत्वादीश्वरस्य तद्विषयत्वेन वेदान्तानां तत्र प्रामाण्यं न हीयत इति शङ्कनीयम्, येन केनाप्यन्येन प्राप्तेऽर्थे शास्त्रप्रामाण्यायोगात् । अन्यथा "अग्निर्हिमस्य भेषजम्" (तै० सं० ७.४.१८.२) इत्यादिश्रुत्यर्थविषयं प्रत्यक्षं तत्तात्पर्यग्राहकमिति प्रत्यक्षविषयेऽप्यर्थे शास्त्रप्रामाण्यप्रसङ्गादिति पूर्वपक्षी मन्यते ।

ननु तर्कमार्गेणासद्युक्तेरपि युक्तित्वेनोपन्यासः श्रुतितात्पर्यनिर्णयार्थमुपपत्तिरूपलिङ्गं भवत्येव । यथा शास्त्रान्तरदृष्ट्या दोषस्य—"ब्रह्मवादिनो वदन्ति स त्वै यजेत यो यज्ञस्यार्त्या वसीयान् स्यात्" इति । "आपः स्वभावतो मेध्याः किं पुनर्वह्निसंयुताः । तस्मात् प्रयत्नतः कुर्यात् स्नानमुष्णेन वारिणा ॥" इत्याद्यर्थवादेषु गुणत्वेन कीर्तनं विधेयप्रशंसार्थं गुणकथनं भवति । दृश्यते चाप्यन्यत्राप्ययुक्तेर्युक्तित्वेनोपन्यासः । "तद्यद्यस्मिन् सर्पिर्वोदकं वा सिञ्चति वर्त्मन्येव गच्छति" (छा० उ० ४.१५.१) इति । अत्र हि—"य एषोऽक्षिण पुरुषो दृश्यते" (छा० उ० ४.१५.१) इत्यक्षिण परमेश्वरस्य स्थितिमुक्त्वा अक्ष्णः परमेश्वरस्थानत्वादेव तस्यापि परमेश्वरवन्निर्लेपत्वं दृश्यत इति परमेश्वरस्थानत्वे निर्लेपत्वं युक्तितयोच्यते । न च काचपटलादिभिः सलेपेऽक्षिण सर्पिरुदकानवस्थानमात्रेण सर्वथा निर्लेपत्वं सिद्ध्यति, किन्त्वयुक्तेर्युक्तितयोपन्यासादक्षिण परमेश्वरावस्थानप्रतिपादने श्रुतेस्तात्पर्यातिशयमात्रं तेन सिद्ध्यति । एवम्—"तस्मात्त्वेवोद्गातैतस्य हि गाता तद्य इमे वीणायां गायन्त्येतं ते गायन्ति तस्मात्ते धनसनयः" इत्यादीन्यत्र भूयांस्युदाहरणानि । एवं श्रुतावयुक्तेर्युक्तित्वोपन्यासदर्शनेन श्रुतिशैलीविदो महर्षयोऽपि तत्र तत्र तात्पर्याविष्करणार्थमयुक्तिमेव युक्तित्वेनोपन्यस्यन्ति । यथा तावदापस्तम्बः स्वसूत्रे—"अथाप्यस्य प्रजातिममृतमाम्नाय

अथवा विधिपराण्येव वेदान्तवाक्यानि न ब्रह्मपराणि । उभयपरत्वे वाक्यभेदः स्यात् । अतो वेदान्तवाक्यानां न ब्रह्मबोधकत्वं युक्तमिति पूर्वः पक्षः । युक्तमिति सिद्धान्तः,

आह प्रजामनुप्रजायसे तदु ते मर्त्यामृतम्'' (आप० ध० २.२४.१) इति पुत्रोत्पादनविधिशेषं पितुः पुत्रपौत्रादिसन्तानरूपेणानुवृत्तिरेव नित्यत्वमित्यर्थवादं पितुः पुत्रादिभिरभेदरूपमसिद्धहेतुमवलम्ब्य प्रवृत्तं हेतूपपादनेन परिष्कर्तुमयुक्तिमेव युक्तित्वेनोदाजहार—''अथापि स एवायं निरूढः पृथक् प्रत्यक्षेणोपलभ्यते दृश्यते चापि सारूप्यं देहत्वमेवान्यत्'' (आप० ध० २.२४.२) इति ।

इयांस्तु विशेषः—उदाहृता युक्तयः सर्वथा युक्त्याभासा एव । ''सन्मूलमन्विच्छ'' इति प्रकृतयुक्तिस्तु केवलतर्कमार्गेण दोषप्रसक्तिमत्यपि स्वानुग्राह्यप्रमाणभूतवेदान्तशरणत्वाद् वनप्रविष्टसिंहन्यायेन बलवती न तद्दोषस्पृष्टा भवति । अनुमानेन जगत्कर्तृवत् तदनेकत्वादयोऽपि सिद्ध्येयुरिति हि दोषास्ते श्रुतिविरोधान्न प्रवर्तयिष्यन्ते । एवं च श्रुत्यनुग्राहकस्यानुमानस्य निर्दोषत्वात् तद्विषयं सांख्याधिकरणे जगत्कर्तर्यनुमानप्रदर्शनम् । अतः स्वतन्त्रानुमानस्य प्रामाण्याभावान्न तत्प्राप्तविषयतया वेदान्तानामप्रामाण्यं प्रसज्यते । न च कर्तृत्वानुकूलज्ञानचिकीर्षादिवत् सर्वेषां परमेश्वरगुणानामनुमानतः प्राप्तिरपि सम्भाव्यते, येन तत्प्राप्तविषयतया सर्वेषां वेदान्तानां तस्मिन्नप्रामाण्यं प्रसज्यत इत्यस्वरसादाह—अथवेति । सर्वाणि वेदान्तवाक्यान्युपासनाविधिपराणि, न तेषां मध्ये किञ्चिदपि स्वरूपपरं वाक्यमस्ति । येषु वेदान्तवाक्येषु ब्रह्मगुणकीर्तनमात्रमस्ति नोपासनाविधिश्रवणम्, तेषामपि योग्योपासनाविधित्वस्य सम्भृत्यधिकरणे (ब्र० ३.२.२३) वक्ष्यमाणत्वात् । अतः कस्यापि वेदान्तवाक्यस्य ब्रह्मणि तात्पर्यं न सम्भवति, उभयपरत्वे वाक्यभेदप्रसङ्गादित्यर्थः ।

ननु परस्परापेक्षस्वतन्त्रार्थद्वयपरत्व एव वाक्यभेदः, इह तूपासनाविधीनामुपास्यत्वेन फलत्वेन चास्ति ब्रह्मस्वरूपसिद्ध्यपेक्षा । अतः स्तावकतया यागविधिपरेणाप्यर्थवादेन तदपेक्षितस्वर्गस्येवोपासनाविध्येकवाक्यतापन्नेनाऽपि ब्रह्मस्वरूपसमर्पकावान्तरवाक्यजातेन तत्सिद्धिः स्यादित्याशङ्क्याह—अत इति । न तावदुपासनाविधीनामुपास्यत्वेन ब्रह्मस्वरूपसिद्ध्यपेक्षा, आरोपितविषयेणाप्युपासनोपपत्तेः । नापि फलत्वेन,

वेदान्तवाक्यानां तात्पर्यलिङ्गसमन्वयेन ब्रह्मबोधनसमर्थत्वात् । यदुक्तं 'कार्यार्थत्वाद् व्युत्पत्तेर्न सिद्धे ब्रह्मणि शब्दस्य प्रामाण्यम्' इति, तदसत्, 'पुत्रस्ते जातः' इत्यादिषु सिद्धार्थेष्वपि

ततो निरतिशयानन्दरूपमात्रेण तत्सिद्धावपि स्वरूपतो गुणतो विभूतितश्च परिच्छेदराहित्यात्मना ब्रह्मत्वेन ब्रह्मलक्षणत्वाभिमत-जगज्जन्मादिकारणत्वादिरूपेण च फलत्वाप्रयोजकेन तत्सिद्ध्यसम्भवात् । एतेन यावद्गुणविभूत्यादिकं मुक्तानामुपासनाफलत्वेनोपासनाविध्यन्वितै-र्वाक्यैः सिद्ध्यति, तावता तेन युक्तं ब्रह्म "निरञ्जनः परमं साम्यमुपैति" (मुण्डको० ३.१.३) इति श्रुत्यन्यथानुपपत्त्या सिद्ध्यति, तथाभूतब्रह्मभावे प्रजापतिविद्यायां मुक्तिफलत्वेनोक्तस्य सत्यसङ्कल्पत्वादेर्ब्रह्मसादृश्यरूपत्वानुप-पत्तेरित्यपि शङ्का निरस्ता, एवमपि मुक्तेष्वसम्भावितेन जगद्व्यापारादिना रूपेण तत्सिद्ध्युपायालाभात्, यत्किञ्चिच्छ्रुतिमूलार्थापत्तिसिद्धेऽर्थे कस्यापि श्रुतिवाक्यस्य प्रामाण्यासम्भवेन मुक्तगतसादृश्यप्रतियोगितोपयुक्तरूप-विशिष्टेऽपि ब्रह्मणि वेदान्तानां प्रामाण्यासिद्धेश्च । न च फलभूतसादृश्य-प्रतियोगित्वानुपयुक्ते रूपजाते ध्यानविध्यनपेक्षितत्वेनावान्तरतात्पर्याना-स्पदेऽपि देवताधिकरणन्यायेन मानान्तरप्राप्तिविरोधराहित्याद् वेदान्ता भवेयुरिति वाच्यम्, "ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम्" (महाना० १२.१),"न सन्न चासच्छिव एव केवलः" (श्वे० उ० ४.१८) इत्यादिवाक्यानां "नारायणः परं ब्रह्म" (महाना० ११.४), "एको ह वै नारायण आसीत्" (महो० १.१) इत्यादिवाक्यान्तरविरोधसत्त्वेन विरोधराहित्यासिद्धेः, द्विविधवाक्यविरोधे सति तद्बलाबलावधारणस्य तात्पर्यलिङ्गाधीनत्वेन तात्पर्यराहित्ये तदवधारणासम्भवादिति भावः ।

सिद्धान्तप्रतिज्ञायां सौत्रहेतुं प्रदर्श्य प्रथमपूर्वपक्षमाद्यव्युत्पत्तिग्रहस्य कार्यवाचिपदयुक्तकार्यश्रवणाधीनत्वनियमासिद्ध्या दूषयति—यदुक्तमित्या-दिना। पुत्र इति। दृष्टचैत्रपुत्रजन्मा बालस्तथाभूतेन वार्ताहारेण सह चैत्र-समीपं गतः 'चैत्र पुत्रस्ते जातः' इति वाक्यमाकर्णितवतश्चैत्रस्य मुख-विकासेन हर्षमनुमाय हर्षकारणं पुत्रजन्मज्ञानं कल्पयित्वा तज्जननसामर्थ्यं वाक्यस्य कल्पयतीत्येवं सिद्धार्थेऽपि प्रथमव्युत्पत्तिग्रहो दृश्यते। प्रियान्तर-ज्ञानस्यापि हर्षकारणत्वसम्भवात् पुत्रजन्मज्ञानमेव तत्कारणमिति निश्चेतु-मशक्यमिति चेन्न, स्वोपलब्धपुत्रजन्मन इव प्रियान्तरस्यानुपस्थितत्वात्,

सुखप्रसवसुलग्नजन्मादेः प्रियान्तरस्योपस्थितिसम्भवेऽपि तस्य पुत्रजन्मघटितशरीरतया लाघवेन पुत्रजन्मज्ञानस्यैव हर्षकारणत्वेन कल्पनौचित्यात्। तथापि हर्षमात्रं व्यभिचारि पुत्रजन्मज्ञानानुमितौ न लिङ्गमिति चेन्न, अनुपस्थितस्य गुरुशरीरस्य चात्र मुखविकासानुमितेश्च हर्षे व्यभिचारकारणत्वकल्पनायोगात्, प्रियान्तरज्ञानाजन्यत्वनिश्चयसम्भवेन तद्विशेषितस्य हर्षस्याव्यभिचारित्वात्, लिङ्गाभासजन्यज्ञानस्यापि विषयाबाधेन प्रमात्वसम्भवाच्च। सूत्रसञ्चाराधिष्ठितदारुपुत्रकस्य 'घटमानय' इति सूत्रधारवाक्यप्रयोगानन्तरं घटानयनक्रियादर्शने सति या क्रिया कृतिजन्या सा कृतिज्ञानसाध्या तज्ज्ञानं वाक्यजन्यमित्यनुमितिप्रवाहस्य भ्रमत्वेऽपि तद्धेतुकशक्तिग्रहस्य विषयाबाधेन प्रमात्वदर्शनादिति भावः।

स्यादेतत्। यथा कार्यव्युत्पत्तिपक्षे बालस्य स्तन्यपानादिप्रवृत्तौ कार्यताज्ञानं कारणमवगच्छन् प्रयोज्यप्रवृत्त्या तस्य कार्यताज्ञानं कल्पयति, तथा पुत्रजन्मज्ञानं हर्षकारणमिति जातः शिशुश्चैत्रस्य पुत्र इत्यपि प्रागवगच्छन् चैत्रस्य हर्षेण पुत्रजन्मज्ञानं कल्पयति, उत यथा प्रयोज्यप्रवृत्त्यनुमितकार्यताज्ञाने 'गामानय' इति वृद्धवाक्यस्य कारणत्वं प्रागनवगच्छन्नपि तत्कारणत्वं कल्पयति, एवं पूर्वं तथानुपगच्छन्नपि मुखविकासानुमिते हर्षे पुत्रजन्मज्ञानस्य कारणत्वं कल्पयति ? नाद्यः, स्तनन्धयस्य स्तनपानादिषु हर्षकारणत्वावगतिसम्भवेऽपि पुत्रजन्महर्षकारणमिदानीं जातः शिशुश्चैत्रस्य पुत्र इति कस्यचिदुपदेशमन्तरेण स्वयमेव तथावगतेरसम्भवात्, उपदेशेन तथावगतिसमर्थने 'पुत्रस्ते जातः' इत्यत्र व्युत्पत्तिग्रहस्य प्राथमिकत्वासिद्धेः। न द्वितीयः, कार्यताज्ञाने गामानयेत्युक्तमवृद्धवाक्यस्येव हर्षे पुत्रजन्मज्ञानस्यान्वयव्यतिरेकवत्त्वानुपलम्भात्, बालगतपुत्रजन्मज्ञानस्य चैत्रहर्षाकारणत्वात्, चैत्रपुत्रजन्मज्ञानस्य प्रागक्लृप्तत्वात्। न च बालः स्वस्य मनस्यनुवर्तमानमेव शिशुजन्मज्ञानं चैत्रेऽपि हर्षकारणत्वेन कल्पयतीति वाच्यम्, शिशुजन्मज्ञानचैत्रहर्षानुमानयोर्मध्ये बालस्य वस्त्वन्तरविषयज्ञानानामपि सत्त्वेन तस्यैव तत्कारणत्वेन कल्पने विशेषहेत्वभावात्, चैत्रे क्लृप्तस्य 'पुत्रस्ते जातः' इति वर्णावलिविषयज्ञानस्य वार्ताहारदर्शनस्य च हर्षकारणत्वसम्भवे तत्कारणत्वेन ज्ञानान्तरकल्पनानवकाशाच्च। बालः स्वस्य ताभ्यां हर्षो न जात इति चैत्रे हि तयोस्तत्कारणत्वं न कल्पयतीति चेत्, तर्हि बालस्य शिशुजन्मज्ञानेनापि हर्षो न जात इति तदपि तत्कारणत्वेन न कल्पयेत्। शिशुजन्मज्ञाने चैत्रस्य हर्षहेतुसम्बन्धविशेषकल्पने क्लृप्तयो-

वाक्येषु सम्बन्धग्रहणदर्शनात् । वृद्धव्यवहारेऽपि व्युत्पित्सुः स्वस्य प्रवृत्तिहेतुभूतायाः कार्यावगतेः पदार्थज्ञानपूर्वकत्वाव-

---

स्तयोरेव तत्कल्प्यताम्, 'धर्मिकल्पनातो वरं धर्मकल्पना' इति न्यायात् ।

न च शिशुपदाङ्कितं पटं गृहीत्वागच्छन् वार्ताहारस्तज्जननज्ञापनाय गच्छतीत्यवगमात् शिशुजन्मज्ञानं भविष्यत्त्वेन प्रागेव क्लृप्तमिति वाच्यम्, शिशुपदाङ्कितपटनयनं शिशुजन्मज्ञापनार्थमिति प्राचीनमाप्तोपदेशमन्तरेणावगन्तुमशक्यतया प्राचीनतदुपदेशापेक्षावश्यम्भावेन 'पुत्रस्ते जातः' इत्यत्र व्युत्पत्तिग्रहस्य प्राथमिकत्वासिद्धेः । तस्मादाद्यव्युत्पत्तिग्रहस्य वृद्धव्यवहारैकायत्तत्वात् तदपेक्षितप्रवृत्तिकैरुपदेशैः पुत्रजन्म हर्षकारणमिदानीं जातः शिशुश्चैत्रस्य पुत्रः, तत्पदाङ्कितपटनयनं तज्जन्मज्ञापनार्थमित्यवगच्छन्नेव 'पुत्रस्ते जातः' इति वाक्यस्य स्वानभ्यस्तभाषान्तररूपस्य पुत्रजन्मज्ञाने सामर्थ्यं कल्पयति, न तु प्राचीनैरुपदेशैस्तावदवगन्तुमसमर्थोऽत्यन्तबाल इति कार्यविषयाद्यव्युत्पत्त्यनुरोधात् । तत्रापि पुत्रजन्मनिमित्तस्नानाभ्युदयजातकर्मादिकार्यतावाचिपदान्तराध्याहारो युक्तः, तद्वाक्यश्रवणसमनन्तरभाविस्नानादिप्रवृत्तिसंवादाच्चेति चेत्, अत्राप्युक्तमेवोत्तरं लिङ्गाभासजन्यस्यापि ज्ञानस्य विषयाबाधेन प्रमात्वं सम्भवतीति । तथा हि—धर्मिकल्पनागौरवमनालोच्यैव कश्चिद् बालो वार्ताहारदर्शनतद्धस्तपदाङ्कितपटालोकनतदीयवर्णावलीश्रवणेभ्योऽन्यदेव किञ्चिज्ज्ञानं कारणमिति मन्यमानस्तदन्विच्छन् दैवात् स्वदृष्टशिशुजन्मज्ञानमेव तत्कारणं कल्पयित्वा वाक्यस्य तज्जननसामर्थ्यं कल्पयेत् । एवं कल्पनायां च काकतालीयसंवादेन ततः सिद्धार्थे शब्दसामर्थ्यकल्पनारूपस्य ज्ञानस्य प्रमात्वमनिवार्यम् ।

ननु 'चैत्र पुत्रस्ते जातः' इति वाक्यस्य न विशिष्य चैत्रपुत्रजन्मज्ञानजनने सामर्थ्यम्, न च बालेन चैत्रस्य स्वदृष्टजन्मनः शिशोश्च प्रागनवगतजन्यजनकभावसम्बन्धेन चैत्रे विशिष्य तत्पुत्रत्वाकारेण तज्जन्यज्ञानं कल्पयितुं शक्यम्, येन वाक्येन तज्जननसामर्थ्यं कल्प्यत इति सा कल्पना प्रमा स्यात् । किन्तु बालेन चैत्रपुत्रस्य यद्धर्मप्रकारेण गृहीतस्य जन्म दृष्टम्, तद्धर्मावच्छिन्नतज्जन्यज्ञानमेव कल्पयितुं शक्यम् । तथाभूतज्ञानजनने शब्दसामर्थ्यकल्पना त्वप्रमैव स्यादिति चेन्न, प्रकारविशेषौदासीन्येन यस्य जन्म मया दृष्टं तज्जन्मज्ञानं चैत्रस्य हर्षकारणमासीदिति कल्पयित्वा वाक्ये तज्जननसामर्थ्यकल्पनायाः प्रमात्वसम्भवात् । यद्वा एतदस्वरसादाह—वृद्धेति ।

गमात् प्रयोज्यवृद्धस्य प्रयोजकवाक्यं पदार्थज्ञानमुत्पादयतीति निश्चिनोति । ततः सिद्धार्थेष्वपि शब्दस्याभिधाननिश्चयः ।

यथा प्रवृत्तिः कार्यावगतिपूर्विका, तथा कार्यावगतिरपि प्रवृत्तिविषयशुद्ध-पदार्थगोचरज्ञानपूर्विकेति नियमस्य दृष्टत्वात् प्रयोजनस्य प्रवृत्त्या कार्यावगतेरिव कार्यावगत्या तदन्वितशुद्धपदार्थज्ञानस्याप्यनुमितिरनिवार्या । ततश्च तत्रोत्तमवृद्धवाक्यादृते नान्यत् कारणमस्तीत्याद्यव्युत्पत्तिग्रहसमय एव शुद्धे गवादिपदार्थे शब्दसामर्थ्यग्रहणसिद्धिः । ननु प्रवृत्त्यनुमितकार्यताज्ञान एव शब्दस्य सामर्थ्यं कल्पयितुं शक्यम्, अर्थापत्तेः साक्षादुपपादकविषयत्वादिति चेत्, तर्ह्युक्तहेतुना प्रयोज्यचेष्टानुमितप्रवृत्तिजनन एव तस्य सामर्थ्यं कल्प्येत ।

ननु कार्यताज्ञानरूपक्लृप्तकारणाभावे प्रवृत्तिर्न सम्भवतीति प्रवृत्त्यनुमितकार्यताज्ञानजनने तस्य सामर्थ्यं कल्प्यमिति चेत्, तर्हि कार्यताज्ञानमपि शुद्धपदार्थगोचरज्ञानरूपक्लृप्तकारणाभावे न संभवतीति तस्य शुद्धपदार्थगोचरज्ञानजननसामर्थ्यकल्पनमपि भवन्न निवारयितुं शक्यम् । किञ्च, यदि न साक्षात्प्रवृत्तिजनकज्ञाने शब्दस्य सामर्थ्यं कल्पनीयम्, तर्हि ममेदं कार्यमिति ज्ञान एव तस्य सामर्थ्यं कल्प्येत, तस्यैव गामानयेति वाक्यजन्यमिदमंशरहितगवानयनकार्यतामात्रविषयज्ञानानन्तरभाविनः साक्षात् प्रवर्तकत्वात् । तस्माद् यद्यपि प्रथमं बालस्य कार्य एव व्युत्पत्तिग्रहो भवेत्, तथापि पश्चादावापोद्वापाभ्यां पदविशेषाणां शक्तिग्रहसमये कार्यस्य तद्वाचिपदलभ्यत्वाप्रतिसन्धानात् कार्यांशपरित्यागेन गवादिपदानां स्वस्वार्थमात्रे शक्तिनिष्कर्षो भवेत्, प्रथमप्रवृत्तस्यापि शब्दानां कार्ये व्युत्पत्तिरिति ज्ञानस्य कार्यमन्यलभ्यमिति प्रतिसन्धानाभावेन जातस्य तत्प्रतिसन्धानानन्तरं बाधोपपत्तेः । न चोपजीव्यबाधो दोषः, गामानयेति समुदायस्य गवानयनकार्यताज्ञाने सामर्थ्यग्रहणस्य पश्चादावापोद्वापकृतगवादिपदशक्तिग्रहोपजीव्यत्वेऽपि सर्वशब्दानां कार्यताज्ञाने सामर्थ्यमिति ग्रहणस्य तदनुपजीव्यत्वात्, यथाकथञ्चित् स्वरूपेण तस्य तदुपजीव्यत्वेऽपि तदनुपजीव्यस्य तत्प्रामाण्यस्य तेनोपमर्दनसम्भवाच्च । देहात्मभ्रमस्य रागादिदोषसम्पादनेन सकलकर्मानुष्ठानहेतोरदृष्टशरीराद्यार्जनद्वारा तत्त्वज्ञानोपजीव्यत्वेऽपि तत्त्वज्ञानेन तदनुपजीव्यस्य तत्प्रामाण्यस्योपमर्ददर्शनात् । एवं यदा प्रथमं सर्वशब्दानां कार्ये व्युत्पत्तिग्रहेऽपि पश्चादन्यलभ्यत्वप्रतिसन्धानेन कार्यांशपरित्यागात्

अथवा किमिह वृद्धव्यवहारेण, व्युत्पत्तेः प्रकारान्तरेणापि सिद्धत्वात् । तथा हि—बाला मात्रादिभिः शिशुपशुप्रभृती-

---

सिद्धार्थेऽपि शब्दानां व्युत्पत्तिसिद्धिः, तदा किमु वक्तव्यं प्रथममेव सिद्धार्थेऽपि व्युत्पत्तिग्रहे सतीत्याशयः ।

इत्थं द्विविधवक्तृश्रोतृव्यवहारपर्यालोचनया व्युत्पत्तिग्रहस्य सिद्धार्थ-विषयत्वमुपपादितम्, इदानीं मातापित्रादिकर्तृकशब्दार्थसम्बन्धव्युत्पादन-पर्यालोचनया तस्य तद्विषयत्वमुपपादयितुमुपक्रमते—अथवेति । अन्यार्थ-प्रवृत्ताद् वक्तृश्रोतृव्यवहाराद् व्युपित्सोर्व्युत्पत्तिग्रहणमानुषङ्गिकं जायते । आनुषङ्गिकतया भवत्फलं नियमेन नात्यन्तं यथावद् भवतीति ततः कदाचित् कश्चिच्छब्दार्थसम्बन्धं कार्यविषयं सिद्धार्थसाधारणं वा प्रतिपद्यमानो विपर्यस्यतीत्यपि वक्तुं शक्यम् । मातापित्रादिकर्तृकाद् व्युत्पादनादिपरम्परा-प्रसिद्धाद् व्युत्पत्तिग्रहणं तदर्थादेव जायते । ततो भवत्फलं कदापि न यथा-वद्भवति । ततो व्युत्पाद्यमानो विपर्यस्यतीति वक्तुमशक्यमित्यनन्यथासिद्धेन व्युत्पादनेन सिद्धार्थे व्युत्पत्तिः सुदृढा भवतीत्यभिप्रेत्य किमिह वृद्धव्यव-हारेणेति वृद्धव्यवहारेऽनादरणमाविष्कृतम् । मातापित्रादिकर्तृकव्युत्पादन-प्रकारं दर्शयति—तथा हीति । मातापित्रादयो हि बालान् शब्दार्थसम्बन्धं जिग्राहयिषवः शिशुपशुप्रभृतीनर्थानङ्गुल्यादिभिर्निर्दिश्य तत्तद्वाचकशब्दान् प्रयुञ्जते । ते बालास्तदर्थाभिमुखाङ्गुलिनिर्देशसहितैर्वाचकशब्दप्रयोगै-र्बहुशः शिक्षिताः शब्दार्थसम्बन्धं निश्चिन्वन्तीत्येवं प्रायः सिद्धार्थ एव व्युत्पत्तिग्रहः सर्वेषामनुभवसिद्ध इत्यर्थः ।

अत्रेदं विचार्यते—अङ्गुलिनिर्देशसहितवाचकशब्दप्रयोगदर्शनमात्रेण कथं बालोऽस्य शब्दस्यायमर्थ इति निश्चिनुयात् । नह्यर्थविशेषाभि-मुखाङ्गुलिनिर्देशसहितशब्दविशेषप्रयोगस्तयोर्वाच्यवाचकभावप्रत्ययार्थ इति बालस्य प्राग् व्युत्पत्तिग्रहोऽस्ति । न वा तथा नियमोऽस्ति, बहुजनसमाजे विशिष्य चैत्रमनवबुध्यमानं तमन्विच्छन्तं प्रति तदभिमुखाङ्गुलिनिर्देश-सहितचैत्रशब्दप्रयोगस्य वाच्यवाचकभावप्रत्यायनार्थत्वाभावात् । स्यादेतत् । तत्तदर्थानङ्गुल्या निर्दिश्य तत्तद्वाचकशब्देषु बहुशः प्रयुक्तेषु बालानां तत्तर्थाभिमुखाङ्गुलिनिर्देशशब्दविशेषप्रयोगसाहचर्यदर्शनजनितवासनाबाहु-ल्यात् तत्तच्छब्दश्रवणानन्तरं तत्तदर्थविषयस्वबुद्ध्युदयेन तत्र तत्रार्थे तस्य तस्य शब्दस्य वाचकत्वरूपसम्बन्धनिश्चयो भवेत्, सम्बन्धं विना शब्दार्थ-

बोधासम्भवात्, सम्बन्धान्तराभावाच्च। भाष्यमप्युक्तार्थपरम्। तदर्थं बहुशः शिक्षिता इत्यादिभाष्यमित्थं योजनीयम्—बहुशो यावदङ्गुलिनिर्देशशब्दप्रयोगसाहचर्यजनितवासनाभूयस्त्वात् शब्दश्रवणमात्रेणार्थं स्मर्तुं बालः क्षमो भवेत्, तावत्पर्यन्तमङ्गुलिनिर्देशसहितशब्दप्रयोगावर्तनेन शिक्षितास्तैस्तैः शब्दैरुत्पादिततत्तदर्थज्ञानाः सन्तस्तेषु तेष्वर्थेषु व्युत्पद्यन्ते। शब्दैरर्थबोधस्य सम्बन्धमूलत्वात् सम्बन्धान्तराभावाच्च अर्थेषु शब्दानां वाचकत्वमेव सम्बन्ध इति निश्चयं लभन्त इति। नैतद्युक्तम्। यदि तत्तदर्थविषयाङ्गुलिनिर्देशशब्दप्रयोगसाहचर्यरूपसम्बन्धान्तराधीनो बालस्य शब्दार्थप्रत्ययः, किमर्थं वाचकत्वरूपसम्बन्धान्तरकल्पना। नहि चैत्रमैत्रादिषु साहचर्यसम्बन्धादन्यतरदर्शनेनान्यतरस्मरणं जायमानं स्वोपपादकतया सम्बन्धान्तरकल्पनामपेक्षत इति।

अत्रायं भाष्यकारस्याभिप्रायः—दृश्यन्ते तावन्मात्रादिकृतार्थविशेषाभिमुखाङ्गुलिनिर्देशसहितशब्दविशेषप्रयोगभूयोदर्शनवन्तो बालास्तयोर्वाच्यवाचकभावं प्रतिपद्य शब्दश्रवणे तदर्थं स्मृत्वा तदनुसारेण चेष्टन्ते, अर्थदर्शने तद्वाचकशब्दं स्मृत्वा प्रयुञ्जते चेति। तेन तद्दर्शनादित्थमवधारणं जायते। शब्दार्थसम्बन्धानभिज्ञान् प्रत्यङ्गुलिनिर्देशादिचेष्टाविशेषसहितशब्दप्रयोगो वाच्यवाचकभावसम्बन्धप्रत्यायनार्थः। अत एव तेन बालाः प्रतिलब्धवाचकभावज्ञानास्तदनुकूलं व्यवहरन्तीत्येवमवधारणवन्त एव जन्मान्तरे शैशवं प्रतिपद्य मात्रादिभिर्व्युत्पाद्यन्त इति। तेषां पूर्वजन्मसंस्कारानुवृत्त्या मात्रादिकर्तृकार्यविशेषाभिमुखशब्दविशेषप्रयोगस्य शब्दार्थसम्बन्धप्रत्यायनार्थत्वस्मरणं भवति। ततो वाच्यवाचकभावरूपतत्सम्बन्धनिश्चयः। तदनन्तरमेव शब्दश्रवणादर्थप्रत्ययो न तु ततः पूर्वम्। जन्मान्तरसंस्काराणां स्तन्यपानप्रवृत्तेरन्यत्राप्यनेकत्रोपकारकत्वं देवताधिकरणे "हिंस्राहिंस्रे मृदुक्रूरे" इत्यादिवचनोदाहरणेन स्फुटीकरिष्यते। एवं जन्मान्तरसंस्कारबलमभिप्रेत्यैवार्थविषयचेष्टाविशेषसहितशब्दप्रयोगस्य संज्ञासंज्ञिभावप्रत्यायकत्वमुक्तं महाभाष्ये—"अगोज्ञाय कश्चिद् गां सक्थिनि कर्णे वा गृहीत्वोपदिशत्ययं गौरिति। न चास्मायाचष्टे गौरितीयमस्य संज्ञेति भवति चास्य सम्प्रत्ययः" इति।

एवं च भाष्यस्यायमर्थः—बहुशः शिक्षिताः शिक्षां वाच्यवाचकभावसम्बन्धज्ञानरूपविद्योपादानं पौनःपुन्येन प्रापितास्तेषु तेष्वर्थेषु व्युत्पद्यन्ते व्युत्पत्तिं शब्दानां वाचकत्वनिश्चयं दृढसंस्काराधानेन शब्दश्रवणे

नर्थानङ्गुल्यादिना निर्दिश्य तत्तच्छब्दांस्तेषु तेष्वर्थेषु प्रयुञ्जानै-र्बहुशः शिक्षितास्तेषु तेष्वर्थेषु व्युत्पद्यन्ते । काव्यनाटकान-भिज्ञाः पुरुषास्तदभिज्ञपुरुषसमीपमेत्य पदविच्छेदं कृत्वाऽस्य शब्दस्यायमर्थ इति सर्वशब्दानामर्थमवगच्छन्ति । अतः

सत्यर्थस्मरणस्यार्थदर्शने सति शब्दस्मरणस्य चोपकारकं लभन्ते । यथा बहुभिरुपदेशैः शास्त्रार्थज्ञानपौनःपुन्यं प्रापिताः शास्त्रार्थनिश्चिताः शास्त्रार्थ-निश्चयं दृढसंस्काराधानेन कालान्तरव्यवहारोपयोगिनं लभ्यन्त इति । एवं क्रियाकारकपदानां मात्रादिकृतव्युत्पादनप्रक्रिययाऽर्थनिश्चये सति बालाः परप्रयुक्तैर्वाक्यैर्वाक्यार्थमवगच्छन्ति । स्वयं च क्रमेण परप्रत्यायनार्थं वाक्यं प्रयुञ्जते । एवं चानया प्रक्रियया व्युत्पत्तिग्रहणे पदार्थप्रतिपत्तिपूर्विका वाक्यार्थप्रतिपत्तिः, न तु वृद्धव्यवहाराद् व्युत्पत्तिग्रहण इव वाक्यार्थप्रतिपत्ति-पूर्विका पदार्थप्रतिपत्तिः ।

अत्रेयं शङ्कोन्मिषति—अनया प्रक्रियया व्युत्पत्तिग्रहकाले शब्दानां पदार्थमात्रे सामर्थ्यग्रहणे सत्यन्वयांशे तेषां सामर्थ्यस्यागृहीतत्वाद्वाक्यान्तर्गत-सर्वपदशक्तिग्रहेऽपि पदार्थानां परस्परान्वयविषयिणी वाक्यार्थप्रति-पत्तिर्न स्यात् । वाक्यस्यान्वये सामर्थ्यग्रहणेऽपि तत्प्रतिपादकत्वेन पदान्यप्यगृहीतपदार्थसामर्थ्यान्येव पदार्थान् प्रतिपादयेयुरितीमामाशङ्का-मुदाहरणमुखेनापाकारोति—काव्येति । अयं भावः—कतिपयकाव्यश्लोक-पाठेन क्रियाकारकतद्विशेषणपदयोजनाप्रकाराभिज्ञाः कङ्कटिकमुञ्जकेशाद्य-प्रसिद्धपदप्रायाणां काव्यश्लोकानामर्थमजानानास्तदभिज्ञपुरुषोपदेशेन पदच्छे-दपूर्वकं पदार्थानवगच्छन्ति । ततः स्वयमेव वाक्यार्थमवगच्छन्ति । न तत्र तेषां काव्यश्लोकानां तदन्तर्गतपदार्थान्वयरूपे वाक्यार्थे सामर्थ्यग्रहणमस्ति । वृद्धव्यवहाराधीनकार्यान्वितव्युत्पत्तिग्रहणाभ्युपगमेऽप्यन्वयसामान्य एव सामर्थ्यग्रहणं लभ्यते, नान्वयविशेषे । वृद्धव्यवहारात् कार्यान्विते गवादि-पदानां शक्तिग्रहणेनान्वयसामान्ये शब्दसामर्थ्यग्रहणलाभे सत्याकाङ्क्षादि-सहकृताद् वाक्याद् विशेषो लभ्यत इति चेत्, एवं तर्हि शब्दानां पदार्थमात्रे सामर्थ्यग्रहणे सत्युक्तसहकारिविशिष्टाद्वाक्यात् तदन्तर्गतपदार्थान्वयो लभ्यत इत्येवास्तु, कृतं वृद्धव्यवहाराधीनेनान्वयसामान्ये शक्तिग्रहणेनेति ।

एवं सिद्धार्थे व्युत्पत्तिग्रहव्युत्पादनेन सिद्धं प्रथमपूर्वपक्षनिराकरणमुप-संहरति—अत इत्यादिना । द्वितीयपूर्वपक्षमनूद्य पूर्वाधिकरणोक्तजगत्कर्त्रनु-

सिद्धार्थेऽपि व्युत्पत्तिसम्भवात् तत्र शब्दस्य प्रामाण्यमस्ति । ततो वेदान्तवाक्यानां ब्रह्मणि प्रामाण्यम् । यदुक्तं 'जगतः कार्यविशेषत्वात् कर्तृविशेषस्य ब्रह्मणोऽनुमानादपि सिद्धिः' इति, तन्न सम्भवति, विचित्ररचनस्य रथप्रासादादेरनेककर्तृकत्वदर्शनादनुमानेनास्य जगत एककर्तृकत्वसाधनायोगात्, व्याप्तिबलात् कर्मवश्यत्वादीनां कर्तरि प्राप्तेश्च पूर्वमुक्तत्वात् । अतो नानुमानगम्यं ब्रह्म भवति । किञ्च, श्रुत्यानुगुण्यादनुमानमपि ब्रह्मणि प्रमाणं भवतु नाम । यत्र वाक्यानां तात्पर्यं तत्र हि तेषां प्रामाण्यं न प्रत्यक्षादीनामिव सर्वत्र ।

मानदूषणोद्घाटनेन निराकरोति—यदुक्तमित्यादिना । तर्हि पूर्वाधिकरण एव निराकृतस्य जगत्कर्त्रनुमानस्यात्रापि तेनैव दूषणे निराक्रियमाणस्य पुनरुत्थाने किं बीजमित्याकाङ्क्षायां सांख्याधिकरणपर्यालोचनया तदनुमानप्रामाण्यं सिद्धान्तेऽप्यवश्यमुपगन्तव्यमित्येतद्बीजमिति सूचयन्नेव तत्प्रामाण्याभ्युपगमस्तस्य वेदान्तानुगुण्यकृतो न स्वातन्त्र्यकृतः, वेदान्तानुगुण्यकृततत्प्रामाण्याभ्युपगमश्च न वेदान्तप्रामाण्यविघातक इत्यभिप्रेत्याह—किञ्चेति । अथोपासनाविधिपराणां वेदान्तानां ब्रह्मण्यपि तात्पर्ये वाक्यभेदप्रसङ्ग इति तृतीयपूर्वपक्षो निराकरणार्थमुद्भावनीयः । तदुद्भावनोपयोगितया तेषामुभयत्रापि तात्पर्यं व्यवस्थापयति—यत्र वाक्यानामित्यादिना तज्ज्ञानविधिपरा अपि ज्ञायन्त इत्यन्तेन ।

अत्रेयं शङ्का समुन्मिषति—नैवं पूर्वपक्ष उपपद्यते, वेदान्तानां वाक्यभेदप्रसङ्गेनोभयत्र तात्पर्यासम्भवेऽपि चक्षुषो वस्तुद्वयसन्निकर्षवन्मयूखवत्त्वेन तदुभयविषयप्रत्यक्षप्रमाजनकत्ववत् परामर्शस्य साध्यद्वयव्याप्यलिङ्गद्वयविषयत्वेन तदुभयानुमितिप्रमाजनकत्ववच्च वेदान्तवाक्यानां ब्रह्मतदुपासनाविधिशक्तपदद्वयवत्त्वेन तदुभयविषयशब्दप्रमाजनकत्वस्योपपन्नतया तेषां ब्रह्मण्यपि प्रामाण्यसम्भवात् । यदि तात्पर्याभावेऽप्युभयविषयप्रमाजनकत्वमात्रेण वाक्यभेदः स्यात्, तदा शब्दशक्तिप्रयुक्तस्योभयविषयप्रमाजनकत्वस्यानिवार्यत्वाद्वाक्यभेदो दोष एव न भवेत् । सम्भवति ह्येकवाक्यत्वे तस्य

वेदान्तवाक्यानां ब्रह्मणि तात्पर्यनिर्णायकानि कानि लिङ्गानीति चेत्, उपक्रमादीनि । तथा पठन्ति—"उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम् । अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये ॥" इति । तदिह उपक्रमादिभिर्लिङ्गैर्वेदान्त-

---

दोषतेति। तत्र यथा प्रत्यक्षादिप्रामाण्यं यावत्सन्निकृष्टादिविषयं न तथा शब्दप्रामाण्यं यावद्व्यक्तिगोचरविषयम् । किन्तु तात्पर्यनियन्त्रितं सत्तद्गोचरे व्यवस्थितम् । अत एव नानार्थशब्दप्रयोगे यत्र तात्पर्यं तत्रैव प्रमा जायते । श्लेषकाव्यादिष्वनेकत्र तात्पर्ये तावत्यर्थे प्रमा जायते। तथा चोपासनाविधिपराणां वेदान्तानां ब्रह्मणि तात्पर्याभावाभ्युपगमे तत्र प्रामाण्यं न प्रसज्यत इत्यवाक्यभेदोपपत्तौ वाक्यभेदावहमुभयत्र तात्पर्यं नाभ्युपगन्तव्यमिति परिहारप्रदर्शनेन पूर्वपक्षोपपादनार्थं सर्वत्रेत्यन्तम्। यद्यपि 'श्वेतो धावति' इत्यादिलौकिकवाक्यात् तात्पर्याविषयेऽपि तात्पर्यज्ञानस्याकारणत्वात् तात्पर्यभ्रमाद्वाक्यज्ञानं जायते, तज्ज्ञानं क्वचिद्विषयाबाधेन संवादेन च प्रमापि भवतीत्यनुभवसिद्धम्, तथापि लोके तात्पर्याधीनं प्रामाण्यमिति प्रायिकोऽर्थः। वेदे तु नियम एव। वेदवाक्यादनेकविधार्थप्रतीतावर्थान्तरे बाधकन्यायोपन्यासपुरस्सरं खलु क्वचिदर्थे तात्पर्यं सर्वत्र व्यवस्थाप्यते । तथा च वेदवाक्यान्न्यायपरामर्शदोषेण जातं ज्ञानं भ्रमरूपमेव पर्यवस्यति । मन्त्रेषु त्वनेकत्र विनियुक्तेषु विनियोजकप्रमाणावगतमनेकत्र तात्पर्यमस्तीति । तत्र क्वचिदप्यर्थे ज्ञानं भ्रमरूपं न भवति। मन्त्रप्रकाश्येषु द्रव्यदेवतादिषु यानि विशेषणानि बलवद्बाधकबलाद् यत्र न समवयन्ति, तत्र तेषामभिधानमदृष्टार्थमिति विशेषः।

एवमुद्भावनीयपूर्वपक्षसम्भवं प्रदर्श्य तदुद्भावनाय वेदान्तानां ब्रह्मणि तात्पर्यं तत्प्रमाणप्रश्नमुखेनोपपादयितुमुपक्रमते—वेदान्तवाक्यानामिति । ननूपक्रमादिभिस्तात्पर्यनिर्णयो नास्मिन्नधिकरणे क्रियमाणो दृश्यते, उपक्रमादिलिङ्गावगमिततात्पर्येणान्वयस्य सिद्धवद्धेतूकरणादित्याशङ्क्याह—तदिहेति। यस्मादस्मिन्नधिकरणे समन्वयस्य सिद्धवद्धेतूकरणं तत्प्रसाधनं विनानुपपन्नम्, तस्मादिह शास्त्रे ईक्षत्यधिकरणमारभ्य प्रत्यधिकरणं स्थालीपुलाकन्यायतः कस्यचिद्वाक्यस्योदाहरणे सर्वेषां वेदान्तानामुपक्रमादिलिङ्गैर्ब्रह्मणि तात्पर्यं निर्णीयत इत्यर्थः। प्रसङ्गादयमेव तात्पर्यनिर्णयः श्रवणं

वाक्यानां ब्रह्मणि तात्पर्यं निश्चीयते । य उपक्रमादिभिस्तात्पर्यनिर्णयस्तदेव वेदान्तवाक्यानां श्रवणमित्युच्यते । तथा हि उच्यते—"अज्ञानप्रभवं दुःखं ज्ञानं तस्य निवर्तकम् । सर्ववेदान्तवाक्यानां श्रवणं तत्प्रवर्तकम् ।। श्रवणं नाम वाक्यानां वैदिकानां परात्परे । उपक्रमादिभिर्लिङ्गैः शिवे तात्पर्यनिर्णयः ।।" इति । उपक्रमोपसंहारावेकं लिङ्गं वेदान्तशब्दानां ब्रह्मणि शिवे तात्पर्यनिर्णये । तत्र तात्पर्यं नाम तत्स्वरूपो-

---

नाम, यस्य रागतः प्राप्तिः प्राक् प्रसाधितेत्याह – य इति । तत्प्रवर्तकमिति यस्य ज्ञानस्य जनकमित्यर्थः । ननूपक्रमादयः सम्मतिश्लोके सप्त परिगणिताः, कथं षड्विधं तात्पर्यलिङ्गमिति प्रसिद्धिः ? तत्राह—उपक्रमेति । उपक्रमोपसंहारावेकरूपावेकं तात्पर्यलिङ्गम् ।एकार्थपर्यवसायिन्यनेकावान्तरवाक्यघटिते महावाक्ये तद्विषयौ प्रथमचरमावान्तरवाक्यभागावुपक्रमोपसंहारौ । तयोरेकेन प्रकारेण तत्प्रतिपादकत्वमैकरूप्यम् । यत्र नैवंविधमैकरूप्यं तत्रासञ्जातविरोधित्वेनोपक्रमो बलीयानुपसंहारादिति यथोपक्रममुपसंहारो नेतव्यः ।

किं तत् तात्पर्यं यस्योपक्रमादिभिर्निर्णयः कार्य इत्याकाङ्क्षायामाह—तात्पर्यमिति । परशब्द इष्टवाची महाभाष्ये, "विप्रतिषेधे परं कार्यम् (पा० १.४.२) इति सूत्रे तस्य तद्वाचित्वोक्तेः, "ततस्तदालोकनतत्पराणाम्" इत्यादिप्रयोगदर्शनाच्च । तदर्थरूपं वस्तु परमिष्टमस्येति तत्परं वाक्यम् । वाक्यस्येच्छाभावेऽपि तद्वक्तुरर्थविवक्षारूपेच्छा तदीयत्वेनोपचर्यते । यद्यपि वेदे स्वतन्त्रवक्तुरिच्छा न सम्भवति, तथापि कल्पादौ सकलवेदप्रवर्तकस्य शब्दब्रह्माधिष्ठातुः परमेश्वरस्य प्रत्येकमृग्वेदाद्यभिमानिनां देवताविशेषाणां वेदव्याख्यातॄणां मीमांसकयाज्ञिकानां च तत्तदर्थविवक्षारूपेच्छा वेदेऽपि प्रवाहानादिन्यायसम्प्रदायसिद्धार्थविषयिणी सम्भवत्येव । यथोक्तं ग्रहैकत्वाधिकरणवार्त्तिके—"शब्दब्रह्मेति यच्चेदं शास्त्रं वेदाख्यमुच्यते । तदप्यधिष्ठितं सर्वमेकेन परमात्मना ।। तथर्ग्वेदादयो वेदाः प्रोक्ता येऽपि पृथक् पृथक् । भोग्यत्वेनात्मनां तेऽपि चैतन्यानुगताः सदा ।। तेषामन्तर्गतेच्छानां वाक्यार्थप्रतिपादने । विवक्षा चाविवक्षा च ज्ञायते शब्दशक्तितः ।। विधिशक्त्या गृहीतं यत् तत्तत् सर्वं विवक्षितम् । तयैव तु परित्यक्तं व्याख्येयमविवक्षितम् ।।" इति । "न्यायेन सम्प्रदायाद्वा ये मीमांसकयाज्ञिकाः । वेदं व्याचक्षते तेषामभि-

पासनाविषयत्वम् । उपक्रमोपसंहारौ, "सदेव सोम्येदमग्र

प्रायोऽयमुच्यते ।। तत्र यः शक्त्युपारूढः स तैर्व्याख्यातुमिष्यते । यस्तु शक्त्या परित्यक्तो नैव व्याख्यायते स तैः ।। तेन व्याख्यातुमिष्टार्थो यस्तेषां स विवक्षितः । अनिष्टो यस्त्वशक्तत्वादविवक्षित एव सः ।।" इति । एवं च यद्वाक्यं वक्त्रा यदर्थविवक्षया प्रणीतं तद्वाक्यं तत्परमिति पर्यवस्यति । यद्वा परशब्देनेष्टवाचिना शेषी लक्ष्यते । यागादिविशेषे हि स्वर्गादिः यागादिना साधयितुमिष्टो भवति । उत्कृष्टवाची वा परशब्दोऽत्र प्रधाने शेषिणि पर्यवस्यति । प्रसिद्धं च वाक्यं प्रति वाक्यार्थस्य शेषित्वम् । "ऐन्द्रया गार्हपत्यमुपतिष्ठते" (मै० सं० १.५.११) इत्यादिश्रुतिषु शेषित्वं च वाक्यार्थस्य वाक्योद्देश्यप्रतीतिविषयता । इदं वाक्यमेतत्प्रतीत्युद्देश्यकमित्येतल्लोके वक्तृविवक्षयाऽवगम्यते, वेदे न्यायेन । एवं च यद्वाक्यं यत्प्रतीत्युद्देशेन प्रवर्तते, तद्वाक्यं तत्परमिति पर्यवस्यतीति वक्त्रभिप्रायविषयतया न्यायविषयतया वा यत्प्रतीतिर्वाक्यस्योद्देश्या न भवति, तस्य कदाचिद्वाक्यजन्यप्रतीतिविषयत्वेऽपि न तत्र तस्य तात्पर्यप्रसङ्गः ।

एवं द्विविधं तात्पर्यपदार्थनिर्वचनं मनसि निधाय प्रकृते तदुभयं योजयति—तत्स्वरूपोपासनाविषयत्वमिति । तस्य ब्रह्मणः स्वरूपं चोपासना च तत्स्वरूपोपासने, ते विषयावेषामिति तत्स्वरूपोपासनाविषया वेदान्ताः, तेषां भावस्तत्त्वम् । अनन्यत्रभावोऽत्र विषयशब्दार्थः । एवं च वेदान्तानां ब्रह्मस्वरूपे तदुपासनाविधाने च विश्रान्तिः, तयोरेव वक्तृविवक्षागोचरत्वात्, तत्प्रतीत्योरेव वेदान्तोद्देश्यत्वाच्चेति प्रदर्शिते तात्पर्यशब्दार्थनिर्वचनद्वयेऽस्य भाष्यस्य पर्यवसानं लभ्यते । यद्यपि वेदान्तानां ब्रह्मण्येव तात्पर्यमुपक्रमादिनिर्णयवत्त्वेनात्र प्रस्तुतम्, तथापि तदुपासनाविधानेऽपि तेषां तात्पर्यमग्रे प्रदर्शयिष्यत इति तदभिप्रायेणोपासनाग्रहणम् । परिगणितेषु तात्पर्यलिङ्गेष्वाद्येन तात्पर्यनिर्णयस्थलमुदाहरति —उपक्रमेति । सदेवेति ।

नन्वत्र ब्रह्मणः सामान्येन सर्वप्रपञ्चात्मकतयोपक्रमो विशिष्य श्वेतकेत्वात्मतयोपसंहार इति तयोर्नैकरूप्यमिति चेन्न, सामान्येनोपक्रम्य विषयविशेषप्रदर्शनेनोपसंहारस्य स्थालीपुलाकन्यायेन सामान्यप्रतिज्ञादृढीकरणार्थतया तत्रैव पर्यवसानात् । दृश्यते ह्येतत् । ग्रामस्थाः सर्व एवात्यन्तं शिष्टा सामान्यतः प्रतिज्ञाय चैत्रस्तावदयमतिशिष्ट इति विशिष्य कस्यचित्प्रदर्शनस्य —"लोकोत्तरं चरितमर्पयति प्रतिष्ठां पुंसां कुलं नहि निमित्तमुदात्तताया: ।

वातापितापनमुनेः कलशात् प्रसूतिः लीलायितं पुनरमुष्य समुद्रपानम् ॥''
इत्याद्यर्थान्तरन्यासोदाहरणश्लोकेषु सामान्यप्रतिज्ञापूर्वकविशेषोपन्यासस्य सामान्यप्रतिज्ञादृढीकरणार्थतया तदर्थे पर्यवसानम् ।

ननु ''तत्त्वमसि'' (छा० उ० ६.८.७) इत्यतः प्राग् ''ऐतदात्म्यमिदं सर्वम्'' (छा० उ० ६.८.७) इति सामान्येनोपसंहारो दृश्यते। स किमर्थं नोदाहृतः । तदुदाहरणे ह्यत्यन्तमाञ्जस्यं लभ्यते । सत्यम् । तत्रैतत्प्रकृतम्, सदात्मा सोऽस्येत्येतावद्विवक्षायां तद्धितवैयर्थ्यप्रसङ्गादेतदात्मनि भवं विवक्षितमित्याद्यर्थान्तरशङ्काग्रस्तत्वेनास्फुटत्वात् तन्नोदाहृतम् । अत एव— ''स्तब्धोऽस्युत तमादेशमप्राक्ष्यः'' (छा० उ० ६.१.२) इत्यादिसर्वविज्ञानप्रतिज्ञाविषयः परमोपक्रमोऽत्र नोदाहृतः, सर्वविज्ञानप्रतिज्ञानप्रतिज्ञायाः ''सदेव सोम्येदम्'' (छा० उ० ६.२.१) इति समानाधिकरणनिर्देशस्यैव सर्वात्मविषयताया अस्फुटत्वात् । नन्वनेन ब्रह्मप्रपञ्चसामानाधिकरण्यनिर्देशात्मकब्रह्मसार्वात्म्यप्रतिपादकवाक्यप्रमाणवत्त्वरूपेणोपक्रमोपसंहारैकरूप्येण कस्य प्रपञ्चात्मनि ब्रह्मणि तात्पर्यं निर्णीयते ? उच्यते—उपक्रमोपसंहारगतवाक्यप्रमाणयोरेव तावत्तत्र तात्पर्यमविचलं तेन निर्णीयते, येनोपक्रम्यते येन चोपसंह्रियते स वाक्यार्थ इति न्यायात् । ''वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जाते यदष्टाकपालो भवति गायत्र्यैवैनं ब्रह्मवर्चसेन पुनाति, यन्नवकपालस्त्रिवृतैवास्मिंस्तेजो दधाति, यद्दशकपालो विराजैवास्मिन्नन्नाद्यं दधाति, यदेकादशकपालस्त्रिष्टुभैवास्मिन्निन्द्रियं दधाति, यद्द्वादशकपालो जगत्यैवास्मिन् पशून् दधाति, यस्मिन् जात एतामिष्टिं निर्वपति पूत एव तेजस्व्यन्नाद इन्द्रियावी पशुमान् भवति'' (तै० सं० २.२.५.३) इति वाक्यसन्दर्भस्य द्वादशकपालेष्टिरिव श्वेतकेतुसम्बोधकोद्दालककृतब्रह्मोपदेशरूपस्यास्य वाक्यसन्दर्भस्य सकलप्रपञ्चात्मभूतं ब्रह्मार्थ इत्यवगमात् तदुपक्रमोपसंहारमध्यवर्तिनि ब्रह्मसार्वात्म्ये विरोधिधर्मप्रतिपादकत्वेन प्रतीयमानान्यवान्तरवाक्यान्यष्टाकपालादिवाक्यानि द्वादशकपालेष्टिविधानपरतयेव सर्वप्रपञ्चात्मभूतब्रह्मपरतया नेतव्यानीति तेषामपि तत्र तात्पर्यं निर्णीयते ।

तथाहि—तत्र नवखण्डीमध्ये प्रथमखण्डे शकुनिबन्धनयोर्द्वितीयखण्डे नानावृक्षरसमधुनोस्तृतीयखण्डे नदीसमुद्रयोः पञ्चमखण्डे वटतद्बीजयोः षष्ठखण्डे जललवणयोः सप्तमखण्डे पुरुषगन्धारदेशयोर्नवमखण्डे स्तेनापहार्ययोश्च शरीरात्मभावापन्नयोर्दृष्टान्तीकरणलिङ्गाद् दार्ष्टान्तिकयोः प्रपञ्चब्रह्मणो-

आसीत्" (छा० उ० ६.२.१) इत्युपक्रमः "तत्त्वमसि" (छा० उ० ६.८.७) इत्युपसंहारः । "धातुः प्रसादान्महि-

---

स्तदभावोऽवसीयते । चतुर्थखण्डे दृष्टान्तीकृतयोर्महावृक्षबीजयोः शरीरात्मभावसत्त्वेऽपि बहुलिङ्गविरुद्धमेकलिङ्गमसाधकम् । स्यादेतत् । उपक्रमोपसंहारैकरूप्यशरणीकरणे बहुविरुद्धमेकमसाधकमित्येतत् तुल्यम् । तेनापि हि वैश्वानराधिकरणन्यायतौल्यात् सद्विद्यावाक्यसन्दर्भः कृत्स्नोऽपि प्रपञ्चात्मनि ब्रह्मणि प्रमाणमेकं प्रकरणं वेति वाक्यप्रकरणयोरन्यतरदेकमेव प्रमाणमुत्थापनीयम् । न च वैश्वानरवाक्ये उपक्रमोपसंहारैकरूप्यावधृतेनैकेन वाक्यप्रमाणेन बह्वन्यष्टाकपालादिवाक्यानि जातेष्ट्याश्रितगुणफलविध्यर्थत्वेन प्रतीयमानानि बाधितानि दृष्टानीति वाच्यम्, अष्टाकपालादिवाक्येषु विध्यश्रवणात्, विधियोग्यपुरुषव्यापारमात्रस्याप्यश्रवणात्, यच्छब्दोपबन्धेनानुवादकत्वस्यैव प्रत्यायनात् । अष्टाकपालादिभवनपवनादिकयोरेककालत्वनिर्देशेन फलफलिभावाप्रतीतेः, "यस्मिन् जाते" (तै० सं० २.२.५.३) इति वाक्ये पूतत्वादीनां समुच्चयश्रवणेन तेषां व्यवस्थिताष्टाकपालादिफलत्वायोगाच्च तेषु गुणफलविधयस्त्यक्ताः, न त्वेकेनैव केनचित् प्रमाणेन बाधितत्वात् ।

अथापि स्यात्—"जामि वा एतद्यज्ञस्य क्रियते यदन्वञ्चौ पुरोडाशावुपांशुयाजमन्तरा यजति, विष्णुरुपांशु यष्टव्योऽजामित्वाय, प्रजापतिरुपांशु यष्टव्योऽजामित्वाय, अग्नीषोमावुपांशु यष्टव्यावजामित्वाय" (तै० सं० २.६.६) इत्यत्र पुरोडाशद्वयनैरन्तर्यप्रयुक्तजामितादोषोपक्रमतन्निर्हरणोपसंहारावधृतान्तरालसंयुक्तकिञ्चित्कर्मविधितात्पर्यैकवाक्यतानुरोधाद् मध्ये श्रूयमाण एव विष्णुरुपांशु यष्टव्य इत्यादिविधयस्त्यक्ता इति । सत्यं त्यक्ताः, न त्वेकवाक्यत्वानुरोधात् । किन्तु जामितापरिहारायावश्यमन्तरावाक्ये विधावभ्युपगन्तव्ये तत्रैव शाखाभेदेनाग्नेयाग्नीषोमीययाज्यानुवाक्यायुगलमध्ये पठितानां वैष्णवप्राजापत्याग्नीषोमीययाज्यानुवाक्यायुगलानां क्रमप्रमाणेनान्वये सति तत्तन्मन्त्रोदितानां विष्ण्वादीनां तत्र यागे विकल्पेन देवतात्वस्य प्राप्तत्वाद् विष्ण्वादिवाक्यस्थयजिना सन्निहिततद्यागानुवादकत्वस्वारस्याच्च, विधेयाभावेन विष्ण्वादिवाक्यानां मन्त्रवर्णेन प्राप्तविष्ण्वादिदेवतावत्तया तद्यागस्तावकप्रतीतेः ।

एतेन "सदेव सोम्येदमग्र आसीत्" (छा० उ० ६.२.१), "तत्त्वमसि" (छा०उ० ६.८ ७) इत्युपक्रमोपसंहारगतवाक्यद्वयेन ब्रह्मसार्वात्म्यप्रतिपादकेन

मानमीशम्" (महाना० ८.३) इत्युपक्रमः, "यः परः स महेश्वरः" (महाना० १०.८) इत्युपसंहारः। एवमन्यत्रापि द्रष्टव्यम्। "तत्त्वमसि" (छा० उ० ६.८.७), "सर्वो वै रुद्रः" (महाना० १३.२), "अम्बिकापतय उमापतये" (महाना० १३.४), "यो वै रुद्रः स भगवान् भूर्भुवः सुवः" (अ० शिर० २९) इत्यभ्यासः। अपूर्वता वेदेतरप्रमाणा-

---

तद्विरोधिनामुदाहृतलिङ्गानां बाध इत्यपि शङ्का निरस्ता, अल्पेनाधिकबाधस्य वाक्येन लिङ्गबाधस्य चायुक्तत्वादिति चेत्, उक्तप्रायमत्रोत्तरम्। श्रुत्यादिषूत्तरमप्यल्पमपि तात्पर्यलिङ्गवत्प्रबलं पूर्वमप्यधिकमपि तात्पर्यलिङ्गरहितं दुर्बलम्, तात्पर्याधीनत्वाद् वेदप्रामाण्यस्य। तदिहोपक्रमोपसंहारगतमुदाहृतवाक्यद्वयं सर्वात्मभूतब्रह्मप्रमाणभूततयाऽवधृतं कृत्स्नमिदं प्रकरणं चोपक्रमोपसंहारैकरूप्यावधृतसर्वात्मभूतब्रह्मतात्पर्यशालितया बलवत्त्वात् तैरतथाभूतानामुदाहृतलिङ्गानां बाधो युक्तः। शकुनिबन्धनादयो हि प्रपञ्चब्रह्मणोर्न शरीरात्मभावराहित्ये दृष्टान्तीकृताः, येन ते तत्तात्पर्या भवेयुः। किन्त्वाश्रिताश्रयभावादिष्वन्यत्र दृष्टान्तीकृता अपि वस्तुतः शरीरात्मभावरहिता इत्येतावता प्रपञ्चब्रह्मणोरपि तदभावं गमयन्तीति वक्तव्यम्। नैतदुपपद्यते, तात्पर्यवद्वाक्यविरोधादिति। एवम्—"ऐतदात्म्यमिदं सर्वम्" (छा० उ० ६.८.७) इत्यत्राप्येतदात्मेति वक्तव्ये चातुर्वर्ण्यादिवत् स्वार्थे तद्धित इति योजनीयम्। एवमन्यदपि तत्र तत्र विरुद्धत्वेन प्रतीयमानं सर्वमनया दिशोपपादनीयम्। उपक्रमोपसंहारलिङ्गेन तात्पर्यनिर्णयस्योदाहरणं तैत्तिरीयाणाम्—"अणोरणीयान्" (तै० आ० १०.१०.१) इत्यनुवाके वक्तव्यम्। सर्वं शारीराधिकरणे प्रपञ्चयिष्यते।

एवमन्यत्रापीति। तत्र आनन्दमयाधिकरणादिषूदाहरिष्यमाणे विषयवाक्य इत्यर्थः। तत्त्वमसीति नवकृत्वश्चिदात्मत्वाभ्यासः, "सर्वो वै रुद्रः" (महाना० १३.२), "पुरुषो वै रुद्रः" (महाना० १३.२), "सन्महः सर्वो ह्येष रुद्रः" (महाना० १३.२) इति सर्वात्मत्वाभ्यासः। "अम्बिकापतये उमापतये" (महाना० १३.४) इति चिच्छक्तिशबलत्वाभ्यासः। "यो वै रुद्रः स भगवान् यश्च ब्रह्म" (अ० शिर० २९) इत्यादिषु ब्रह्मविष्णुमहेश्वरादिपर्यायेषु प्रतिपर्यायं भगवच्छब्दोक्तकल्याणगुणवत्त्वाभ्यासः। वेदेतरेति

प्राप्तता। फलं ब्रह्मज्ञानम्। अर्थवादो जगत्सृष्टिस्थितिप्रध्वंसादयः। उपपत्तिर्विरोधाभावः सर्वज्ञतादिसम्पत्तिर्वा। एतैर्लिङ्गैर्ब्रह्मणि तात्पर्यमवगन्तव्यं वेदान्तवाक्यानाम्। न केवलं ब्रह्मपरा वेदान्ताः, किन्तु—"आत्मा वा अरे द्रष्टव्यः"

वेदग्रहणं तदुपजीविनां स्मृतिपुराणादीनामप्युपलक्षणम्। अपूर्वता ब्रह्मप्रमाणभूतसर्ववेदान्तानुगतेति विशिष्योदाहरणं न दर्शितम्। फलं ब्रह्मज्ञानमिति। निरतिशयानन्दरूपब्रह्मसाक्षात्कार इत्यर्थः। अत्र "धातुः प्रसादान्महिमानमीशम्" (महाना० १०.१) इत्युपक्रमोदाहरणमेवोदाहरणं भविष्यतीति पृथगुदाहरणं (न) दर्शितम्।

"अणोरणीयान् महतो महीयानात्मा गुहायां निहितोऽस्य जन्तोः।
तमक्रतुं पश्यति वीतशोको धातुः प्रसादान्महिमानमीशम्॥" (महाना० ८.३)

इति मन्त्रस्य ह्ययमर्थः—अणोरणुत्वेन प्रसिद्धात् परमाण्वादेरप्यणीयान् अणुतरः, अव्यक्तत्वादतिसूक्ष्मत्वव्यपदेशः। महतो गगनादेरपि महीयान् महत्तरः, सर्वव्यापकत्वात्। यद्वा अणोरल्पशरीरावच्छिन्नस्य जन्तोरणीयान् तदीयहृदयगुहावच्छिन्नत्वेन महाशरीरहृदयगुहावच्छिन्नात् स्वस्मादणुतरः। महतो महाशरीरावच्छिन्नस्य जन्तोः। महीयान् अल्पशरीरहृदयगुहावच्छिन्नात् स्वस्मान्महत्तरः। प्रतियोग्यनिर्देशेऽपि बौद्धप्रतियोग्यपेक्षायामप्यतिशायनिक इत्यणीयान्महीयानितीयसुन्प्रत्ययः। एवम्भूतः परमात्मा अस्य जन्तोः प्राणिवर्गस्य हृदयगुहायां निहितः सन्निहितः। तं परमात्मानम्। अक्रतुं सकलकर्मास्पृष्टम्। महिमानं महिमवन्तम्। महाविभूतियुक्तमीशं सर्वस्य नियन्तारम्। धातुर्जगतां धारकस्य तस्यैव प्रसादाद्वीतशोको विगलितसांसारिकसकलक्लेशः सन्। पश्यति निरतिशयानन्दरूपमनुभवतीति। अत्र शोकनिवृत्त्यनन्तरं वर्ण्यमानं दर्शनं फलरूपमेव विवक्षितमिति ज्ञायते।

जगत्सृष्टीति। सृष्ट्यादीनां संक्षेपेण जन्माद्यधिकरणे प्रपञ्चेनेक्षत्यधिकरणादिषु चोदाहरणाद्विरोधाभावस्य सर्ववेदान्तव्यापकत्वाज्जगत्कारणत्वोपपत्तिरूपसर्वज्ञतादिसम्पत्तेर्जन्माधिकरणे प्रपञ्चितत्वाच्चानुदाहरणम्। एवं वेदान्तानां ब्रह्मणि तात्पर्यं प्रसाध्योपासनाविधिष्वपि तेषां तात्पर्यमावश्यकमित्याह—न केवलमिति। तज्ज्ञानविधिपरा अपि ज्ञायन्त इति। अन्यथोपासनानुष्ठानासम्भवेन ब्रह्मप्राप्तिफलानिष्पत्तिप्रसङ्गादिति भावः।

(बृ० उ० २.४.५.) इत्यादिषु तज्ज्ञानविधिपरा अपि ज्ञायन्ते। उभयपरत्वे वाक्यभेदप्रसङ्ग इति यदुक्तं तन्न, रूपप्रत्यायकेन चक्षुषा यथा द्रव्यस्यापि सिद्धिस्तथा विधिपरैरपि वेदान्तैर्ब्रह्मसिद्धिरिति नोभयपरत्वविरोधः।

शाब्दं हि ब्रह्मज्ञानम्। तद्ब्रह्मवाचिशब्दादेव प्राप्तम्। तद्विधिना किं प्रयोजनमिति चेत्, प्राप्तावपि मन्त्रादिष्विव विधेरविरोधः। यथा द्रव्यदेवतादिप्रकाशकेषु मन्त्रेष्वप्योय-

---

एवमुभयत्र तात्पर्ये प्रसाधिते लब्धावकाशं तृतीयपूर्वपक्षमनुवदति—उभयपरत्व इति। यद्यप्युभयत्रापि तात्पर्यस्यावश्यम्भावे सति वाक्यभेद आपतति चेत्, स न दोष इत्येव प्राप्नोति,तथापि वाक्यभेदाप्रसङ्गेन परिहर्तुमनुवादः। एकदेशिमतेन तावत्परिहर्तुमुपक्रमते—तन्नेति। यथा रूपप्रत्यायकं चक्षुस्तत्समवायि द्रव्यमपि तत्संसृष्टतया प्रत्याययति, तथा ज्ञानविधिपरा वेदान्तास्तज्ज्ञेयं ब्रह्मापि तत्संसृष्टतया प्रत्याययेयुः। न चोभयपरत्वे वाक्यभेदो दोषः, स्वतन्त्रोभयपरत्वानङ्गीकारादित्याह—रूपेति। ननु तर्हि यथा रूपज्ञानजनकेन चक्षुषा तदाश्रयद्रव्यज्ञानस्यापि सहजनितत्वात् तदाश्रयद्रव्यज्ञाने यत्नान्तरापेक्षा नास्ति, एवं ब्रह्मज्ञानविधिगोचरज्ञानजनकैर्वेदान्तैर्ब्रह्मज्ञानस्यापि जनितत्वान्न ब्रह्मज्ञाने विध्यपेक्षास्तीति शङ्कते—शाब्दं हीति। साङ्गाध्ययनबलाद् वेदान्तेभ्यः स्वतः प्राप्तं ब्रह्मज्ञानं विध्यनुष्ठाप्यं नाभ्युपगम्यते, किन्तु मन्त्रादिष्विवान्यदेव ज्ञानम्, अतो न विधिवैयर्थ्यमिति परिहरति—प्राप्तावपीति। मन्त्रादिष्विवेति दृष्टान्तं विशदयति—यथेति। यथा "बर्हिर्देवसदनं दामि" (मै० सं० १.१.२), "अग्निर्मूर्धा दिवः ककुत्" (तै० ब्रा० ३.५.७.१) इत्यादिमन्त्रैः साङ्गाध्ययनानन्तरं द्रव्यदेवतादिज्ञाने जातेऽपि क्रतुप्रयोगमध्ये तत्तदनुष्ठानोपयोगि मन्त्रकरणकं तज्ज्ञानान्तरं प्रयोगविधिरनुष्ठापयति, तथात्रापीत्यर्थः।

ननु मन्त्राः क्रतुषु व्रीह्यादिवदङ्गभावेन "सूक्तवाकेन प्रस्तरं प्रहरति" इत्यादिवाक्यगततृतीयाश्रुत्यादिभिर्विनियुक्ताः केन द्वारेणोपकुर्वन्तीत्यपेक्षायां दृष्टे सम्भवत्यदृष्टकल्पनानुपपत्तेरनुष्ठानापेक्षितद्रव्यदेवतादिज्ञानोत्पादनद्वारोपकुर्वन्तीति कल्पनाद् अध्ययनानन्तरं मन्त्रैर्जातस्य ज्ञानस्य क्रतुप्रयोगमध्य-

मानेषु द्रव्यादिज्ञाने जातेऽपि पुनरनुष्ठानकाले–"मन्त्रैरनुस्मर्तव्यम्" इति प्रयोगविधिर्ज्ञानान्तरमनुष्ठापयति, तथात्रापि। न चोत्पत्तिविनियोगाधिकारविधीनामभावात् प्रयोगविध्यसम्भव इति शङ्कनीयम्। उत्पत्तिविधेरध्याहारेण सिद्धौ प्रकरणवशाच्छमादिकं विनियोजयन् "आत्मानं पश्येत्" इति

पात्यनुष्ठानोपयोगित्वासम्भवात् साङ्गं क्रतुमनुष्ठापयन् प्रयोगविधिस्तदानीं मन्त्रैर्मन्त्रार्थज्ञानमप्यनुष्ठापयतीति युक्तम्। इह तु नास्ति वेदान्तैर्ब्रह्मज्ञानस्य पुनरनुष्ठापकः प्रयोगविधिः। न च वाच्यं ज्योतिष्टोमादिष्वपि कल्प्यः प्रयोगविधिः, तद्वदिहापि कल्प्यतामिति, तत्र कल्पकानामुत्पत्तिविनियोगाधिकारविधीनां सत्त्वात्। "ज्योतिष्टोमे महासोमेन यजेत" इति सोमद्रव्यरूपकरणविशिष्टयागस्वरूपविधिरुत्पत्तिविधिः। "ज्योतिष्टोमेन स्वर्गकामो यजेत" इति फलसम्बन्धबोधको विधिरधिकारविधिः। तत्प्रकरणे दीक्षणीयाद्याम्नानकल्पितः "दीक्षणीयादिभिर्ज्योतिष्टोमस्योपकुर्यात्" इति विधिर्नियोगविधिः, ततश्च दीक्षणीयादिभिरुपकृत्य "ज्योतिष्टोमेन स्वर्गकामो यजेत" इति प्रयोगविधिकल्पनं युक्तम्। नेह तथा वेदान्तैर्ब्रह्म ज्ञातव्यमित्यादिरूपेणोत्पत्तिविध्यादयः श्रूयन्त इत्याशङ्क्य निराकरोति—न चेति। "आत्मा वा अरे द्रष्टव्यः" (बृ० उ० २.४.५) इत्यात्मदर्शने विधिः श्रूयते। तत्र दृशिधातुना चाक्षुषज्ञानवाचिना करतलामलकालोकनादिवदसन्दिग्धाविपर्यस्तमात्मज्ञानं विवक्षणीयम्, आत्मनि चाक्षुषज्ञानासम्भवादिति। न स्ताद् ब्रह्मज्ञानस्योत्पत्तिविधिः, तत्र करणाकाङ्क्षायां वेदान्ताः करणत्वेनाध्याहार्या इत्येवमपेक्षितांशाध्याहारेण वेदान्तकरणविशिष्टब्रह्मज्ञानोत्पत्तिविधिसिद्धावित्यर्थः।

ननु वेदान्तानामेव करणत्वेनाध्याहारो नान्यस्य कस्यचिदित्यत्र किं प्रमाणम्? इत्याकाङ्क्षायामाह–प्रकरणवशादिति। श्रोतव्य इत्यनन्तरवाक्ये तात्पर्यावधारणरूपश्रवणसङ्कीर्तनयोग्यतया वेदान्ततात्पर्यविषयं पर्यवस्यति। तत्र वेदान्तानां सन्निहितत्वलाभे सति सन्निधिलक्षणप्रकरणवशात् तेषामेव करणत्वेनाध्याहारः सिद्ध्यतीति भावः। यद्यप्यत्रापि योग्यतयैव वेदान्तानां करणत्वेनाध्याहारः सिद्ध्यति, तथापि सन्निधिरप्यस्तीति दर्शयितुं प्रकरणवशादित्युक्तम्। शमादिकमिति। "शान्तो दान्त उपरत-

विनियोगविधिरुपपद्यते । ततश्च रात्रिसत्रन्यायेन "ज्ञात्वा देवं मुच्यते सर्वपाशैः" (श्वे० उ० ४.१६) इत्याद्यर्थवादावगत-मोक्षकामोऽधिकारी कल्पनीयो भवति । अतो मोक्षकामः शमादियुक्तो ब्रह्मज्ञानं सम्पादयेदिति प्रयोगविधिलाभः ।

ननु ब्रह्मज्ञानस्य विधेयत्वमनुपपन्नम्, "आत्मा वा अरे द्रष्टव्यः" (बृ० उ० २.४.५) इत्यादौ नित्ये ब्रह्मणि

स्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्येत्" इति विधिः श्रुत्युपात्त-कर्त्रैक्यवशात् फलसाधनमात्मज्ञानं प्रति शमादीन्यङ्गत्वेन विनियोजयन् विनियोगविधिः सम्पद्यत इत्यर्थः । यद्यपि शान्तो दान्त इति वाक्यस्य शाखान्तरत्वात् तत्रापि शमादिविशिष्टस्यात्मदर्शनस्य विधानमङ्गीकर्तुं शक्यमिति तदुत्पत्तिविधिरेव पर्यवस्यति, एवं प्राप्तकर्मानुवादेन शमाद्यनेक-गुणविधानाभावाद् वाक्यभेदोऽपि न प्रसज्यते, तथापि शमादीनामङ्गत्वेन विधानाद्विनियोगविधित्वमप्युपपद्यत इत्यभिप्रायेण तथोक्तम् । एवमेव ज्ञात्वा देवमित्यत्रार्थवादप्रतीतमोक्षकामाधिकारिकज्ञानविधेरधिकारविधित्वमपि । एवं च पाशमोक्षकामः शमादियुक्तो वेदान्तैर्ब्रह्म जानीयादिति प्रयोगविधि-कल्पनोपपत्तेः । तेन प्रयोगविधिना प्राग् वेदान्तैर्ब्रह्मज्ञाने स्वतो जातेऽपि पुनरपि वेदान्तकरणकं ब्रह्मज्ञानान्तरं फलायानुष्ठाप्यत इति युक्तमित्याह— अत इति ।

ज्ञाने विध्यसम्भवात् तत्र चतुर्विधविध्युपन्यासो न सङ्गच्छत इत्या-शङ्कते—नन्विति । स्वतन्त्रफलाय धात्वर्थे कर्मरूपज्ञानविधिरभ्युपगम्यते, उत कर्मकारकगतफलाय गुणकर्मरूपज्ञानविधिरिति विकल्पं मनसि निधायाद्यं विधायकत्वाभिमतवाक्योदाहरणेन निरस्यति—आत्मेति । "आत्मा द्रष्टव्यः", "आत्मानं पश्येत्" इत्यादिवाक्येषु ज्ञानविधिमभ्युपगच्छता कर्माभिधायि-प्रत्ययानुसारेण कर्मोपसर्जनक्रियाविधानमभ्युपगन्तव्यम्, न स्वतन्त्रक्रिया-विधानमिति भावः । द्वितीयं निरस्यति—नित्य इति । कर्मोपसर्जनक्रिया-विधानमपि नाभ्युपगन्तुं शक्यम्, आत्मन्युत्पत्त्यादीनां क्रियाजन्यफलानाम-सम्भवेन तस्य विधेयक्रियाकर्मत्वासम्भवादिति भावः । "वेदिं करोति" (आप० श्रौ० १.८.१३) इत्यत्र वेद्या इवोत्पत्त्यसम्भवे हेतुर्नित्य इति विशेषणम् । "पयो दोग्धि" इत्यत्र पयस इव प्राप्यत्वासम्भवे हेतु-

निर्विकारे विशुद्धे चात्मनि न कर्मकारकभावो युज्यते, येन विधिसम्भवः, उत्पत्तिप्राप्तिविकारसंस्काराणामत्रासम्भवात् । न च स्वतन्त्रफलाय सक्तुन्यायेन कर्मकारकतां परित्यज्य करणत्वविपरिणानेन आत्मना पश्येदिति विधातुं शक्यम्, वैषम्यात् । तथा हि—क्रियाकृतातिशयस्य भस्मीभावलक्षणस्य सक्तुषु सम्भवात् तेषु शब्दतः करणत्वेऽप्यर्थतः कर्मत्वमस्ति । न तस्यात्मनि सम्भवः । अतो वेदान्तानां न ब्रह्मज्ञानविधिपरत्वमिति चेन्न, आत्मनि कर्मत्वप्रयुक्तोत्पत्त्याद्यभावेऽपि कर्तृस्थमोक्षफलाय विध्युपपत्तेः । प्राप्ते कथं विधि-

---

ब्रह्मणीति । बृहत्त्वाद् व्यापकत्वेन नित्यप्राप्तत्वात् प्राप्यत्वं न सम्भवतीति भावः । "बर्हिर्लुनाति" (तै० ब्रा० ३.२.२.४) इत्यत्र बर्हिष इव विकार्यत्वासम्भवे "व्रीहीन् प्रोक्षति" (आप० श्रौ० १.१९.१) इत्यत्र व्रीहीणामिव गुणाधानलक्षणसंस्कारासम्भवे च हेतुर्निर्विकार इति । "ग्रहं संमार्ष्टि" इत्यत्रेव शुद्ध्याधानलक्षणसंस्कारासम्भवे हेतुर्विशुद्ध इति ।

यद्येवं सक्तुन्यायेन विपरीतो गुणप्रधानभावोऽस्तु । "सक्तून् जुहोति" इत्यत्र हि होमेन भस्मीकृतानां सक्तूनां भाव्युपयोगासम्भवाद् भूतोपयोगाभावाच्चाघटमानं गुणकर्मत्वं परित्यज्य सक्तुभिरिति तृतीयाश्रयणेन क्रियाप्राधान्यमुपादायार्थकर्मत्वमाश्रितम्, एवमिहाप्यस्त्वित्याशङ्क्याह—न चेति । होमकरणतया विवक्षितानामपि सक्तूनां प्रक्षेप्यत्वेनार्थिककर्मत्वापरित्यागाद् अस्ति जुहोतेः सकर्मकत्वनिर्वाहः । तथात्र न निर्वाहोऽस्ति, आत्मनि कर्मत्वनिर्वाहकानामुत्पत्त्यादीनामसम्भवादित्याह—वैषम्यादिति । होमेन सक्तूनां प्रक्षेप्यत्वेनेव ज्ञानेनात्मनोऽवभास्यत्वेन व्यवहार्यत्वेन चार्थतः कर्मत्वमिहापि सम्भवतीति स्मृतिविनियोगादर्शनात् सक्तुहोमवदात्मज्ञानस्याप्यर्थकर्मत्वकल्पनं सम्भवतीति समाधत्ते—नेति । यद्यपि ज्ञानेन प्रसादितस्य परमेश्वरस्य मोक्षप्रदानेऽस्त्युपयोग इति सिद्धान्तदृष्ट्या गुणकर्मत्वमपि निर्वोढुं शक्यम्, तथाप्येकदेशिमतं यावदुक्तमिहानूदितम् ।

ननु वेदान्तैरात्मज्ञानं कुर्यादिति विधिर्न सम्भवति, अधीतवेदान्तस्य पठितमीमांसाशास्त्रस्य वेदान्तानुसन्धानेन तदर्थज्ञानस्य स्वयमेव प्राप्तेरिति

रिति चेत्, प्राप्तिः पाक्षिकी नित्या वा । उभयथापि नियमादिविधिः सम्भवति ।

ननु तथा सति वेदान्तानां विधिपरत्वेन ब्रह्मपरत्वमनुपपन्नम् । यदुक्तं 'रूपप्रत्यायकेन चक्षुषा द्रव्यसिद्धिवद् विधिपरैरपि वेदान्तैर्ब्रह्मसिद्धिः' इति, तदयुक्तम्, चक्षुर्हि सम्प्रयोगे सति निरपेक्षमेव प्रतिवस्तु प्रमापकम् । न तथा शब्दः, किन्तु यत्र तात्पर्यं तत्र प्रमाणम् । तस्माद् वेदान्तानां ब्रह्मप्रमापकत्वं ब्रह्मज्ञानविधायकत्वं च न सम्भवतीति चेन्न, "विधो

शङ्कते—प्राप्त इति । लौकिकी खल्वियमिह प्राप्तिः, सा तु पाक्षिकी ऋतुगमन इव । तथा च "ऋतावुपेयादेव" इतिवद् वेदान्तैरात्मज्ञानं कुर्यादिवेत्यस्ति नियमविधेरवकाशः । यदि ब्रह्मोज्झितापरिहाराय सदा वेदाभ्यासावश्यम्भावाद् विचारितवेदान्तस्य वेदान्तैरात्मज्ञानप्राप्तिर्नित्येत्युच्यते, तथापि वेदान्तानुसन्धानप्रयुक्तात्मज्ञानस्य लोकव्यवहारप्रयुक्तानात्मज्ञानस्य च समुच्चित्य प्राप्तावनावश्यकानात्मज्ञाननिवृत्त्यर्थस्य परिसंख्याविधेरवकाशोऽस्ति । "आसुप्तेरामृतेः कालं नयेद् वेदान्तचिन्तया" इति स्मृत्यानुगुण्यादित्यभिप्रेत्य परिहरति—प्राप्तिरिति ।

एवमेकदेशिमतमुपन्यस्तम् । तत्रानभिमतांशं तदुपमर्दकशङ्कासमाधानमुखेन निराकृत्य स्वमतेन वेदान्तानां विधौ ब्रह्मणि च तात्पर्यमुपपादयत्यग्रिमग्रन्थसन्दर्भेण । तत्र वेदान्तानां ब्रह्मणि विधौ च प्रामाण्यसम्भवे रूपतदाश्रयप्रमाणभूतचक्षुर्दृष्टान्तप्रदर्शनमयुक्तमित्याशङ्कते—नन्विति । चक्षुर्हि येन येन योग्येन सन्निकृष्टम्, तत्र सर्वत्रापि प्रमां जनयतीति युक्तं तस्योभयत्र प्रामाण्यम् । न तथा शब्दो यत्र यत्र शक्तिरस्ति तत्र सर्वत्र प्रमां जनयति, किन्तु यत्र तात्पर्यं तत्रैव । तथा चोभयतात्पर्यवत्त्वेनोभयत्र प्रमाजनकशब्द एवात्र दृष्टान्तीकर्तव्यो न चक्षुरिति भावः । तथैव स्वयं दृष्टान्तमुदाहरन् समाधत्ते—नेति ।

ननु समिदादिवाक्यानि केवलं प्रयाजानां विधायकानि न तदनुष्ठानक्रमेऽपि तात्पर्यवन्ति, किन्तु तेषां पाठक्रमेण तदर्थानुष्ठानक्रम इति नैकस्योभयपरतायामिदमुदाहरणमिति चेन्न, यथा समिदादिवाक्यानि परमेश्वरेणाध्ये-

यजति" (तै० सं० २.६.१.२) इत्यादीनां वाक्यानां पञ्चप्रयाजविधायकत्वं तदनुष्ठानक्रमविधायकत्वं चेत्युभयपरत्वदर्शनाद् वेदान्तवाक्यानामपि ब्रह्मप्रमापकत्वं ब्रह्मज्ञानं मोक्षोपकारकं प्रति विधायकत्वं च युक्तमेव ।

तॄणां तदर्थप्रतीतिर्भवत्वितीच्छयोच्चरितानि तथा तत्पाठक्रमेण तदर्थानुष्ठानक्रमप्रतीतिर्भवत्वित्यपीच्छया क्रमविशेषे तान्युच्चरितानीति तेषां तत्रापि तात्पर्यानिवारणात्, तत्प्रमितिशेषत्वं तात्पर्यमित्यभ्युपगमेऽपि क्रमविशेषेण पठितानां विधिवाक्यानां तत्तदर्थानुष्ठानक्रमप्रमितिशेषत्वस्यापि सत्त्वेन तत्र तात्पर्यानिवारणात् । अत एव शिवं पूजयता गन्धा लेपनीयाः, धूपो दातव्यः, पुष्पाण्यवकिरितव्यानीति वदन्तं प्रति नायं क्रमः, किन्तु गन्धो लेपनीयः, पुष्पाण्यवकिरितव्यानि धूपो दातव्य इति प्रत्युक्तिर्दृश्यते । यदि क्रमेणोच्चरितानां विधिवाक्यानां तदर्थानुष्ठानक्रमे तात्पर्यं न स्यात्, तदा तदभिमतक्रमनिषेधपूर्वकं क्रमान्तरोपदेशविषयतयैवं प्रत्युक्तिर्न संगच्छते ।

ननु विधिवाक्यसन्दर्भे विधेयपदार्था एव शब्दप्रमाणकाः, न तु तेषां क्रमः, तस्यापदार्थत्वादवाक्यार्थत्वाच्च । किन्त्वेकेन कर्त्रा बहूनां पदार्थानां युगपदनुष्ठातुमशक्यत्वात् क्रमाकाङ्क्षायां पाठक्रमसन्निधापितस्तत्क्रमो गृह्यत इत्येवमुपस्थितिलाघवसहकृतार्थापत्तिर्गम्यत इति चेन्न, क्रमस्य प्रत्येकविधिवाक्यार्थत्वाभावेऽपि क्रमपठितानेकवाक्यार्थत्वोपपत्तेः, पाठक्रमेण सन्निधापितः पदार्थक्रमो गृह्यत इति वदतापि पाठक्रमेण सन्निधानस्य क्रमपठितानेकवाक्यजन्यज्ञानविषयत्वादन्यस्य वक्तुमशक्यत्वात् । अन्यथा पाठक्रमस्य स्वातन्त्र्येण क्रमप्रमितिजनकत्वे तस्य प्रमाणान्तरतापत्तेः, तस्मिन्नपि पक्षे वाक्यविशेषाणां पाठक्रमस्यैव तदर्थानुष्ठानक्रमप्रमितिजनकत्वेन विशेषणतया तेषामपि तज्जनकत्वावश्यंभावाच्च । क्रमस्य श्रुतिमूलार्थापत्तिगम्यत्वपक्षेऽपि धूमवह्न्युभयबोधनाय प्रवृत्तस्य 'पर्वते धूमः' इति वाक्यस्य धूमवह्न्योरिवानुष्ठेयपदार्थतत्क्रमबोधनाय प्रवृत्तानां क्रमपठितविधिवाक्यानां शब्दतन्मूलप्रमाणान्तरगम्ययोरनुष्ठेयपदार्थजाततत्क्रमयोस्तात्पर्यानिवारणाच्चेति भावः ।

एवं वेदान्तानां ब्रह्मणि विधौ च तात्पर्यसम्भावनायामेकदेश्युक्तं दृष्टान्तं निरस्य स्वाभिमतो दृष्टान्तः समर्थितः । अथ तेषां वेदान्तकरणकज्ञानविधौ तात्पर्यमिति तन्मतं निरस्य तन्मूलकोपासनाविधौ तात्पर्यमिति स्वमतं

ननु ब्रह्मणि वेदवाक्यादेव ज्ञाते तज्ज्ञानविधिरप्रयोजनः, तत्प्रयोजनस्य पूर्वज्ञानादेव सम्भवादिति चेन्न, वाक्येन परोक्षत्वेन ज्ञाते ब्रह्मणि तत्साक्षात्काराय ज्ञानविधेरुपपत्तेः। कथं भेद इति चेत्, यच्छब्दजन्यं न तत्साक्षात्कारहेतुः। किन्तु उपासनारूपं ज्ञानमेव। तथा च श्रूयते—"ध्यात्वा मुनिर्गच्छति भूतयोनिं समस्तसाक्षि तमसः परस्तात्" (कै० उ० ७), "ज्ञाननिर्मथनादेव पाशं दहति पण्डितः" इत्यादिषु, "ज्ञात्वा देवं मुच्यते सर्वपाशैः" (श्वे० उ० ४.१६), "ईशं तं ज्ञात्वा अमृता भवन्ति"

समर्थयितुं तन्मतेऽनुपपत्तिमाशङ्कते—नन्विति। यदि वेदान्तकरणकं शाब्दं ब्रह्मज्ञानं मोक्षजनकं तदा तेभ्यः स्वतः प्राप्तस्यैव तस्य मोक्षजनकत्वोपपत्तेर्व्यर्थं तत्र विधिकल्पनम्। नहि स्वतोऽसमर्थं विधिसंस्पर्शेन सामर्थ्यं लभते। न च विहितं शमादिकमितिकर्तव्यतायोगान्मोक्षजनने समर्थं भवेत्, नान्यदिति वाच्यम्, शमादिकं हि ज्ञानाङ्गभावं भजच्चित्तैकाग्र्यसम्पादनद्वारा ज्ञानस्वरूपनिष्पादकतया सन्निपत्योपकारकतां भजेत्। तच्चेज्ज्ञानं शमादिकं विनाप्युत्पद्यते, किं तदभावेन तस्य वैकल्यमापद्यते। तस्माच्छाब्दज्ञानमूलकं यज्ज्ञानमत्यन्तचित्तैकाग्र्यसम्पादनयत्नसाध्यं तदेव ज्ञानं मोक्षार्थं विधेयमभ्युपगन्तव्यम्, न तु शाब्दज्ञानमिति भावः। स्वयं तथाभूतज्ञानान्तरं विधेयं प्रदर्शयन् समाधत्ते—वाक्येनेति। किं तच्छाब्दज्ञानाद् विलक्षणं ज्ञानं यत्साक्षात्कारं जनयितुं शक्नुयादिति पृच्छति—कथमिति। ध्यानोपासनादिशब्दवाच्यं निरन्तरस्मृतिसन्तानरूपं ज्ञानं तदित्याह—यदिति। उपासनारूपमेव ज्ञानं वेदान्तेषु फलाय विधेयमित्युपासनावाचिपदविशेषघटितवाक्योदाहरणेन दर्शयति—तथा च श्रूयत इति। इत्यादिष्वित्यनेन ध्यानोपासनादिपदघटितानि फलयुक्तवाक्यानि गृह्यन्ते। एवं च फलयुक्तवाक्येषु श्रुतानां ज्ञानसामान्यवाचिपदानां छागपशुन्यायेनोपासनारूपज्ञाने पर्यवसानमित्यभिप्रेत्य तथाभूतानि वाक्यानि पृथगुदाहरति—ज्ञात्वेति।

ननूदाहृतेषु वाक्येषु विधेयज्ञानस्य मोक्षजनकत्वमेव प्रतीयते, न तु मोक्षजनकसाक्षात्कारजनकत्वमित्याशङ्क्योदाहृतश्रुतीनामुपबृंहणानुसारेण

(श्वे० उ० ३.७) इत्यादिषु च । तथाहि—"श्रोतव्यः श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिः । ज्ञात्वा च सततं ध्येय एते दर्शनहेतवः ॥" इत्यत्र श्रवणमननसम्पन्नज्ञानाविनाभूतं निदिध्यासनं ब्रह्मणः साक्षात्कारे निमित्तमिति स्मर्यते । अत उपासनारूपज्ञानं मोक्षफलं विधीयते । "आत्मन्येवात्मानं पश्येत्" (बृ० उ० ४.२.२३), "शम्भुराकाशमध्ये ध्येयः", "तज्जलानिति शान्त उपासीत", "इति प्राचीनयोग्योपास्व" (तै० उ० १.६.२) इत्यादिषु च । तथा—"ब्रह्मविदाप्नोति परम्" (तै० उ० २.१.१) इत्यादिषु ब्रह्मस्वरूपोपासना-

---

साक्षात्कारद्वारा मोक्षजनकत्वे तात्पर्यं न तु साक्षादिति दर्शयितुमुपबृंहण-मुदाहरति—तथा हीति । श्रवणेति । श्रवणेन जातमुपपत्त्यनुचिन्तनरूपेण मननेन स्थिरीकृतं च ज्ञानं श्रवणमननसम्पन्नज्ञानं तेन कारणभूतेनाविनाभूतं निदिध्यासनं ध्यानम् । स्वार्थे सन्प्रत्ययः । अत इति । मोक्षजनकसाक्षात्कार-साधनत्वादेवोपासनारूपं ज्ञानं मोक्षफलं विधीयते, न तु साक्षान्मोक्षसाध-नत्वादिति भावः । पूर्वं फलयुक्तान्युपासनावाक्यान्युदाहृतानि । इदानीं गुणयुक्तवाक्यान्युदाहरति—आत्मनीति । शरीरे हृदयाकाशमध्य इत्यर्थः । तद्विवरणार्थं द्वितीयोदाहरणम् । शान्त उपासीतेति शमगुणयुक्तोपासना-विधिः । इति प्राचीनयोग्योपास्वेति व्याहृतिशरीरकत्वादिगुणयुक्तोपासना-विधिः । तत्र प्राचीनयोग्येति शिष्यसम्बोधनम् । इतिशब्दः प्रागुक्तप्रकार-परामर्शी । चकारः पूर्वोदाहृतश्रुतिभिः समुच्चयार्थः । ब्रह्मस्वरूपं तदुपासना-प्रकारं तत्फलविशेषं च विवेचयन्तीं श्रुतिमुदाहरति—तथेति । ब्रह्म-विदाप्नोति परमित्युपक्रम्य किं तद्ब्रह्म कथं तद्वेदनीयं तद्वेदनेन प्राप्यं फलं कीदृशमित्याकाङ्क्षायां तत्त्रितयविवेचनार्थं ऋक्सद्भावं तदेषाभ्युक्तेति प्रतिज्ञाय सा ऋगुदाहृता—"सत्यं ज्ञानमनन्तं ब्रह्म । यो वेद निहितं गुहायां परमे व्योमन् । सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता" (तै० उ० २.१) इति । अत्र प्रथमपादेन ब्रह्मस्वरूपमुक्तम् । द्वितीयपादेनो-पासनाप्रकारः । तृतीयपादेन निरतिशयब्रह्मानन्दरूपं फलमुक्तम् । मानुषादि-हिरण्यगर्भान्तेषु यावन्तो भोगास्तेषां सर्वेषां सहत्वे यावानानन्दस्तावान्निर-

तत्फलादिकमुपदिश्यते । अन्यथा सत्यत्वादिविशिष्टब्रह्मणा सह कथं सकलकामावाप्तिः फलं तादृशब्रह्मसाक्षात्करणं च सिद्धयति । तस्मात्—"सत्यं ज्ञानमनन्तं ब्रह्म" (तै० उ० २.१), "आनन्दो ब्रह्म" (तै० उ० ३.६), "आकाशशरीरं ब्रह्म सत्यात्म प्राणारामं मनआनन्दं शान्तिसमृद्धममृतम्" (तै० उ० ३.६), "ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम् । ऊर्ध्वरेतं विरूपाक्षम्" (महाना० १२.१) इति सत्यज्ञानानन्तरूपं स्वात्मारामभुपशान्तसकलोपद्रवकलङ्कं सकलमङ्गलात्मकं परमशक्त्यविनाभूततया शबलरूपत्वेन कृष्णपिङ्गलं विरूपाक्षं त्रिलोचनं ब्रह्म उपक्रमादितात्पर्यलिङ्गैर्निरूप्यते । "यो वेद निहितं गुहायाम्" (तै० उ० २.१), "इति प्राचीन-

---

तिशयब्रह्मानन्दो हि तेन लक्षणया प्रकाश्यते । चतुर्थपादेन ब्रह्मविद्यया तत्साम्यप्राप्तिरुच्यते । तत्र ब्रह्मणा सहेत्यनेन ब्रह्म यावन्तं स्वात्मानन्दमनुभवति, तावन्तं तदीयमानन्दं मुक्तोऽप्यनुभवतीति मुक्तस्य ब्रह्मणा परमसाम्यं प्रकाश्यते ।

ननु वेदान्तेषूपासनाविधयस्तत्र तत्र प्रतीयन्तां नाम, तथापि तेषां तात्पर्यलिङ्गसद्भावाद् ब्रह्मण्येव प्रामाण्यं नोपासनाविधिष्वित्याशङ्क्य तेष्वपि तात्पर्यलिङ्गसद्भावं दर्शयति—अन्यथेति । यद्युपासना विधीयेरन् तदोक्तफलावाप्तिस्तदुपयोगिब्रह्मसाक्षात्कारोदयश्च न स्यात् । तदभावे सर्वैर्वेदान्तैर्महातात्पर्येण ब्रह्मणः प्रतिपादनमपि विफलं स्यात्, तत्प्राप्त्युपायोपदेशेनैव तत्साफल्यस्योपपादनीयत्वात् । तस्मात् स्वाध्यायविध्यापादितं ब्रह्मपरवाक्यानां पुरुषार्थपर्यवसायित्वं तत्प्राप्त्युपायविधानं विना न सम्भवतीत्युपपत्तिरूपं तात्पर्यलिङ्गमुपासनाविधिष्वप्यस्तीति भावः । एवं च वेदान्तानां ब्रह्मणि विधौ च तात्पर्यसत्त्वादुभयत्रापि प्रामाण्यं सिद्धमित्युपसंहरन् ब्रह्मपरवाक्यान्युपासनापरवाक्यानि च विविच्योदाहरति—तस्मात् सत्यं ज्ञानमित्यादिना । उदाहृतेषु ब्रह्मपरवाक्येषु कैश्चित् पदैः सिद्धं रूपं संगृह्णाति—सत्यज्ञानेत्यादिना । इदं पदान्तरोपात्तधर्मविशेषणानामप्युपलक्षणम् । उपक्रमेति । उपक्रमादीनि तात्पर्यलिङ्गानि येषां तथाभूतै-

योग्योपास्व" (तै० उ० १.६.२) इति ज्ञानाविनाभूतं तदुपासनं च विधीयते। "सर्वान् कामान्" (तै० उ० २.५) इत्यादिषु सकलकामावाप्तिर्ब्रह्मणा सहोपासकानामवगम्यते । अतो निष्कामनिजधर्मोपेतो निषिद्धकाम्यकर्मरहितो यथाश्रुतिस्मृतिचोदितकर्मानुष्ठानसम्पन्नचित्तशुद्धिः शमाद्यनुगृहीतपरमशिवभक्तिभावित एव मुमुक्षुः श्रुतिसारेभ्यः शिवाभिधेयं परं ब्रह्म विदित्वा तदुपासीतेति ज्ञानोपासनाविधिरुपपन्नः । अत्र शिवोपपदग्रहणं विरूपाक्षस्य ब्रह्मणः परमविशुद्धिमङ्गलभाजनत्वान्मुमुक्षूणामुपासनैकविषयत्वद्योतनार्थम् । तथाऽथर्वशिखायाम्—"शिव एको ध्येयः शिवङ्करः सर्वमन्यत् परित्यज्य" (अ० शिखो० ३) इति श्रूयते शिवशब्दवाच्यस्य वस्तुन एव

वेदान्तैर्वेदान्तवाक्यैर्निरूप्यते, उक्तरूपं ब्रह्म प्रतिपाद्यत इत्यर्थः। ज्ञानाविनाभूतमिति। श्रवणमननसम्पन्नज्ञानाविनाभूतमित्यर्थः। सर्वान्कामानित्यादिना वेदान्तानामुदाहृतेषूपासनाविधिषु तात्पर्यलिङ्गसद्भावं पूर्वोक्तदृढीकरणाय स्मारयित्वा तात्पर्यलिङ्गसद्भावाद् ब्रह्मपरेषु वेदान्तेषु उपासनाविधिरप्युपपन्न इत्युपसंहरन् उपासनाविधौ यावदुक्तविशेषणविशिष्टमधिकारिणं दर्शयति—अत इत्यादिना।

ज्ञानोपासनाविधिरित्यस्य पूर्ववज्ज्ञानाविनाभूतोपासनाविधिरित्यर्थः। सर्वत्रोपासनस्य श्रवणमननसम्पन्नज्ञानाविनाभावोक्तिरुपासनाविध्यपेक्षितज्ञानोत्पत्त्यर्थे श्रवणे मनने च स्वतःप्राप्तिसम्भवेन तस्य विध्यनपेक्षासूचनार्था। 'शिवाभिधेयं परं ब्रह्म' इति भाष्यकृता शिवोपपदग्रहणं कृतम्। एवमेव प्रायः पूर्वोत्तरग्रन्थेष्वपि क्रियते। तस्य तात्पर्यं "स्वपदानि च वर्ण्यन्ते" इति भाष्यलक्षणानुसारेण स्वयमेव दर्शयति—अत्रेति। संसारमूलमलोच्छेदरूपा परमविशुद्धिः सत्यसङ्कल्पत्वादिमङ्गल्यगुणवत्त्वं च मुमुक्षुणा प्रेप्सितम्। तदुभयमपि शिवशब्दार्थ इति प्राग्वायुसंहितावचनोदाहरणेन दर्शितम्। अतस्तत्क्रतुन्यायेन मुमुक्षोः शिव एवोपास्य इति द्योतनार्थं सर्वत्र शिवोपपदग्रहणं क्रियत इत्यर्थः। मुमुक्षोः सकलेतरदेवतापरित्यागेन शिव एवोपास्य इत्यत्र श्रुतिमुदाहरति—तथेति। तथाभूतस्य

ध्येयत्वमिति । अन्यथा कथं संसारनिवृत्तिः । निरस्तसमस्तदोषकलङ्कनिरतिशयमङ्गलाधारत्वं हि शिवत्वम् । यद्विज्ञानान्मोक्षरूपं फलमुच्यते । "यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः । तदा शिवमविज्ञाय दुःखस्यान्तो भविष्यति ॥" (श्वे० उ० ६.२०) इति । "शिव एको ध्येयः शिवङ्करः सर्वमन्यत् परित्यज्य" (अ० शिखो० ३) इति शिवव्यतिरिक्तस्य मुमुक्षूणां ध्येयत्वं परिसंख्यायते । अतः शिव एव परं ब्रह्म मोक्षकामैर्ध्यातव्यो ज्ञातव्यश्चेति । अतस्तात्पर्यलिङ्गसमन्वयेन ब्रह्मपरा वेदान्तास्तदुपासनापराश्चेत्यविरोधः ॥

इति समन्वयाधिकरणम् ॥ ४ ॥

शिवस्योपासनां विना मुक्तिर्न सम्भवतीत्याह—अन्यथेति । अत्र श्रुतिमुदाहरति—यदेति । यदित्यर्थः । अतः शिवोपासनां विना मुक्त्यसम्भवादन्यत्र मुमुक्षुप्रेप्सितस्य शिवत्वस्य नित्यसिद्धस्याभावाच्च सकलेतरपरित्यागेन मुमुक्षुभिः शिव एव ध्येय इति प्रतिपादयन्त्यथर्वशिखाश्रुतिरुपपन्नार्थेत्याह—शिव एक इति । अतो मोक्षकामैः शिव एव ध्यातव्यः साक्षात्कर्तव्यश्चेति युक्तमित्याह—अतः शिव एवेति । परमप्रकृतमुपसंहरति—अत इति ।

॥ इति समन्वयाधिकरणम् ॥ ४ ॥

ग्रन्थग्रन्थकार-मतमतान्तरसूची

अथर्वशिखा १०२, २६७
अथर्वशिरस् १०२, १८१
अन्यदीयभाष्यम् १४
अन्ये ११, १५६
अपरे १५७
अभिधानकोशः ३३
अभियुक्ताः ५६, ११२, १४६
अमरकोशः ३३, १७०
अर्थशास्त्रम् २१७
अष्टादशविद्याः २१६
अस्माभिः १०९, १२९-१३०, १४०, १८८
आगमाः ११२, १३८, १५५, २१७, २४०
आचार्यः ६
आचार्यदीक्षितः १
आथर्वणोपनिषत् ४, ५
आनन्दवल्ली ६
आपस्तम्बः १२६, १७६-१७७, २४१, २४२
आपस्तम्बसूत्रम् १५५, १७७
आपस्तम्बीयाः १७६-१७६
आयुर्वेदः २१७
आर्षवचनम् ३
आलङ्कारिकाः ३२
आश्वलायनः १७६, १८५
आश्वलायनधर्मशास्त्रम् १८६
आश्वलायनसूत्रम् १७७
आहुः ३, २२, २६
इतिहासः ८६, ११२, १३८, १८९, २१७
उपनिषत् २२, १९०
ऋग्वेदः २१४, २५२
एकदेशिमतम् २६२
औपनिषदवाक्यम् १९४
कठवल्लीश्रुतिः ५, ९८
कणादसूत्रम् २९, ४८
कर्ममीमांसकाः २६
कर्ममीमांसा १०२
कर्मविपाकशास्त्रम् २३, ६१
कल्पसूत्रम् ७१, ७२, ८६, १६७
कल्पसूत्रकारः ४५
कालिदासः २१४
काव्यम् १४९, २१३, २४९
काव्यलक्षणविदः १९
काव्यालङ्कारशास्त्रम् ५३
कुमारसम्भवम् २१४
कूर्मपुराणम् ४, १५८, १७३ १७५, १८५-१८७, १८९
केचन ३
केचित् ११, २२, ३१, १५२, १५६, १५८, २१३
कैयटः १५३
कैवल्योपनिषत् ५
कोशः २३७
क्षपणकर्षिः २१५

गान्धर्वम् २१७
गुरुमतम् ६०, १४४
गौतमसूत्रम् (न्या०) १३१, १४२
गौतमस्मृतिः ५६
चतुर्मतसारः १४०
चार्वाकः ७०
चिन्नबोम्मनृपतिः २
छान्दोग्योपनिषत् ५, १८४
जयादित्यः ४९
जैनव्याकरणम् २१५
जैमिनिः ३०, ४८-५२
जैमिनिसूत्राणि ९, १२, १४
जैमिनीयम् ३०
ज्ञानकर्मसमुच्चयवादी ५८, ६४-६५
तन्त्ररत्नम् २०५
तन्त्रवार्त्तिकम् २१४, २५२-२५३
तन्त्रान्तरम् १३९
तलवकारोपनिषत् १००, १९१
तार्किकाः २११, २१९-२२२, २३२, २३४
तैत्तिरीयाः २५६
तैत्तिरीयोपनिषत् ३, ४
धनुर्वेदः २१७
धर्ममीमांसाशास्त्रम् २१, २२, २४, १२८, १३४
धर्ममीमांसासूत्रकृत् २४
धर्मविचारशास्त्रम् २७, २९
धर्मशास्त्रम् ७२, २१७
नयविवेकः ३८
नाटकम् २४९
नानार्थकोशः १७०
निघण्टुः १५७, १८०
निरीश्वरवादः १११
निरुक्तम् ४६
नैयायिकाः ९७, १३२, १३९, १४१, १४८, १५९, १६०, १९५
न्यायभाष्यम् १९६
न्यायमतम् १५२, २३५
न्यायवित् २३५
न्यायशास्त्रम् १४४, १६२, २१७
न्यायसूत्रम् ८७, २३५
पतञ्जलिः २, १२२
परभाष्यम् १४, १७, १८
परमतम् १६
परव्याख्यानम् १३
पराशरः १००
परैः ३८
पाञ्चरात्रम् १४
पाणिनिः २, १६२, २२४
पारिजातसंहिता (हरि०) २०
पाशुपतागमः ९
पुराणम् १, ४, ८, ८४, ८६, १००, १३८, १८०, १८६, १८९, १९०, २१६, २१७, २२०, २२२, २२७, २५७
पूर्वतन्त्रम् ६५, ११४-११६, १३६
पूर्वमीमांसकाः ५९, ११५, २१९
पूर्वमीमांसा १२९, २३१
पूर्वाचार्याः ९, १३
पौराणिकाः ४, २६, १०१, १८०
प्रपञ्चसारः ५
प्राभाकराः ३४

बादरायणः २, १८, २२, ३२ ५१, ५२, १४५
बुद्धाद्यागमाः २१५
बृहदारण्यकोपनिषत् ४
बोधायनसूत्रम् १७७
बौद्धाः १३३
ब्रह्मसूत्रम् १, २, ५०
भट्टपादः ३६
भवदासः ३१
भागवतपुराणम् १८२
भाष्यकारः १७, २२, २८, ४८, २४८
भाष्यकृत् १४५
भाष्यान्तरम् १३, १५०, २१३
(भट्ट)भास्करः १७४
मध्वविध्वंसनम् १२९, १३०
महाभारतम् १, ३, ८४, ११२, १७७, २१९
महाभाष्यम् १८, ८४, २४८, २५२
मीमांसकप्रवादः ४१
मीमांसकमर्यादा २०५, २३५
मीमांसकाः २०५, २२२, २५२
मीमांसाशास्त्रम् २२, ४८, २१७
मुण्डकश्रुतिः १६, ९८
मुण्डकोपनिषत् ९४, १८२
मोक्षकारिका १३७
यजुर्वेदारण्यकभाष्यम् १७४
योगशास्त्रम् १५४, १५५, २०८
योगाचार्याः १, ९
रङ्गराजमखी १
वामनः ४९
वामनजयादित्यवृत्तिः ४९
वायुसंहिता १५८
वार्त्तिकम् (पा०) १७, १८
वार्त्तिकम् (मी०) ५०, ५३, ५५ २५२
वाशिष्ठकल्पसूत्रम् ७२
विधिरसायनम् १०९
विवरणम् ६०
विष्णुपुराणम् १८६, १८९
वृत्तिः १९०
वृद्धनैयायिकाः १५१
वृद्धप्रसिद्धिः ७७
वेदव्यासः २
वेदाः १७०, २१४-२१६, २१८-२२३, २२५, २२७, २२९, २५२, २५७
वेदान्तप्रामाण्यवादी २४१
वेदान्तमीमांसा २
वेदान्तशास्त्रम् २२, ९६, २०६, २०७, २१२, २१६, २३०-२३२, २३५-२४३, २५०-२५३, २५७-२६४, २५६, २६८
वेदाङ्गानि ७३
वैद्यशास्त्रम् २३, ५३, ६१, ७६, ८४, २१५
वैद्यशास्त्रकृत् २३
वैयासिकभाष्यम् १५५
वैयासिकसूत्राणि १२
वैशेषिकाः २६
व्याकरणस्मृतिः १०, १२, ४१, ४२, ४६, ७१-७३, १२२, १७७, २१५, २२४, २३७

व्यासः ३०
व्याससूत्रम् ९, १२, १७-१९
शङ्करः १
शाङ्करभाष्यम् १४
शाबरभाष्यम् ११५
शाब्दिकाः २९
शिवतत्त्वविवेकः १८८
शिवपुराणम् १०२, १८८, १८९
शीक्षा ४१
शुष्कतार्किकाः २१०, २१२
शैवकर्णामृतम् १८८
श्रीकण्ठाचार्यः २, ९, १३, १८, १९
श्रुतिः ४, १०, १६-२०, २४, २५, २८, ३४, ३७, ५७, ६४, ९१, १०५, ११३, ११४, ११९, १२१, १२३-१२५, १२७, १२८, १३७, १३८, १४०, १४५, १५२, १५७, १५८, १६१, १६४-१६६, १६८, १६९, १७१-१७३ १७६-१७८, १८०, १८१, १८३, १८६, १९०, २०९, २१०, २१२, २१४, २१६, २१७, २१९, २२२, २२३ २२६, २२७, २४१, २५०, २५३, २५६, २६७
श्वेताश्वतरोपनिषत् १२२, १६१, १८६, १८८, १८९, २२८
श्वेताचार्यः ८, ९
सङ्कर्षणाख्या चतुरध्यायी ५०
सांख्यमतम् २४१
साम्प्रदायिकाः ४८
साम्बपुराणम् १८२
सुबालोपनिषत् १८४
सूत्रकारः ३२, १५७
स्कान्दवचनम् ९९, १००
स्मृतिः १, १७, ३२, ३७, ४०, ४१, ८४, ८६, ९७, १००, १११, ११९, १३७, १३८, १५४, १८६, २१९, २२०, २५७, २६२, २६७
हरिवंशः २०, १७९, १८५
(भर्तृ)हरिः ३६
हैरण्यगर्भाः ११२, १८९

संकेतसूची

अ.को.	अमरकोशः
अ शिखो.	अथर्वशिखोपनिषत्
अ.शिर.	अथर्वशिर उपनिषद्
आप.गृ.	आपस्तम्बगृह्यसूत्रम्
आप.ध.	आपस्तम्बधर्मसूत्रम्
आप म.	आपस्तम्बीयमन्त्रपाठः
आप.श्रौ.	आपस्तम्बश्रौतसूत्रम्
आश्व.	आश्वलायनः
आश्व.ध.	आश्वलायनधर्मसूत्रम्
इ उ.	इतिहासोपनिषत्
ई उ.	ईशावास्योपनिषत्
उ.सू.	उणादिसूत्रम्
ऋ.	ऋग्वेदः
ऐ.उ.	ऐतरेयोपनिषत्
ऐ.ब्रा.	ऐतरेयब्राह्मणम्
क.उ.	कठोपनिषत्
का.वृ.	काशिकावृत्तिः
का सं	काठकसंहिता
कु.स.	कुमारसम्भवकाव्यम्
कू.पु.	कूर्मपुराणम्
के.उ	केनोपनिषत्
कै.उ.	कैवल्योपनिषत्
गौ.स्मृ.	गौतमस्मृतिः
च.सा.	चतुर्मतसारः
छा.उ.	छान्दोग्योपनिषत्
जै.सू.	जैमिनिसूत्रम्
त.भा.	तर्कभाषा
त र	तन्त्ररत्नम्
त.वा.	तन्त्रवार्त्तिकम्
ता.ब्रा.	ताण्ड्यमहाब्राह्मणम्
तै.आ.	तैत्तिरीयारण्यकम्
तै.उ.	तैत्तिरीयोपनिषत्
तै.ब्रा.	तैत्तिरीयब्राह्मणम्
तै.सं	तैत्तिरीयसंहिता
धा.	धातुपाठः
न.वि.	नयविवेकः
ना.पु.	नारदीयमहापुराणम्
नै.का.	नैषधकाव्यम्
न्या.भा.	न्यायसूत्रभाष्यम्
न्या सू.	न्यायसूत्रम्
पा.ग.सू.	पाणिनिगणसूत्रम्
पा.म.	पाणिनिसूत्रमहाभाष्यम्
पा.म.प.	पाणिनिसूत्रमहाभाष्यपस्पशाह्निकम्
पा.वा.	पाणिनिसूत्रवार्त्तिकम्
पा.सू.	पाणिनिसूत्रम्
प्र.उ.	प्रश्नोपनिषत्
बृ.उ.	बृहदारण्यकोपनिषत्
बृ.वा.	बृहदारण्यकवार्त्तिकसारः
बौ.गृ.	बौधायनगृह्यसूत्रम्
बौ श्रौ.	बौधायनश्रौतसूत्रम्
ब्र.पु.	ब्रह्माण्डपुराणम्
ब्र.सू.	ब्रह्मसूत्रम्
भ.गी.	भगवद्गीता

भा.पु.	भागवतमहापुराणम्	वा.पु.	वायुपुराणम्
महाना.	महानारायणोपनिषत्	वा.रा.	वाल्मीकिरामायणम्
म.भा.	महाभारतम्	वा.स्मृ	वाधूलस्मृतिः
म.वि.	मध्वविध्वंसनम्	वि.पु.	विष्णुपुराणम्
म.स्मृ.	मनुस्मृतिः	वै.सू.	वैशेषिकसूत्रम्
महो.	महोपनिषत्	श.ब्रा.	शतपथब्राह्मणम्
मु.उ.	मुण्डकोपनिषत्	शा.ब्रा.	शाङ्खायनब्राह्मणम्
मै.उ.	मैत्रायण्युपनिषत्	शा.भा.	शाबरभाष्यम्
मै.सं.	मैत्रायणीसंहिता	शि.पु.	शिवपुराणम्
मो.का.	मोक्षकारिका	श्लो.वा.	श्लोकवार्त्तिकम्
य.भा.भा.	यजुर्वेदभास्करभाष्यम्	श्वे.उ.	श्वेताश्वतरोपनिषत्
यो.भा.	योगसूत्रव्यासभाष्यम्	ष.ब्रा.	षड्विंशब्राह्मणम्
यो.सू.	योगसूत्रम्	सा.पु.	साम्बपुराणम्
र.वं.	रघुवंशकाव्यम्	सि.मु.	सिद्धान्तमुक्तावली
रौ.वा.	रौरववार्त्तिकम्	सु.उ.	सुबालोपनिषत्
वा.प.	वाक्यपदीयम्	स्क.पु.	स्कन्दपुराणम्

——

उद्‌धृतवचनानुक्रमणी

अकादिप्रयोगेऽप्रति० १८ पा.वा.२.३.६६

अक्षय्यं ह वै चातु० ७१, ११७ श.ब्रा. २.५.४.१

अक्षरमम्बरान्त० १५७, १५८ ब्र. सू. १.३.१०

अगोज्ञाय कश्चिद् २४८, पा.म. १.१.१

अग्नये जुष्टं निर्व० १०७ तै. सं. १.१.४.२

अग्निमीळे पुरोहितं ५ ऋ. १.१.१

अग्निरग्रे प्रथमो १३६ तै.ब्रा. २.४.३.३

अग्निर्मुखं प्रथमो १३६ का.सं. ४.१६

अग्निर्मूर्धा दिवः २५८ तै.ब्रा.३.५.७.१

अग्निर्हिमस्य २४१ तै.सं. ७.४.१८.२

अग्निष्टोमेनानु० ८३

अग्निहोत्रहवण्या १०८ आप. श्रौ. १.१७.१०

अग्निहोत्रं जुहुयात् ४३, १०४, २०३ मै. उ. ६.३६

अग्निहोत्रं जुहोति ५८, १०२, १०५, २०३, ३०४ तै.सं. १.५.९.१

अग्निं चित्वा सौत्रा० ५८, ५९ आप. श्रौ० १७.२४.१

अग्ने त्रीते वाजिना ११ तै. सं. २.४.११.२

अङ्गुष्ठमात्रः पुरुषः ११३ कठो. ४.१३

अचेतनत्वात् १८८ शि.पु. ७.२.७.१५

अजात इत्येव १४७ श्वे. उ. ४.२१

अज्ञानप्रभवं २५२

अटेत पृथिवीं १२६

अणुश्यामता १३१ न्या.सू. ४.१.६८

अणोरणीयान् १३९, २५६, २५७ तै.आ. १०.१०.१; महाना० ८.३

अत ऊर्ध्वं त्रयो० ३८. म.स्मृ. २.३९

अत एव च नित्य० ११३ ब्र.सू.१.३.२

अतः समुद्रा गिर० १९४ मु.उ. २.१.९

अतिथौ तत्प्रधान० ५२ जै.सू. ९.१.१०

अत्ता चराचर० १५८ ब्र.सू. १.२.९

अत्यन्तपरिशुद्धात्मा ७ शि. पु. ६.९.७

अथ कस्मादुच्यते १०२ अ. शिर. ३.५

अथ कस्मादुच्यते १८१-१८२ अ. शिर. ३.४

अथ काम्यानि ३८ आप.ध. १.१.१.२०

अथ परा यया १२१ मु.उ. १.५

अथ य इहात्मा ५ छा.उ. ८.१.६

अथ योगानुशासनम् २९, ३१ यो.सू. १.१

अथवात्यन्तकल्या० ७ शि. पु. ६.९.८

अथ शब्दानुशासनम् २९ पा.म.प.

अथातः शेष० ४९-५० जै.सू. ३.१.१

अथातोऽग्निमग्नि० ८३, २०२, २३५

अथातो धर्मजिज्ञासा० २१, २६, ३१, ४८-५०, १०२, ११६, ११९, १४३ जै.सू. १.१.१

अथातो धर्मं २९, ४८ वै.सू. १.१.१

अथातो ब्रह्मजिज्ञासा २७, ४९-५१, २३१ ब्र. सू. १.१.१

अथापि स एवायं २४२ आप.ध.२.२४.२

अथापि संकल्प० १५५आप.ध.२.९.२३.६

अथाप्यस्यप्रजाति० २४१-२४२ आप.ध. २.२४.१
अथैष ज्योतिः १०३ ता.ब्रा.१६.८.१
अधिकं च विवर्णं २६ जै.सू. ९.२.३९
अधिकं तु भेद० १३ ब्र. सू. २.१.२२
अधिष्ठिताः केन १५९ श्वे. उ. १.१
अधीत्य स्नायात् ७३ आप.गृ. ५.१२.१
अध्वनामध्वपते १७६आ.म.ब्रा.२.३.३२
अध्वर्युर्गृहपतिं १०५श.ब्रा.११.१.१.१०
अनन्ता वै वेदाः २२५तै.ब्रा.३.१०.११.३
अनन्तैश्वर्ययोगा० १७३कू.पु.२.३१.३६
अनन्यत्रभावो २९
अनवधारणज्ञानं १५१ न्या.भा. २.१.१
अनादिनिधना २२९म.भा.१२.२२४.५५
अनादिमलसंश्ले० ७ शि. पु. ६.९७
अनावृत्तिः शब्दात् ४९ ब्र.सू. ४.४.२२
अनिष्टो यस्त्वशक्त०२५३त.वा.३.१.१३
अनुकृतेस्तस्य च १४ ब्र. सू. १.३.२२
अनुत्पादाच्च १८५ कू. पु. १.४.६०
अनुर्लक्षणे १४६ पा.सू. १.४.८४
अन्तर्धाने तिर्य० १५७ निघण्टुः
अन्तर्धौ येना० १७ पा. सू. १.४.२४
अन्तर्याम्यधिदै० १५८ ब्र.सू. १.२.१८
अन्तःप्रविष्टः ९८ तै. आ. ३.११
अन्ते तु बादरा० १० जै.सू. ५.२.१९
अन्नं ब्रह्म १२५, १२८, १३३, १३५, १३८ तै. उ. ३.२
अन्नेन सोम्य २०६, २१२, २४१ छा. उ ६.८.४
अन्योऽन्तर आत्मा १७१ तै. उ. २.५
अपहतपाप्मा १५५ छा. उ. ८.१.५
अपाम सोमममृता ११७ ऋ. ८.४८.३
अपि वा यश्चण्डालः ३
अपि वा शब्दपूर्व० ५१ जै. सू. ९.१.९
अपि वा शेषभाजां ९ जै. सू. ६.४.३
अ प्रत्ययात् १२० पा. सू. ३.३.१०२
अप्रमेयोऽनया १८८ शि.पु. ७.२.७.१८
अप्राप्ते शास्त्र० १९४, २३५ [1]शा.भा. ६.२.१८
अब्जजो भगवा० १८६ कू. पु. १.९.४
अमित्रजिन्मित्र० १४९ नै. का. १.१३
अम्बिकापतये २५६ महाना. १३.४
अयनं तस्य सा १८५ कू. पु. १.६.५
अयमात्मा ब्रह्म २८, १२३-१२५, १२७, १२८, १३०, १३३-१३५ बृ. उ. २.५.१९
अयस्मयादीनि ४१ पा. सू. १.४.२०
अयं च लोकः १६७ बृ. उ. ४.५.११
अरुणया क्रीणाति २६, १०३ तै. सं. ६.१.६.७
अर्तिस्तुसुहुसृ० ४, २४ उ. सू. १४५
अर्थवादाद्यव० ११५
अर्थवादोपपत्ती २५१
अर्थी समर्थो विद्वान् २८ [2]शा. भा. ६.१.५; १०.२.५६
अर्थैकत्वादेकं ११३ जै. सू. २.१.४६
अर्धमन्तर्वेदि ९५ मै. सं. ३.९.४
अल्पश्रुतेरिति १४ ब्र. सू. १.३.२१
अवतेष्टिलोपश्च ४ उ. सू. १४७

१. आनुपूर्वी नोपलभ्यते ।
२. आनुपूर्वी नोपलभ्यते ।

अवाप्य संज्ञां १८६ कू. पु. १.१०.१८
अविद्यया मृत्युं ६५ ई.उ. ११
अविद्यायां बहुधा १२० मु. उ. १.२.९
अविलङ्घ्या च १८८ शि.पु.७.२.७.१३
अवैद्यत्वादभावः ४१ जै. सू. ६.१.३६
अव्यक्तमक्षरे १८४ सु. उ. २.२
अव्यक्तात् पुरुषः ९९ कठो. ३.११
अव्ययादाप् सुपः ४ पा. सू. २.४.८२
अश्विनोर्बाहुभ्यां ४६ तै. सं. १.१.१.१
अष्टन आ विभक्तौ १८१पा.सू.७.२.८४
अष्टवर्षं ब्राह्मण० ३४, ३७
अष्टादशानामेतासां २१६ शि. पु. ७.१.१.२७
अष्टावध्वर्युर्विहारे ११०
अस्मान्मायी सृजते २१७ श्वे. उ. ४.९
अस्य महतो भूतस्य १६७,२१३,२१६ बृ. उ. २.४.१०; ४.५.११
अस्याध्यक्षः परमे १२५ ऋ.१०.१२९.७
अहमेवेदं सर्वो० ४ बृ. उ. ४.३.२०
अहं ब्रह्मास्मि १२५,१२८ बृ.उ.१.४.१०
आकाशशरीरं १७२,२६५ तै. उ. १.६
आकाशस्तल्लिङ्गात् ११३,११४,१२४ ब्र. सू. १.१.२२
आकाशो ह वै १७३ छा. उ. ८.१४.१
आकाशो ह्येवैभ्यो ११४ छा.उ. १.९.१
आग्नावैष्णव० ११० तै. सं. २.२.९.१
आग्नेय पशुरग्नि० १२
आग्नेयों मूर्ति० १०० स्क. पु.
आचान्तेन कर्तव्य ८३ शा.भा. १.३.५
आचार्यकुलाद् ११९ छा. उ. ८.१५.१
आचार्याय दक्षिणा ३४
आज्यभागौ यजति ४३, ५१, ८८, १०९ मै. सं. १.१०.१५
आज्यहविरुपांशु० १६७ आप. श्रौ. २.१९.११
आज्येन शेषं ४५ तै. सं. ६.६.६.२
आतिवाहिकस्त० ११४ ब्र. सू. ४.३.४
आत्मन आकाशः १६६ तै. उ. २.१
आत्मनात्मान०[1] १५४ भ. गी. ६.५
आत्मन्येवात्मानं २६१ बृ. उ. ४.२.२३
आत्मानमरणिं १३९, १४० कै. उ.११
आत्मानं पश्येत् २५९-२६०सु.उ.९.१४
आत्मा ब्रह्मेत्यधीतः १४० च. सा.
आत्मा वा अरे २५७-२६० बृ.उ.२.४.५
आत्मा वा इदमेक १८८ ऐ. उ. १.१
आत्मा श्रोतव्यः ८८ बृ उ. २.४.५
आत्मीयां मतिमास्थाय[2] ३२
आदरादलोपः ११५ ब्र. सू. ३.३.३९
आदिकर्ता कविः २१६-२१७ शि. पु. १.१.२७
आदित्यो ब्रह्म १२९,१३३ छा.उ.३.१९.१
आदौ वेदमयी २२९ म.भा. १२.२२४.५५
आधारोऽधिकरणम् ३१ पा.सू. १.४.४५
आधृषाद्वा १२० पा. ग. सू.
आनन्दमयोऽभ्या० ११४ ब्र.सू.१.१.१३
आनन्दं ब्रह्मणो २२५ तै. उ. २.४
आनन्दाद्ध्येव ९८, १४७, १६४, १६७, १९१ तै. उ. ३.६

---

१. उद्धरेदात्मनात्मानमिति भगवद्गीतापाठः ।

२. काव्यप्रकाशे ४ उल्लासे दृश्यते ।

आनन्दो ब्रह्मेति १६८, १७१, १७२, २६६ तै. उ. ३.६

आन्महत: समाना० १८१ पा.सू. ६.३.४६

आप: स्वभावतो मेध्या: २४१

आपो देवी: १०७-१०८ मै. सं. १.२.१

आपो नारा इति १८५ कू. पु. १.६.५

आपो ह वा इद० १८६ तै.सं ७.१.५.१

आप्रायणात् ११७ ब्र. सू. ४.१.१२

आमनस्यामनस्य ११२ तै.सं.२.३.९.३

आम्नायस्य क्रिया० १५,५१जै.सू.१.२.१

आयुराशास्ते १०९ तै. सं. २.६.९.९

आवश्यकाधमर्ण्य० २० पा.सू. ३.३.१७०

आविरासीन्महा० १८७कू.पु.२.३७.१५३

आवृत्तिरसकृदुप० ११७ ब्र. सू. ४.१.१

आसुप्तेरामृते: २६२

आस्य प्रजायां ७० तै. सं. ३.२.९.६

इतरपरामर्शात् १५ ब्र. सू. १.३.१८

इतराभ्योऽपि १६३ पा.सू. ५.३.१४

इतरेण तु १६४ कठो. ५.५

इतिकर्तव्यताका० ११५

इतिकर्तव्यताभा० ५३

इति प्राचीनयोग्यो०२६५-२६७तै.उ.१.६

इतिहासपुरा० १८९ वा. पु. १.२००

इत्थंभूतलक्षणे १४६ पा. सू. २.३.२१

इत्यश्वाभिधानी० ८९, २०१ तै. सं. ५.१.२.१

इत्येवं मन्यमानानां १८७ कू. पु. २.३७.१५३

इदमेव लिङ्गं मुक्ता० १७४ य.भा.भा.

इदि परमैश्वर्ये १९० धा. भ्वा. ६३

इन्द्रस्य सख्य० ११८ तै.ब्रा.३.७.६.१४

इन्द्रियजन्यं ज्ञानं १४४ सि. मु. ५२

इन्द्रियार्थसन्नि० २३५ न्या सू. १.१.४

इन्द्रो यातो १३६ ऋ. १.३२.१५

इमं चोदाहरन्त्यत्र १८५ कू. पु १.६.४

इमामगृभ्णन् ७५, ८८, ८९, २०१ तै. सं. ५.१.२.१

इमा रुद्राय १००, १७६ तै. ब्रा. २.८.६,८; ऋ. ७.४६.१

इयं वै समिध्य० १०

इह वर्तामहे १८८ शि. पु. ७.२.७.१३

इषे त्वा ४६ तै. सं. १.१.१.१

इष्टापूर्तं मन्य० १२० मु. उ. १.२.१०

ईशं तं ज्ञात्वा१३९,२६४-२६५श्वे उ.३.७

ईशान: सर्व० १६५, २२३ तै. आ. १०.४७.१; महाना. १०.८

ईशानाय पर० ४३ मै. सं. ३.१.४

उग्रोऽस्युग्रोऽहं १८० तै. सं. १.६.२.१

उत्तम: पुरुष० ७ भ गी. १५.१७

उत्तरां देवयज्या० ६२ तै ब्रा.३.५.१०.५

उत्तरेऽहन् द्विरा० ९०, ९१ तै. ब्रा. १.८.१०.३

उदीरय कवितमं २१७ ऋ. ५.४२.३

उपक्रमादिभि० ७७, २५२

उपक्रमोपसंहा० २५१

उपनयनं विद्या० ३६ आप.ध.१.१.१.९

उपनिषदं भो २२ के. उ. ४.७

उपनीय तु य: ३४-३५, ३७, ४० म. स्मृ. २.१४०

उपसद्भिश्चरित्वा ५८, ७९ ता. ब्रा. २५.४.१

उपांशु पौर्णमास्यां २०३ तै.सं. २.६.६.१

उपांशुयाजमन्तरा २०२ तै.सं. २.६.६.४

उभयप्राप्तौ कर्मणि १७ पा.सू.२.३.६६
उभा वामिन्द्राग्नी ६८ तै.सं १.५.७.२
उमासहायं ५ कै. उ. १.७
उषिकुषिगार्तिभ्यः १०१ उ.सू. १६९
उष्णिक्ककुभो० ११. जै. सू. ५.३.६
ऊर्ध्वरेतं विरू० ३, १६६, २६६ महाना. १२.१
ऋग्वेद एवाग्ने० २१४ऐ.ब्रा.२५.७.१-२
ऋचः सामानि १८ तै.ब्रा. १.२.१.२६
ऋचो यजूंषि १२६-१२७
ऋज्रेन्द्राग्रवज्र० १८०, १९० उ.सू.१९६
ऋतं सत्यं परं २, १०२, १२१, १३३, १६५, १६६, २४३, २६६ महाना. १२.१
ऋतावुपेयादेव २६२ गौ. स्मृ. ५.१
ऋत्विक्श्वसुर० ४० गौ. स्मृ. ६.९
ऋदोरप् १७९ पा. सू ३ ३.५७
ऋषिभिर्निश्चिते १८९
ऋषिः सर्वगतत्वेन १८५ कू.पु. १.४.६०
एकथाऽस्य त्वच० १०८ मै.सं. ४.१३.४
एकमूर्त्यभिधानेन १०० स्क. पु.
एकमेवाद्वितीयं १६६ छा. उ. ६.२.१
एकविंशतिमनु० १० तै.सं. २.५.१०.२
एकस्मै वा अन्ये २५, ११८ ता. ब्रा. ६.३.१-२
एकं वाक्यं विचार्यं १३० म. वि.
एकं साम त्र्यृचे ८५
एकादश पशो० १६४ तै. सं. ६.३.१०.३
एकार्णवे तदा १८५ कू. पु. १.६.२
एकादश प्राजापत्यान् १०३
एको रुद्रो न १७५ १७६, २१२ श्वे. उ. ३, २; अ. शिर. २.७
एको ह वै नारा० ९९, १४८, १६८ १८८, २४३ महो. १.१
एतद्ध्येवाक्षरं ५ कठो. २.१६
एतस्माज्जायते १९४ मु. उ २.१.३
एतस्यैवाक्षरस्य १५७,१५८ बृ.उ.३.८.९
एतस्यैवानन्दस्य १७४ बृ. उ. ४.३.३२
एतं सेतुं तीर्त्वा १५ छा. उ. ८.४.२
एतेन सर्वे ८६ ब्र. सू. १.४.२८
एरच् २९ पा. सू ३.३.५८
एवमादीनि ९९ स्क. पु.
एष आत्माऽप० १८४ मु. उ. ६.१
एष सम्प्रसादो १६ छा. उ. ८.१२.३
एष ह्येव साधु २७ कौ. उ. २.८
एषोऽणुरात्मा ११४ मु. उ. ३.१.९
ऐतदात्म्यमिदं २५४, २५६, छा. उ. ६.८.७
ऐन्द्रं पञ्चशराव० १०७. तै.ब्रा.३.७.१.७
ऐन्द्रचा गार्हपत्य० ४६, २५३ मै. सं. १.५.११
ऐश्वर्यं चैव धर्मश्च १८९, २२७ ब्र पु. १.१.४; वा. पु. १.५
ऐश्वर्यं तस्य १७५ कू. पु. १.१.९३
ओङ्कारश्चाथशब्दश्च ३२ ना.पु.१.५१.१०
ओङ्कारः प्रलयः १०२ अ. शिखो. ४
ओमिति ब्रह्म ४ तै. उ. १.८.१
ओमित्येतत् ५ कठो. २.१५
औदुम्बरः सोम० १०९
औदुम्बरो यूपो १०९,१५० तै.सं.२.१.१.६
कण्ठकूपे क्षुत्पि० १५५ यो. सू. ३.३०
कण्ठं भित्वा विनि० ३२ ना.पु.१.५१.१०
कथं स भगवान् १८६ कू. पु. १.९.४
कपालेषु श्रप० ९२, ९३, १०९ आप. श्रौ. १.२४.६

कर्तृकर्मणोः कृति १८ पा. सू. २.३.६५
कर्मणि च १७, १८ पा. सू. २.२.१४
कर्मण्यारम्भ० ११७ जै. सू. ११.१.२०
कर्मवत् कर्मणा १५३ पा. सू. ३.१.८७
कविं कवीनामुप० २१७ ऋ. २.२३.१
कविं सम्राजम् २१७ ऋ. ६.७.१
कानिचिद् वेद० १०० स्क. पु.
कालः स्वभावो १८८ शि.पु. ७.२.७.१४
कालः स्वभावो १८७, १८८ श्वे. उ.१.२
किमस्य जगतो १८७ कू.पु. २.३७.१५२
किं कनिष्ठाः किमु[1] १४९
किं कारणं कुतो १८८ शि.पु ७.२.७.१२
किं कारणं ब्रह्म १५९, १८६, १८७ श्वे. उ. १.१
किं तत् परतरं १७५ कू. पु. १.१.९१
किं नु मलं ७१ ऐ. ब्रा. ७.१३.७
किं प्रजया करि० ७१ बृ. उ. ४.४.२२
कुर्यां हरस्यापि ९९ कु. स. ३.१०
कृद्योगलक्षणा षष्ठी १७ पा.वा. २.२.९.
कृन्मेजन्तः ४ पा. सू. १.१.३९
कृष्णलं श्रपयेत् ९५
कृष्णविषाणया १०५ तै. सं. ६.१.३.८
कृष्णं धर्मं २६ म. भा. ३.८६.२२
कृगृश्वदृभ्यो वः १७९ उ. सू. १६१
को अद्धा वेद क १२५ ऋ.१०.१२९.६
कोपं रागिणि मुञ्च[2] ४५
कोऽपि स्यात् सर्वं० १८७ कू. पु २.३७.१५२
को हि तद्वेद १२७,१५१ तै.सं.६.१.१.१
को ह्येवान्यात् कः १७३ तै.उ. २.७.
क्यचि च १७६ पा. सू. ७.४.३३
क्याच्छन्दसि १७६ पा. सू. ३.२.१७०
क्रमेण वा निय० ५३ जै. सू. ५.१.४
क्रियाफलं ३६ का. वृ. १.३.७२
क्रीते सोमे १०३ तै. सं. ६.१.४.२
क्व चास्माकं १८८ शि. पु. ७.२.७.१२
क्षणतत्क्रमयोः १५५ यो. सू. ३.५२.
क्षरं प्रधान० १७५, १८७, १८९ श्वे. उ. १.१०
क्षुत आचामेत् ७४ आप. गृ. ३.६.७
खलेवाली यूपो १०८ ता ब्रा १६.१३.८
खं वायुर्ज्योति० १९४ मु. उ. २.१.३
गमिकर्मीकृत० १९ नै. का. २.४०
गर्भाष्टमेषु ३७-३८ आप.ध. १.१.१.१९
गव्यस्य च १० जै. सू. ८.१.१८
गावो एतत्सत्र० १० ते. सं. ७.५.२.१
गार्हपत्ये पत्नी० ११०
गुणकामेष्वाश्रित० ८३ जै.सू. ८.१.२३
गुणत्वेन देवता० ५२. जै. सू. ८.१.३४
गुणदोषौ बुधो[3] १३
गुणाच्च न फलं २५
गोदोहनेन पशु० ६३ आप. श्रौ. १.१६.३
गोपयसोर्यत् १० पा सू. ४.३.१६०
गौणश्चेन्नात्म० ११४ ब्र. सू. १.१.६
ग्रहणस्वरूपा० १५५ यो. सू. ३.४.७.
ग्रहं संमार्ष्टि २६१

---

१. क्षेमेन्द्रस्येति सुभाषितावल्यां पठ्यते।

२. विद्यापतेरिति सुभाषितरत्नभाण्डागारे।

३. कुवलयानन्दे समुद्धृतमिदं वचनम्।

घनसारश्चन्द्र० १८५ अ.को. २.६.१३०
घृते प्ररोचनां ११५
चतुरो मुष्टीन् १०८, १२४
आप श्रौ. १.१८.२
चतुर्गृहीतान्या० २१ आप.श्रौ. ८.१४.२
चतुर्जुह्वां गृह्णाति ८५ श.ब्रा.१.३.२.११
चतुर्दश पौर्ण० ११४
चतुर्विंशति० १८० शि. पु. ७.२.२.१३
चन्द्र तारक० १२५ यो. सू. ३.२७
चरुमुपदधाति ६८
चात्वालान्मृद० १०३
चात्वाले कृष्ण० १०५आप.श्रौ.१३.७.१६
चुद प्रेरणे २६ धा. चु. १५९३
चोदनालक्षणो २१,२६,४८,जै.सू.१.१.२
छन्दांसि यज्ञाः २१७, २२२ श्वे.उ. ४.९
छन्दोब्राह्मणानि २९ पा. सू. ३.२.६६
छागस्य वपाया १०७ तै. ब्रा. ३.६.८.१
जगद्वाचित्वात् १५८ ब्र. सू. १.४.१६
जनिकर्तुः प्रकृतिः १६३-१६४
पा. सू. १.४.३०
जन्माद्यस्य यतः २७ ब्र. सू. १.१.२
जन्मान्तरकृतं २३
जामि वा एतत् २०३, २५५
तै. सं. २.६.६.४
जि जये ७ धा.भ्वा. ५६१
जीवनग्रहणे[1] १४९
ज्ञः कालकालो १२७, १९० श्वे उ. ६.२
ज्ञाज्ञौ द्वावजा० १७५ श्वे.उ. १.९
ज्ञात्वा च सततं २६५
ज्ञात्वा देवं मुच्यते १४०, २६०, २६४
श्वे. उ. ४.१६
ज्ञात्वा शिवं शान्ति० १३९श्वे.उ.४.१४
ज्ञाननिर्मथनादेव २६४ कै. उ. १.११
ज्ञानप्रसादेन ५७, ७७ मु. उ. ३.१.८
ज्ञानमप्रतिघं यस्य १८९, २२७ ब्र. पु.
१.१.४; वा. पु. १.५
ज्ञानशक्तिबलै० १८९ वि. पु. ६.५.७९
ज्योतिश्चरणा० १६. ब्र. सू. १.१.२४
ज्योतिष्टोमेन स्व० ४३, ११८, १२७,
२५९ आप. श्रौ. १०.२.१
ज्योतिष्टोमे महा० २५९
ज्वरत्वरस्रिव्यवि० ४ पा. सू. ६.४.२०
ञिइन्धी दीप्तौ १९० धा. रु. १४४९
डुमिञ् प्रक्षेपणे ३७ धा. स्वा. १२५१
तच्छान्तिरौषधै० २३
तज्जलानिति २६५ छा. उ. ३.१४.१
तज्ज्ञानात् सर्वजीवा० १४० च. सा.
तण्डुलेभ्योऽर्थ० ९२
ततस्तदालोकन० २५२ र. वं. ७.५
ततस्तु तं पश्यते ७८ मु. उ. ३.१.८
ततो मनोजवित्वं १५५ यो. सू. ३.४८
ततो मां तत्त्वतो १२६ भ. गी. १८.५५
तत्तु समन्वयात् ५१ ब्र. सू. १.१.४
तत्ते पदं संग्रहेण ९९ कठो. २.१५
तत्परेणेरितं १८३ मै. उ. ५.५
तत्र पञ्चाक्षरी ४
तत्र भवः १७७ पा. सू. ४.३.५३
तत्र यः शक्त्युपा० २५३ त.वा.३.१.१३
तत्त्वमसि १२५, १२८, २५४-२५६
छा. उ. ६.८.७

१. क्षेमेन्द्रस्येति सुभाषितावल्यां दृश्यते ।

तत्प्रधानं फलं ३६ वा. प. ३.१२.१८
तत्सर्वं वक्तु० ५० त. वा. ३.१.१
तत्सृष्ट्वा तदेवा० ९८ तै. उ. २.६
तथर्ग्वेदादयो २१४,२५२ त.वा.३.१.१३
तथाकामोऽर्थ० ३६,३८ जै.सू. ३.८.१३
तया चैकवाक्यतो० ११३ ब्र सू.३.४.२४
तथा यूपस्य ९५ जै. सू. ३.७.१३
तदक्षरं तत्सवितु० १८३श्वे. उ. ४.१८
तदधीनमुपादान० ९२
तदप्यधिष्ठितं २१४,२५२त.वा.३.१.१३
तदर्थं विकृते १६३ पा. सू. ५.१.१२
तदशिष्यं संज्ञा० १५, १९३ पा. सू. १.२.५३
तदस्य प्रयोजनम् ३३ पा.सू.५.१.१०९
तदात्मानं स्वय० ६ तै. उ. २.७
तदापि विपरीतत्वं ७४ त. वा.३.३.१४
तदा शिवमविज्ञाय २६८ श्वे.उ. ६.२०
तदा समभवद् १८५ कू. पु. १.६.२
तदुपर्यपि बाद० ११३ ब्र. सू. १.३.२६
तदेव ब्रह्म त्वं १२५ केनो. १.५.
तदेव ब्रह्म प० १०२, १३५, २१७ महाना. १.६.
तदेषाऽभ्युक्ता १३९ तै. उ. २.१
तदैक्षत बहु १६४,१८३ छा.उ ६.२.३
तद्धितार्थोत्तर० १२२ पा. सू २.१.५०
तद्भाविताः प्रप० ११८ कू.पु.१.७.६२
तद्य इमे वीणायां २४१ छा. उ. १.७.६
तद्यथेह कर्म० ७१, ११७, ११९, १४० छा. उ. ८.१.६
तद्यद्यस्मिन् सर्पि० २४१ छा.उ.४.१५.१
तद्वशाद् व्रीहि० ९२
तद्विजिज्ञासस्व ३२, १३३ तै उ. ३.१
तद्विज्ञानार्थं स ८३, ८७, १२२ मु. उ. १.२.१२
तद्विष्णोः परमं ९९ कठो. ३.९
तनूनपातं ५३, १०३ तै.सं. २.६.१.१
तन्निष्ठस्य मोक्षो० १०१, १५८ ब्र. सू. १.१.७
तप आलोचने[1] ६
तपसा चीयते १२५, १३३, १८४ मु. उ. १.१.८
तपांसि सर्वाणि ५, ६ कठो. २.१५
तप्ते पयसि ३७, १०३, १०४ तै. ब्रा.१.६.२
तम आसीत् तमसा १८३ ऋ.१०.१२९.३
तमक्रतुं पश्यति १३९-१४०, २५७ महाना. ८.३
तमादिमध्यान्त० ५, १९० कै. उ. १.७
तमीशानं वरदं १८७ श्वे. उ. ४.११
तमेतं वेदानु० ५५ बृ. उ. ४.४.३२
तमेवैकं जानथ ११४ मु. उ. २.२.५
तमो वा इदमेक० १८३ मै. उ. ५.५
तया विच्छिन्न० १८८ शि.पु.७.२.७.१७
तयैव तु परित्यक्तं २५२ त.वा. ३.१.१३
तरति शोक० १८० छा. उ. ७.१.३
तव प्रसादात् ९९ कु. स. ३.१०
तस्मात्त्वेवोद्गातृ० २४१ छा.उ. १.६.८
तस्मात् प्रयत्नतः २४१

१. पाणिनिधातुपाठे नोपलभ्यते ।

तस्मात् सर्वगतः १८७ श्वे. उ. ३.११
तस्मादण्डादभूत् १८६ आश्व. ध.
तस्मादाहुर्भव १७९ हरिवंशे[1]
तस्मादुपसंहर्त्रे १७८-१७९ अ.शिर. ३.३
तस्मादेतद् ब्रह्म १०१ मु. उ. १.१.९
तस्माल्लोकात् ११९ बृ. उ. ४.४.६
तस्मै स विद्वान् ८३,१२१ मु.उ.१.२.१३
तस्याः शिखाया ३ महाना. ११.१३
तस्येदम् १०६ पा. सू. ४.३.१२०
तस्यैतस्य तदेव ५४ छा. उ. १.७.५
तस्यैते कथिता १२२ श्वे उ. ६.२३
तं तं लोकं जयते ८ मु. उ. ३.१.१०
तं द्विरात्रेण ८३, २०२, २३५
तं बोधयामास १८६ कू. पु. १.७.२२
ताच्छील्यवयो० १७९ पा.सू. ३.१.१२९
तान् पर्यग्निकृता० ४३ तै ब्रा.१.३.४.४
तान्यैव मम नामानि १८५ हरिवंशे[2]
तावब्रूतामग्नी० २०२, २०३, २०५
शा. ब्रा. ३.६
तुरीयमिमं लोक० १७६
तुल्यः सर्वेषां १२, १४ जै. सू. ३.६.१८
तृजकाभ्यां कर्तरि १८ पा.सू. २.२.१५
ते ध्यानयोगानु० १८७ श्वे. उ. १.३
ते ध्यानयोगानु० १८८ शि.पु.७.२.७.१६
तेन रक्तं रागात् १९९ पा. सू ४ २.१
तेन व्याख्यातुमिष्टो० २५३ त.वा.३.१.१३
तेनेष्ट्वा राजा ५८ आप.श्रौ. १८.८.१
तेनैति ब्रह्मवित् ६४ बृ. उ. ४.४.९
तेषामन्तर्गतै० २५२ त. वा. ३.१ १३
तेषामैन्द्रियकत्वे० २६ श्लो.वा., चो.१३
तेषां पतित्वाद् १७९ शि.पु. ७.२.२.१२
त्रातः काकोदरो[3] २१३
त्रिभिरनश्नत् ७२
त्रिविधाऽस्य शास्त्रस्य १४३ न्या.भा १.१.३
त्रिशुक्लः क्षीणवृत्तिश्च ४०
त्रिष्टुभा परिदधाति ११ तै सं.२ ४.११.२
त्रिष्टुभो वा एतद् ११ तै.सं. २.४.११.१
त्रीणि ह वै यज्ञ० ९६ ता. ब्रा. ७.३
त्वामस्मि वच्मि[4] ३२
त्वाष्ट्रं पात्नीवत० ४४, ४५
तै.सं. ६.६.६.२
दक्षिणाग्नावपरि० १०८आप.श्रौ.३.३.१२
दधि घृतं धाना ९२ मै. सं. २.३.६
दध्ना जुहोति २६, ४३, ५८
दध्ना जुहोत्यरु० २६
दध्नेन्द्रियकामस्य १०३ तै. ब्रा. २.१.५.६
दब्धिरस्यदब्धो १०४ तै.सं. १.६.२.४
दर्भैस्तृणीत ४६ का. सं ३१.१४
दर्शपूर्णमासयो० २३५
दर्शपूर्णमासाभ्यामि० ३७, ५९, ६३
तै. सं. २.५.६.१
दर्शपूर्णमासाभ्यां स्व० ४३, ११०,२०३
दशानामाहुतीना० २०३
दहर उत्तरेभ्यः १४, १५ ब्र.सू.१.३.१४
दिविज्योतिरजर० ११८तै.ब्रा.३.७.५.११

१-२. हरिवंशपादसूच्यां नोपलभ्येते वचने।

३. कुवलयानन्दे ६४-६५ कारिकाव्याख्याने समुद्धृतम्।

४. काव्यप्रकाशे ४ उल्लासे दृश्यते।

दीक्षणीयादिभि० २५९
दुर्बलस्य प्रमाणस्य ७४ त. वा. ३.३.१४
दुःखजन्मप्रवृत्ति० ८७ न्या. सू. १.१.२
देवता वा प्रयो० ५१ जै. सू. ९.१.६
देहयोगाद्वा सोऽपि १५६ ब्र सू. ३.२.५
द्यावाभूमी जनयन् १६६ ऋ. १०.८१.३
द्युभ्वाद्यायतनं ११३, ११४ ब्र.सू. १.३.१
द्रव्यक्रियागुणा० २६ श्लो. वा., चो. १३
द्रष्टव्यः श्रोतव्यः ७६ बृ. उ. २.४.५
द्रुहिदक्षिभ्यामिनच् १९० उ. सू २१८
द्वादशाहमृद्धि० ४३ ता. ब्रा. २४.४.१
द्विलक्षण्या परं ५० त. वा. ३.१.१
द्वे आहवनीये २०२-२०४, २०६
धन्यं यशस्य० ७२
धर्मस्य शब्द० १५-१६ जै. सू. १.३.१
धर्मं जैमिनिरत ५२ ब्र. सू. ३.२.४०
धर्मं ज्ञातुमिच्छेत् ३२ शा. भा. १.१.१
धर्मिकल्पनातो २०८, २४५
धर्मेण पापमप० ५७ महाना. २२.१
धर्मे प्रमीयमाणे ५३
धर्मो विग्रहवान् ३६ [1]वा. रा. ३.३७.१३
धातुर्महीति पूजायां १८२ सा. पु.
धातुः प्रसादान्महि० ३, २५५-२५७ महाना. ८.३
धारणं धर्मशास्त्रस्य ७२
ध्यातस्यास्य प्रसादात् १४० च. सा.
ध्यात्वा मुनिर्गच्छति ५, २६४ कै.उ. ७
ध्याननिर्मथनादेव १४० कै. उ. ११
ध्यायतीव लेला० १२४ बृ. उ. ४.३.७
ध्रुवे तद्गतिज्ञानम् १५५ यो.सू. ३.२८
न कर्मणा वर्धते २१०, २१२ इ. उ. २०
नकिरिन्द्र त्वदु० १३५-१३६ ऋ.४.३०.१
न गिरा गिरेति १०७ ता. ब्रा. ८.६.९
न चतुष्ट्वमैति० १६ न्या.सू. २.२.१
न छन्दस्यपुत्रस्य १७६ पा.सू. ७.४.३५
न तत्र सूर्यो १८०-१८१ श्वे. उ. ६.१४
न तत्समश्चाभ्यधि० १८० श्वे. उ. ६.८
न तौ पशौ करोति १०९ शा. ब्रा. ३.५
न प्रयोजनवत्त्वात् १६ ब्र. सू. २.१.३२
न प्राणेन नापा० १६४ कठो. ५.५
नमो हिरण्यबाहवे ९ तै. सं. ४.५.२.१
न विलक्षणत्वा० १४५ ब्र.सू. २.१.४
न सन्न चासच्छिव १६७, १७०, २४३ श्वे. ४.१८
न हिंस्यात् सर्वा १६१
नाकस्य पृष्ठे १२० मु. उ १.२.१०
नाधीयीत वायौ ८४ गौ.स्मृ. १६.५-६
नाभिचक्रे काय० १५५ यो.सू. ३.२९
नाममात्रेण संकी० १४१ न्या.भा. १.१.३
नामरूपधर्म० ३० जै. सू. २.४.८
नामानि तव गोविन्द १८५ हरिवंशे[2]
नारा आयतनं १८५ कू. पु. १.४.६१
नारायणपरं ब्रह्म १०२, १२९, १३३-१३५ २४३ महाना. ११.४
नारायणाख्यामभ० १८६ आश्व. ध.
नारायणाख्यो भग० १८६ वि.पु.१.३.४
नारायणाख्यो भग० १८६ कू. पु. १.१०.८५
नारायणो महा० १८६ कू. पु १.७.२२

१. रामो विग्रहवान् धर्म इति तत्रत्यः पाठः ।

२. हरिवंशपादसूच्यां नोपलभ्यते वचनम् ।

नार्षेयं वृणीते १०९ तै. ब्रा. १.६.९.१
नावेदविन्मनुते ९१, २०७ इ. उ. २०
नासदासीन्नो सदा० १८३, १८४ ऋ. १०.१२९.१
नाहरासीन्न रात्रि० १८३, १८४ ता. ब्रा. १६.१.१
नित्यानन्दं स्वयं १७५ कू. पु. १.१.९२
निरञ्जनः परमं ६, १५, १६, २४३ मु. उ. ३.१.३
निरपेक्षः शब्दः श्रुतिः ११३
निरीक्षितास्ते १८७ कू. पु. २.३७.१५७
निर्देशाच्छेषभक्ष्ये० १० जै. सू. ६.४.४
निर्देशाद्वान्यदाग० १० जै. सू. ६.४.२
निवृत्तिर्वा कर्म० ८३ जै.सू. ८.१.२४
निवेशनः संग० ४६ तै. सं. ४.२.५.४
निष्कलं निष्क्रियं१२७,१६९ श्वे.उ.६.१९
नेतरोऽनुपपत्तेः १०१ ब्र.सू. १.१.१६
नैर्ऋतं चरुं १०६ तै. सं. १.८.९.१
नैवारश्चरु० १०६, १०९ श. ब्रा. ५.१.४.१४
नैषा तर्केण मति० ९१,२०७ कठो.२.९
न्यायेन सम्प्रदाया० २५२ त.वा.३.१.१३
पञ्चदशान्याज्यानि ४३ ता.ब्रा.२०.१.१
पञ्च पञ्चनखा ९४ वा. रा. कि.१७.३९
पन्थानः सन्तु ते शिवाः[1] १८५
पयसा जुहोति ४३
पयो दोग्धि २६०
परमं साम्यमुपैति १६ मु. उ. ३.१.३
परं जैमिनिर्मुख्य० ४९ ब्र. सू. ४.३.१२
परात्तु तच्छ्रुतेः १५८ ब्र. सू. २.३.४०
परात् परतरं १७५ कू. पु. १.१.९२
पराभिध्यानात्तु १५६,१५७, ब्र.सू.३.२.४
पराऽस्यशक्ति०१३,१७५,१७६श्वे.उ.६.८
परिणामत्रयसंय० १५५ यो. सू. ३.१६
परिधौ पशुं १०७
परीक्ष्य लोकान् ७३, ८३, ११९, १२०,१२२,१४० मु.उ.१.२.१२
पर्यग्निकृतमुत्सृज्य ४४ तै.सं ६.६.६.२
पर्यग्निकृतं पात्नी० ४४,४५ तै.स. ६.६.६.१
पर्यवस्यन्ति विप्रेन्द्रा १०० स्क. पु.
पशवः परिकीर्त्यन्ते१७९शि.पु.७.२.२.११
पशुना यजेत १०३
परोक्षश्च विप्रकर्ष० ११जै.सू.१२.२.३२
पश्यन्ति शम्भुं १८७ कू.पु.२.३७.१५७
पाय्यसानाय्य० १० पा. सू. ३.१.२९
पावकोऽस्मभ्यं १८५ तै. सं. ४.६.१.१
पाशविच्छेदिकां १८८शि.पु.७.२.७.१६
पाशैरेतैः पति०८,१८०शि.पु.७.२.२.१५
पुण्यः पुण्येन कर्मणा २१८ बृ.उ. ४.४.५
पुण्ये हिमवतः ८४ म.भा.१.२२.१-५प.
पुत्रं ब्रह्माणमिच्छ० ७१ ऐ.ब्रा.७.१३.७
पुनराधेयमोदन० ७० जै. सू. ६.४.२६
पुरुषं कृष्णपिङ्गलं ७ महाना. १२.१
पुरुषो वै रुद्रः १७७, १७८, २५६ महाना० १३.२
पुरोडाशकपा० १०५, १११ आप. श्रौ. १.२०.९
पूज्यते यः सुरैः १८२ सा. पु.
पूतनामारणख्यातः[2] २१३
पूरणगुण० १९३ पा. सू. २.२.११

१. दण्डिनः काव्यादर्शे (२.१४१) दृश्यते।

२. कुवलयानन्दे ६४-६५ कारिकाव्याख्याने समुद्धृतम् ।

पूर्वपदात् संज्ञाया० १८५ पा.सू. ८.४.३

पूर्वं तु बादरा० ५२ ब्र. सू. ३.२.४१

पृथुपाजवत्यौ १०

प्रकरणात् ११३ ब्र. सू. १.३.६

प्रकृत्या कृत० ६२ जै. सू. ५.१.२५

प्रजापतिर्वरु० ११५ तै. सं. २.३.१२.१

प्रजापतिर्वा इद० १८३ का.सं. १२.५

प्रज्ञा च तस्मात् २२६ श्वे. उ. ४.१८

प्रज्ञानं ब्रह्म १२५, १२८ ऐ. उ. ५.३

प्रणम्रेषु महीपेषु २६

प्रतितिष्ठन्ति ह वा ६१

प्रतिपदविधाना १७ पा. वा. २.२.९

प्रतिपाद्यो महादेवः १०० स्क. पु.

प्रतीपभूपैरिव १४९ नै. का. १.१३

प्रत्यक्षानुमानोप० १४३ न्या.सू.१.१.३

प्रत्ययस्य पर० १५५ यो. सू. ३.१९

प्रधानजयश्च १५५ यो. सू. ३.४८

प्रधानक्षेत्रज्ञ० १३१,१६५-१६६,१७५ श्वे. उ. ६.१६

प्रमथेऽपि पशुः १८०

प्रमाकरणं प्रमाणम् १४१, १४४, २३२ त. भा.

प्रमाणप्रमेय० २९, १४१, १४२ न्या. सू. १.१.१

प्रमाणमत आचार्यो ८४ पा. भा. प.

प्रयाजशेषेण ७३

प्रविश्य योगं ८४ म.भा. १.२२.१-५प.

प्रवृत्तिहेतून् २२ बृ. वा. १.७

प्रवृत्त्यालोकन्यासात् १५५ यो.सू.३.२५

प्रसन्ने सति कीटो १०१

प्रागुत्पत्तेरभावा० १३१ न्या.सू ४.१.६७

प्राणो ब्रह्म १२८ तै. उ. ३.३

प्राप्यान्तं कर्मणस्तस्य ११९ बृ.उ.४.४.६

प्रा स्मा अग्निं भरत १०७ मै.सं.४.१३.४

प्रोक्तं संरक्षणं नाम १५६ रौ. वा.

फलमत उपपत्तेः ५२, १०१,१३१-१३२ ब्र. सू. ३.२.३८

फलवत्तां च दर्श० ११८ जै.सू.६.१.२१

फलस्य कर्मनिष्पत्ते० ११७जै.सू.१.२.१७

बर्हिर्देवसदनं १०३,२५८ मै.सं.१.१.२

बर्हिर्लुनाति २६१ तै. ब्रा. ३.२.२.४

बलाबलविवि० ५५ त. वा. ३.३.१५

बार्हस्पत्यो नैवारः १०८, १२४

बिभेत्यल्पश्रुताद् १२९ वा. पु. १.२००

बुद्धे चेत् क्षेमप्रा० १२६ आप. श्रौ. २.२१.१६

बृहत्पृष्ठं भवति २०४ ता.ब्रा. ११.४.६

बृहत्वाद् बृंहणत्वाच्च ९७

ब्रह्मणेऽभिजिते २७ तै. ब्रा. ३.१.५.६

ब्रह्मवर्चसकामो ५८

ब्रह्म वा इदमग्र १८८ बृ. उ. १.४.१

ब्रह्मवादिनो वदन्ति १५८, १८६ श्वे. उ. १.१

ब्रह्मवादिनो'''स २४१ तै.सं. २.६.६.३

ब्रह्मविदाप्नोति १३९, १४०, १४३, १४७, १५२, १६१, १८३, २६५ तै. उ. २.१

ब्रह्म वेदा ब्रह्म १७०

ब्रह्मसाम्नाऽऽलभते ४३

ब्रह्मस्वरूपिणं १८५ कू. पु. १.६.४

ब्रह्म ह देवेभ्यो १००,१९१ केनो. ३.१

ब्रह्म ह्यर्थानुगत्या १४० च. मा.

ब्रह्मादिस्तम्ब० ८, १८० शि. पु. ७.२.२.१४

ब्रह्माद्याः स्थावरा० १७९ शि. पु. ७.२.२.११
ब्रह्मा नारायणाख्य० १८५ कू.पु.१.६.३
ब्रह्मा नारायणख्यो १८६ वि.पु.१.४.१
भक्त्या मामभि० १२६, १३७ भ. गी. १८.५५
भगवच्छब्दवा० १८९ वि. पु. ६.५.७९
भगवान् सर्व० १५८ कू. पु. १.४.६२
भवाय देवाय १८२ आप. म.२.१८.१४
भवेदुपनिषन्नामा २२ बृ. वा. १.८
भारतस्येतिहा० ८४ म.भा.१.२२.१-५प.
भिद्यते हृदय० १४० मु. उ. २.२.८
भीमादयोऽपादाने १८१ पा.सू.३.४.७४
भीषास्माद्वातः १५८, १८१ तै.उ.२.८
भुवनज्ञानं सूर्ये १५५ यो. सू. ३.२६
भूतभाव्युपयोगं ३५, ७२ त.वा.२.१.१२
भूतं यस्माज्जग० १७९ हरिवंशे[1]
भूतानि योनिः १८८ शि.पु.७.२.७.१४
भू प्राप्तावात्मनेपदी १२० धा. चु.१८.४५
भोक्ता भोज्यं प्रेरि० १७५ श्वे.उ.१.१२
भोक्तारं यज्ञ० १११ भ. गी. ५.२९
भोग्यत्वेनात्मनां२१४,२५२त.वा.३.१.१३
मङ्गलानन्तरा० ३३ अ.को. ३.३.२४७
मदुक्तिश्चेदन्त० २० नै.का. २२.१५०
मधुरं रसवद्[2] १९
मनो ब्रह्म १२९, १३३ तै. उ. ३.४
मन्त्रायुर्वेदप्रा० १६ न्या. सू. २.१.६९
मन्त्रैरनुस्मर्तव्यम् २५९
मरुद्भ्यः सान्तप० ६५ मै.सं. १.१०.१
मलमायादिभिः १७९ शि.पु.७.२.२.१२
मल्हा आलभेत तै. सं. २.१.२.४
महादेवे महानन्दे १०१
महान् वा अयमभूद् १९१तै.सं. ६.५.५.३
महीङ् पूजायाम् १८१ धा. क. १९८३
मातापितृभ्यामृणा० ५८
मानवी ऋचौ धाय्ये १०-११ तै. सं. २.२.१०.२
मानसमप्यशुचिः ८४ गौ.स्मृ. १६.४६
मा मोहमापद्यथ १७३ प्र. उ. २.३
मायां तु प्रकृतिं १४. १६६, १६८, १९१ श्वे. उ. ४.१०
मायिनं तु महे० १८७,१९१ श्वे.उ.४.१०
मासमग्निहोत्रं ४३, ५८, १०६ आप. श्रौ. २३.१०.९
मुख्यक्रमेण ६२ जै. सू. ५.१.१४
मुमुक्षया पुरा १८८ शि.पु. ७.२.७.११
मुमोह मायया १८६ कू. पु. १.७.२१
मुष्टिलोपात्तु १२४ जै. सू. १०.२.६३
मैत्रावरुणः १०४
मोक्षमिच्छेज्जना० १००
य आत्मनि तिष्ठन् १२५ श. ब्रा. १४.६.७.३०
य इमांल्लोकानीशत १७९ श्वे. उ.३.२
य एतामेवं २२ छा. उ. ३.११.३
य एष सम्प्रसादो १५ छा. उ. ८.३.४
य एषोऽक्षिणि पुरुषो २४१ छा.उ.४.१५.१
य एषोऽन्तर्हृदय० ४ बृ. उ. २.१.१७
य ओङ्कारः स १०२ अ. शिर. ३
यजमानस्य याज्या १०३
यज्जुह्वां गृह्णाति ८५, ९३५

---

१. हरिवंशपादसूच्यां नोपलभ्यते वचनम् ।
२. दण्डिनः काव्यादर्शे (१.५१) दृश्यते ।

यज्ञायैव स्रुवेणा० ४३
यज्ञेन यज्ञमय० २४ ऋ. ८.४.१९
यतोऽवसादयेद् २२ बृ. वा. १.८
यतो वा इमानि ९८, १६१-१६५,२०६ २०७, तै.उ. ३.१
यतो वाचो निव० १२५, १३७, २२५ तै.उ. २.४
यत्कर्मिणो न प्रवे० १२० मु.उ.१.२.९
यत्पादपद्मं १८२ भा. पु. ३.१४.२८
यत्सिद्धावन्यप्रक० १४२ न्या.सू १ १.३०
यथा मत्स्याना० २९
यथा यजेत् सौत्रा० ५८
यथा वर्षे प्रजा० १५५ आप.ध.२.९.२३.७
यथोक्तविद्याबोधि० २२ बृ. वा. १.८
यदाग्नेयोऽष्टा० २०३ तै.सं.२.६.३.३
यदा चर्मवदाकाशं २६८ श्वे.उ. ६.२०
यदा तमस्तन्न १४७, १६८, १८३, १८४,१८६,१८८ श्वे. उ. ४.१८
यदि कामयेत ३६ तै. सं. ६.४.५.५
यदिच्छन्तो ब्रह्म० ५.९८ कठो. २.१५
यदि लभ्येत १२६
यद् द्वयक्षरं नाम ३,४ भा.पु. ४.४.१४
यद्यपि चतुरवत्ती १६४ आप.श्रौ.७.२०.९
यद्यपि प्राकरणिके० २०५ त. र.
यद्येकं भोजये० १२६
यद्योन्यां तदुत्तरयो० ८५
यद्वाचाऽनभ्युदितं १२५. केनो. १.४
यन्न दुःखेन संभिन्नं[1] ५१
यन्मनसा न मनुते २८, १२५ केनो.१.५
यमर्थमधिकृत्य १४२ न्या. सू. १.१.२४
यवागूं पचति १०५
यवैर्यजेत ८७ आप. श्रौ. ८.३१.१३
यश्चादर्थो न स २३५
यस्तु शक्त्या परि० २५३त.वा.३.१.१३
यस्मात्परं नापर० १८० श्वे. उ. ३.९
यस्मिन् जाते एता० १६१, २५५ तै. सं. २.२.५.३
यस्य देवे परा १२२ श्वे. उ. ६.२३
यस्य ब्रह्म च क्षत्रं १७८ कठो. २.२५
यस्य सा परमा १७३ कू पु. २.३१.३६
यस्य हविर्निरुप्तं ४४ तै. सं. २.५.५.१
यस्यावद्यं १८२ भा. पु. ३.१४.२८
यस्यार्थस्य प्रसि० ३६ वा.प. ३.१२.१८
यस्यैते चत्वारि० ५६ गौ. स्मृ. ८.३
यस्योभयं हविरार्ति० १०७ तै. ब्रा. ३.७.१.७
यस्योभावग्नी ७० आप.श्रौ. ५.२९.१३
यं यं लोकं मनसा ८ मु. उ. ३.१.१०
यः कारणानि निखि० १८७ श्वे.उ.१.३
यः कारणान्यशे० १८८ शि. पु. ७.२.७.१८
यः परः स महे० ३,२५६ महाना.१०.८
यः पशुकामः स्यात् ४४
यः पुनरेतं त्रिमा० ४ प्रश्नो. ५.५
यः सर्वज्ञः सर्व० ९९,१७१,२१३ मु.उ. १.१.९
यः सर्वांल्लोकानी० १७६ अ. शिर.३.७
यावत्या वाचा ६३
याजनाध्यापन० ४०,१११
यूपं छिनत्ति ११०

१. तन्त्रवार्त्तिके नोपलभ्यते ।

येन माद्यन्ति[1] १९
येनाक्षरं पुरुषं ८३, ९८, ९९, १२१ मु. उ. १.२.१३
येनाहं नामृता ७६ बृ उ. २.४.३
येनोपक्रम्यते २५४
येषामीशे पशु० १७९, १८० तै. सं. ३.१.४.२
यैर्वस्त्रमाल्याभर० १८२ भा.पु.३.१४.२७
योगानुशासनं ३२ यो. भा. १.१
यो देवानां प्रथमं २२७ महाना. १०.३
योऽनधीत्य द्विजो ३८ म. स्मृ. २.१६८
योनिः समुद्रो बन्धुः ५ तै.सं. ७.५.२.५
यो ब्रह्माणं १५०, २२७ श्वे.उ.६.१८
यो वा एतदक्षरं ५० बृ. उ. ३ ८.१०
यो वृष्टिकामो ११८ ता. ब्रा. ८.८.१८
यो वेद निहितं २६५-२६६ तै.उ. २.१
यो वै रुद्रः स २५६ अ. शिर. २.९
यो वै वेदांश्च २२८ श्वे. उ. ६.१८
योऽस्मिन्नन्धे तमसि १८३
रचनानुपपत्तेश्च २३१ ब्र. सू. २.२.१
रथन्तरं पृष्ठं २०४ ता. ब्रा. ११.४.६
रथन्तरे प्रस्तूय० ४३
रसो वै सः १९ तै. उ. २.७
राजन्यवसिष्ठा० ८६
राजसूयेन स्वा० ४३, ११० आप. श्रौ. १८.८.१-४
राजानौ वा एतौ १३६ तै.सं.२.६.२.१-२
रुग् दुःख दुःख० १८० शि. पु. ७.१.३२.३६
रुद्र इत्युच्यते १८० शि.पु.७.१.३२.३६
रुद्रमूर्ति समा० १०० स्क. पु.
रुद्र यत्ते दक्षिणं १४७ श्वे. उ. ४.२१
लक्षणेत्थंभूता० १४६ पा. सू. १.४.९०
लिङ्गभूयस्त्वात् ११४ ब्र. सू. ३.३.४३
लुनातिस्तावद् १५३ कैयटः
लुब्योगाप्रख्यानात् १५ पा. सू. १.२.५४
लोके धर्मिष्ठं २४ महाना. १०.६
लोकोत्तरं चरित०[2] २५३
लौकिकपरीक्षकाणां १४२ न्या.सू.१.१.२५
वत्सः प्रथमजो १०९ तै. सं. १.८.१२
वपया प्रातःसवने १२ मै. सं. ३.९.५
वर्णव्यत्ययतः सिद्धौ ३
वर्तमाने पृषद् १८२ पा. वा. ६.४.३०
वर्षासु रथकार० ४१ बौ. श्रौ. २.१२.५३.१७
वश कान्तौ ३ धा. अ. १०८१
वशित्वादप्यवश्य० १८५ कू. पु.१.४.५९
वशी सर्वस्य लोकस्य १७५ श्वे.उ.३.१८
वस आच्छादने १९० धा. चु १७४५
वस निवासे १९० धा. भ्वा. १००५
वसन्ते ब्राह्मण० ३५ बौ. गृ २.५ ६
वसु च्छेदने १९० धा. दि. १२१४
वसुरसि रुद्रोऽसि १०७ मै. सं. १.१.१३
वस्व्यसि रुद्रासि १०७ तै.सं. १.२.५.१
वाचा विरूप० २१३-२१४ ऋ.८ ७५.६
वाच्यवाचकयो० १०२ शि. पु. ६ ३.७
वाजपेयेनेष्ट्वा ५८ आप.श्रौ. १८.७.१७
वातापितापनमुने.[3] २५४

---

१. दण्डिनः काव्यादर्शे (१.५१) दृश्यते ।

२. सुभाषितावल्यां दृश्यते ।

३. सुभाषितावल्यां दृश्यते ।

वारुण्या निष्कासेन ४३ आप.श्रौ.८.७.१४
वासो दक्षिणा १०९ तै. सं. १.८.१.२
विकल्पोऽविशिष्ट० ९१, ११७ ब्र. सू. ३.३.५९
विज्ञानमानन्दं ४४ बृ. उ. ३.९.३४
विज्ञानं ब्रह्म १२९ तै. उ. ३.५
वितेनिरे बहून् १८७ कू. पु.२.३७.१५१
विद्याविद्ये ईशते १७५ श्वे. उ. ५.१
विद्यासु श्रुतिरुत्कृष्टा ४
विद्यां चाविद्यां च ५७,६४ ई. उ. ११
विधिना त्वेक० ५१ जै. सू. १.२.७
विधिर्वा स्यादपूर्वं० १५०जै.सू.१.२.१९
विधिशक्त्या गृहीतं २५२ त.वा.३.१.१३
विप्रतिपत्तौ ५२ जै. सू. ८.१.३२
विप्रतिषेधाच्च १४ ब्र. सू. २.२.४५
विप्रतिषेधाच्चा० १४ ब्र. सू. २.२.१०
विप्रतिषेधे परं २५२ पा. सू. १.४.२
विभाषा गुणेऽस्त्रि० १६३ पा.सू २.३.२५
वियुक्तो यो निषे० ४०
विरोधः क्वास्ति ५५ त. वा. ३.३.१५
विवक्षा चाविवक्षा २५२ त.वा.३.१ १३
विविदिषन्ति ६० बृ. उ. ४.४.२२
विश्वस्मादिन्द्र १३६ ऋ. १०.८६.१
विश्वाधिको रुद्रो ३.१८७ श्वे. उ. ३.४
विषया इति कथ्यन्ते १८० शि. पु. ७.२.२.१४
विष्णुर्मूर्ति समाश्रित्य १०० स्क. पु.
विष्णुरुपांशु ९६,२५५ तै. सं. २.६.६
विष्णोः परमं पदम् ९९ कठो. ३.९
विहारो लौकिकाः ७२ जै.सू. १२.२.१
विहितत्वाच्चाश्रम० ६५ ब्र.सू. ३.४.३२
वृत्तानुपूर्वे च न १९ कु. स. १.३५
वृद्धिकामाः सत्र० १०५-१०६
वृधिवृषिभ्यां रन् १९१ उ. सू. १९५
वेदस्तत्त्वं तपो १७० अ.को. ३.३.११४
वेदं कृत्वा वेदिं ७४ आप.श्रौ.१.८.१३
वेदं व्याचक्षते २५२ त. वा. ३.१.१३
वेदाङ्गानि सम० ४१, ७३
वेदान्तविज्ञान० १३७ म. उ. ३.२.६
वेदार्थो यः स्वयं १८९
वेदिं करोति २६० आप. श्रौ. १.८.१३
वेद्यां हवींष्यासा० १०३ तै.ब्रा.१.६.५.१
वैखानसं पूर्वं० ८९-९१. ९४ ता. ब्रा. १४.४.७
वैश्वानरं द्वादश० २५४ तै.सं. २.२.५.३
व्याख्यानतो विशेष० १९ पा. म. प.
व्यापनाद् व्यापी १०२ अ. शिखो. २
व्रीहिभिर्यजेत ७७, ८७, २०१ आप. श्रौ. ६.३१.१३
व्रीहिभिर्यवैर्वा १५० आप.श्रौ.६.३१.१३
व्रीहीनवहन्ति ४३, ७४, ७५,७७, ८७, २०१ आप. श्रौ. १.१९.११
व्रीहीन् प्रोक्षति ४३,७४, १०३, ११४, २६१ आप. श्रौ. १.१९.१
शक्तिमन्तं महा० १८८ शि.पु.७.२.७.१७
शब्द इति चेन्नातः ११३ ब्र.सू. १.३.२८
शब्दब्रह्मेति २१४, २५२ त.वा. ३.१.१३
शब्दादेव प्रमितः ११३ ब्र. सू. १.३.२४
शब्दार्थप्रत्ययाना० १५५ यो.सू. ३ १७
शम्भुराकाशमध्ये[1] २६५ अ. शिखो. ३
शरमयं बर्हिः ११२ तै. सं. २.१.७.७
शल्यशशकश्व० ९५ गौ. स्मृ. १७

---

१. शम्भुराकाशमध्ये शिव एको ध्येयः शिवङ्करः इति क्वाचित्कः पाठः ।

शान्तिसमृद्ध० १७५ तै. उ. १.६
शान्तो दान्त उप० २५९-२६०
सु. उ. ९.१४
शास्त्रयोनित्वात् १७, ५१ ब्र.सू.१.१.२
शिरसा श्लाघते पूर्वं[1] १३
शिव इत्युच्यते ७ शि.पु. ६.९.८
शिव एको ध्येयः २६७-२६८ अ.शिखो.३
शिवमिच्छन् मनु० ३ म.भा.७.१७३.९०
शिवमेव सदा साम्बं १०० पराशरः
शिवं शक्त्यादिभिः १३७ मो. का. १११
शिवः स निर्मलो १८५ कू.पु. १.४.६३
शिवार्कशक्ति० १३७ मो. का. १११
शिवो रुद्रो महा० ९९ स्क. पु.
शिवो वा प्रणवो १०२ शि. पु. ६.३.७
शिवोऽस्मि सर्वं० ३ म. भा. ८.२.४
शुचिः सन्नियमो ८४म.भा. १.२२.१-५५.
शुन्धध्वं दैव्याय १०४ तै सं. १.१.३.१
शॄ हिंसायाम् १७८ धा. क्र्या. १४८९
शेषाद्द्व्यवदान० १० जै. सू. ६.४.१
शेषे विभाषा १७, १८ पा.वा.२.३.६६
शोभतेऽस्य मुखं ७०
श्येनचितं चिन्वीत ८३, ११८, २०३,
२३५ तै. सं. ५.४.११.१
श्येनेनाभिचरन् ३,१०२ षड्वि.ब्रा.३.८
श्रपणस्य निवृत्तस्य ९२
श्रवणं नाम वाक्यानां २५२
श्रवणं नाम सर्वेषां ७७
श्रिणीभुवोऽनुप० १७९ पा.सू. ३.३.२४
श्रुतिस्मृती ममै० १११ वा. स्मृ. १८९
श्रुतेस्तु शब्दमूल० १४ ब्र. सू. २.१.२७
श्रुतोपनिषत्क० २२ ब्र. सू. १.२.१६
श्रुत्यादिबलीय० ११३ ब्र. सू. ३.३.४७
श्रोतव्यः श्रुति० २६५
श्रोत्रियस्य चाकाम० १७४ तै. उ. २.८
षट्त्रिंशदहो वा १७७ ऐ. ब्रा. ४.२४
षडङ्गो वेदोऽध्येयः ४१, ४२ पा. म. प.
षड्ढोता वै भूत्वा २१४, २२६
षद्लृ विशरण० २२ धा. भ्वा. ८५४
षिञ् बन्धने २९ धा. स्वा. १२४९
षोडश्युत्तरे ९४
स आत्मनो वपा० २२१ तै.सं. २.१.१.४
स ईक्षत लोकान्नु १८४ ऐ. उ. १.१
स एको ब्रह्मण ९८,१७२,१७४तै.उ.२.८
स एतस्माज्जीव० १३९ प्र. उ. ५.५
स एव मोचक० १८० शि.पु.७.२.२.१३
स एवैनं भूतिं ५२ तै. सं. २.१.१.१
सकल्पं सरहस्यं ३५ म. स्मृ. २.१४०
सकृदुच्चारित० १०२ अ. शिखो. १
सक्तून् जुहोति २६१
स चाप्सु शयना० १८६ आश्व. ध.
सच्च त्यच्चाभवत् १७३ तै. उ. २.६
स जीवन्नेव शूद्रत्व० ३८ म.स्मृ. २.१६८
सत्यं ज्ञानमनन्तं १४७, १६५-१६६,
१६८, १७७-१७८, २६५-२६६
तै. उ. २.१
सत्यात्म प्राणारामं १७७,१७८ तै.उ.१.६
सत्येन लभ्य० ६४ मु.उ. ३.१.५
सत्ये साधौ च[2] १७७ म. भा.
सत्रादुदवसाय ४३

१. कुवलयानन्दे समुद्धृतम् ।
२. महाभारते नोपलभ्यते ।

सदेव सोम्येद० १४७, १६५, १६७-१६८, १७७, १७८, १८८, १९१, २१२, २५३-२५५ छा. उ. ६.२.१
स नो देवः शुभया २२३ महाना. १०.३
सन्महः १७७, १७८, २५६ महाना. १३.२
सन्मूलमन्विच्छ २४२ छा.उ. ६.८.४-५
सन्मूला सोम्येमाः २०६, २०७ छा. उ. ६.८.४
सप्तऋषीणां सुकृतां ११८आप.श्रौ.३.१९.१
सप्तदश प्राजा० १०३ तै.ब्रा. १.३.४.३
सप्तदश सामि० २०५ श.ब्रा. १.५ १.१२
सप्तदशानि पृष्ठानि२०४ता.ब्रा.१९.११.२
सप्तमे ब्रह्मवर्च० ३८ आप.ध.१.१.१.२१
स प्रत्यामनेत् १०७ जै. सू. ६.४.३०
स ब्रह्मणः सायुज्यं ५६, ५७ गौ.स्मृ. ८.४
स ब्रह्मविद्यां ११५, १२१ मु.उ. १.१.१
समवाये चोदना० ५९ जै.सू. ४.३.२९
समं स्यादश्रुतत्वात् २०४ जै.सू.१० ३.५३
समाख्या यौगिकी ११५
समानतन्त्रसिद्धः १४२ न्या.सू. १.१.२९
समानमितरच्छचे० १०६ आप. श्रौ. २२.७.१८
समानं वरम् ५
समा भवन्ति मे ३ म.भा. ८.२.३
समिधो यजति ५३, ८५, १०३,१०५, २६२-२६३ तै. सं. २.६.१.१
समिध्यमानवतीं ११ जै. सू. ५.३.४
समेत्य ते महा० १८७ कू.पु.२.३७.१५१
समे दर्शपूर्णमासाभ्यां ११०
समेधयति ३ म. भा. ७.१७३.९०
स यथा सैन्धव० १६७ बृ.उ. ४.५.१३
स यदि पितृलोक० २० छा उ. ८.२.१
सर्तेर्णिच्च १०१ उ सू. १७०
सर्वे एते पुण्य० ५७ छा. उ. २.२३.१
सर्वज्ञः सर्ववि० ४, १८५ कू.पु. १.४.६२
सर्वतन्त्रप्रति० १४२ न्या.सू. १.१.२७
सर्वतन्त्राविरुद्धः १४२ न्या सू. १.१.२८
सर्वनिघृष्वरि० १८२ उ. सू १५९
सर्वलोकस्य निर्माता १८६ आश्व. ध.
सर्ववेदान्तवाक्यानां २५२
सर्वं खल्विदं ब्रह्म ४४ छा. उ. १.४.१
सर्वाणि ह वा १७३ छा. उ. १.९.१
सर्वाणि ह वा १७६, १.५ आश्व.
सर्वे वेदा यत्पद० ५, ४२, ९८, ९९ कठो २.१५
सर्वेषामेव नाना० १३० म. वि.
सर्वोपिता च तद्द० १३ ब्र. सू. २.१.३०
सर्वो वै रुद्र २५६ महाना. १३.२
स विश्वजिद्विश्व० १६५ श्वे. उ. ६.१६
सव्यभिचारविरुद्ध० १४२ न्या.सू. १.२.४
सहस्रशीर्षा पुरुषो १८५ कू. पु. १.६.३
संमाननोत्सञ्जना० ३५, ३६ पा. सू. १.३.३६
संयजत्रैरङ्गानि १६३ तै. सं. १ ३.८.१
संयुक्तमेतत् क्षर० १८७, १८९ श्वे. उ. १.८
संयोग एषां न १८७ श्वे. उ १.२
संशयाविष्टम० १८८ शि पु. ७.२.७.११
संशोध्य देहं ८४ म.भा. १.२२.१-५प.
संसवे उभे ११२
संस्कारसाक्षात्कर० १५५ यो. सू. ३.१८
साङ्गकर्मण्यधि० ३८ न. वि.

सा च प्रशासनात् १५८ ब्र.सू. १.३.११
साद्यस्क्रे क्रतौ १०५
सान्तपनीया ६५ जै. सू. ५.१.३०
सापेक्षमसमर्थम् १०९ पा. म. २.१.३०; शा. भा. ३.१.२७
साम्ना स्तुवीत ७७
सार्वधातुकार्ध० ४ पा. सू. ७.३.८४
सावित्रीपतिता ३८ म. स्मृ. २.३९
सिद्धान्त्यस्वीकृतेऽर्थे १२९ म. वि.
सिद्धेऽसिद्धे च सिद्धा० १२९ म. वि.
सुखदुःखातिभूत० १८८ शि.पु.७.२.७.१५
सु गतौ १०१ धा. भ्वा. ९३५
सुप आत्मनः क्यच् १७६ पा.सू. ३.१.८
सुप्यजातौ णिनि० ८ पा. सू. ३.२.७८
सुभ्रु त्वं कुपिते०[1] ४५
सूक्तवाकेन प्रस्तरं २५८
सूर्य आत्मा जगत० १३६ ऋ. १.११५.१
सूर्यमूर्ति मुनिश्रेष्ठा १०० स्क. पु.
सैषानन्दस्य मीमांसा १७२ तै. उ. २.८
सोऽकामयत बहु १८४ तै. उ. २.६
सोऽध्वनः पार० ९८ क. उ. ३.९
सोऽन्वेष्टव्यः स ३२ छा. उ. ८.७.१
सोऽपि योगं समा० १८६ कू.पु. १.१०.८५
सोऽरोदीद्यदरोदीत् २११ तै.सं.१.५.१.१-२
सोऽश्नुते सर्वान् २६५, २६७ तै.उ.२.२
सोऽस्मिन्नन्धे १८३ ता. ब्रा. १६.१.१
सौम्यं चरुं निर्वपेत् १०६ तै.सं.२.३.२.३
स्तब्धोऽस्युत तमा० २५४ छा.उ.६.१.२
स्थूलस्वरूपसूक्ष्मा० १५४ यो. सू. ३.४४
स्थेशभासपिस० १७९ पा. सू. ३.२.१७५
स्मृतयश्च पुराणानि १०० पराशरः[2]
स्मृतिलाभे सति २२७ छा.उ. ७.२६.२
स्यात्तु कर्मावयवेन १५५ आप. ध. २.९.२४.१४
स्याच्चैकस्य ब्रह्म० २१ ब्र. सू. २.३.५
स्रुवेणावद्यति १०४
स्वधितिनावद्यति १०४
स्वपदानि च वर्ण्यन्ते २६७
स्वरितञितः ३६ पा. सू. १.३.७२
स्वशब्दोन्माना० ११४ ब्र.सू. २.३.२३
स्वसंस्कारोचिताद् १५६ रौ. वा.
स्वाध्यायोऽध्येतव्यः ३४, ३५, ४१, ६६, ६८, ७३, ८९, ९२ श. ब्रा. ११.५.७.२
हरः संसारहर० ४, १८५ कू.पु.१.४.६१
हसन्ति यस्याश्चरितं १८२ भा. पु. ३.१४.२७
हस्तेनावद्यति १०४
हिरण्यगर्भं जन० २२८ श्वे. उ. ३.४
हिरण्यगर्भं पश्यत २२७ महाना. १०.३
हिरण्यगर्भः सम० ९९, १४८, १६८ ऋ.१०.१२१.१; तै.सं.४.१.८.३
हिरण्यदा अमृतत्वं ११७ ऋ.१०.१०७.२
हिसिधातोः सिंह० ३
हिंस्राहिंस्रे मृदु० ११८, २४८ कू. पु. १.७.६२
हीषिति वृष्टिकामाय ११८ ता.ब्रा.८.८.१९
हृद्यपेक्षया तु ३ ब्र. सू. १.३.२५
हेतौ १६३ पा. सू. २.३.२३

---

१. विद्यापतेः श्लोकोऽयमिति सुभाषितरत्नभाण्डागारे ।

२. पराशरस्मृत्यां बृहत्पाराशरीये धर्मशास्त्रे विष्णुपुराणे च नोपलभ्यते ।